

This is a digital copy of a book that was preserved for generations on library shelves before it was carefully scanned by Google as part of a project to make the world's books discoverable online.

It has survived long enough for the copyright to expire and the book to enter the public domain. A public domain book is one that was never subject to copyright or whose legal copyright term has expired. Whether a book is in the public domain may vary country to country. Public domain books are our gateways to the past, representing a wealth of history, culture and knowledge that's often difficult to discover.

Marks, notations and other marginalia present in the original volume will appear in this file - a reminder of this book's long journey from the publisher to a library and finally to you.

Usage guidelines

Google is proud to partner with libraries to digitize public domain materials and make them widely accessible. Public domain books belong to the public and we are merely their custodians. Nevertheless, this work is expensive, so in order to keep providing this resource, we have taken steps to prevent abuse by commercial parties, including placing technical restrictions on automated querying.

We also ask that you:

+ *Make non-commercial use of the files* We designed Google Book Search for use by individuals, and we request that you use these files for personal, non-commercial purposes.

+ *Refrain from automated querying* Do not send automated queries of any sort to Google's system: If you are conducting research on machine translation, optical character recognition or other areas where access to a large amount of text is helpful, please contact us. We encourage the use of public domain materials for these purposes and may be able to help.

+ *Maintain attribution* The Google "watermark" you see on each file is essential for informing people about this project and helping them find additional materials through Google Book Search. Please do not remove it.

+ *Keep it legal* Whatever your use, remember that you are responsible for ensuring that what you are doing is legal. Do not assume that just because we believe a book is in the public domain for users in the United States, that the work is also in the public domain for users in other countries. Whether a book is still in copyright varies from country to country, and we can't offer guidance on whether any specific use of any specific book is allowed. Please do not assume that a book's appearance in Google Book Search means it can be used in any manner anywhere in the world. Copyright infringement liability can be quite severe.

About Google Book Search

Google's mission is to organize the world's information and to make it universally accessible and useful. Google Book Search helps readers discover the world's books while helping authors and publishers reach new audiences. You can search through the full text of this book on the web at `http://books.google.com/`


3 2044 012 586 327

Digitized by Google

IndL 726.5

Harvard College Library



FROM THE BEQUEST OF

HENRY WARE WALES, M.D.

Class of 1838

FOR BOOKS OF INTEREST TO THE
SANSKRIT DEPARTMENT

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

68 33
12

THE

KIRÂTÂRJUNÎYA

OF

BHÂRAVI

WITH

The Commentary (the Ghantâpatha) of Mallinâtha.

EDITED

With various Readings

BY

NÂRÂYAṆA BÂLAKRISHṆA GODABOLE B. A.

AND

KÂSÎNÂTHA PÂṆḌURANGA PARABA.

PRINTED AND PUBLISHED

BY

THE PROPRIETOR

OF

THE NIRṆAYA-SÂGARA PRESS,

BOMBAY:

1885.

Price 2½ Rupees.

Digitized by Google

Digitized by Google

Ind.L 726.3
~~IV.6706~~
Ind L 726.3
HARVARD COLLEGE
JAN 29 1889
LIBRARY.
Walter Fund.

Digitized by Google

52

महाकविश्रीभारविविरचितं

किरातार्जुनीयम् ।

मल्लिनाथकृतघण्टापथसमेतम् ।

नारायण बालकृष्ण गोडबोले

काशीनाथ पाण्डुरङ्ग परब

इत्येताभ्यां

पाठान्तरैः संयोज्य संशोधितम् ।

तच्च

शाके १८०६ वत्सरे

मुम्बय्यां

निर्णयसागरयन्त्रालयाधिपतिना मुद्रितम् ।

मुम्बय्यां सार्थं कम्पकारयत् ।

Digitized by Google

॥ श्रीः ॥

॥ किरातार्जुनीयम् ॥

॥ घण्टापथेन समेतम् ॥

प्रथमः सर्गः ।

अर्धाङ्गीकृतदांपत्यमपि गाढानुरागि यत् ।
पितृभ्यां जगतस्तस्थौ कस्मैचिन्महसे नमः ॥
आलम्बे जगदालम्बं हेरम्बचरणाम्बुजम् ।
क्षुभ्यन्ति यद्रजःस्पर्शात्सद्यः प्रत्यूहवार्धयः ॥
वन्दिष्यमव्ययं धाम सारस्वतमुपाश्रये ।
यत्प्रसादात्प्रलीयन्ते मोहान्धतमसच्छटाः ॥
वाणीं काणभुजीमजीगणदवाग्घासीच्च वैयासकी-
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत् ।
वाचामाकलयद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूयदुपप्लवेद विदुषां सौजन्यजन्यं यशः ॥
मल्लिनाथकविः सोऽयं मन्दात्मानुजिघृक्षया ।
तत्किरातार्जुनीयाख्यं काव्यं व्याख्यातुमिच्छति ॥
नारिकेलफलसंमितं वचो भारवेः सपदि तद्विभज्यते ।
तादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम् ॥
नानानिबन्धविषमैकपदैर्नितान्तं साधक्रचक्रमणलिप्सधियामशक्यम् ।
कर्तुं भवेन्नमिह भारविकाव्यबन्धे घण्टापथं कमपि नूतनमातनिष्ये ॥
इहान्वयमुखेनैव सर्वं व्याख्यायते मया ।
नाप्तूलं लिख्यते किंचिन्नानपेक्षितमुच्यते ॥

अथ तत्रभवान्भारविनामा कविः "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे" इत्यायालंकारिकवचनमा-

Digitized by Google

Digitized by Google

काव्यात्काव्यस्यानेकश्रेयःसाधनतास् "काव्यालापांश्च वर्जयेत्" इति निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यन्किरातार्जुनीयाख्यं महाकाव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलसाधनत्वात् "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इत्याचार्याशीर्वादात्मकस्य प्रबन्धमुखलक्षणत्वाच्च वनेचरस्य युधिष्ठिरप्राप्तिरूपं वस्तु निर्दिदिक्षन्प्रकाशमुपक्षिपति—

श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ॥ १ ॥

श्रिय इति ॥ आदितः श्रीशब्दप्रयोगाद्गुणजातिद्युद्धिरूपोपयुज्यते । तदुक्तम्—"देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निघ्नाः स्युर्जिपितो गणतोऽपि वा" इति ॥ कुरूणां निवासाः कुरवो जनपदाः ॥ "तस्य निवासः" इत्यण्प्रत्ययः । "जनपदे लुप्" ॥ तेषामधिपस्य दुर्योधनस्य संबन्धिनीम् ॥ शेषे षष्ठी ॥ श्रियो राज्यलक्ष्म्याः ॥ "कर्तृकर्मणोः कृति" इति कर्मणि षष्ठी ॥ पाल्यतेऽनेति पालनी तास् । प्रतिष्ठापिकामित्यर्थः । प्रजारागमूलत्वात्संपद इति भावः ॥ "करणाधिकरणयोश्च" इति ल्युटेऽपि करणे ल्युट् । "टिड्ढाणञ्—" इत्यादिना ङीप् ॥ प्रजासु जनेषु विषये ॥ "प्रजा स्यात्संततौ जने" इत्यमरः ॥ वृत्तिं व्यवहारं वेदितुं ज्ञातुं यं वनेचरमयुङ्क्त नियुक्तवान् । वर्णः प्रशस्तिरस्यास्तीति वर्णी ब्रह्मचारी । तदुक्तम्—"स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् । संकल्पोऽध्यवसायश्च क्रियानिर्वृतिरेव च ॥ एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः । विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम्" । एतदष्टविधमैथुनाभावः प्रशस्तिः ॥ "वर्णाद्ब्रह्मचारिणि" इतीनिप्रत्ययः ॥ तस्य लिङ्गं चिह्नमस्यास्तीति वर्णिलिङ्गी । ब्रह्मचारिवेषवानित्यर्थः । स नियुक्तः । वने चरतीति वनेचरः किरातः ॥ "भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः" इत्यमरः ॥ "चरेष्टः" इति टप्रत्ययः । "तत्पुरुषे कृति बहुलम्" इत्यलुक् ॥ विदितं वेदनमस्यास्तीति विदितः । परोक्षज्ञानवानित्यर्थः ॥ "अर्शआदिभ्योऽच्" इत्यच्प्रत्ययः ॥ अथवा कर्तरि कर्मधर्मोपचाराद्विदितशब्दो विदित इत्युच्यते । उभयत्रापि "पीता भावः" "शुक्ला ब्राह्मणाः" "विमलका भ्रातरः" इत्यादिवत्साधुत्वम् । न तु कर्तरि क्तः । सकर्मकेभ्यस्तस्य विधानाभावात् । अतएव भाष्यकारः—"अकारो मत्वर्थीयः । विभक्तमेषामस्तीति विमलकाः । पीतमेषामस्तीति पीताः । शुक्लमेषामस्तीति शुक्लाः" इति सर्वत्र ॥ अथवोत्तरपदलोपोऽत्र द्रष्टव्यः । विमलकघना विमलकाः पीतोदकाः पीता शुक्लाश्च शुक्ला इति । अत्र लोपशब्दार्थमाह कैयटः—"वस्त्वार्थस्य प्रयोग एव लोपोऽभिमतः । 'विमलका भ्रातरः' इत्यत्र च वस्त्व यद्विमलकं तद्भ्रातृषूपपद्यते । 'पीता भावः' इत्यत्रापि कस्य पीतत्वं नोच्चारोप्यते । 'शुक्ला ब्राह्मणाः' इत्यत्रापि कस्य शुक्लत्वं ब्राह्मणेषूपपद्यते" इति । तद्वदत्रापि दृष्टिगतं विदितत्वं वेदितरि वनेचर उपपद्यते ।

Digitized by Google

एतेन "वनाय पीतमतिवद्धवत्साम्" इति "पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु" एवमादयो व्याख्याताः॥ अथवा विदितो विदितवान्। सकर्मकादप्यविवक्षिते कर्मणि कर्तरि क्तः। "आश्रितः कर्ता" इत्यादौ यथाहुः—"धात्वोर्वान्तरे दृष्टेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया" इति॥ मतीहारादिना ज्ञापित इति वा॥ द्वैतवने द्वैताख्ये तपोवने। यद्वा द्वे इते गते यस्मात्तद्वीतम्। द्वीतमेव द्वैतम्। तच्च वदनं च तस्मिन्। शोकमोहादिरहित इत्यर्थः। युधि रणे स्थिरं युधिष्ठिरं धर्मराजम्॥ "हलदन्तात्सप्तम्याः संज्ञायाम्" इत्यलुक्। "न वियुजिभ्यां स्थिरः" इति षत्वम्॥ समाययौ संप्राप्तः॥ अत्र "वने वनेचरः" इति द्वयोः स्वरव्यञ्जनसमुदायपोरेकधैवावृत्त्या वृत्त्यनुप्रासो नामालंकारः॥ अस्मिन्सर्गे वंशस्थं वृत्तम्। तस्य लक्षणम्—"जतौ तु वंशस्थमुदीरितं जरौ" इति॥

संप्रति तत्कालोचितत्वमादेशयंस्तस्य तद्गुणसंपन्नत्वमादर्शयन्नाह—

कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः॥२॥

कृतप्रणामस्येति॥ कृतप्रणामस्य तत्कालोचितत्वात्कृतनमस्कारस्य सपत्नेन रिपुणा दुर्योधनेन॥ "रिपौ वैरिसपत्नारिद्विषद्देषणदुर्हृदः" इत्यमरः॥ जितां स्वायत्तीकृतां महीं महीभुजे युधिष्ठिराय॥ क्रियाग्रहणात्संप्रदानत्वम्॥ निवेदयिष्यतो ज्ञापयिष्यतः॥ "लृटः सद्वा" इति शतृप्रत्ययः॥ तस्य वनेचरस्य मनो न विव्यथे। कथमीदृगप्रियं राज्ञे विज्ञापयामीति मनसि न चचालेत्यर्थः॥ "व्यथ भयचलनयोः" इति धातोर्लिट्॥ उक्तमर्थमर्थान्तरोपन्यासेन समर्थयते—न हीति॥ हि यस्मात्। हितमिच्छन्तीति हितैषिणः स्वामिहितार्थिनः पुरुषा मृषा मिथ्याभूतं प्रियं प्रवक्तुं नेच्छन्ति। अन्यथा कार्यविघातकतया स्वामिद्रोहिणः स्युरिति भावः॥ "अमीक्ष्णममात्यमसृषाभाषित्वमभ्यूहकत्वं चेति चारगुणाः" इति नीतिवाक्यामृते॥

तथापि प्रियार्हे राज्ञि कटुनिष्ठुरोक्तिर्न युक्तेत्याशङ्क्य स्वाम्यनुज्ञायां न दुष्यतीत्याशयेनाह—

द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः।
स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे॥३॥

द्विषामिति॥ रहस्येकान्ते स वनेचरो द्विषां शत्रूणाम्॥ कर्मणि षष्ठी॥ विघाताय। द्विषो विहन्तुमित्यर्थः॥ "तुमर्थाच्च भाववचनात्" इति चतुर्थी। "भाववचनाश्च" इति तुमर्थे यप्रत्ययः। अत्र तादर्थ्ये चतुर्थ्यामपि न दोषः। तथापि प्रयोगवैचित्र्यविशेषस्याप्यलंकारत्वादेवं व्याचक्षते॥ विघातुं व्यापारं कर्तुमिच्छतः॥ "समानकर्तृकेषु

१ भूभुजः॥

Digitized by Google

सुष्ठु"॥ हितो विदन्तुसुकृज्ज्ञानस्येत्यर्थः। अतएव भूरितो युधिष्ठिरस्यानुज्ञामभिलम्ब्य माघ्व। सुष्ठु भावः सौष्ठवं शब्दसामर्थ्यम् ॥ सुष्ठुशब्दादव्ययादुष्ठ्राजादित्वादण्प्रत्ययः ॥ उदारस्य भाव औदार्यमर्थसंपत्तिः। तयोर्द्वन्द्वः सौष्ठवौदार्ये ॥ अत्रौदार्यशब्दस्याजादन्तत्वेऽपि "लक्षणहेत्वोः क्रियायाः" इत्यत्रापस्वरस्यापि हेतुशब्दस्य पूर्वनिपातमङ्गीकुर्वता सूत्रकृतैव पूर्वनिपातज्ञापनान्न पूर्वनिपातः। उक्तं च काशिकायाम्—"अयमेव लक्षणहेत्वोरिति निर्देशः पूर्वनिपातव्यभिचारचिह्नम्" इति ॥ त एव विशेषः। तयोर्वा विशेषः। तेन शास्त इति सौष्ठवौदार्यविशेषशालिनी ताम् ॥ ताच्छील्ये णिनिः ॥ विनिश्चितार्थां विशेषतः प्रमाणतो निर्णीतार्थामिति वक्ष्यमाणरूपां वाचमाददे स्वीकृतवान्। उपायेत्यर्थः ॥

अथवं तावदभियनिवेदकमात्मानं मन्त्रणोभं याचते—

क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽईसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः॥४॥

क्रियास्विति ॥ हे नृप। क्रियासु कृत्यवस्तुषु युक्तैर्नियुक्तैरनुजीविभिर्भृत्यैः। चारादिभिरित्यर्थः। चरन्तीति चराः ॥ पचाद्यच् ॥ त एव चाराः ॥ चरेः पचाद्यजन्तात्प्रज्ञादित्वादण्प्रत्ययः ॥ त एव चक्षुर्येषां ते चारचक्षुषः ॥ "स्वपरमण्डलकार्याकार्यविलोकने चाराश्चक्षूंषि क्षितिपतीनाम्" इति नीतिवाक्यामृते। तदुक्तम्—"भावः पश्यन्ति मन्त्रेण वेदैः पश्यन्ति पण्डिताः। चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः" इति ॥ प्रभवो निग्रहानुग्रहसमर्थाः स्वामिनो न वञ्चनीया न प्रतारणीयाः। सत्यमेव वक्तव्या इत्यर्थः। चारापचारे चक्षुरपचारवद्राज्ञां पदे पदे निपात इति भावः। अतोऽप्यतार्थत्वाद्धेतोः। असाध्वप्रियं साधु प्रियं वा। यदुक्तमिति शेषः। वाशब्दोऽप्यर्थे। क्षन्तुं सोढुमर्हसि। कुतः। हितं पथ्यं मनोहारि प्रियं च वचो दुर्लभम्। अतो महद्भोऽपि हितत्वादप्रियमपि क्षन्तव्यमित्यर्थः ॥

तर्हि तूष्णींभाव एव वरमित्याशङ्क्याह—

स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसंपदः ॥ ५ ॥

स इति ॥ यः सखामात्यादिरधिपं स्वामिनं साधु हितं न शास्ति नोपदिशति ॥ "बुधिबासि—" इत्यादिना शासेर्दुहादिपाठाद्विकर्मकत्वम्॥ स हितानुपदेष्टा। कुत्सितः सखा किंसखा। दुर्मन्त्रीत्यर्थः ॥ "किमः क्षेपे" इति समासान्तप्रतिषेधः। तथा यः मन्त्रणिग्रहानुग्रहसमर्थः स्वामी हितादाप्तजनादहितोपदेशुः सकाशात् ॥ "आख्याक्षेपणे" इत्यपादानत्वात्पञ्चमी ॥ न संशृणुते न शृणोति। हितमिति शेषः ॥ "कर्तृस्थे मन्यकि—" इत्यादिना सम्पूर्वाच्छृणोतेरकर्मकत्वादात्मनेपदमकर्मकत्वं

Digitized by Google

वैवक्षिकम् ॥ स हितमभोक्ता मधुः किमधुः कुत्सितस्वामी ॥ पूर्ववत्समासः ॥ सर्वथा सचिवेन वक्तव्यं श्रोतव्यं च स्वामिना। एवं च राजमन्त्रिणोरेकमत्यं स्यादित्यर्थः॥ ऐकमत्यस्य फलमाह—सदेति ॥ हि यस्मान्नृपेषु स्वामिषु। अया सह भवा अमात्यास्तेषु च ॥"अभ्ययास्यप्"॥ अनुकूलेषु परस्परानुरक्तेषु सत्सु सर्वसंपदः सदा रतिमनुरागं कुर्वते कुर्वन्ति। न जातु जहतीत्यर्थः। अतो मया वक्तव्यं त्वया च श्रोतव्यमिति भावः ॥ अमीदं राजमन्त्रिणोर्दितानुपदेशतदभवणनिन्दासामर्थ्यसिद्धैरैकमत्यलक्षणकारणस्य निर्दिष्टस्य सर्वसंपत्सिद्धिरूपकार्येण समर्थनात्कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासोऽलंकारः। तदुक्तम्—"सामान्यविशेषकार्यकारणभावाभ्यां निर्दिष्टकृतसमर्थनमर्थान्तरन्यासः" इति ॥

संप्रति स्वाहंकारं परिहरति—

निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः।
तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥ ६ ॥

निसर्गेति ॥ निसर्गदुर्बोधं स्वभावदुर्ग्रहम् ॥ "ईषदुः—" इत्यादिना खल्प्रत्ययः ॥ भूपतीनां चरितं क्व। अबोधविक्लवा अज्ञानोपहता जन्तवः। मादृशाः पामरजना इत्यर्थः। क्वापि। नोभयं संघटत इत्यर्थः। तथापि निगूढतत्त्वं संहृतयाथार्थ्यं विद्विषां नयवर्त्म पाण्डुत्वप्रयोगः "संधिविग्रहयानानि संस्थाप्यासनमेव च। द्वैधीभावश्च विज्ञेयाः षड्गुणा नीतिवेदिनाम्" इत्यादिरूपो यन्मयावेदि। ज्ञातमिति यावत् ॥ विदेः कर्मणि लुङ् ॥ अयम्। इदं वेदनमित्यर्थः ॥ विधेयप्राधान्यात्पुंल्लिङ्गनिर्देशः ॥ तवानुभावः सामर्थ्यम् ॥ अनुगतो भावोऽनुभावः। राज्ञां मकुष्टो भाव इति यञन्तेन प्रादिसमासः। न तूपसृष्टाद्भम्प्रत्ययः। "भ्रिनीभ्रुवोऽनुपसर्गे" इत्यनुपसर्गाद्भवतेर्धातोर्धम्विधानात्। अतएव काशिकायाम्—"कथं प्रभावो राज्ञां मकुष्टो भाव इति प्रादिसमासः" इति ॥ दोषपरिहारौ सम्यग्ज्ञानेन विज्ञापयामि। न तु दृष्टा कर्णकठोरं मत्प्रणामीत्याशयः ॥

संप्रति यदुक्तव्यं तदाह—

विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः ॥ ७ ॥

विशङ्कमान इति ॥ सुखेन युध्यते स सुयोधनः॥ "भाषायां शासियुधिदृशिधृषिभ्यो युच्याच्यः"॥ नृपासनस्थः सिंहासनस्थोऽपि। वनमधिवसतीति वनाधिवासिनो वनस्थात्। राज्यभ्रष्टादपीत्यर्थः। भवतस्त्वत्तः पराभवं पराजयं विशङ्कमान उत्प्रेक्षमाणः सन्। दुष्टमुदरमस्येति दुरोदरं द्यूतम् ॥ पृषोदरादित्वात्साधु ॥ "दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम्" इत्यमरः ॥ तस्य छद्मना मिषेण जितां छद्मा दुर्नयार्जितां जगतीं महीम् ॥ "जगती विष्टपे मह्यां वास्तुच्छन्दोविशेषयोः" इति वैजयन्ती ॥ नयेन

Digitized by Google

श्रीजा जेतुं वशीकर्तुं समीहते व्याप्नियते । न तूदात्त इत्यर्थः । बलवत्स्वामिकमविश्वद्धागमं च धनं भुञ्जानस्य कुतो मनःसमाधिरिति भावः ॥ अत्र "दुरोदरच्छलिताम्" इति विशेषणद्वारेण पदार्थं प्रति हेतुत्वेनोपन्यासाद्वितीयकाव्यलिङ्गमलंकारः । तदुक्तम्— "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्" इति ॥

"नयेन जेतुं जगतीं समीहते" इत्युक्तम् । तत्प्रकारमाह—

तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसंपदा यशः ।
समुन्नयन्भूतिमनार्यसंगमाद्धरं विरोधोऽपि समं महात्मभिः ॥ ८ ॥

तथापीति ॥ तथापि साम्राङ्गोऽपि । जिह्मो वक्रः । वधक इति यावत् । स दुर्योधनो भवज्जिगीषया । गुणैर्भवन्तमाक्रमितुमिच्छयेत्यर्थः ॥ "हेतौ" इति तृतीया ॥ गुणसंपदा दानदाक्षिण्यादिगुणगरिम्णा । करणेन । शुभ्रं यशस्तनोति । स खलो गुणलोभनीयां स्वस्संपदमात्मसात्कर्तुं त्वचोऽपि गुणवत्तामात्मनः प्रकटयतीत्यर्थः ॥ नन्वेवं गुणिनः सतोऽपि सज्जनविरोधो महान्दोष इत्याशङ्क्य सोऽपि सत्संसर्गलाभे नीचसंगमाद्वरमुत्कर्षावहत्वादित्याह—समिति ॥ तथाहि । भूतिं समुन्नयन्नुत्कर्षमापादयन् ॥ "सदः सदनज्ञानयो—" इत्यादिना सदमत्ययः । पुनर्लङ्घनसामर्थ्यात्प्रथमासामानाधिकरण्यम् ॥ महात्मभिः समम् । सहेत्यर्थः ॥ "साकं सत्रा समं सह" इत्यमरः ॥ अनार्यसंगमापुर्जनसंसर्गात् ॥ "पञ्चमी विभक्ते" इति पञ्चमी ॥ विरोधोऽपि वरं मनाक्प्रियः ॥ "देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये" इत्यमरः ॥ अत्र मैत्र्यपेक्षया मनाक्प्रियत्वं विरोधस्य "भूतिं समुन्नयन्" इत्यस्य पूर्ववाक्यान्वये समाप्तस्य वाक्यार्थस्य पुनरादानात्समाप्तपुनरात्ताख्यानदोषापत्तिः । तदुक्तं काव्यमकाशे— "समाप्तपुनरादानात्समाप्तपुनरात्तकम्" इति । न च वाक्यान्तरमेतत् । येनोक्तदोषपरिहारः स्यात् ॥ अर्थान्तरन्यासोऽलंकारः । स च भूतिसमुन्नयनस्य पदार्थविशेषणद्वारा विरोधवत्त्वं प्रति हेतुत्वाभिधानरूपकाव्यलिङ्गानुप्राणित इति ॥

ननु "कातर्यं केवला नीतिः" इत्याशङ्क्य नीतियुक्तं पौरुषमस्येत्याह—

कृतारिषड्वर्गजयेन मानवीमगन्यरूपां पदवीं प्रपित्सुना ।
विभज्य नक्तंदिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ॥ ९ ॥

कृतेति ॥ षण्णां वर्गः षड्वर्गः । अरीणामन्तःशत्रूणां कामक्रोधादीनां षड्वर्गोऽरिषड्वर्गः ॥ विभज्यावयवतत्तत्कालः ॥ तस्य जयः कृतो येन तथोक्तेन । विनीतेनेत्यर्थः । विनीताधिकारं प्रजापालनमिति भावः । अगम्यरूपां दुरुपभाग्यदुष्प्राप्याम् । मनोरिमां श्रयतीम् । मनूपदिष्टदायादशुश्रूषामित्यर्थः । पदवीं प्रजापालनपद्धतिं प्रपित्सुना प्रतिपत्तुमिच्छुना ॥ प्रपूर्वतेः सन्नन्तादुप्रत्ययः । "सनि मीमा—" इत्यादिनेसादेशः । "अत लोपोऽभ्यासस्य" इत्यभ्यासलोपः ॥ अस्या तन्द्रिराहत्यं यस्य तेना-

Digitized by Google

स्रतन्द्रिणा। अनलसेनेत्यर्थः॥ तदिः सौत्रो धातुः। तस्मात् "तङ्कृपादयश्च" इत्यौणादिकः क्किन्प्रत्ययः। "कृदिकारादक्तिनः" इति वा ङीष्। "वन्दीघटीतरीतन्द्रीति ङीषन्तोऽपि" इति क्षीरस्वामी। तथा रामायणप्रयोगः—"निस्तन्द्रिरप्रमत्तश्च स्वदोषे परदोषवत्" इति॥ तेन दुर्योधनेन। पुरुषस्य कर्म पौरुषं पुरुषकारः। उद्योग इति यावत्॥ युवादित्वादण्प्रत्ययः॥ "पौरुषं पुरुषश्लोकं भावे कर्मणि तेजसि" इति विश्वः॥ नक्तं च दिवा च नक्तंदिवम्। अहोरात्रमित्यर्थः॥ "अचतुर-" इत्यादिना सप्तम्यर्थद्वस्योरव्ययपदयोर्द्वन्द्वनिपातेऽप्तमासान्तः॥ विभज्यास्यां वेलायामिदं कार्यमकार्यमिति विभागं कृत्वा नयेन नीत्या वितन्यते विस्तार्यते॥

संप्रति भृत्याधनुरागमाह—

सखीनिव प्रीतियुजोऽनुजीविनः समानमानान्सुहृदश्च बन्धुभिः।
स संततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम्॥१०॥

सखीनिति॥ गतस्मयो निरहंकारोऽतएव स दुर्योधनः संततमनारतं साधु सम्यक्। अकपटमित्यर्थः। अनुजीविनो भृत्यान्। प्रीतियुजः स्निग्धान्सखीनिव मित्राणीव। दर्शयते। लोकस्येति शेषः॥ "हेतुमति च" इति णिच्। "णिचश्च" इत्यात्मनेपदम्॥ शोभनं हृदयं येषां तान्सुहृदो मित्राणि च॥ "सुहृदुर्हृदौ मित्रामित्रयोः" इति निपातः॥ बन्धुभिर्भ्रात्रादिभिः समानमानांस्तुल्यसत्कारान्दर्शयते। बन्धूनां समूहो बन्धुता ताम्॥ "ग्रामजनबन्धुसहायेभ्यस्तल्"॥ कृताधिपत्यं स्वाम्यं यस्यास्तां कृताधिपत्यामिव दर्शयते। बन्धूनधिपतीनिव दर्शयत इत्यर्थः। यथा भृत्यादिषु सख्यादिबुद्धिर्जायते लोकस्य तथा तान्संभावयतीत्यर्थः॥ अनुजीव्यादीनाम् "कर्तुरीप्सिततमं कर्म" इति कर्मत्वम्। पूर्वे त्वक्षिज्ञेन पदान्वये वाक्यार्थमित्थं वर्णयन्ति। स राजानुजीव्यादीन्सख्यादीनिव दर्शयते। सख्यादय इव ते तु तं पश्यन्ति। सख्यादिभावेन पश्यतस्तांस्तथा दर्शयते। स्वयमेव छन्दानुवर्तितया स्वदर्शनं तेभ्यः प्रयच्छतीत्यर्थः। अत्रापि स्वस्येप्सिततमकर्मत्वम्। "अभिनि कर्तुरनुजीव्यादेरभिवादिदृशोरात्मनेपदमुपसंख्यानम्" इति पाणिनीयं कर्मत्वम्। एवं चाभाव्यन्तकर्मणो राधोऽप्यन्ते कर्तुत्वेऽपि "आरोहयते हस्ती स्वयमेव" इत्यादिवदश्रूयमाणकर्मान्तराभावान्नायं णेरणादिसूत्रस्य विषय इति मत्वा "णिचश्च" इत्यात्मनेपदं प्रतिपेदिरे। भाष्ये तु णेरणादिसूत्रविषयत्वमप्यस्योक्तम्। यथाह—"'पश्यन्ति भृत्या राजानम्' 'दर्शयते भृत्यान्राजा' 'दर्शयते भृत्यै राजा' अत्रात्मनेपदं सिद्धं भवति" इति। अत्राह कैयटः—"ननु कर्मान्तरसद्भावादत्रात्मनेपदेन संभाव्यम्। उच्यते। अस्मादेवोदाहरणाद्भाष्यकारस्यायमेवाभिप्राय लक्ष्यते। अन्यत्रावस्थायां ये कर्तृकर्मणी तद्व्यतिरिक्तकर्मान्तरसद्भावादात्मनेपदं न भवति। यथा—"स्वक-

Digitized by Google

रोहयति मनुष्यान् " इतीह तथ्यन्तावस्थायां कर्दमां भवानां जौ कर्मत्वमिति भवतेरात्मनेपदमिति ॥

न चायं त्रिवर्गात्मनायतीत्याह—

असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया ।
गुणानुरागादिव सख्यमीयिवान्न बाधतेऽस्य त्रिगणः परस्परम् ॥१२॥

असक्तमिति ॥ यथायथं यथार्हं विभज्य । संकीर्णरूपं विविच्येत्यर्थः ॥ "यथास्ते यथायथम्" इति निपातनादिर्भावो नपुंसकत्वं च । "इसो नपुंसके प्रातिपदिकस्य" इति इसत्वम् ॥ पक्षे पातः पक्षपात आसक्तिविशेषः समस्तुल्यो यस्यां सा तया तया समपक्षपातया । भक्त्यानुरागविशेषेण । पूज्येष्वनुरागो भक्तिरित्युपदेशः । पूज्यश्चार्य त्रिवर्गः इति भावः । असक्तमनासक्तम् । अभ्यसनितयेति यावत् । आराधयतः सेवमानस्यास्य दुर्योधनस्य यथानां धर्मार्थकामानां गणस्त्रिगणस्त्रिवर्गः ॥ "त्रिवर्गो धर्मकामार्थश्चतुर्वर्गः समोक्षकैः" इत्यमरः ॥ गुणानुरागादधीयगुणेष्वनुरागात् । गुणवदाश्रयकोभादित्यर्थः । सख्यं मैत्रीम् ॥ "सख्युर्यः" इति यप्रत्ययः ॥ ईयिवानुपगतवानित्येत्युत्प्रेक्षा ॥ " उपेयिवाननाश्वानश्चानूचानश्च " इति क्वसुप्रत्ययान्तो निपातः ॥ "आत्मोपसर्गस्तन्त्रम्" इति काशिकाकार आह स्म ॥ परस्परं न बाधते । समवर्तितादस्य धर्मार्थकामाः परस्परानुपमर्देन वर्धन्त इत्यर्थः । उक्तं च—"धर्मार्थकामाः समयेव सेव्या यो ह्येकसक्तः स जनो जघन्यः" इति ॥

अथ श्लोकत्रयेणोपायकौशल्यं दर्शयन्नादौ सामदाने दर्शयति—

निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियाम् ।
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ॥१३॥

निरत्ययमिति ॥ तस्य दुर्योधनस्य निरत्ययं निर्बाधम् । अमायिकमित्यर्थः । अन्यथा जनानां दुर्ग्रहत्वादिति भावः । साम सान्त्वम् ॥ "साम सान्त्वमुपे समे" इत्यमरः ॥ दानवर्जितं न प्रवर्तते । अन्यथा लुब्धप्रवर्तनस्य शुद्धाग्नियैर्वाक्यैर्दुष्करत्वादिति भावः । उक्तं च—"लुब्धमर्थेन गृह्णीयात्साधुमञ्जलिकर्मणा । मूर्खं छन्दानुरोधेन तत्त्वार्थेन च पण्डितम्" इति । तथा भूरि प्रभूतम् । न तु कदाचित्स्वल्पमित्यर्थः । दानं धनत्यागः ॥ सदित्यादरार्थेऽव्ययम् । "आदरानादरयोः सदसती" इति निपातसंज्ञाकरणात् ॥ तस्य क्रियां सत्क्रियां विरहय्य विहाय ॥ "क्त्यपि लुगुपसर्गात्" इत्यपादेशः ॥ न प्रवर्तते ॥ अनादरे दानवैफल्यादिति भावः । न चैवं सर्वत्र वैशाविवेकित्वं कोशदानिश्च स्यादित्याह—सेति ॥ विशेषशालिन्यतिशयवत्यपि सत्क्रियादरक्रिया गुणानुरोधेन गुणानुरागेण विना न प्रवर्तते ॥ "पृथग्विना—" इत्यादिना तृतीया ॥ " गुणेष्वेवादरो भूरिदानं च" इति लोकदोषापवादाय

Digitized by Google

इत्यर्थः ॥ अत्रोत्तरोत्तरस्य पूर्वपूर्वविशेषणतया स्थापनादेकावल्यलंकारः। तदुक्तं काव्यमकाशे— "स्थाप्यतेऽपोह्यते वापि यथापूर्वं परस्परम्। विशेषणतया वस्तु यत्र सैकावली द्विधा" इति ॥

अथ दण्डमकारमाह—

वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः।
गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम्॥१३॥

वसूनीति ॥ वशी तु दुर्योधनो वसूनि धनानि वाञ्छन्न। लोभाभावेत्यर्थः ॥ "वसु तोये धने मणौ" इति वैजयन्ती ॥ निहन्तीति शेषः। तथा मन्युना कोपेन न च ॥ "मन्युर्दैन्ये क्रतौ कुपि" इत्यमरः ॥ "धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः" इति स्मरणादित्यर्थः। किंतु निवृत्तकारणो निवृत्तलोभादिनिमित्तः सन्स्वधर्म इत्येव। स्वस्य राज्ञः सतो समार्यं धर्मो ममेदं कर्तव्यमित्यस्मादेव हेतोरित्यर्थः। "अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन्। अयशो महदाप्नोति नरकं चैव गच्छति" इति स्मरणादिति भावः। गुरूपदिष्टेन भाद्विवाकोपदिष्टेन। "धर्मशास्त्रं पुरस्कृत्य भाद्विवाकमते स्थितः। समाहितमतिः पश्येद्व्यवहाराननुक्रमात्" इति नारदस्मरणात्। दण्डेन दमेन। शिक्षयेत्यर्थः। रिपौ सुतेऽपि वा। स्थितमिति शेषः। एतेनास्य समदर्शित्वमुक्तम्। धर्मविप्लवं धर्मव्यतिक्रमम्। अधर्ममिति यावत्। निहन्ति निवारयति। दुह एवास्य अनुः शिष्ट एव बन्धुः। न तु संबन्धनिबन्धनः पक्षपातोऽस्तीत्यर्थः ॥

संप्रति भेदकौशलं दर्शयति—

विधाय रक्षान्परितः परेतरानशङ्कितोऽकारमुपैति शङ्कितः।
क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति संपदः॥१४॥

विधायेति ॥ अद्धा संजातास्य शङ्कितोऽविश्वस्तः सन्परितः सर्वत्र स्वपरमण्डले परेतरानात्मीयान्। अवश्यकानिति यावत्। यद्वा परानितरयन्ति भेदेनात्मसात्कुर्वन्तीति परेतरान् ॥ तत्करोतीति ण्यन्तात्कर्मण्यण्प्रत्ययः ॥ रक्षन्तीति रक्षान्रक्षकान्। मन्त्रगुप्तिसमर्थानित्यर्थः ॥ "नन्दिग्रहि—" इत्यादिना पचाद्यच् ॥ विधाय कृत्वा। नियुज्येत्यर्थः। अशङ्कितोऽकारमुपैति। स्वयमविश्वस्तोऽपि विश्वस्तवदेव व्यवहरन्परमुत्सेनैव परान्भिनत्तीत्यर्थः। न च तान्रक्षानुपेक्षते येन तेऽपि विकुर्वीरन्नित्याह—क्रियेति ॥ क्रियापवर्गेषु कर्मसमाप्तिष्वनुजीविसात्कृता भृत्यापीनाः कृताः। अपरावर्तितया दत्ता इत्यर्थः ॥ "देये त्रा च" इति सातिमत्ययः ॥ संप-

१ एव. २ स्वधर्मविप्लवम्.

Digitized by Google

दोऽस्य राज्ञः कृतज्ञतामुपकारित्वं वदन्ति । प्रीतिदानेरेवास्य कृतज्ञत्वं प्रकाश्यते न तु पाद्यार्घेरित्यर्थः । कृतज्ञे राजन्यचूडामणौ विनोऽनुरज्यन्तेऽनुरक्ताश्च तं राजन्वतीति भावः ॥

अथोपायमयोगस्य फलवत्तां दर्शयति—

अनारतं तेन पदेषु लम्भिता विभज्य सम्यग्विनियोगसत्क्रियाः ।
फलन्त्युपायाः परिबृंहितायतीरुपेत्य संघर्षमिवार्थसंपदः ॥ १५ ॥

अनारतमिति ॥ तेन राज्ञा दुर्योधनेन पदेषूपायवस्तुषु ॥ "पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः ॥ सम्यगसंकीर्णमव्यस्तं च विभज्य विविच्य । विनियोग एव सत्क्रियानुग्रहः । सत्कार इति यावत् । यासां ता लम्भिताः । स्थानेषु सम्यगयुक्ता इत्यर्थः । उपायविशेषणं वा । उपायाः सामादयः । संघर्षं परस्परस्पर्धामुपेत्येवेत्युत्प्रेक्षा । परिबृंहितायतीः प्रचितोत्तरकालाः । स्थिरा इत्यर्थः । अर्थसंपदोऽनारतमजस्रं फलन्ति । मधुवत इत्यर्थः ॥

अर्थसंपदमेवाह—

अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरम् ।
नयत्ययुग्मच्छदगन्धिरार्द्रतां भृशं नृपोपायनदन्तिनां मदः ॥ १६ ॥

अनेकेति ॥ अयुग्मच्छदस्य सप्तपर्णपुष्पस्य गन्ध इव गन्धो यस्यासावयुग्मच्छदगन्धिः ॥ "सप्तम्युपमान—" इत्यादिना बहुव्रीहिरुत्तरपदलोपश्च । "उपमानाच्च" इति समासान्त इकारः ॥ नृपाणामुपायनान्युपहारभूता ये दन्तिनस्तेषां मदः ॥ "उपायनमुपग्राह्यमुपहारस्त्रयोपदा" इत्यमरः ॥ राज्ञामपत्यानि पुमांसो राजन्याः क्षत्रियाः ॥ "राजश्वशुराद्यत्" इति यत्प्रत्ययः । राज्ञोऽपत्ये जातिग्रहणाद्यञ् ॥ रथाश्वाश्च रथाश्वम् ॥ सेनाङ्गत्वादेकवद्भावः ॥ अनेकेषां राजन्यानां रथाश्वेन संकुलं व्याप्तं तदीयमास्थाननिकेतनाजिरं सभामण्डपाङ्गणम् ॥ "अङ्गणं चत्वराजिरे" इत्यमरः ॥ भृशमत्यर्थमार्द्रतां पङ्किलत्वं नयति । एतेन महासमृद्धिरुक्ता । अत्रोपमोदाहरणालंकारः । तथा चालंकारसूत्रम्—"समृद्धिमद्वस्तुवर्णनमुदाहरणम्" इति॥

संप्रति जनपदक्षेमकरत्वमाह—

सुखेन लभ्या दधतः कृषीबलैरकृष्टपच्या इव सस्यसंपदः ।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन्कुरवश्चकासते ॥ १७ ॥

सुखेनेति ॥ चिराय तस्मिन्दुर्योधने क्षेमं वितन्वति क्षेमंकरे सति । देवः पर्जन्य एव मातेव येषां ते देवमातृका इन्द्रयज्ञादियुता देवाः । ते न भवन्तीत्यदेवमातृकाः । अदीमातृका इत्यर्थः ॥ "देवो भवेदिन्द्रयज्ञसंपन्नश्रीहिषालिवः ।

Digitized by Google

स्वाश्रदीमातृको देवमातृकश्च यथाक्रमम्" इत्यमरः॥ एतेनास्य कृत्यादिपूर्तमवर्त-कत्वमुक्तम्। कुरूणां निवासाः कुरवो जनपदविशेषाः। कुरुन पश्यन्त इति कुरु-पश्याः॥ "राजसूय-" इत्यादिना कर्मकर्तरि क्यप्प्रत्ययान्तो निपातः॥ तद्वि-परीता अकुरुपश्या इव। कुपिरेषामस्तीति कुपीवलैः। कर्षकैरित्यर्थः॥ "रजः कृषि-" आदिना वलच्प्रत्ययः। "वले" इति दीर्घः॥ सुखेनाक्लेशेन लब्धा लब्धुं शक्याः सस्यसंपदो दधतो धारयन्तः॥ "नाभ्यस्ताच्छतुः" इति नुमागममतिषेधः॥ चका-सते। सर्वोत्कर्षेण वर्तन्त इत्यर्थः॥ "अदभ्यस्ताद्" इति शेरदादेशः। "अस्तिस्यादयः षट्" इत्यभ्यस्तसंज्ञा॥ संपन्नजनपदत्वादसंतापकरत्वाच्च दुःसाध्योऽयमिति भावः॥

नन्वेवं जनपदानुवर्तिनः कथमर्थलाभ इत्यत आह—

उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षया।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्तुता वसूपमानस्य वसूनि मेदिनी॥१८॥

उदारेति॥ उदारकीर्तेर्महायशसः॥ "उदारो दातृमहतोः" इत्यमरः॥ दयावतः परदुःखमहरणेच्छोः। अतएव प्रशान्तबाधं प्रशमितोपद्रवं यथा स्यात्तथेति क्रि-याविशेषणम्। उदयविशेषणं वा॥ "या दान्तशान्त-" इत्यादिना क्रियाघातोर्ण्यन्ता-च्छिष्टान्तो निपातः॥ अभिरक्षया सर्वतस्त्राणेनोदयं वृद्धिं दिशतो संपादयतो वसूप-मानस्य कुबेरोपमस्य॥ "वसुर्मयूखाग्निधनाधिपेषु" इति विश्वः॥ अस्य दुर्योधनस्य गुणैर्दयादाक्षिण्यादिभिरुपस्तुता द्राविता मेदिनी वसूनि धनानि॥ "वसु तोये धने मणौ" इति वैजयन्ती॥ स्वयं प्रदुग्धे। अक्लेशेन दुह्यत इत्यर्थः॥ दुहेः कर्मकर्तरि क्विप्। "न दुहस्नुनमां यचिणौ" इति यक्प्रतिषेधः॥ यथा केनचिद्दिग्धेन नवप्रसूता रक्षिता च गौः स्वयं प्रदुग्ध इति भावः॥ "अलंकारस्तु विशेषणमात्र-साम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः" इति सर्वस्वकारः। अत्र प्रतीयमा-नया गवा सह प्रकृतात्मया मेदिन्या भेदेऽभेदलक्षणातिशयोक्तिवशादपह्नुत्येनोक्ति-रिति संक्षेपः॥

वीरानुकूल्यमाह—

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः।
नसंहतास्तस्य नभिन्नवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम्॥१९

महौजस इति॥ महौजसो महाबलाः। अन्यथा दुर्बलानामनुपकारित्वादिति भावः। मानः कुलशीलाद्यभिमान एव धनं येषां ते मानधनाः। अन्यथा कदाचिद्भ-ङ्गदर्पाद्विकुर्वीरन्निति भावः। धनार्चिता धनैरर्चिताः सत्कृताः। अन्यथा दारि-द्र्यादेनं जह्युरिति भावः। संयति सङ्गामे लब्धकीर्तयः। बहुयशस इत्यर्थः। अ-

१ उपस्कृता. २ भेदवृत्तयः.

Digitized by Google

न्यथा कदाचिन्मुह्येयुरिति भावः। संहता मिथःसंगताः स्वार्थनिष्ठा न भवन्तीति असंहताः॥ नञर्थस्य नञ्शब्दस्य सुप्सुपेति समासः॥ मिथश्चरयो मिथो विरोधात्स्वामिकार्यविघातकरा न भवन्तीति नमिश्चरयः॥ पूर्ववत्समासः॥ अन्यथा स्वामिकार्यविघातकतया स्वामिद्रोहिणः स्युरित्युभयत्रापि तात्पर्यार्थः। धनुर्भृतो धानुष्काः। आयुधीयमात्रोपलक्षणमेतत्। माधान्याद्धनुर्ग्रहणम्। तस्य दुर्योधनस्यामुभिः प्राणैः त्रियाणि समीहितुं कर्तुं वाञ्छन्ति। आनृण्यार्थं प्राणान्दातुमिच्छन्ति। अन्यथा दोषस्मरणादिति भावः॥ अत्र महीजसादिपदार्थानां प्राणदानकर्तव्यता प्रति विशेषणत्वेन हेतुत्वाभिधानात्काव्यलिङ्गमलंकारः। लक्षणं तूक्तम्—"तथा स्वाभिप्रायविशेषणत्वात्परिकरालंकारः" इति। दुर्योधिकत्वमुक्तवद्विमक्तवा स्फुरणात्संदृष्टिः॥

संप्रति स्वराष्ट्रवत्परराष्ट्रहचान्तमपि वेत्तीत्याह—

महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः।
महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः॥ २०॥

महीभृतामिति॥ अशेषितक्रियः समापितकृत्यः। आफलोदयकर्मेत्यर्थः। स दुर्योधनः सच्चरितैः शुद्धचरितैः। अवधकैरित्यर्थः। चरन्तीति चरास्तैश्चरैः प्रणिधिभिः॥ पचाद्यच्॥ महीभृतां क्रियाः प्रारम्भाभिःशेषं वेद वेत्ति॥ "विदो लटो वा" इति लटादेशः॥ स्वरहस्यं तु न कश्चिद्वेदेत्याह—महोदयैरिति॥ धातुरिव तस्य दुर्योधनस्येहितमुद्योगो महोदयैर्महाद्भिः। हितमनुबध्नन्त्यनुरुध्यन्तीति हितानुबन्धिनस्तैरित्यर्थः। फलैः कार्यसिद्धिभिः प्रतीयते ज्ञायते। फलानुमेयात्तस्य प्रारम्भा इत्यर्थः॥

विभवकथाह—

न तेन सख्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्मिताननम्।
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम्॥२१॥

नेति॥ तेन राज्ञा क्वचित्कुत्रापि। सह ज्यया मौर्व्या सख्यम्॥ "मौर्वी ज्या शिञ्जिनी गुणः" इत्यमरः॥ "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः॥ धनुर्नोद्यतं मौर्व्याकृतम्। आनतं वा कोपविजिह्मं कोपेन कुटिलं न कृतम्। यस्य कोप एव कोदेति कुत्सितस्य कुत्सकस्किरिति भावः॥ कथं तर्ह्यस्य कारयति राज्ञ इत्याह—गुणेति॥ गुणेषु दयादाक्षिण्यादिष्वनुरागेण भक्त्या। माल्यपक्षे सूत्रानुषङ्गेण। यद्वा शिरस्यनुषङ्गेण। नराधिपैरन्यभूपालैरस्य शासनमाज्ञा। माल्यं तदिव॥

१ स्मृत्य्.

Digitized by Google

"चातुर्वर्ण्यादिस्वात्स्वार्थे ष्यञ्" इति क्षीरस्वामी ॥ शिरोभिरुह्यते धार्यते ॥ "वपिस्वपियजादीनां किति" इति यकि संप्रसारणम् ॥ अत्रोपमा रूपकं च ॥

संप्रत्यस्य धार्मिकत्वमाह—

स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः ।
मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम् ॥२२॥

स इति ॥ इद्धशासनोऽप्रतिहताज्ञः स दुर्योधनो नवयौवनोद्धतं मगल्भम् । पुरंधरमित्यर्थः । दुःखेन शिष्यत इति दुःशासनस्तम् ॥ "भाषायां शासियुधि—" इत्यादिना खलर्थे युच्प्रत्ययः॥ यौवराज्ये युवराजकर्मणि ॥ ब्राह्मणादित्वात्ष्यञ् ॥ निधाय । नियुज्येत्यर्थः । पुरोधसा पुरोहितेनानुमतोऽनुज्ञातः । तस्मिन्याजके सतीत्यर्थः । तदुक्तकृत्ये दोषस्मरणादिति भावः ॥ "निष्ठा" इति भूतार्थे क्तः । न तु "मतिबुद्धि—" इत्यादिना वर्तमानार्थे । अन्यथा "पुरोधसा" इत्यत्र "कर्तरि च वर्तमाने" इति षष्ठी स्यात् ॥ अखिन्नोऽनलसो मखेषु क्रतुषु हव्येन हविषा । हिरण्यं रेतो यस्य तं हिरण्यरेतसमनलं धिनोति प्रीणयति ॥ धिवेः प्रीणनार्थात् "धिन्विकृण्व्योर च" इत्युप्रत्ययः । अकारश्चान्तादेशः ॥

स चेत्थादृश उपयोगी वर्तत्यामिर्न निरूपणैर्भाव्यमित्याशङ्क्योपोद्घातान्दर्शयति—

प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः ।
स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥ २३ ॥

प्रलीनेति ॥ स दुर्योधनः प्रलीनभूपालम् । निःसपत्नमित्यर्थः । स्थिरायति । चिरस्थायीत्यर्थः । भुवो मण्डलमा वारिधिभ्य आवारिधि ॥ "आङ्मर्यादाभिविध्योः" इत्यव्ययीभावः ॥ प्रशासदाज्ञापयन्नपि ॥ "जक्षित्यादयः षट्" इत्यभ्यस्तसंज्ञा । "नाभ्यस्ताच्छतुः" इति नुमागममतिषेधः ॥ त्वत्त्वच एष्यतीरागमिष्यतीः । आगामिनीरिति यावत् । धातूनामनेकार्थत्वादुक्तार्थसिद्धिः । अथवाऽपूर्वः पाठः ॥ "एत्येधत्यूठ्सु" इति वृद्धिः । "लृटः सद्वा" इति शतृप्रत्ययः । "उगितश्च" इति ङीप् । "आच्छीनद्योर्नुम्" इति विकल्पानुमभावः ॥ भियो भयहेतून् । विपद इत्यर्थः । चिन्तयत्यालोचयत्येव । स एवाह—अहो बलवद्विरोधिता दुरन्ता दुष्टावसाना । सार्वभौमस्यापि प्रबलैः सपत्नैः सह वैरमनर्थपर्यवसाय्येवेति तात्पर्यम् ॥ सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलंकारः ॥

ननु गूढाकारेङ्गितस्य तस्य भयं त्वया कथं निरधारीत्यत आह—

कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृतासण्डलसूनुविक्रमः ।
तवाभिधानादथ[1] ते नताननं सुदुःसहान्मन्त्रपदादिवोरगः ॥ २४ ॥

१ सुदुःसहान्.

Digitized by Google

कथेति ॥ कथाप्रसङ्गेन गोष्ठीवचनेन जनैः । तज्ज्ञैरित्यर्थः । अन्यत्र कथाप्रसङ्गेन विषयेण ॥ "कथाप्रसङ्गो वार्तायां विषयेऽपि वाच्यवत्" इति विश्वः ॥ एकवचनस्यातन्त्रत्वाज्जनविशेषणम् ॥ यद्वा कथाप्रसङ्ग इत्यत्र ते जनाश्चेत्येकं पदम् । उदात्तादुदात्तारितादाधिधानाज्जामधेयाज्जामधेयस्मरणादेतोः ॥ "हेतौ" इति पञ्चमी ॥ "आख्याहं अभिधानं च नामधेयं च नाम च" इत्यमरः ॥ अन्यत्र तदाभिधानात् । "नामैकदेशग्रहणे नाममात्रग्रहणम्" इति न्यायात् । तस्य वस्य तवी तार्ण्यवासुकी तयोरभिधानं यस्मिन्पदे तस्मात् । अनुस्मृतास्तण्डलमुनिविक्रमः स्मृतार्जुनपराक्रमः सन्दुःसहादतिदुःसहान्मन्त्रपदान्मन्त्रशब्दास्मारकादेतोः । आखण्डलमुनिरिन्द्रानुजः । उपेन्द्रो विष्णुरिति यावत् ॥ "मुनुः पुमेऽनुजे रवौ" इति विश्वः ॥ तस्य विः पक्षी । गरुड इत्यर्थः । तस्य क्रमः पादविक्षेपः । सोऽनुस्मृतो येन स तथोक्तः स्मृतगरुडमहिमा । उरग इव । नताननः सन् ॥ "उरगः पन्नगो भोगी" इत्यमरः ॥ व्यथते दुःखायते ॥ "पीडा बाधा व्यथा दुःखम्" इत्यमरः ॥ अस्युत्कटमपदोषादिविकारा दुर्वारा इति भावः ॥ "सर्वतो जयमन्विच्छेत्पुत्रादिच्छेत्पराजयम्" इति न्यायादर्जुनोत्कर्षकथनं युधिष्ठिरस्य भूषणमेवेति सर्वमवदातम् ॥

जिगमयिषति—

तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम् ।
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः २५

तदिति ॥ तच्छ्रुत्वास्मारणात्त्वयि जिह्मं कपटं कर्तुमुद्यते । त्वां जिघांसाविष्यर्थः । तत्र तस्मिन्दुर्वोधने विषये कर्तव्यमुत्तरं प्रतिक्रियायां विधीयतां क्रियताम् । ननु कर्तव्यमपि त्वयैवोच्यतामिति चेत्तत्राह—परेति ॥ परप्रणीतानि परोक्तानि वचांसि चिन्वतां गवेषयतां मादृशाम् । वार्ताहारिणामित्यर्थः । गिरः प्रवृत्तिसाराः वार्तामात्रसाराः खलु ॥ "वार्ता प्रवृत्तिर्वृत्तान्तः" इत्यमरः ॥ वार्तामात्रवादिनो वयं न तु कर्तव्यावोपदेशसमर्थाः । अतस्त्वयैव निर्वार्यं कार्यमिति भावः ॥ सामान्येन विशेषसमर्थनादर्थान्तरन्यासः ॥

इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसंनिवासिनाम् ।
प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेऽनुजसंनिधौ वचः ॥ २६ ॥

इतीति ॥ वनसंनिवासिनां पत्यौ वनेचरापि इति गिरमीरयित्वोक्त्वात्तसत्क्रिये गृहीतसारिलोपिके गते सति ॥ "तुष्टिदानमेव चाराणां हि वेतनम् । ते हि तुष्टाश्चास्वामिकार्यमप्यात्मीय स्मरन्ते" इति नीतिवाक्यामृते ॥ अथ महीभुजा राज्ञा कृष्णासदनं द्रौपदीभवनं प्रविश्यानुजसंनिधौ तद्गमेचरोक्तं वचो वाक्यमाचचक्ष

१ विधः.

Digitized by Google

"चातुर्वर्ण्यादिस्वास्त्यर्थे ष्यञ्" इति क्षीरस्वामी ॥ शिरोभिरुह्यते पार्श्वते ॥ "वषि-स्वपियजादीनां किति" इति यकि संप्रसारणम् ॥ अत्रोपमा रूपकं च ॥

संप्रत्यस्य धार्मिकत्वमाह—

स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः।
मखेष्वखिन्नोऽनुमतः पुरोधसा घिनोति हव्येन हिरण्यरेतसम्॥२२॥

स इति ॥ इद्धशासनोऽप्रतिहताज्ञः स दुर्योधनो नवयौवनोद्धतं मगत्वम्। धुरं-धरमित्यर्थः। दुःखेन शिष्यत इति दुःशासनस्तम् ॥ "भाषायां सासिवसि-" इत्यादिना खलर्थे युच्प्रत्ययः॥ यौवराज्ये युवराजकर्मणि ॥ ब्राह्मणादित्वात्ष्यञ् ॥ निधाय। नियुज्येत्यर्थः। पुरोधसा पुरोहितेनानुमतोऽनुज्ञातः। तस्मिन्याजके सतीत्यर्थः। तदुक्तकृत्ये दोषस्मरणादिति भावः ॥ "निष्ठा" इति भूतार्थे क्तः। न तु "मतिबुद्धि-" इत्यादिना वर्तमानार्थे। अन्यथा "पुरोधसा" इत्यत्र "कृत्य च वर्त-माने" इति षष्ठी स्यात् ॥ अखिन्नोऽनलसो मखेषु क्रतुषु हव्येन हविषा। हिरण्यं रेतो यस्य तं हिरण्यरेतसमनलं घिनोति प्रीणयति ॥ घिवेः प्रीणनार्थात् "घिन्विकि-ण्व्योर च" इत्युप्रत्ययः। अकारश्चान्तादेशः ॥

स चेत्थंभूतश्चरणयोगी तर्हि किमर्थमिन्द्रियाणामुपरतिरूपोयोगाद्भ्रान्तिमित्याशङ्क्योपरतिप्रयोजनमाह—

प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः।
स चिन्तयत्येव भियस्त्रदेष्यतीरहो दुरन्ता बलवद्विरोधिता॥ २३ ॥

प्रलीनेति॥ स दुर्योधनः प्रलीनभूपालम्। निःसपत्नमित्यर्थः। स्थिरायति। चि-रस्थायीत्यर्थः। भुवो मण्डलमा वारिधिभ्य आवारिधि ॥ "आङ्मर्यादाभिविध्योः" इत्यव्ययीभावः ॥ प्रशासदाज्ञापयन्नपि ॥ "अस्तिभ्वादयः षट्" इत्यव्यत्वसंज्ञा। "नाभ्यस्ताच्छतुः" इति नुमागममतिषेधः ॥ त्वरन्त एष्यतीरागमिष्यतीः। आगा-मिनीरिति यावत्। धातूनामनेकार्थत्वादुक्तार्थसिद्धिः। अथवाऽत्रपूर्वः पाठः ॥ "ए-त्येधत्यूठ्सु" इति वृद्धिः। "लृटः सद्वा" इति शतृप्रत्ययः। "उगितश्च" इति ङीप्। "आच्छीनद्योर्नुम्" इति विकल्पान्नुमभावः ॥ भियो भयहेतून्। विपद इत्यर्थः। चिन्तयत्यालोचयत्येव। स एवाह—अहो बलवद्विरोधिता दुरन्ता दु-ष्टावसाना। सार्वभौमस्यापि प्रबलैः सपत्नैः सह वैरमनर्थपर्यवसाय्येवेति तात्पर्यम् ॥ सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलंकारः ॥

ननु गूढाकारेङ्गितस्य तस्य भयं त्वया कथं निरधारीत्यत आह—

कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद्व्यथते नताननः सुदुःसहाच्चन्त्रपदादिवोरगः॥ २४॥

१ सुदुःसहाम.

Digitized by Google

कथेति ॥ कथाप्रसङ्गेन गोष्ठीविचनेन जनैः । तत्रत्यैरित्यर्थः । अन्यत्र कथाप्रसङ्गेन विपर्ययेण ॥ "कथाप्रसङ्गो वार्तायां विपर्ययेऽपि दृश्यते" इति विश्वः ॥ एकवचनस्यातन्त्रत्वाज्जनविशेषणम् ॥ यद्वा कथाप्रसङ्ग इनाश्च ते जनाश्चेत्येकं पदम् । उदाहृतादुच्चारितात्तदाभिधानाज्जामधेयाज्जामधेयस्मरणाद्धेतोः ॥ "हेतौ" इति पञ्चमी ॥ "आख्याहे अभिधानं च नामधेयं च नाम च" इत्यमरः ॥ अन्यत्र तदाभिधानात् । "नामैकदेशग्रहणे नाममात्रग्रहणम्" इति न्यायात् । तस्य तस्य तवी तार्ण्यवासुकी तयोरभिधानं यस्मिन्पदे तस्मात् । अनुस्मृतात्खण्डलसूनुविक्रमः स्मृतार्जुनपराक्रमः सन्दुःसहादविदुःसहान्मन्त्रपदान्मन्त्रशब्दात्स्मारकाद्धेतोः । आखण्डलसूनुरिन्द्रानुजः । उपेन्द्रो विष्णुरिति यावत् ॥ "सूनुः पुत्रेऽनुजे त्वौ" इति विश्वः ॥ तस्य विः पक्षी । गरुड इत्यर्थः । तस्य क्रमः पादविक्षेपः । सोऽनुस्मृतो येन स तथोक्तः स्मृतगरुदमहिमा । उरग इव । नताननः सन् ॥ "उरगः पन्नगो भोगी" इत्यमरः ॥ व्यथते दुःखायते ॥ "पीडा बाधा व्यथा दुःखम्" इत्यमरः ॥ अस्मत्कृतमपदोषादिविकारा दुर्वारा इति भावः ॥ "सर्वतो जयमन्विच्छेत्पुत्रादिच्छेत्पराजयम्" इति न्यायादर्जुनोत्कर्षकथनं युधिष्ठिरस्य भूषणमेवेति सर्वमवदातम् ॥

जिगमयिषुः—

तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम् ।
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः २५

तदिति ॥ तच्छ्रुत्वास्मारणात्त्वयि जिह्मं कपटं कर्तुमुद्यते । त्वां जिघांसाविष्यर्थः । तत्र तस्मिन्दुर्बोधने विषये कर्तव्यमुत्तरं प्रतिक्रियासु विधीयतां क्रियताम् । ननु कर्तव्यमपि त्वयैवोच्यतामिति चेत्तत्राह—परेति ॥ परप्रणीतानि परोक्तानि वचांसि चिन्वतां गवेषयतां मादृशाम् । वार्ताहारिणामित्यर्थः । गिरः प्रवृत्तिसारा वार्तामात्रसाराः खलु ॥ "वार्ता प्रवृत्तिर्वृत्तान्तः" इत्यमरः ॥ वार्तामात्रवादिनो वयं न तु कर्तव्यावोधदेशसमर्थाः । अतस्त्वयैव निर्णयं कार्यमिति भावः ॥ सामान्येन विशेषसमर्थनादर्थान्तरन्यासः ॥

इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसंनिवासिनाम् ।
प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेऽनुजसंनिधौ वचः ॥ २६ ॥

इतीति ॥ वनसंनिवासिनां पत्यौ वनेचरेऽपि इति गिरमीरयित्वोक्त्वात्तसत्क्रिये गृहीतवारिलोपिके गते सति ॥ "तुष्टिदानमेव चाराणां हि वेतनम् । ते हि तुष्टो-ऽस्वामिकार्येष्वपीव त्वरन्ते" इति नीतिवाक्यामृते ॥ अथ महीभुजा राज्ञा कृष्णासदनं द्रौपदीभवनं प्रविश्यानुजसंनिधौ सहनेचरोक्तं वचो वाक्यमाचचक्ष

१ विधेः.

Digitized by Google

आख्यातम् । अथवा । कृष्णेति पदच्छेदः । सदनं प्रविश्यानुजसंनिधौ तद्वचः कृष्णाग्रजश्च आख्याता ॥ चक्रिरे दुहादेर्द्विकर्मकत्वादप्रधानकर्मणि क्विट् ॥

निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियन्तुमक्षमा ।
नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः ॥ २७ ॥

निशम्येति ॥ अथ द्रुपदात्मजा द्रौपदी द्विषतां सिद्धिं द्वंद्वरूपां निशम्य ततस्तदनन्तरम् । ततो द्विषद्भ्य आगतास्ततस्त्याः ॥ "अव्ययात्त्यप्" इति त्यप् ॥ अपाकृतीर्विकारान्विनियन्तुं निरोद्धुमक्षमा सती नृपस्य युधिष्ठिरस्य मन्युव्यवसाययोः क्रोधोद्योगयोर्दीपिनीः संवर्धिनीर्गिरो वाक्यान्युदाजहार । जगादेत्यर्थः ॥

भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः ॥२८॥

भवादृशेष्विति ॥ भवादृशा भवद्विधाः । पण्डिता इत्यर्थः । तेषु विषये ॥ "त्यदादिषु–" इत्यादिना कत्व । "आ सर्वनाम्नः" इत्याकारादेशः ॥ प्रमदाजनोदितं स्त्रीजनोक्तम् ॥ वदेः क्तः । "वचिस्वपि–" इत्यादिना संप्रसारणम् ॥ अनुशासनं नियोगवचनमधिक्षेपस्तिरस्कार इव भवति । अतो न युक्तं वक्तुमित्यर्थः । तथापि वक्तुमनुचितत्वेऽपि निरस्तनारीसमयास्त्याजितश्वशुरीनतारूपस्त्रीसमाचाराः ॥ "समयाः शपथाचारकालसिद्धान्तसंविदः" इत्यमरः ॥ दुराधयः समयोल्लङ्घनहेतुत्वाद्दुष्टा मनोव्यथाः ॥ "पुंस्याधिर्मानसी व्यथा" इत्यमरः ॥ मां वक्तुं व्यवसाययन्ति प्रेरयन्ति । न किंचिदयुक्तं दुःखितानामिति भावः ॥

अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्वयंशजैः ।
त्वयात्महस्तेन मही मदच्युता मतङ्गजेन स्रगिवापवर्जिता ॥२९॥

अखण्डमिति ॥ आखण्डलतुल्यधामभिरिन्द्रतुल्यप्रभावैः ॥ "धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोः" इति हैमः ॥ स्वयंशजैः भूपतिभिर्भरतादिभिश्चिरमखण्डमविच्छिन्नं धृता मही त्वया । मदं च्योततीति मदच्युत् ॥ क्विप् ॥ तेन मदस्राविणा मतङ्गजेन स्रगिवात्महस्तेन स्वकरेण । स्वापत्येनेत्यर्थः । अपवर्जिता परित्यक्ता । स्वदोषादेवायमनर्थागम इत्यर्थः ॥

स्वदोषादेवायमनर्थागम इत्युक्तम् । स च दोषः कुटिलेष्वकौटिल्यमेवेत्याह—

व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि[1] घ्नन्ति शठास्तथाविधानसंवृताङ्गानिशिता इवेषवः ॥३०॥

व्रजन्तीति ॥ मूढधियो निर्विवेकबुद्धयस्ते पराभवं व्रजन्ति ये मायाविषु मायाः

[1] निघ्नन्ति.

Digitized by Google

वस्तु विषये ॥ "अज्ञायामेधा–" इत्यादिना विनिमस्वयः ॥ मायिनो मायावन्तः॥ श्रीज्ञादित्यादिनिमस्वयः ॥ न भवन्ति ॥ अत्रैवार्थान्तरं न्यस्यति—भविष्येति ॥ यदा अपकारिणो पूर्तास्तथाविधानकुटिलानसंहृताङ्गानवर्मितशरीरान्निशिता इ-षव इव भविष्य भवेयं कृत्वात्मीया भूत्वा घ्नन्ति हि। "आर्जवं हि कुटिलेषु न नीतिः" इति भावः ॥

न च लक्ष्मीचाञ्चल्यादयमनर्थागमः। किंतु स्वोपेक्षादोषमूलत्वादित्याशयेनाह—

गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः।
परैरदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥ ३१ ॥

गुणेति ॥ अनुरक्तसाधनोऽनुकूलसहायवान् ॥ उक्तं च कामन्दकीये—"उद्यो-गादनिहतस्य सुसहायस्य धीमतः। छायेवानुगता तस्य नित्यं श्रीः सहचारिणी" इति ॥ कुलाभिमानी क्षत्रियत्वाभिमानी कुलीनत्वाभिमानी च स्वदन्यस्त्वचो-ऽन्यः ॥ "अन्याराद्–" इत्यादिना पञ्चमी ॥ क इव। नराधिपो गुणैः संध्यादिभिः सौन्दर्यादिभिश्चानुरक्तामनुरागिणीं कुलजां कुलक्रमागतां कुलीनां च मनोरमां प्रियमात्मवधूमिव स्वभार्यामिव॥ "वधूर्जाया स्नुषा स्त्री च" इत्यमरः ॥ परैः शत्रु-भिरन्यैश्चापहारयेत् । स्वयमेवापहारं कारयेदित्यर्थः । कलत्रापहारवच्छ्रियपि-हारोऽपि राज्ञा मानहानिकरत्वादुपेक्षणीय इति भावः ॥

अथ दण्डिभिः क्रोधोद्दीपनं करोति—

भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः॥३२॥

भवन्तमिति ॥ हे नरदेव नरेन्द्र। एतर्हीदानीम् । अस्मिन्नापत्काले ऽपीत्यर्थः ॥ "एतर्हि संप्रतीदानीमधुना साम्प्रतं तथा" इत्यमरः ॥ "इदमो हिरु" इति हिरु-प्रत्ययः। "एतेतौ रथोः" इत्येतादेशः ॥ आपदमेवाह—मनस्विगर्हिते शूरजुगुप्सिते वर्त्मनि मार्गे विवर्तमानम्। शत्रुकृतां दुर्दशामनुभवन्तमित्यर्थः। भवन्तं त्वामुदीरित उ-द्दीपितो मन्युः क्रोधः। शुष्कं नीरसम् ॥ "शुषः कः" इति निष्ठातकारस्य ककारः॥ शमी चासौ तरुश्चेति विशेषणसमासः। तम्। शमीग्रहणं क्षीघ्रज्वलनस्वभावात्तरु-त्वम्। उच्छिखः उद्गतज्वालः ॥ "पृषिज्वाले अपि शिखे" इत्यमरः ॥ वह्निरिव। कथं न ज्वलयति। ज्वलयितुमुचितमित्यर्थः ॥ "मितां ह्रस्वः" इति ह्रस्वः ॥

अथ दण्डिभिरनुत्साहं क्रोधस्याज्य एवेत्याशङ्क्याह—

अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः।
अहर्यशून्येन जनस्य जन्तुना न जातहार्देन नृशंसवृत्तयः ॥३३॥

१ नराधिपः. २ नरस्य. ३ च.

Digitized by Google

अवन्ध्येति ॥ अवन्ध्यः कोपो यस्य तस्यावन्ध्यकोपस्यातएवापदां विहन्तुः । निग्रहानुग्रहसमर्थस्येत्यर्थः । पुंस इति शेषः । देहिनो जन्तवः स्वयमेव वश्या वशंगता भवन्ति ॥ "वशं गतः" इति यत्प्रत्ययः ॥ अतस्तया कोपिना भवितव्यमित्यर्थः । व्यतिरेके त्वनिष्टमाचष्टे—अमर्षशून्येन निःकोपेन जन्तुना ॥ कन्यया शोक इतिवत् "हेतौ" इति तृतीया ॥ हृदयस्य कर्म हार्दं स्नेहः ॥ "प्रेमा ना प्रियता हार्दं प्रेम स्नेहः" इत्यमरः ॥ युवादित्वादण् । "हृदयस्य हृल्लेखयदण्लासेषु" इति हृदादेशः ॥ जातहार्देन जातस्नेहेन सता जनस्यादरो न । विद्विषा द्विषता च सतादरो न । अमर्षहीनस्य रागद्वेषावकिंचित्करत्वादगण्यावित्यर्थः । अथवा विद्विषा सता दरो भयं न ॥ "दरोऽस्त्रियां भये श्वभ्रे" इत्यमरः ॥ एतस्मिन्नेव प्रयोगे संधिमाश्रित्या पदच्छेदः । पुंवाक्येषु न दोषः । अतः स्थाने कोपः कार्यस्त्याज्यस्तस्थाने कोप इति भावः ॥

परिभ्रमँल्लोहितचंन्दनोचितः पदातिरन्तर्गिरि रेणुरूषितः ।
महारथः सत्यधनस्य मानसं दुनोति नो कञ्चिदयं वृकोदरः ॥ २४ ॥

परिभ्रमन्निति ॥ लोहितचन्दनोचित उचितलोहितचन्दनः ॥ "वाहिताग्न्यादिषु" इति साधुः ॥ अभ्यस्तरक्तचन्दन इत्यर्थः ॥ "अभ्यस्तेस्त्युचितं न्याय्यम्" इति यादवः ॥ महारथो रथचारी । उभयत्रापि मागिति शेषः । अथ तु रेणुरूषितो धूलिप्लुषितः । पद्भ्यामतति गच्छतीति पदातिः पादचारी ॥ "अज्यतिभ्यां च" इत्यनुवृत्तौ "पादे च" इत्यौणादिक इन्प्रत्ययः । "पादस्य पदाज्यातिगोपहतेषु" इति पदादेशः ॥ अन्तर्गिरि गिरिष्वन्तः ॥ विभक्त्यर्थेऽव्ययीभावः । "गिरेश्च सेनकस्य" इति विकल्पात्समासान्ताभावः ॥ परिभ्रमन्नयं वृकोदरो भीमः । सत्यधनस्येति सोद्वुण्डवचनम् । अथापि त्वया सत्यमेव रक्ष्यते न तु भ्रातर इति भावः । तवेति शेषः । मानसं नो दुनोति ॥ "स्वान्तं हृन्मानसं मनः" इत्यमरः ॥ कञ्चिन्न परितापयति ॥ "कञ्चित्कामममवेदने" इत्यमरः । स्वामिमायाविष्करणं काममवेदनम् ॥

विजित्य यः प्राज्यमयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः ।
स वल्कवासांसि तवाधुनाहरन्करोति मन्युं न कथं धनंजयः ॥ २५ ॥

विजित्येति ॥ वासव इन्द्र उपमानं यस्य स वासवोपम इन्द्रतुल्यो यो धनंजयः । उत्तरान्कुरून्मेरोरुत्तरान्मानुषान्देशविशेषान्विजित्य प्राज्यं प्रभूतम् ॥ "प्रभूते प्रचुरं प्राज्यम्" इत्यमरः ॥ कुप्यादन्यदकुप्यं हेमकुप्यात्मकम् ॥ "स्यात्कोशश्च हिरण्यं च हेमकुप्ये कुवाकृते । ताभ्यां यदन्यत्तत्कुप्यम्" इत्यमरः ॥ वसु धनमयच्छदत्तवान् ॥ "पाघ्रा—" इत्यादिना दाणो यच्छादेशः ॥ स धनं जयतीति धनंजयोऽर्जुनः ॥ "संज्ञायां भृतृवृजि—" इत्यादिना खच्प्रत्ययः । "अर्हादृत्—" इत्यादिना मुमागमः ॥

१ चन्दनान्वितः ।

Digitized by Google

अधुनास्मिन्काले ॥ "अधुना" इति निपातनात्साधुः ॥ तव वल्कवासांस्याहरन्। कर्म तव मन्युं क्रोधं दुःखं वा न करोति ॥

वनान्तशय्याकठिनीकृताकृती कषाचितौ विष्वगिवागजौ गजौ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम्॥३६॥

वनान्तेति॥ वनान्तो वनभूमिरेव शय्या तया कठिनीकृताकृती कठिनीकृतदेहौ ॥ "आकारो देह आकृतिः" इति वैजयन्ती ॥ विष्वक्समन्तात् ॥ "समन्ततस्तु परितः सर्वतो विष्वगित्यपि" इत्यमरः ॥ कषाचितौ कषव्याप्तौ । विशीर्णकेशावित्यर्थः । अतएवागजौ गिरिसंभवौ गजाविव स्थितावेतौ यमौ युग्मजातौ । माद्रीपुत्रावित्यर्थः ॥ "यमो दण्डधरे भ्राते संयमे यमजेऽपि च" इति विश्वः ॥ विलोकयंस्त्वं कथं धृतिसंयमौ संतोषनियमौ ॥ "धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिषु" इति विश्वः ॥ बाधितुं नोत्सहसे न प्रवर्तसे ॥ "सकृपः—" इत्यादिना तुमुन् ॥ अहो ते महद्धैर्यमिति भावः ॥

अथ राज्ञो दुर्दर्शां दर्शयितुमुपोद्घातमाह । प्रकृतार्थं वर्णयितुमर्थान्तरवर्णनमुपोद्घातः—

इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः।
विचिन्त्तयन्त्या भवदापदं परां रुजन्ति चेतः प्रसभं ममाधयः॥३७॥

इमामिति॥ इमां वर्तमानाम्। तवेमां तावकीं त्वदीयाम् ॥ "तस्येदम्" इत्यण्प्रत्ययः। "तवकममकावेकवचने" इति तवकादेशः ॥ धियं त्वदापद्विषयां चित्तवृत्तिमहं न वेद न वेत्मि। परवुद्धेरमत्पक्षत्वादिति भावः ॥ "विदो लटो वा" इति लटादेशः ॥ न चात्मदृष्टान्तेनापक्षत्वादुःखित्वमनुमातुं शक्यते धीरादिष्वनैकान्तिकत्वादित्याशयेनाह—विचित्ररूपा धीरधीरा अनेकप्रकाराः खलु। किंतु परावृत्तदृष्टा भवदापदं विचिन्तयन्त्या भावयन्त्या मम चेतश्चित्तम्। आधयो मनोव्यथाः॥ "उपसर्गे घोः किः" इति किप्रत्ययः ॥ प्रसभं प्रसह्य रुजन्ति भञ्जन्ति ॥ "रुजो भङ्गे" इति धातोर्लट् ॥ पश्यतामपि दुःसहा दुःखजननी त्वद्विपच्चिरनुभविष्यतां त्वां नाविष्करोतीति महच्चित्रमित्यर्थः ॥ चेत इति "रुजार्थानां भाववचनानामज्वरेः" इति षष्ठी न भवति। तत्र शेषाधिकाराच्छेषत्वस्य विवक्षितत्वादिति ॥

त्रयोदशभिः श्लोकैरुपोद्घातमाह—

पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः।
अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः॥३८॥

पुरेति ॥ यस्त्वं महाधनं बहुमूल्यं शेषे ॥ "महाधनं महामूल्ये" इति विश्वः ॥

Digitized by Google

शयनं शय्यामधिरुहः सन् । स्तुतयो गीतयश्च ता एव मङ्गलानि तैः । करणभूतैः । पुरा विबोध्यसे । वैतालिकैरिति शेषः । पूर्वं बोधित इत्यर्थः ॥ "पुरि लुङ् चास्मे" इति भूतार्थे लङ् ॥ स त्वमदभ्रदर्भा बहुकुशाम् ॥ "अल्पे कुर्शं कुपो दर्भः" इति। "अदभ्रं बहुलं बहु" इत्युभयत्राप्यमरः ॥ स्थलीमकृत्रिमभूमिम् ॥ "जानपद–" इत्यादिना कृत्रिमार्थे ङीष् ॥ एतेन दुःसहस्पर्शत्वमुक्तम् ॥ "अधिशीङ्स्थासां कर्म" इति कर्मत्वम् ॥ अधिशय्य शयित्वा ॥ "अयक्ष्विक्ति" इत्ययङादेशः ॥ अधिवैरम्भैः शिवारुतैः क्रोष्टुवासितैः ॥ "शिवा हरीतकी क्रोष्टा शमी नयमसक्यभे" इति वैजयन्ती ॥ निद्रां जहासि । अयेति शेषः ॥

पुरोपनीतं नृप रामणीयकं द्विजातिशेषेण यदेतदन्धसा ।
तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं वशसा समं वपुः॥३९॥

पुरेति ॥ हे नृप । यदेतत्पुरोवर्ति वपुः पुरा द्विजातिशेषेण द्विजभुक्तावशिष्टेनान्धसान्नेन ॥ "भिस्सा स्त्री भक्तमन्धोऽन्नम्" इत्यमरः ॥ द्वे जाती येषां ते द्विजातयः । तदुक्तम्— "जन्मना जायते शूद्रः संस्कारैर्द्विज उच्यते" इति ॥ "दन्तविभाण्डनात् द्विजाः" इत्यमरः ॥ रमणीयस्य भावो रामणीयकं मनोहरत्वमुपनीतं प्रापितम् ॥ नयतेर्द्विकर्मकत्वात्प्रधाने कर्मणि क्तः । "प्रधानकर्मण्याख्येये स्वादीनामुद्विकर्मकान्" इति वचनात् ॥ अथ वन्यफलाशिनस्ते तव तद्वपुर्वशसा समं परमतिमात्रं कार्श्यं परैति प्राप्नोति । उभयमपि क्षीणत्व इत्यर्थः ॥ अत्र सहोक्तिरलंकारः । तदुक्तं काव्यप्रकाशे—"सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्" इति ॥

अनारतं यौ मणिपीठशायिनावरञ्जयद्राजशिरःस्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम् ॥४०॥

अनारतमिति ॥ अनारतमजस्रं मणिपीठशायिनौ मणिमयपीठस्थितौ यौ चरणौ राजशिरःस्रजां नमद्भूपालमौलिस्रजां रजः परागोऽरञ्जयत् । तौ ते चरणौ मृगैर्द्विजैश्च तपस्विभिरालूनशिखेषु छिन्नाग्रेषु बर्हिषां कुशानाम् ॥ "बर्हिः कुशदुताशयोः" इति विश्वः ॥ वनेषु निषीदतस्तिष्ठतः ॥

ननु सर्वप्राणिसाधारण्यामापदि का परिवेदनेत्यत्राह—

द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः ।
परैरपर्यासितवीर्यसंपदां पराभवोऽप्युत्सव एव मानिनाम् ॥ ४१ ॥

द्विषदिति ॥ यतः कारणादियं दशावस्था ॥ "दशा वर्तावस्थायाम्" इति विश्वः ॥ द्विषन्तो निमित्तं यस्याः सा ॥ "द्विषोऽमित्रे" इति शतृप्रत्ययः ॥ अतो मे मनः समूलं निःशेषमुन्मूलयतीवोत्पाटयतीव । दैविकी त्वापन्न दुःसाधेत्याह—

Digitized by Google

परैरिति ॥ परैः शत्रुभिरपर्यासिता पर्यावर्तिता वीर्यसंपन्नेषां तेषां मानिनां पराभवो विपदप्युत्सव एवेति ॥ वैधर्म्येणार्थान्तरन्यासः॥मानहानिर्दुःसहा न स्यादिति भावः॥

विहाय शान्तिं नृप धाम तत्पुनः प्रसीद संधेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः॥४२॥

विहायेति ॥ हे नृप । शान्तिं शमं विहाय तत्पसिद्धं धाम तेजो विद्विषां वधाय पुनः संधेह्यङ्गीकुरु प्रसीद ॥ मार्दनायां क्रोद् ॥ नन्वु शमेन कार्यसिद्धौ किं क्रोधेनेत्याह—व्रजन्तीति ॥ निःस्पृहा मुनयः शत्रून्कामादीनवधूय निर्जित्य शमेन क्रोधवर्जनेन सिद्धिं मोक्षाख्यां व्रजन्ति । भूभृतस्तु न । कैवल्यकार्यवद्राजकार्यं न शान्तिसाध्यमित्यर्थः ॥

पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशम् ।
भवादृशाभेदधिकुर्वते रतिं निराश्रया हन्त हता मनस्विता ॥४३॥

पुर इति ॥ किं च धामवतां तेजस्विनाम् । परापकारासहिष्णूनामित्यर्थः । पुरः सरन्तीति पुरःसरा अग्रेसराः ॥ "पुरोऽग्रतोऽग्रेषु सर्तेः" इति टप्रत्ययः ॥ यशोधना भवादृशाः सुदुःसहमतिदुःसहमीदृशमुक्तप्रकारं निकारं पराभवं प्राप्य रतिं संतोषमधिकुर्वते स्वीकुर्वते चेत्तर्हि । हन्त इति खेदे । मनस्विताभिमानिता निराश्रया सती हता तेजस्विजनैकशरणत्वान्मनस्विताया इत्यर्थः । अतः पराक्रमितव्यमिति भावः ॥ वधप्यत्र असहनस्वासङ्गेरधिपूर्वात्करोतेः "अधेः प्रसहने" इत्यात्मनेपदं न भवति। "प्रसहनं परिभवः" इति काशिका । तथाप्यस्याः कर्मभिप्रायविवक्षायामेव प्रयोजकत्वात्कर्मभिप्राये "स्वरितञितः—" इत्यात्मनेपदं प्रसिद्धम् ॥

अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः संजुहुधीह पावकम्॥४४॥

अथेति ॥ अथ पक्षान्तरे निरस्तविक्रमः सन् । चिराय चिरकालेनापि क्षमां क्षान्तिमेव ॥ "क्षितिक्षान्त्योः क्षमा" इत्यमरः ॥ सुखस्य साधनं पर्येष्यवगच्छसि तर्हि लक्ष्मीपतिलक्ष्म राजचिह्नं कार्मुकं विहाय । धरतीति धरः ॥ पचाद्यच् ॥ जटाभी धरो जटाधरः सन्निह वने पावकं संजुहुधि। पावके होमं कुर्वित्यर्थः । अधिकरणे कर्मस्वोपचारः । चिरकस्य किं पक्षपेक्षयेति ॥ "दुष्करम्यो हेयिः" ॥

अथ समयोऽक्षमाद्विभेषि तदपि न किंचिदित्याह—

न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः ।
अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि संधिदूषणानि४५

नेति ॥ परेषु शत्रुषु । निकृतिः शाठ्यं परं प्रधानं येषु तेषु तथोक्तेष्वपकारतत्परेषु

Digitized by Google

तस्तु भूरिपाज्ञो महौजसः प्रतीकारक्षमस्त्व ते तव समयक्षयोदक्षसंवत्सरान्वने व-
त्स्यामीत्येवंरूपा संविद् ॥ "समयाः क्षपणाचारकालसिद्धान्तसंविदः" इत्यमरः ॥
तस्य परिरक्षणं प्रतीक्षणं न क्षमं न युक्तम् ॥ "युक्ते क्षमं शक्ते हिते त्रिषु" इत्य-
मरः ॥ हि यस्माद्विजयार्थिनो विजिगीषवः क्षितीक्षा अरिषु विषये सोपधि सकपटं
यथा तथा ॥ "कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे" इत्यमरः ॥ संविदूष-
णानि विदधति केनचिदूषणेन दोषमापाद्य संधिं दूषयन्ति । विपक्षयन्तीत्यर्थः ।
शत्रुस्य हि विजिगीषोः सर्वथा कार्यसाधनं प्रधानमन्यत्समयरक्षणादिकमप्रधानमेवेति
भावः ॥ अर्थान्तरन्यासोऽलंकारः ॥ पुष्पिताग्राछन्दः ॥

उक्तमर्थमाशीर्वादपूर्वकमुपसंहरति—

विधिसमयनियोगादीक्षितं संहारजिह्मं
शिथिलवसुमगाधे मज्जमापत्पयोधौ ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ॥ ४६ ॥

विधीति ॥ विधिर्दैवम् ॥ "विधिर्विधाने दैवे च" इत्यमरः ॥ समयः कालक्षयो-
नियोगाभियमनाद्धेतोः । तयोर्दुरतिक्रमत्वादिति भावः । अगाधे दुस्तरे । आपत्प-
योधिरित्येतुपमितसमासः । दिनकृतमिवेति वक्ष्यमाणानुसाराच्चिन्त्यापत्प-
योधौ मग्नम् । सूर्योऽपि सायं सागरे मज्जति परेद्युरुन्मज्जतीत्यागमः । दीक्षितः म-
ताप आतपश्च तस्याः संहारेण जिह्ममप्रसन्नं शिथिलवसुं शिथिलधनमन्यत्र शि-
थिलरश्मिम् ॥ "वसुर्देवेऽग्नौ रश्मौ च वसु तोये धने मणौ" इति वैजयन्ती ॥
"शिथिलवसुम्" इति पाठे तूभयत्रापि शिथिलशक्तिकमित्यर्थः ॥ रिपुतिमिर-
मिवेति रिपुतिमिरमुदस्य निरस्योदीयमानमुद्यन्तम् ॥ "ईङ् गतौ" इति धातो-
र्दैवादिकात्कर्तरि शानच् ॥ त्वां दिनादौ दिनकृतमिव लक्ष्मीर्भूयः समभ्येतु भजतु ॥
"आशिषि लिङ्लोटौ" इति लोट् ॥ चमत्कारकारितया मङ्गलाचरणरूपतया च
सर्गान्त्यश्लोके लक्ष्मीशब्दप्रयोगः । यथाह भगवान्भाष्यकारः—"मङ्गलादीनि
मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाण्यायुष्मत्पुरुषाणि च
भवन्त्यध्येतारश्च प्रवक्तारो भवन्ति ॥ पूर्वोपमेयम् ॥ मालिनीवृत्तम् । सर्गान्तत्वा-
द्वृत्तभेदः । यथाह दण्डी—"सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसंधिभिः । सर्वत्र लो-
कवृत्तान्तैरुपेतं लोकरञ्जनम्" इति ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथसमाख्यया
व्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये
व्यवसायदीपनो नाम प्रथमः सर्गः ।

१ उदीपमानम्.

Digitized by Google

द्वितीयः सर्गः ।

विहितां प्रियया मनःप्रियामथ निश्चित्य गिरं गरीयसीम् ।
उपपत्तिमदूर्जिताश्रयं नृपसूचे वचनं वृकोदरः ॥ १ ॥

विहितामिति ॥ अथ वृकोदरो भीमः प्रियया द्रौपद्या । प्रियाग्रहणमस्या हितोपदेशवचनार्थम् । विहिताम् । अभिहितामित्यर्थः । विपूर्वस्य दधातेः क्रियासामान्यवाचिनो योग्यविशेषपर्यवसानात् । मनःप्रियामभिमतार्थयोगान्मनोहराम् । विशेषणद्वयेनापि गिरो श्राव्यत्वमुक्तम् । गिरं गरीयसीं सारवचसं निश्चित्य दृष्ट्वा धर्मराजमुपपत्तिमदुक्तियुक्तमूर्जिताभयप्रदानार्थं वचनमूचे उक्तवान् ॥ कर्तरि लिट् । द्रुवो वचिरादेशः । "द्रुविश्रुति-" इत्यादिना द्विकर्मकत्वम् । "अकथितं च" इति द्रौपद्या कर्मत्वम् ॥

किं तद्वचनं तदाह—

यदवोचत वीक्ष्य मानिनी परितः स्नेहमयेन चक्षुषा ।
अपि वागधिपस्य दुर्वचं वचनं तदिदधीत विस्मयम् ॥ २ ॥

यदिति ॥ मानिनी क्षत्रियकुलाभिमानवती द्रौपदी स्नेहमयेन स्नेहप्रचुरेण ॥ "तत्प्रकृतवचने मयट्" ॥ चक्षुषा ज्ञानचक्षुषा । एतेनास्त्वमुक्तम् । परितो वीक्ष्य समन्ताद्विलोक्य यद्वचनमवोचत ॥ ब्रुवोर्वचेर्वा लुङ् । "वच उम्" इत्युमागमः ॥ वागधिपस्य बृहस्पतेरपि दुर्वचं वक्तुमशक्यम् ॥ शेषे षष्ठीयं न कृद्योगलक्षणा । अतो "न लोक-" इत्यादिना षष्ठीनिषेधो नास्ति ॥ तद्वचनं विस्मयं विदधीत । सर्वस्यापीति शेषः । अथवा वागधिपस्यापि विस्मयं विदधीतेति संबन्धः । केनापीति शेषः । यत्स्त्रीणामपि श्राव्यमनुरुन्धद्धि हितं चानुपश्यति । अतो विस्मयकरं श्राव्यं चैतद्वचनमिति श्लोकपर्यायः ॥

विस्मयकरत्वे हेतुमाह—

विषमोऽपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः ।
स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः ॥ ३ ॥

विषम इति ॥ विषमोऽपि दुर्गोऽपि । अन्यत्र दुःसंवेद्योऽपि । नयो नीतिशास्त्रम् । पयसामाशयो ह्रद इव । कृततीर्थः कृताभ्यासोपायः सन् ॥ "तीर्थं शास्त्राध्वरक्षोत्तारघट्टोपायवन्हिषु । योनौ ऋतावतारेषु मन्त्रोपाध्यायवर्त्मसु" इति विश्वः ॥

१ अवोचदेवम्.

Digitized by Google

अन्यत्र कृतजलावतारः सन् ॥ "तीर्थं यौनौ जलावतारे च" इति हलायुधः ॥ विगाह्यते विगुह्यते भविष्यते च। किंतु तत्र नये स तादृशः पुरुषो विशेषदुर्लभः यः कृत्यं संधिविग्रहादि कार्यं स्नानादिकं च तस्य वर्त्म तत्साधु देशकालाद्यविरुद्धम्। यथार्थमिसर्थः। अन्यत्र च गर्तप्राहपाषाणादिरहितम्। उपन्यस्यत्युदाहरति ॥ "उपन्यासस्तु वाक्सुखम्। उपोद्घात उदाहारः" इत्यमरः ॥ यथा केचित्कृततीर्थे पयसि गम्भीरेऽपि प्रवेष्टारः सन्ति। तीर्थकरस्तु विरलः। तद्वदीतावपि निगूढमपि तत्त्वं सति वक्तरि बोद्धारः सन्ति। वक्ता तु न सुलभः। इयं च साधु वक्तीति युज्यते विस्मय इति तात्पर्यार्थः ॥

अथ ग्राह्यत्वे हेतुमाह—

परिणामसुखे गरीयसि व्यथकेऽस्मिन्वचसि क्षतौजसाम्।
अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः ॥ ४ ॥

परिणामेति ॥ परिणामः फलकालः। परिपाकावस्था च। तत्र सुखे हिते ॥ "शस्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च" इत्यमरः ॥ सुखशब्दस्य विशेष्यलिङ्गत्वम् ॥ गरीयसि गुर्वर्थप्रतिपादकेऽर्थभूयिष्ठे श्रेष्ठे च। क्षतौजसामुभयत्रापि क्षीणशक्तीनां व्यथके पुद्धोपोद्बलकत्वाद्व्यथकरे। अन्यत्रादौ संतापादिदुःखजनके। अल्पीयस्यल्पाक्षरेऽल्पमात्रे च। उक्तं च—"स्वल्पा च मात्रा बहुकं गुणञ्च" इति। अस्मिन्वचसि द्रौपदीवाक्ये। अतिवीर्यवत्यत्यन्तसामर्थ्यवति भेषजे औषध इव ॥ "भेषजौषधभैषज्यम्" इत्यमरः ॥ बहुरधिको गुणो मानत्राणराज्यलाभादिरारोग्यबलपोषादिश्च दृश्यते। अतो ग्राह्यमस्या वचनमिति भावः ॥

सत्यमेवं तथापि मह्यं न रोचते। किं करोमीत्यत्राह—

इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती।
ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः ॥ ५ ॥

इयमिति ॥ रुचिरार्था हितार्थसंपत्तेति रुचिरेत्युक्तिः। इयं भारती द्रौपदीवाक्यमिष्टगुणायाभिमतगुणाय। गुणग्राहिण इत्यर्थः। भवते तुभ्यमपि ॥ "रुच्यर्थानां प्रीयमाणः" इति संप्रदानत्वाच्चतुर्थी ॥ रोचतां स्वदताम् ॥ विध्यर्थे लोट् ॥ हितवचने बलादपीच्छां कुर्यादौषधवदिति भावः। तथापि स्त्रैणे वचसि का भद्रा तत्राह—नन्विति ॥ गुणानां गृह्या गुणगृह्याः। गुणपक्षपातिन इत्यर्थः ॥ "यदा स्त्रैरिवाचरेषु च" इति ग्रहेः क्यप् ॥ विपश्चितो विद्वांसः ॥ "विद्वान्विपश्चिद्धोपज्ञः" इत्यमरः ॥ वचने विषये वक्तृविशेषे स्त्रीपुंसादिलक्षणे निःस्पृहा ननु निरास्थाः खलु। "बालादपि सुभाषितं ग्राह्यम्" इति न्यायादिति भावः ॥

Digitized by Google

संप्रति स्वपक्षोपालम्भते—

चतसृष्वपि ते विवेकिनी नृप विद्यासु निरूढिमागता ।
कथमेत्य मतिर्विपर्ययं करिणी पङ्कमिवावसीदति ॥ ६ ॥

चतसृष्विति ॥ हे नृप । चतसृष्वपि विद्यास्वान्वीक्षिक्यादिषु ॥ "आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती । विद्या ह्येताश्चतस्रस्तु लोकसंस्थितिहेतवः" इति कामन्दकः ॥ निरूढिमागता प्रसिद्धिं गता । अतएव विवेकिनी सदसद्विवेकवती । यथाह मनुः—"आन्वीक्षिक्यां तु विद्यायां धर्माधर्मौ त्रयीस्थितौ । अर्थानर्थौ च वार्तायां दण्डनीत्यां नयानयौ" इति ॥ ते मतिः कथं करिणी पङ्कमिव विपर्ययं वैपरीत्यमविवेकरूपमेत्यावसीदति नश्यति । तत्र युक्तमिति भावः ॥

किं मय्यिदानीं येनेत्थमुपालभ्यते तत्राह—

विधुरं किमतःपरं परैरवगीतां गमिते दशामिमाम् ।
अवसीदति यत्सुरैरपि त्वयि संभावितवृत्ति पौरुषम् ॥ ७ ॥

विधुरमिति ॥ त्वयि परैः शत्रुभिरिमामीदृशीमवगीतां गर्हितां ॥ "अवगीतं तु निर्वादे दुष्टुरुद्धे च गर्हिते" इति विश्वः ॥ दशां गमिते प्रापिते सति । सुरैरपि संभावितवृत्ति बहुकृतमसारम् । अथवा निश्चितसद्भावम् । पौरुषं पुरुषकारः ॥ युवादित्वादण्प्रत्ययः ॥ अवसीदति नश्यतीति यत् । अतःपरं अतोऽन्यदधिकं किं विधुरं किं कष्टम् । न किंचिदित्यर्थः ॥ "विधुरं प्रत्यपाये स्यात्कष्टविश्लेषयोरपि" इति वैजयन्ती ॥ अस्तीति शेषः ॥ "अस्तिर्भवतिपरः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्ति" इति भाष्यकारः । भवतीति छदः पूर्वाचार्याणां संज्ञा ॥ यत्पुरुषाधिकारस्य दुर्दशा सा च बहुकृता । तदुपरि महत्कष्टं तच्च त्वदुपेक्षयेत्युपालभ्यस इत्यर्थः ॥

अथापेक्षाकालत्वादिदमुपेक्षेत्याशङ्क्य नायमुपेक्षाकाल इति वक्तुं तदेव तावच्छ्लोकद्वयेन विवृणोति—

द्विषतामुदयः सुमेधसा गुरुरस्यन्ततरः सुमर्षणः ।
न महानपि भूतिमिच्छता फलसंपत्प्रवणः परिक्षयः ॥ ८ ॥

द्विषतामिति ॥ भूतिमुदयमिच्छता । शोभना मेधा यस्य तेन सुमेधसा सुधिया ॥ "विद्यस्यसिध्यशमेधयोः" इत्यसिध्यत्यर्थः ॥ गुरुर्महानप्यस्यन्ततरोऽत्यन्तदुरन्तः । क्षयोन्मुख इत्यर्थः । द्विषतामुदयः । सुखेन सुष्यत इति सुमर्षणः सुसहः । उपेक्ष्य इत्यर्थः । स्वतश्च दुर्मर्षण इति भावः ॥ "भाषायां सासि—" इत्यादिना खल्कर्मे युच् ॥ महानपि फलसंपत्प्रवणः फलसिद्धयुन्मुखः ॥ "अनिरन्तर" इत्यादिना अत्यन्त । परिक्षयो न सुमर्षणः । नोपेक्ष्य इत्यर्थः । अन्यथा उपेक्ष्य इति

Digitized by Google

भावः । नन्वुदय एव प्रतीकार्यो न च क्षय एवोपेक्ष्यः । किंतु स्वन्तत्वात्स्वन्तत्वाभ्यामुभावपि प्रतीकार्यावुपेक्ष्यौ च भवत इत्यर्थः ॥

अथोभयोरपि मध्य एकतरस्योदयक्षययोर्गतिमुक्त्वेदानीं युगपत्परिक्षयावसरे मतिमाह—

अचिरेण परस्य भूयसीं विपरीतां विगणय्य चात्मनः ।
क्षययुक्तिमुपेक्षते कृती कुरुते तत्प्रतिकारमन्यथा ॥ ९ ॥

अचिरेणेति ॥ कृतमनेनेति कृती । कुशल इत्यर्थः ॥ "इष्टादिभ्यश्च" इतीनिप्रत्ययः ॥ परस्य शत्रोः क्षययुक्तिं क्षययोगमचिरेणाशुभाविनीं भूयसीं दुरन्तां च तथात्मनः क्षययुक्तिं विपरीतां चिरभाविनीमल्पीयसीं स्वल्पां च विगणय्य विचार्य ॥ "ल्यपि लघुपूर्वात्" इत्ययादेशः ॥ उपेक्षते । अन्ययोक्तवैपरीत्ये परस्य क्षययुक्तावल्पीयस्याम् । स्वस्य च भूयस्यामित्यर्थः । तत्प्रतिकारं तस्याः क्षययुक्तेः प्रतिकारमचिरेणाशु कुरुते । एवं सति यदा शत्रोरभ्युदयः स्वस्य चातिपरिक्षयो यथाशार्कं तदा किं वक्तव्यमित्यर्थः । सद्यः प्रतिकारं कुरुत इत्यर्थोत्सिद्धमनुसंधेयम् ॥

तथाप्युपेक्षायामनिष्टमाचष्टे—

अनुपालयतामुदेष्यतीं प्रभुशक्तिं द्विषतामनीहया ।
अपयान्त्यचिरान्महीभुजां जननिर्वादभयादिव श्रियः ॥ १० ॥

अनुपालयतामिति ॥ उदेष्यतीं वर्धिष्यमाणाम् ॥ "आच्छीनद्योर्नुम्" इति विकल्पानुमभावः ॥ द्विषतां प्रभुशक्तिं कोशदण्डजं तेजः ॥ "स प्रभावः प्रतापश्च यस्तेजः कोशदण्डजम्" इत्यमरः ॥ अनीहयानुत्साहेनानुपालयतामुपेक्षमाणानां महीभुजां श्रियः संपदो जननिर्वादभयादिव निकृष्टपुरुषानुरागाल्लोकापवादभयादिवेति हेतूत्प्रेक्षा । अचिरादपयान्त्यपसरन्ति । ययाह कामन्दकः—"क्षीणैः पङ्क इव क्षीणैरलसः परिभूयते" इति । अतः पराक्रमितव्यमिति भावः ॥

नन्वेवं परिक्षीणः कथं प्रबलेनाभियुज्यत इत्याह—

क्षययुक्तमपि स्वभावजं दधतं धाम शिवं समृद्धये[1] ।
प्रणमन्त्यनपायमुत्थितं प्रतिपच्चन्द्रमिव प्रजा नृपम् ॥ ११ ॥

क्षयेति ॥ क्षययुक्तमपि तथा क्षीणमपि सन्तं स्वभावजं सहजं शिवं सर्वलोकादकं धाम क्षात्रं तेजः प्रकाशं च दधतं समृद्धये वृद्ध्यर्थमुत्थितमुपक्रमम् । उत्साहमानमिति यावत् । अन्यत्रोत्थितमुदितमत एवानपायमविनाशिनम् । वर्धिष्यमाणमित्यर्थः । नृपं प्रजाः । प्रतिपच्चन्द्रं द्वितीयाचन्द्रमिवेत्यर्थः । प्रतिपच्छब्देन द्वितीया-

१ विवृद्धये.

Digitized by Google

ग्रहणं प्रतिपदि तस्यादृश्यत्वादिति । प्रणमन्ति। महीभावेन वर्तन्त इति भावः । नम्रं तु नमस्कुर्वन्ति । क्षीणस्याप्युत्साहः । कार्यसिद्धेर्निदानमित्यर्थः ॥ "श्रियं हि सततोत्साही दुर्बलोऽपि समश्नुते" इति कामन्दकः ॥

ननु प्रभुशक्तिशून्यस्योत्साहः कुत्रोपयुज्यत इत्यत्राह—

प्रभवः खलु कोशदण्डयोः कृतपञ्चाङ्गविनिर्णयो नयः ।
स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते ॥ १२ ॥

प्रभव इति ॥ कर्मणामारम्भोपायः पुरुषद्रव्यसंपदेशकालविभागो विनिपातप्रतीकारः कार्यसिद्धिश्चेति पञ्चाङ्गानि । यदाह कामन्दकः— "सहायाः साधनोपाया विभागो देशकालयोः । विनिपातप्रतीकारः सिद्धिः पञ्चाङ्ग इष्यते" इति पञ्चानामङ्गानां विनिर्णयः ॥ "तदितरार्थ–" इत्यादिनोत्तरपदसमासः ॥ कृतः पञ्चाङ्गविनिर्णयो यस्य येन वा स तथोक्तः । नयो नीतिशास्त्रमिति यावत् । कोशोऽर्थराशिः ॥ "कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः" इत्यमरः ॥ दण्डश्चतुरङ्गसैन्यम् ॥ "दण्डोऽस्त्री शासने राज्ञां हिंसायां लगुडे यमे । यात्राज्ञायां सैन्यभेदे" इति वैजयन्ती ॥ तयोः कोशदण्डयोः । प्रभुशक्तेरित्यर्थः । प्रभवत्यस्मादिति प्रभवः कारणम् ॥ "ऋदोरप्" ॥ स नयो नीतिशास्त्रं विधेयपदेषु कार्यवस्तुषु ॥ "पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः ॥ दक्षतां क्षिप्रकारित्वम् । उत्साहमित्यर्थः । लोकः कृष्यादिमद्वृत्तो जनः । नियतिं दैवमिव ॥ "नियतिर्नियमे दैवे" इति विश्वः ॥ अनुरुध्यतेऽनुसरति ॥ रुधेर्दैवादिकात्कर्तरि क्विप् ॥ मन्त्रस्यापि मूलोत्साहस्तन्मूलायाः प्रभुशक्तेर्मूलमिति किमु वक्तव्यम् । अतः स एवाश्रयणीयः । यतो नक्तंदिवं मन्त्रयतस्तस्यापि प्रभोर्निरुत्साहस्य न किंचित्सिद्ध्यतीति ॥

ननु सोत्साहस्यासहायस्य कथमर्थसिद्धिरित्यत्राह—

अभिमानवतो मनस्विनः प्रियमिच्छैरुपदमारुरुक्षतः ।
विनिपातनिवर्तनक्षमं तममालम्बनमात्मपौरुषम् ॥ १३ ॥

अभिमानवत इति ॥ अभिमानवतो मानधनस्य प्रियमिच्छुभिरुन्नतं पदं स्थानं राज्यादिकमारुरुक्षतः आरोढुमिच्छतः प्राप्तुकामस्य मनस्विनो धीरस्यात्मपौरुषं स्वभुजपराक्रम एव विनिपातनिवर्तनक्षममनर्थप्रतीकारसमर्थमालम्बनं सहकारि तमभिप्रेयम् । यथा कस्यचिदुरुमारोहतः किंचित्पतनप्रतिबन्धकानुचरहस्तादिकमालम्बनं तद्वदिति ध्वनिः । किं पौरुषादन्यैः सहायैः शूराणामिति भावः ॥

पौरुषानङ्गीकारे दोषमाह—

विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः ।
नियता लघुता निराकृतेरगरीयान्न पदं नृपश्रियः ॥ १४ ॥

Digitized by Google

विपद इति ॥ अविक्रमं पौरुषहीनं विपदोऽभिभवन्ति तिरस्कुर्वन्ति । आपदुपेतं विपन्नमापत्तिरुत्तरकालः ॥ "उत्तरः काल आपत्तिः" इत्यमरः ॥ रहयति त्यजति । निरायतेः । आसन्नश्चयस्त्वेत्यर्थः । लघुवागीरथं नियतावश्यंभाविनी । न कश्चिदेनमाश्रियत इत्यर्थः । अगरीयांडपीयानृपश्रियः पदं राजलक्ष्म्या आस्पदं न भवति । पद्या नृपेति पदच्छेदः । तस्मात्पौरुषं कर्तव्यमेवेत्यर्थः ॥ अत्र पूर्वपूर्वस्याधिकमत्वादुत्तरोत्तरं विपदादिकं प्रति कारणत्वात्कारणमालारूपोऽलंकारः । यथा सूत्रम्—"पूर्वपूर्वस्योत्तरोत्तरहेतुत्वे कारणमाला" इति ॥

फलितमाह—

तदलं प्रतिपक्षमुन्नतेरवलम्ब्य व्यवसायवन्ध्यताम् ।
निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः ॥ १५ ॥

तदिति ॥ तत्तस्मात् । उपेक्षायां दोषसंभवादित्यर्थः । उन्नतेरभ्युदयस्य प्रतिपक्षमन्तरायं व्यवसायवन्ध्यतामुद्योगशून्यतामवलम्ब्यालम् । उद्योगशून्यतावलम्बेननालमित्यर्थः ॥ "अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा" इति क्त्वाप्रत्ययः । तस्य ल्यबादेशः ॥ तथाहि । पराक्रम आश्रयः कारणं यासां तास्तथोक्ताः समृद्धयः संपदो विषादेन समनुत्साहेन सह न निवसन्ति । पौरुषसाध्याः संपदो नानुत्साहसाध्याः । उभयोः सहावस्थानविरोधादित्यर्थः ॥ वैधर्म्येण कार्यकारणरूपोऽर्थान्तरन्यासः ॥

नन्वु समयः प्रतीक्ष्यते । किं वेगेनेत्यत्राह—

अथ चेदवधिः प्रतीक्ष्यते कथमाविष्कृतजिह्मवृत्तिना ।
धृतराष्ट्रसुतेन मृत्यजाश्चिरमास्वाद्य नरेन्द्रसंपदः ॥ १६ ॥

अथेति ॥ अथावधिः कालः प्रतीक्ष्यते चेत् ॥ "अवधिस्त्वधाने स्यात्सीम्नि काले विलेऽपि च" इति विश्वः ॥ आविष्कृतजिह्मवृत्तिना प्रकटितकपटव्यवहारेण धृतराष्ट्रसुतेन दुर्योधनेन नरेन्द्रसंपदो राज्यसंपदः । नरेन्द्रेति वा पदच्छेदः । चिरं चतुर्दशवर्षाण्यास्वायानुभूय कथं मृत्यजाः । ज्ञातास्वादेन तेन पश्चादपि मृत्युना युद्धक्लेशं विना न त्यक्ष्यत एवेत्यवधिमतीक्षणं व्यर्थमित्यर्थः ॥

अथ यदि दैवात्तयमेव दुर्योधनः संपदो दास्यति तथापि तत्कथं रोचयेमहीत्याह—

द्विषता विहितं त्वयाथवा यदि लब्धा पुनरात्मनः पदम् ।
जननाथ तवानुजन्मनां कृतमाविष्कृतपौरुषैर्भुजैः ॥ १७ ॥

द्विषतेति ॥ अथवा द्विषता दुर्योधनेन विहितम् । समर्पितमित्यर्थः । आत्मनः पदं

१ मूर्विना.

Digitized by Google

राज्यं पुनरपि स्वया लब्धा लप्स्यते यदि॥ क्षमेः कर्मणि क्षुद् ॥ हे जननाथ। त्वाद्भुजम्यनामनुजानामाधिष्कृतपौरुषैः प्रकटितपराक्रमैर्मुजैः कृतमलम् । व्यर्थमिति यावत् । अस्मद्भुजैर्न किंचित्साध्यमित्यर्थः । राज्यदानादानयोर्द्वित्वमेव स्वातन्त्र्येऽप्यङ्गभुजनैष्फल्यात् "क्षत्रियस्य विजितव्यम्" इति शास्त्रात्त्वत्रैव राज्यं ग्राह्यमिति भावः ॥ कृतमिति प्रतिषेधार्थमव्ययं चादिषु पठ्यते। "कृतमिति निवारणनिषेधयोः" इति मनव्याख्याने । भुजैरिति मन्यमानसाधनक्रियापेक्षया करणतापृतीया । उक्तं च न्यासोद्योतेन— "केवलं श्रूयमाणैव क्रियानिमित्तं कारकभावस्यापि तु मन्यमानस्यापि" इति ॥

नन्वेवं सान्त्वेन कार्यसिद्धौ किं क्षात्रेण । यथाह मनुः— "सान्त्वा दानेन भेदेन समस्तैरथवा पृथक् । विजेतुं प्रयतेतारीन्न युद्धेन कदाचन" इति । तस्किमात्रहेणेत्याशङ्क्याह—

मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्तयते स्वयंहतैः ।
लघयन्खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः ॥ १८ ॥

मदेति ॥ मृगाधिपः सिंहो मदसिक्तमुखैः। मदवद्भिरित्यर्थः । स्वयं स्वेनैव हतैः करिभिर्वर्तयते वृत्तिं करोति। तैरेव जीवतीत्यर्थः ॥ वृत्तेरादिकाद्भुचेर्लट् । भौवादिकस्य तु "अनात्मकर्मकाच्चित्तवत्कर्तृकात्" परस्मैपदनियमादिति ॥ तथाहि। तेजसा प्रभावेण ॥ "तेजो बले प्रभावे च ज्योतिष्यग्नौ रेतसि" इति वैजयन्ती ॥ जगज्जयपराभूतुर्वन्महांस्तेजस्वन्यतोऽन्यस्मात्पुरुषाद्भूतिं वृद्धिं नेच्छति खलु । यदि तेजस्विनः परापचद्वृत्तित्वं युक्तम् । मनुवचनं तु "अशूरवीरविषयम्" इति भावः ॥ विशेषेण वक्ष्यमाणसामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥

नन्वेवं युद्धात्पार्थिवो लक्ष्मीलाभः । उपायान्तरैस्तु न तथेत्याशङ्क्याह—

अभिमानधनस्य गत्वरैरसुभिः स्थास्नु यशश्चिचीषतः ।
अधिरांशुविलासचञ्चला ननु लक्ष्मीः फलमानुषङ्गिकम् ॥ १९ ॥

अभिमानेति ॥ अभिमानधनस्य वैरिनिर्यातनमात्रनिष्ठस्य । अतएव गत्वरैर्गमनशीलैरस्थिरैः ॥ "गत्वरश्च" इति क्वसन्तो निपातः ॥ असुभिः प्राणैः । करणैः ॥ "पुंसि भूम्न्यसवः प्राणाः" इत्यमरः ॥ स्थास्नु स्थिरम् ॥ "ग्लाजिस्थश्च स्नुः" इति स्नुप्रत्ययः ॥ यशश्चिचीषतश्चेतुं संग्रहीतुमिच्छतः ॥ चिनोतेः सन्नन्ताच्छतृप्रत्ययः ॥ अधिरांशुर्विद्युच्चला सा चासौ विलासः स्फुरणं तद्वच्चला । क्षणिकेत्यर्थः । लक्ष्मीः संपद्भुजोपार्जितमानुषङ्गिकमभ्यावहधिक्षमत्वं फलम्। मानिनाभाव एव मुख्यं फलमभ्युदयस्तु लक्ष्मीरिव मानिनामिदमेवं श्लाघ्यमित्यर्थः ॥ अस्तास्थिरमान-

१ नुद्.

Digitized by Google

त्यागेन स्थिरपक्षःस्वीकाराभिधानाभ्यूनाधिकविनिमयाख्यः परिवृत्त्यलंकारः । उक्तं च काव्यप्रकाशे— "परिवृत्तिर्विनिमयो योऽर्थानां स्यात्समासमैः" इति ॥

नन्वल्पस्य मानस्य हेतोः कथं प्राणत्यागः शक्यते कर्तुं यतो "जीवन्नरो भद्राणि पश्येत्" इत्याशङ्क्याह—

ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः ।
अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः ॥ २० ॥

ज्वलितमिति ॥ जनो भस्मनां चयं पुञ्जमास्कन्दति पादादिनाक्रमति । अदाहकत्वादिति भावः । ज्वलितं ज्वलन्तम् ॥ कर्तरि क्तः । "मतिबुद्धि—" इत्यादिसूत्रे चकारादृतमानार्थस्वम् ॥ हिरण्यं रेतो यस्य तं हिरण्यरेतसमग्निं नास्कन्दति । दाहकत्वादिति भावः । अतो हेतोर्मानिनोऽभिभूतिभयात्मानलोभेन तेजस्तामे परिभवो भविष्यतीति भयादसूनेव सुखमलिष्टमुज्झन्ति त्यजन्ति । धाम तेजस्तु नोज्झन्ति । मानहानिकराज्जीवनात्स्वतेजसा मरणमेव वरमित्यर्थः ॥ पूर्ववत्श्लोकवदर्थान्तरन्यासः ॥

अथवा किमत्र प्रयोजनं चिन्तया । किंतु तेजस्विनामेवायं स्वभावो यच्छिगीषुस्वमित्याशयेनाह—

किमपेक्ष्य फलं पयोधरान्ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥ २१ ॥

किमिति ॥ मृगाधिपः सिंहः किं फलं प्रयोजनमपेक्ष्य ध्वनतो गर्जतः । धरन्तीति धराः ॥ पचाद्यच् ॥ पयसां धरास्तान्पयोधरान्मेघान्प्रार्थयतेऽभियाति ॥ "याच्ञायामभियाने च प्रार्थना कथ्यते बुधैः" इति केशवः ॥ अथवा प्रार्थयतेऽवरुणद्धीत्यर्थः ॥ "अभियाच्ञावरोधयोः" इत्यभिधानात् । तथाहि । महीयसो महत्तरस्य सा प्रकृतिः खलु स्वभावो यया प्रकृत्यान्यसमुन्नतिं परद्धर्द्धिं न सहते । महतः परमजनमेव पुरुषार्थं इत्यर्थः ॥ पूर्ववदलंकारः ॥

उक्तं प्रयोजनं निगमयति—

कुरु तन्मतिमेव विक्रमे नृप निर्धूय तमः प्रमादजम् ।
ध्रुवमेतदवेहि विद्विषां त्वदनुत्साहहता विपत्तयः ॥ २२ ॥

कुरु तदिति ॥ हे नृप । तत्तस्माद्धेतोः कुरीत्या पराक्रमावसरत्वाद्धेतोः ॥ "यत्तत्यतस्तवो हेतौ" इत्यमरः ॥ प्रमादजं तमो मोहं निर्धूय निरस्य विक्रमे पौरुष एव मतिं कुरु । विक्रममेवाङ्गीकुरु न तूपायान्तरमित्यर्थः ॥ न च विक्रमवैफल्यमित्याह—

१ अवेक्ष्य. २ एवम्.

Digitized by Google

भुवमिति ॥ विद्विषां विषयस्त्वदनुत्साहादवास्तवानुत्साहेनाव्यवसायेन इत्याः प्रक्रियाः । अन्यथा मानेव विषयेरन्निति भावः । इत्येतदुर्वं निश्चितमवेहि विद्धि ॥ "धुर्वं निश्चये निश्चिते" च इति शाश्वतः ॥

न च कः पराजयग्रहो कार्यैत्याह—

दिरदानिव दिग्विभावितांश्चतुरस्तोयनिधीनिवायतः ।
प्रसहेत रणे तवानुजान्द्विषतां कः शतमन्युतेजसः ॥ २३ ॥

दिरदानिति ॥ दिग्विभावितान्दिग्प्रसिद्धांस्तानायत आगच्छतः ॥ आङ्पूर्वादिण्वावोः शतृप्रत्ययः ॥ चतुरो दिरदान्दिग्गजानिव तथोक्तविशेषणांश्चतुरस्तोयनिधीनिव रणे दिग्विभावितान्छतमन्युतेजस इन्द्रविक्रमांश्चतुरस्तवानुजान्द्विषतां मध्ये कः प्रसहेत । सोढुं शक्नुयादित्यर्थः ॥ "शकि लिङ् च" इति शक्यर्थे लिङ् ॥ अतो निःशङ्कं भवतस्त्वेति भावः ॥

आशीर्वादव्याजेन फलितमाह—

ज्वलतस्तव जातवेदसः सततं वैरिकृतस्य चेतसि ।
विदधातु शमं शिवेतरा रिपुनारीनयनाम्बुसंततिः ॥ २४ ॥

ज्वलत इति ॥ तव चेतसि सततं ज्वलतो वैरिकृतस्य जातवेदसः क्रोधाग्नेः शिवेतराग्निशमङ्करा । वैधव्यदुःखजनकत्वादिति भावः । रिपुनारीनयनाम्बुसंततिर्वैरिवनिताश्रुप्रवाहः शमं विदधातु । वैरिकृतस्य क्रोधस्य वैरिवधमन्तरेण शान्त्यसंभवादवश्यं तद्वधस्त्वया कर्तव्य इत्यर्थः ॥ क्रोधस्य विषयनिगरणेन विषयिणो जातवेदस एवोपनिबन्धनादतिशयोक्तिरलंकारः । उदुक्तम्— "विषयस्यानुपादानाद्विषय्युपनिबध्यते । यत्र सातिशयोक्तिः स्यात्कवेः प्रौढोक्तिजीविता" इति । तथापि क्रोधस्य जातवेदसो भेदेऽभ्यभेदाध्यवसायाद्भेदेऽभेदरूपा सैव एवाम्बुनिर्वाप्यत्वोक्तिश्च घटते । तथा च यथाम्बुसेकेनाग्निः सम्यक्शाम्यति तथा शत्रुवधेन क्रोध इत्यौपम्यं मन्यते ॥

इति दर्शितविक्रियं सुतं मरुतः कोपपरीतमानसम् ।
उपसान्त्वयितुं महीपतिर्दिरदं दुष्टमिवोपचक्रमे ॥ २५ ॥

इतीति ॥ इत्युक्तरीत्या दर्शिता विक्रिया विकारो वागारम्भात्मको येन तं कोपपरीतमानसं कोपाक्रान्तचित्तम् । इदं विशेषणद्वयं दिरदेऽपि योज्यम् । मरुतः सुतं वीरं महीपतिर्युधिष्ठिरो दुष्टं दिरदमिव । एतेनास्य शौर्यमेव न बुद्धिरस्तीति मन्यते । उपसान्त्वयितुमनुनेतुमुपचक्रमे प्रारब्धः ॥ "प्रोपाभ्यां समर्थाभ्याम्"

Digitized by Google

इत्यात्मनेपदम् ॥ राज्ञा भाव्युपकारविशेषापेक्षया कथंचिदवश्यो जनः क्रमैः क्रमैर्हृदयग्राहिकरणीयो न तु स्याज्य इति भावः ॥

अथमं तावत्स्तुत्यादिभिः प्रसादयति—

अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे।
विमला तव विस्तरे गिरां मतिरादर्श इवाभिदृश्यते ॥ २६ ॥

अपवर्जितेति ॥ विप्लवः प्रमाणबाधः। अन्यत्र वाङ्मलसंक्रमः। सोऽपवर्जितो यस्य तस्मिन्नपवर्जितविप्लवे। शुचौ शुचिः शब्दसौष्ठवं लौहशुद्धिश्च तद्वति। अतएव हृदयग्राहिणि मनोरमे मङ्गलास्पदे। एकत्र हितार्थमतिपादकत्वादन्यत्र मङ्गलवस्तुत्वाच्च श्रेयस्करे। "रोचनं चन्दनं हेम मृदङ्गं दर्पणं मणिम्। गुरूनग्निं तथा सूर्यं प्रातः पश्येत्सदा पुमान्" इति पुराणवचनात्। तव गिरां विस्तरे वाक्यसमूहे ॥ "प्रथने वावशब्दे" इति यङ्लुपि पेषात् "क्रदोरप्" इत्यप्। अतएव "विस्तारो विग्रहो व्यासः स तु शब्दस्य विस्तरः" इत्यमरः ॥ मतिस्त्वद्बुद्धिरादर्शे दर्पण इव ॥ "दर्पणे मुकुरादर्शौ" इत्यमरः ॥ विमला विप्लवाभिदृश्यते। वाग्वैशद्यादेव मतिवैशद्यमनुमीयते। तत्पूर्वकत्वाच्चक्षेत्यर्थः ॥

अथ गुणमेनाह—

स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित् ॥ २७ ॥

स्फुटतेति। उपपत्तिरिति च ॥ पदैः सुप्तिङन्तशब्दैः स्फुटता विशदार्थता नापाकृता न त्यक्ता। अर्थगौरवमर्थभूयस्त्वं वा न च न स्वीकृतम्। स्वीकृतमेवेत्यर्थः ॥ "वैशद्यप्रसक्तार्थगौरवाभावनिवर्तनार्थं नञ्द्वयं संभाव्यनिषेधनिवर्तने ह्यौ प्रकृतिपेधौ" इति वामनः ॥ गिरां पदानामवान्तरवाक्यानां च पृथगर्थता भिन्नार्थता। अपुनरुक्तार्थतेति यावत्। रचिता कृता। तथा क्वचिदपि सामर्थ्यं गिरामन्योन्यसामर्थ्यं साकाङ्क्षत्वाभावोपहितं न वर्जितम्। अन्यथा दण्डादिभिरिव शब्दवदेकवाक्यता न स्यात्। यथाहुः—"अर्थैकत्वादेकवाक्यं साकाङ्क्षं चेद्विभागे स्यात्" इति ॥ नञ्द्वयगौरवमत्रापि कथं षष्ठीसमासः। "पूरणगुण—" इत्यादिना प्रकृतिपेधाभेद दोषः। ये शुक्लादयः शब्दा गुणे गुणिनि च वर्तन्ते। यथा पटस्य शुक्लः शुक्लः पट इति च। तेषामेवात्र निषेधार्थे च सदा गुणमात्रवचनाः। यथा गौरवं माधान्यं रसो गन्धः स्पर्श इत्येवमादयः। तेषामनिषेधात्। तथा "तत्स्थेन गुणैः षष्ठी समस्यते" इति वचनाद्गुणमभियुक्तमयोगदर्शनाच्च वक्ष्यमाणा शौक्ल्यमित्यादौ तु भाष्यकारवचनादसमासः। अतएवाह वामनः— "अत्र पीतिमादिषु गुणवचनसमासो बली स्यात्" इति ॥

Digitized by Google

उपपत्तिरुदाहृता बलादनुमानेन न चागमः क्षतः ।
इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः ॥ २८ ॥

उपपत्तिरिति ॥ किंच बलात्स्वबलमाश्रित्य ॥ कर्मणि त्यब्लोपे पञ्चमी वक्तव्या ॥ उपपत्तिर्युक्तिरुदाहृता । पराक्रमपक्ष एव श्रेयानिति युक्तिरुक्तेत्यर्थः । उचितं चैतन्म-हावीरस्येति भावः । तथानुमानेन युक्त्यागमः शास्त्रं न क्षतो न हतः । किंत्वागम-विरुद्धमेवोक्तम् । अन्यथा तद्विरोधादनुमानस्यैव सामान्यभङ्गप्रसङ्गादिति भावः । ईदृगित्थं क्षात्रयुक्तमिदं वचनमविषयमान ईदृगाशय इत्थं क्षात्रयुक्त्याभिप्रायो यस्य सोऽयमीदृगाशयः ॥ " अभिप्रायश्छन्द आशयः " इत्यमरः ॥ कः प्रसभं इदमीदृगुक्त-मुपक्रमेत । न कोऽपीत्यर्थः । इत्थं वक्तुमुपक्रमितैव नास्ति । वक्ता तु दूरापास्त एवेति भावः ॥ केचिदेतच्छ्लोकमयं निन्दापरत्वेनापि योजयन्ति । तदसत् । हितोपदेशमा-त्रतत्परस्वातिवत्सलस्य राज्ञो मत्सरिण इव महावीरे भ्रातरि विधेये सर्वानर्थमूल-भूतनिन्दातात्पर्यकल्पनानौचित्यादिति ॥

यदि साधूक्तं तर्हि तथैव क्रियतामित्याशङ्क्याह—

अविदूषतया तथापि मे हृदयं निर्णयमेव धावति ।
अवसाययितुं क्षमाः सुखं न विधेयेषु विशेषसंपदः ॥ २९ ॥

अविदूषतयेति ॥ तथापि त्वया सम्यङ्निर्णीतेऽपि मे हृदयमविदूषतयासंदूषत-या । अथापि संशयगतत्वेनेत्यर्थः । निर्णयमेव धावत्यनुसरति । अपेक्षत इति धा-वत् । अथापि निर्णयस्यानुदयादिति भावः ॥ निर्णयानुदये हेतुमाह— अत्रेति ॥ विधेयेषु संधिविग्रहादिकर्तव्यार्थेषु या विशेषसंपदोऽवान्तरभेदानां समृद्धयो बाहु-ल्यानि ताः सुखमक्लेशेनावसाययितुं । पुरुषान्मत्स्यानुकूल्येन स्वस्वरूपं स्वयमेव शीघ्रं मत्स्यार्थायितुमित्यर्थः ॥ ण्यन्तेर्ण्यन्तादपि कर्मकर्तृकाच्छानच् । णेरनादिसूत्रस्थायं विष-यः ॥ क्षमन्त इति क्षमाः ॥ पचाद्यच् ॥ शक्ता न भवन्ति ॥ " क्षमं शक्ते हिते त्रिषु " इत्यमरः ॥ विधेयमात्रस्य सुगमत्वेऽपि तद्विशेषाणां सौक्ष्म्याद्बाहुल्याच्च दुर्बोधत्वादपि निर्णयाक्षमेति तात्पर्यार्थः ॥ अत्र निर्णयधावनं मत्स्युत्तरवाक्यार्थ-स्य हेतुत्वात्तिद्वाक्यार्थहेतुकं काव्यलिङ्गमलंकारः । तदुक्तम्— " हेतोर्वाक्यप-दार्थत्वे काव्यलिङ्गमुदाहृतम् " इति ॥

वस्तुविशेषावधारणमन्तरेणैव महाचरित्यात्राह्यह्याह—

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः ॥ ३० ॥

१. वृणुते.

Digitized by Google

सहसेति ॥ क्रियत इति क्रिया कार्यं तां सहसा । अविमृष्येत्यर्थः ॥ "सहसेत्याकस्मिकाविमर्षयोः" इति गणव्याख्याने स्वरादिपाठादव्ययम् ॥ न विदधीत न कुर्वीत । कुतः । अविवेकोऽविमृष्यकारित्वं परमत्यन्तमापदां पदं स्थानम् । विपत्तिकारणमित्यर्थः ॥ व्यतिरेकेणोक्तमर्थमन्वयेनाह— वृणत इति ॥ गुणलुब्धा गुणग्राहाः । गुणमुभव इति स्वयंवरणहेतूक्तिः । संपदः श्रियः । विमृष्य करोतीति विमृष्यकारी ॥ "उपपदमतिङ्" इति समासः ॥ तं स्वयमेव वृणते भजन्ते हि ॥ "वृङ् संभक्तौ" इति धातुः ॥ तस्माद्विमृष्यैव भवतीतव्यमित्यर्थः ॥ अत्र सहसा विधाननिषेधलब्धविमृष्यकारित्वरूपकारणस्यापमृष्यतिरेककार्येण समर्थनाद्विषम्येणार्थान्तरन्यासः । द्वितीयार्धेन च स एव साधर्म्येणेति ज्ञेयम् ।

ननु साहसिकस्यापि फलसिद्धिर्दृश्यत एव । तत्रैक विवेकेनेत्यत्राह—

अभिवर्षति योऽनुपालयन्विधिबीजानि विवेकवारिणा ।
स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति ॥ २१ ॥

अभीति ॥ यः पुमान् । विधीयन्त इति विधयः कृत्यवस्तूनि बीजानीवेत्युपमितसमासः । शरदं लोक इवेति वाक्यगतोपमानुसारात् । तानि विधिबीजानि । विवेको वारीव विवेकवारि तेन विवेकवारिणा ॥ पूर्ववत्समासः ॥ अनुपालयन्प्रतीक्षमाणः संरक्षन्नभिवर्षति सिञ्चति । स पुमान् । फलं साधननिष्पाद्योऽर्थः सस्यं च ॥ "सस्ये हेतुकृते फलम्" इत्युभयत्राप्यमरः ॥ तच्छालिनीं क्रियां कर्म लोको जनः ॥ "लोकस्तु भुवने जने" इत्यमरः ॥ शरदमिव सदा नित्यमधितिष्ठति । सदा क्रियाफलं प्राप्नोत्येव । न कदाचिदप्यभिचरतीत्यर्थः । साहसिकस्य काकतालीयन्यायेन फलसिद्धिर्विवेकिनस्तु नियतेति भावः ॥ अत्र फलशब्देन सस्यहेतुकृतयोरर्थयोरभेदाध्यवसायाच्छेषमूलातिशयोक्तिस्तदनुगृहीता चोपमेत्यनुसंधेयम् ॥

नियता विवेकिनः फलसिद्धिरित्युक्तम् । संप्रति तामेव रुच्यर्थं स्तौति—

शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलंक्रिया ।
प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः ॥ २२ ॥

शुचीति ॥ शुचि संप्रदायशुद्धं श्रुतं शास्त्रभवणम् ॥ कर्तृ ॥ वपुर्भूषयति । अन्यथाविद्वान्पुरुषः शोच्य इति भावः । तस्य श्रुतस्य प्रशमः क्रोधोपशान्तिरलंक्रिया भूषणं भवति । अन्यथा श्रुतवैफल्यादिति भावः । पराक्रमः सत्यवसरे धीर्यं प्रशमस्याभरणं भवति । अन्यथा सर्वैः परिभूयत इति भावः । स पराक्रमः । नयापादिता नीतिसंपादिता । विवेकपूर्विकेति यावत् । सा चासौ सिद्धिश्च सैव भूषणं यस्य स तथोक्तः । अन्यथा साहसिकस्य सिद्धेः काकतालीयत्वेन पक्षे पराक्रमवैयर्थ्यादिति भावः ॥ वपुषो भूष्यतैवात्र सिद्धेर्भूषणतैव तु । उभयं मध्यमानां

Digitized by Google

तु तत्पूर्वोत्तरपक्षयोरिति विवेकः । एवं विशिष्टसिद्धेरनन्वयभूषितायाः एव भूषणत्वोक्त्या सर्वालंकरणतया स्तुतिर्गम्यते ॥ अत्रोत्तरोत्तरस्य पूर्वपूर्वविशेषणत्वादेकावल्यलंकारः । तदुक्तम्—"यत्र विशेषणभावं पूर्वं पूर्वं प्रति क्रमेणैव । भजति परं परमेवालंकृतिरेकावली कथिता" इति ॥

विदुष्य कुर्वीतेति स्थितम् । तत्र विमर्षोपायः क इत्युक्ते शास्त्रमेवेत्याह—

मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम् ।
सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम् ॥ ३३ ॥

मतीति ॥ मतिभेदः कार्यविप्रतिपत्तिः । मतिभेदस्तम इवेत्युपमितसमासः । दीप इवेत्युपमानुसारात् । तेन तिरोहित आच्छन्नेऽतएव गहने दुरवगाहे कृत्यविधौ कार्यानुष्ठाने विवेकिनां सुकृतः स्वभ्यस्तोऽतएव परिशुद्धो निश्चितोऽन्यत्र सुविहितः भवादिदोषरहित आगमः शास्त्रम् ॥ "आगमः शास्त्र आप्तोक्ते" इति विश्वः ॥ दीप इवार्थदर्शनं कार्यज्ञानं वस्तुप्रतिभासनं च कुरुते ॥

एवं विदुष्य कुर्वतो दैवादर्थनाशेऽपि न कश्चिदपराध इत्याह—

स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः ।
विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः ॥ ३४ ॥

स्पृहणीयेति ॥ स्पृहणीयगुणैर्लोकश्लाघ्यगुणैर्महात्मभिः सज्जनैश्चरितेऽनुष्ठिते वर्त्मन्याचारे मनो यच्छतां निदधताम् । सन्मार्गेण व्यवहरतामित्यर्थः । विधिहेतुर्दैवनिमित्तकः ॥ "विधिर्विधाने दैवे च" इत्यमरः ॥ अतएवागसामपराधानामहेतुर्विनिपातोऽपि दैविकानर्थोऽपि ॥ "विनिपातोऽपाते स्यादैवादिव्यसनेऽपि च" इति विश्वः ॥ समुन्नतेरतिहृद्यैः समस्तुल्यः । दैविके पुरुषस्यानुपालम्भ्यत्वादिति भावः । यथाह कामन्दकः—"यत्तु सम्यगुपक्रान्तं कार्यमेति विपर्ययम् । दुर्वारमानुपालम्भ्यो दैवान्तरितपौरुषः" इति ॥

संप्रति यद्दिदृक्षुं तदाह—

शिवमौपयिकं गरीयसीं फलनिष्पत्तिमदूषितायतीम् ।
विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः ॥ ३५ ॥

शिवमिति ॥ जिगीषवो जयेच्छवो नृपा विजितक्रोधरया जितक्रोधवेगाः सन्तो गरीयसीं बहूनामदूषितायतीमनवद्योत्तरकालाम् । स्वन्तामित्यर्थः । फलनिष्पत्तिं फलसिद्धिं विगणय्य । फलवत्त्वं निश्चित्येत्यर्थः । पौरुषं पुरुषकारं शिवमनुकूलमौपयिकहेतुपायम् ॥ विनयादित्वात्स्वार्थे ठक् । उपायाद्भवत्वर्थे च ॥ नयन्ति प्रापयन्ति । पौरुषहेतुपायेन योजयन्तीत्यर्थः । नानिश्चितफलं कर्म कुर्वीतेति भावः । यथाह का-

Digitized by Google

मन्दक्रः— "निष्फलं क्लेशबहुलं संदिग्धफलमेव च। न कर्म कुर्यान्मतिमान्सदा वैरानुबन्धि च" इति॥ नयतिः भावनार्थे द्विकर्मकः। अत्र पौरुषस्य कर्तृस्थकर्मत्वेऽप्युपायस्यातथात्वात्क्रोधं विनयत इत्यादिवत्॥ "कर्तृस्थे चाशरीरे कर्मणि" इत्यात्मनेपदं न भवति॥

यदुक्तं विजितक्रोधरया इति तदावश्यकमाह—

अपनेयमुदेतुमिच्छता तिमिरं रोषमयं धिया पुरः।
अविभिद्य निशाकृतं तमः प्रभया नांशुमतापुदीयते॥ २६॥

अपनेयमिति॥ उदेतुमभ्युदेतुमिच्छता पुरुषेण पुरः प्रथमं रोषमयं रोषादागतम्॥ "मयट् च" इति मयट्॥ तिमिरमज्ञानं धिया विवेकबुद्ध्या॥ करणेन॥ अपनेयमपनोद्यम्। तथाहि। अंशुमतापि॥ कर्त्रा॥ प्रभया तेजसा॥ करणेन॥ निशाकृतं तमो ध्वान्तमविभिद्य नोदीयते। किंतु विभिद्यैवेत्यर्थः। सूर्यस्याप्येवं किमुतान्येषामित्यपिशब्दार्थः॥ इणो भावे क्त॥

ननु दुर्बलस्यैवमस्तु। बलीयसस्तु क्रोधादेव कार्यसिद्धिरित्यत आह—

बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः।
क्षयपक्ष इवेन्दवीः कलाः सकला हन्ति स शक्तिसंपदः॥ २७॥

बलवानिति॥ बलवान्शूरोऽपि यः। कोपाज्जन्म यस्य तस्य कोपजन्मनः॥ "अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्मानुत्तरपदः" इति वामनः॥ तमसो मोहस्य॥ कृयोगात्कर्तरि षष्ठी॥ अभिभवमाक्रान्तिं न रुणद्धि न निवारयति। स नृपः। क्षयस्य पक्षः क्षयपक्षः कृष्णपक्ष ऐन्दवीरिन्दुसंबन्धिनीः कला इव॥ "कला तु षोडशो भागः" इत्यमरः॥ सकलाः समग्राः शक्तिसंपदः प्रभुमन्त्रोत्साहशक्तीस्तिस्रोऽपि हन्ति नाशयति। अन्धस्य जङ्घाबलमिव क्रोधान्धस्य लोकोत्तरमपि सामर्थ्यं व्यर्थमेवेत्यर्थः। अत्र कालस्य सर्वकारणत्वात्क्षयपक्षस्य कलाक्षयकारित्वमस्त्येव। तमस्तु तत्कालविजृम्भणावस्था व्यपदेश्याः॥

विमृश्य कुर्वतः क्रियाप्रकारमाह—

समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम्।
अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः॥ २८॥

समेति॥ यः। समा नातिमृदुर्नत्वतितिग्मा दृष्टिर्यस्य स समदृष्टिः सन्समये तत्तदवसरे मार्दवं मृदुदृष्टित्वमुपैति तिग्मतां तीक्ष्णदृष्टित्वं च तनोति। स मेदिनीपतिर्विवस्वानिव। ओजसा तेजसा लोकमधितिष्ठत्याक्रामति। सूर्योऽपि ऋतुभेदेन समदृष्टिरित्यादि योज्यम्॥

Digitized by Google

उक्तान्यथाकरणेऽनिष्टमाह—

क्व चिराय परिग्रहः श्रियां क्व च दुष्टेन्द्रियवाजिवश्यता ।
शरदभ्रचलाभ्रलेन्द्रियैरसुरक्षा हि बहुच्छलाः श्रियः ॥ ३९ ॥

क्वेति ॥ श्रियां संपदां चिराय बहुकालं परिग्रहः स्वायत्तीकरणं क्व । इन्द्रियाणि वाजिन इवेत्युपमितसमासः । दुष्टानाममार्गधाविनामिन्द्रियवाजिनां वश्यो वशंगतस्य भावस्तत्ता क्व । नोभयमेकत्र तिष्ठतीत्यर्थः । हेतुः । हि यस्माच्छरदभ्रवच्चलाभ्रवच्चलाः । किंच बहुच्छला बहुव्याजाः । बहुरम्भा इति यावत् ॥ "छलं तु रम्भिते व्याजे" इति विश्वः । श्रियो लक्ष्म्याः । चलेन्द्रियैरजितेन्द्रियैरसुरक्षा रक्षितुमशक्याः । कर्थंचित्प्राप्ता अपि श्रियो नाविनीतेषु तिष्ठन्तीत्यर्थः ॥ वाक्यार्थहेतुकं काव्यलिङ्गमलंकारः ॥

क्रोधस्य दुष्टतामुक्त्वा तस्य त्यागमुपदिशति—

किमसामयिकं वितन्वता मनसः क्षोभमुपात्तरंहसः ।
क्रियते पतिरुच्चकैरपां भवता धीरतयाधरीकृतः ॥ ४० ॥

किमिति ॥ उपात्तरंहसः प्राप्तत्वरस्य मनसः । समयोऽस्य प्राप्तः सामयिकः ॥ "समयश्चदस्य प्राप्तम्" इति ठक् ॥ स न भवतीत्यसामयिकस्तमप्राप्तकालं क्षोभं वितन्वता भवता धीरतया धैर्यगुणेन । "मनसो निर्विकारत्वं धैर्यं सत्स्वपि हेतुषु" इति रसिकाः । अधरीकृतस्तिरस्कृतः । मागिति क्षेपः । अपां पतिः समुद्रः किं किमर्थमुच्चकैरधिकः क्रियते । न पराजितं पुनरुच्चकैः कुर्यादिति भावः ॥ अत्र वितन्वतेति भीमविक्षेपणत्वेन पदार्थस्योद्भेदकरणे हेतुत्वात्काव्यलिङ्गमलंकारः ॥

श्रुतमप्यधिगम्य ये रिपून्विनयन्ते न शरीरजन्मनः ।
जनयन्त्यचिराय संपदामयशस्ते खलु चापलाश्रयम् ॥ ४१ ॥

श्रुतमिति ॥ किंच । ये श्रुतं शास्त्रमधिगम्यापि शरीरजन्मनः शरीरमथवान्निकृष्टकायकोपलोभमोहमात्सर्यादीन्न विनयन्ते न नियच्छन्ति ॥ "कर्तृस्थे चाशरीरे कर्मणि" इत्यात्मनेपदम् ॥ ते खल्वचिराय झटिति संपदां श्रियां चापलाश्रयमस्थैर्यनिदानमयशो दुष्कीर्तिं जनयन्ति । आश्रयदोषादस्थैर्यं संपदां न स्वदोषादित्यर्थः । अजितारिपक्षस्य कुतः संपद इति भावः ॥

तथा क्रोधात्कार्यहानिरित्याक्षेपेणाह—

अतिपातितकालसाधना स्वशरीरेन्द्रियवर्गतापिनी ।
जनयन्न भवन्तमक्षमा नयसिद्धेरपनेतुमर्हति ॥ ४२ ॥

Digitized by Google

अतिपातितेति ॥ अतिपातितान्यतिक्रान्तानि कालः समयोऽनन्तरूपः साधनानि सहायादीनि च यया सा तथोक्ता। तापयतीति तापिनी ॥ कर्तरि ल्युट्। टित्त्वाद् ङीप् ॥ स्वस्य यच्छरीरमिन्द्रियवर्गश्च तयोस्तापिन्यक्षमा क्रोधो भवन्तं जनवत्पृथग्जनमिव ॥ "तेन तुल्यम्–" इति वतिप्रत्ययः ॥ तेनेवार्थो लक्ष्यते ॥ "तद्धितश्चासर्वविभक्तिः" इत्यव्ययम् ॥ नयसिद्धेर्नयसाध्यफलादपनेतुं प्रभवितुं नार्हति। असमयक्रोधस्यात्मसंतापातिरिक्तं फलं नास्तीत्यर्थः ॥

दुष्टः क्रोध इत्युक्तम्। अथ क्षमाया गुणानाह—

उपकारकमायतेर्भृशं प्रसवः कर्मफलस्य भूरिणः।
अनपायि निबर्हणं द्विषां न तितिक्षासममस्ति साधनम् ॥ ४३ ॥

उपकारकमिति ॥ आयतेरुत्तरकालस्य भृशमत्यन्तमुपकारकम्। स्थिरफलहेतुरित्यर्थः। भूरिणः प्रभूतस्य कर्मफलस्य। प्रसूयतेऽनेनेति प्रसवः कारणम्। अपायि न भवतीत्यनपायि स्वयमविनश्यदेव द्विषां निबर्हणं विनाशकमेवंगुणकं साधनं तितिक्षासमं क्षमातुल्यं नास्ति ॥ "क्षान्तिः क्षमा तितिक्षा च" इत्यमरः ॥ "तिज निशाने" इति धातोः "तृप्तिन्धिकद्भ्यः सन्" इति क्षमार्थे सन्प्रत्ययः ॥ तितिक्षासममित्यनुक्तोपमेया समास आर्थी लुप्तोपमा भृशायत्यनपायिशब्दैः साधनान्तरवैलक्षण्याद्व्यतिरेकश्च व्यज्यते। भेदप्राधान्य उपमानादुपमेयस्याधिक्ये विपर्यये च व्यतिरेकः ॥

ननु तितिक्षया कालक्षेपे दुर्योधनः सर्वान्राज्ञो वशीकुर्यादित्यत्राह—

प्रणतिप्रवणान्विहाय नः सहजस्नेहनिबद्धचेतसः।
प्रणमन्ति सदा सुयोधनं प्रथमे मानभृतां न वृष्णयः ॥ ४४ ॥

प्रणतीति ॥ सहजस्नेहेनाकृत्रिमप्रेम्णा निबद्धचेतसोऽस्मासु गाढं लग्नचित्ताः। सुयोधने तु न तथेति भावः। किं च मानभृतामहंकारिणां प्रथमेऽग्रेसराः। सुयोधनस्यापीति भावः। वृष्णयो यादवाः प्रणतिप्रवणान्प्रणामपरान्। सुयोधनस्तु न तथेति भावः। नोऽस्मान्विहाय सुयोधनं सदा न प्रणमन्ति न नमन्ति नानुसरन्ति। किंतु कार्यकाले सख्यन्त्येवेत्यर्थः। सति यादवविग्रहे न किंचिदस्माकमसाध्यं भवेदिति भावः ॥ अनेकपदार्थहेतुकं काव्यलिङ्गमलंकारः ॥

किंच कारणान्तरमाह—

सुहृदः सहजास्तथेतरे मतमेषां न विलङ्घयन्ति ये।
विनयादिव यापयन्ति ते धृतराष्ट्रात्मजमात्मसिद्धये ॥ ४५ ॥

१ प्रेम.

Digitized by Google

सुहृद इति ॥ किं चैषां दुर्ज्जनानां ये सहजाः सहजाताः । सहजा मातृपितृपक्षा इत्यर्थः ॥ "अन्येष्वपि दृश्यते" इति डमत्ययः ॥ सुहृदो मित्राणि तत्तत्रे कृमिसुहृदश्चैषां मतं दुर्ज्जिपक्षं न विलङ्घयन्ति नातिक्रामन्ति । ते द्वेऽपि कृपाः । दुर्योधनोपजीविनोऽपीति भावः । आत्मसिद्धय आत्मजीवनार्थं धृतराष्ट्रात्मजं दुर्योधनं विनयादानुकूल्यादिव यापयन्ति कालं गमयन्ति । कार्यकाले तु दुर्ज्जिपक्षमवेक्षिन एवेत्यर्थः ॥ यातेर्ण्यन्ताद्धुद् । "अतिहि–" इत्यादिना पुगागमः ॥

किंच नायमभियोगकाल इत्याशयेनाह—

अभियोग इमान्महीभुजो भवता तस्य कृतः कृतावधेः ।
प्रविघाटयिता समुत्पतन्हरिदश्वः कमलाकरानिव ॥ ४६ ॥

अभियोग इति ॥ कृतावधेः परिभाषितकालस्य ॥ "अवधिस्त्ववधाने स्यात्सीम्नि काले विलेऽपि च" इति विश्वः ॥ तस्य सुयोधनस्य ॥ कर्मणि षष्ठी ॥ भवता कृतः । अवधिमनपेक्ष्येति शेषः । अभियोगः । आर्द्रीभाव इति यावत् ॥ "अभियोगस्तु शपथे स्यादार्द्रे च पराभवे" इति विश्वः ॥ इमान्पूर्वोक्तान्महीभुजो राज्ञो हरिदश्व उष्णरश्मिः कमलाकरानिव समुत्पतन्सुखमेव प्रविघाटयिता भेत्स्यति ॥ घाटयतेर्भौवादिकाद्धुद् । चौरादिकस्य तु "मितां ह्रस्वः" इति ह्रस्वत्वं स्यात् ॥

अथ न ये दुर्ज्जिपक्षास्तान्नत्याह—

उपजापसहान्विलङ्घयन्स विधाता नृपतीन्मदोद्धतः ।
सहते न जनोऽप्यधःक्रियां किमु लोकाधिकधाम राजकम् ॥४७॥

उपजापेति ॥ मदोद्धतः स दुर्योधनो नृपतीनन्यानपि पार्थिवलङ्घयन्मदादवमानयन् । सहन्त इति सहाः ॥ पचाद्यच् ॥ उपजापस्य सहान्भेदयोग्यान् ॥ "सभी । भेदोपजापौ" इत्यमरः ॥ विधाता विधास्यति ॥ विपूर्वस्य दधातेर्लृद् ॥ अवमानितो जनः । लुनेच इति भावः ॥ न च ते सहिष्णव इत्याह— जनः प्राकृतोऽप्यधःक्रियामपमानं न सहते । लोकाधिकधाम लोकोत्तरमतापं राजकं राजसमूहः ॥ "गोत्रोक्षोष्ट्र–" इत्यादिना पुञ्भावः ॥ किमु । सहत इति किं वक्तव्यमित्यर्थः । तथा सति कृत्स्नमेव राजमण्डलमस्मानेवावलम्बिष्यत इति भावः ॥

नन्वसहीनिवेत्यादिवनेचरोक्त्या तस्य मदसंभावनापि कथमित्यत्राह—

असमापितकृत्यसंपदां हतवेगं विनयेन तावता ।
प्रभवन्त्यभिमानशालिनां मदमुत्तम्भयितुं विभूतयः ॥ ४८ ॥

असमापितेति ॥ असमापितकृत्यसंपदामकृतकृत्यानामभिमानशालिनामहंकारिणां विभूतयः संपद एव तावता स्वल्पेन विनयेन । कार्यवत्त्वादारोपितेनेति शेषः ।

Digitized by Google

इतवेगं प्रतिषद्धवेगं नतु स्वरूपतो हतं मदमुत्तम्भयितुं वर्धयितुं समर्थन्ति । सर्वथा दुर्जनं संपदो विकारयन्तीति भावः ॥

अथ मदस्यानर्थहेतुतां युग्मेनाह—

मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढता ।
अतिमूढ उदस्यते नयान्नयहीनादपरज्यते जनः ॥ ४९ ॥

मदेति । अपरागेति च ॥ मदमानाभ्यां दर्पाहंकाराभ्यां समुद्धतं नृपं मूढता कार्यापरिज्ञानं नियमेनावश्यं न वियुङ्क्ते न विमुञ्चति । अतिमूढो नयान्नीतिमार्गादुदस्यत उत्क्षिप्यते ॥ कर्मकर्तरि लट् ॥ नयहीनाज्जनो लोकोऽपरज्यतेऽपरक्तो भवति ॥ "स्वरितञितः—" इत्यादिनात्मनेपदम् ॥

अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसंततिः ।
सुकरस्तरुवत्सहिष्णुना रिपुरुन्मूलयितुं महानपि ॥ ५० ॥

अपरागोऽप्रीतिः । द्वेष इति यावत् । समीरण इव । तेनेरितश्चोदितः । अतएव क्रमेण शीर्णा शीर्णीभूताकुला चला च मूलसंततिः प्रकृत्यादिस्वजनवर्गः शिफासंघातश्च यस्य स तथोक्तः ॥ "मूलं वशीकृते स्वीये शिफातारान्तिकादिषु" इति वैजयन्ती ॥ रिपुर्मदानपि तरुवद्वृक्ष इव सहिष्णुना क्षमावतोन्मूलयितुमुद्धर्तुं सुकरः सुसाध्यः । सुकरोन्मूल इत्यर्थः ॥ अत्र मदादेः पूर्वपूर्वस्योत्तरोत्तरं प्रति कारणत्वात्कारणमाला तरुवदित्युपमा चेति द्वयोः संसृष्टिः ॥

नन्वन्तर्भेदमात्रेण कथं सुसाध्यत्वमाह—

अणुरप्युपहन्ति विग्रहः प्रभुमन्तःप्रकृतिप्रकोपजः ।
अखिलं हि हिनस्ति भूधरं तरुशाखान्तनिघर्षजोऽनलः ॥ ५१ ॥

अणुरिति ॥ अणुरल्पोऽप्यन्तःप्रकृतिप्रकोपजोऽन्तरङ्गामात्याद्यपरागसमुत्थः ॥ "प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे । छन्दःकारणगुह्येषु जन्यस्वामात्यादिकेष्वपि" इति वैजयन्ती ॥ विग्रहो वैरं प्रभुमुपहन्ति नाशयति ॥ अत्र दृष्टान्तमाह—तरुशाखान्तानां निघर्षो घर्षणं तज्जोऽनलोऽग्निः । भूधरं गिरिमखिलं साकल्येन हिनस्ति हि । दहतीत्यर्थः ॥ अत्रोपमानोपमेयसमानधर्माणां प्रतिबिम्बतया निर्देशेन दृष्टान्तालंकारः ॥

तथापि कथं वर्धमानं शत्रुमुपेक्षेतेत्याशङ्क्य दुर्विनीतत्वादित्याह—

मतिमान्विनयप्रमाथिनः समुपेक्षेत समुन्नतिं द्विषः ।
सुजयः खलु तादृगन्तरे विपदन्ता ह्यविनीतसंपदः ॥ ५२ ॥

Digitized by Google

मतिमानिति ॥ मतिमान्माह्नः । विनयं मयभ्नाति त्यजतीति विनयभमाथिनो दुर्विनीतस्य द्विषः समुच्छेत्तुं बुद्धिं समुपेक्षेत । उपेक्षायाः फलमाह—तादृगविनीतोऽन्तरं क्वचिदुन्मे सुजयः सुखेन जेतुं शक्यः स्यात् । हि यस्मादविनीतसंपदो विपदन्ता अनर्थोदर्काः ॥

कथं दुर्विनीतस्य शत्रोः सुजयत्वमित्याशङ्क्य भेदजर्जरितत्वादित्याह—

लघुवृत्तितया भिदां गतं बहिरन्तश्च नृपस्य मण्डलम् ।
अभिभूय हरत्यनन्तरः शिथिलं कूलमिवापगारयः ॥ ५३ ॥

लघ्विति ॥ लघुवृत्तितया स्वस्य दुर्वृत्तरूपतया बहिर्मित्रादिजनपदेष्वन्तरमात्यादिषु च भिदां भेदं गतम् ॥ "भिद्रिदादिभ्योऽङ्" इत्यङ्प्रत्ययः ॥ नृपस्य मण्डलं राष्ट्रमनन्तरः संनिहितो जिगीषुरापगारयो नदीवेगः शिथिलमन्तर्भेदजर्जरं कूलमिवाभिभूयाक्राम्य हरति ॥

अनुशासतमित्यनाकुलं नयवर्त्माकुलमर्जुनाग्रजम् ।
स्वयमर्थ इवाभिवाञ्छितस्तमभीयाय पराशरात्मजः ॥ ५४ ॥

अन्विति ॥ इतीत्थमाकुलमरिनिकारस्मरणात्क्षुभितमर्जुनाग्रजं भीमसेनं नयवर्त्म नीतिमार्गमनाकुलमसंकीर्णं यथा तथानुशासतमुपदिशन्तम् ॥ "अशित्रादयः षट्" इत्यभ्यस्तान्मुमभावः ॥ तं युधिष्ठिरं पराशरात्मजो वेदव्यासः । स्वयमभिवाञ्छितोऽर्थ इव । साक्षान्मनोरथ इवेत्युत्प्रेक्षा । अभीयाय प्राप्तः ॥

अथ युग्मेनाह—

मधुरैरवशानि लम्भयन्नपि तिर्यञ्चि शमं निरीक्षितैः ।
परितः पटु बिभ्रदेनसां दहनं धाम विलोकनक्षमम् ॥ ५५ ॥

मधुरैरिति ॥ मधुरैः शान्तैर्निरीक्षितैरवलोकनैः ॥ नपुंसके भावे क्तः ॥ न विद्यते वशमायत्तत्वं येषां तान्यवशानि प्रतिकूलानि ॥ "वशमायत्ततायां च" इति विश्वः ॥ तिर्यञ्चि मृगपक्ष्यादीनि शमं शान्तिं लम्भयन्प्रापयन् ॥ "लभेश्च" इति मुगागमः । "गत्यर्थ-" इत्यादिना द्विकर्मकत्वम् । परितः पटूज्ज्वलमेनसां दहनेऽग्नेरिव दहनं निवर्तकं तथापि विलोकनक्षमं दर्शनीयम् । बह्वादिविलक्षणमिति भावः । धाम तेजो बिभ्रत् ॥

सहसोपगतः सविस्मयं तपसां सूतिरसूतिरोपदाम् ।
ददृशे जगतीभुजा मुनिः स वपुष्मानिव पुण्यसंचयः ॥ ५६ ॥

१ जगतीभिः. २ दनवान्.

Digitized by Google

सहसेति ॥ पुनः सहसोपगतोऽकस्मादागतस्तपसां सूतिः प्रसव आपदामसूतिरभवः । निवर्तक इति यावत् । स मुनिर्व्यासो वपुष्मान्देहधारी पुण्यसंचयः पुण्यराशिरिवेत्युत्प्रेक्षा । जगतीभुजा राज्ञा सविस्मयं ददृशे दृष्टः ॥

अथोच्चकैरासनतः परार्ध्यादुद्यन्सं धूतारुणवल्कलाग्रः ।
रराज कीर्णकपिशांशुजालः शृङ्गात्सुमेरोरिव तिग्मरश्मिः ॥५७॥

अथेति ॥ अथ दर्शनानन्तरम् । उच्चकैरुन्नतात्परार्ध्यादुच्चैष्टात् ॥ "अर्घाच्च"। "पराबराधमोत्तमपूर्वाच्च" इति यत्प्रत्ययः ॥ आसनतः सिंहासनादुद्यन्सुषिप्लुतएव धूतानि कम्पितान्यरुणानि वल्कलाग्राणि यस्य स तथोक्तः । स नृपः कीर्ण विस्तृतमाकपिशमंशुजालं यस्य स तथोक्तः। सुमेरोः शृङ्गादुद्यंस्तिग्मरश्मिरिव । रराज॥

अवहितहृदयो विधाय सोऽर्हामृषिवदृषिप्रवरे गुरूपदिष्टाम् ।
तदनुमतमलंचकार पश्चात्प्रशम इव श्रुतमासनं नरेन्द्रः ॥ ५८ ॥

अवहितेति ॥ स नरेन्द्रोऽवहितहृदयोऽप्रमत्तचित्तः सन् ॥ "चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः" इत्यमरः ॥ ऋषिप्रवरे मुनिश्रेष्ठे । ऋषिवदृष्यर्हाम् ॥ अर्हत्यर्थे घतिप्रत्ययः ॥ गुरूपदिष्टाम् । शास्त्रीयामित्यर्थः । अर्हां पूजाम् ॥ "गुरोश्च हलः" इत्यकारप्रत्ययः ॥ विधाय पश्चादनन्तरं तदनुमतं तेनानुज्ञातमासनम् । प्रशमः शान्तिः श्रुतं शास्त्रश्रवणमिव । अलंचकार । उक्तं च पूर्वम्—"प्रशमस्तस्य भवत्यलंक्रिया" इति । मुन्याज्ञयोपविष्टवानित्यर्थः ॥

व्यक्तोदितस्मितमयूखविभासितोष्ठ-
स्तिष्ठन्मुनेरभिमुखं स विकीर्णधाम्नः ।
तन्वन्तमिद्धमभितो गुरुमंशुजालं
लक्ष्मीमुवाह सकलस्य शशाङ्कमूर्तेः ॥ ५९ ॥

व्यक्तेति ॥ व्यक्तोदितैः स्फुटोद्भूतैः स्मितमयूखैर्विभासितावोष्ठौ यस्य स तथोक्तः। विकीर्णधाम्नो विस्ततेजसो मुनेरभिमुखं तिष्ठन्स नृपः । इद्धं समृद्धम् । दीप्तमिति यावत् । अंशुजालं तन्वन्तं गुरुं गीष्पतिम् ॥ "गुरुर्गीष्पतिधिषणादी" इत्यमरः ॥ "अभितःपरितः–" इत्यादिना द्वितीया ॥ अभितोऽभिमुखम् । तिष्ठत इति शेषः । सकलस्य संपूर्णस्य शशाङ्क मूर्तिर्यस्य तस्येन्दोर्लक्ष्मीमुवाह वहति स्म ॥ अत्रोपमेयस्य राज्ञ उपमानेन्दुधर्मेण लक्ष्म्याः साक्षात्संबन्धासंभवात्सदृशीं लक्ष्मीमिवेति प्रतिबिम्बकरणश्लेषादसंभवद्वस्तुसंबन्धात्पदार्थहेतुकोनिदर्शनालंकारः ।

१ सुधीतारुण. २ धर्मरश्मिः. ३ मृगाङ्कमूर्तेः.

Digitized by Google

बहुकम्— "प्रतिबिम्बस्य करणं संभवति यत्र वस्तुयोगेनागन्तुकसंभविता भिदेत्यत्र द्वितीयमता" इति ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथसमाख्यया व्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये व्याख्यानमयो नाम द्वितीयः सर्गः ।

तृतीयः सर्गः ।

अथ त्रिभिर्मुनिं विशिनष्टि । चतुर्भिः कलापकमाह । तदुक्तम्— "द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम् । कलापकं चतुर्भिः स्यात्सर्गे कुलकं समम्" इति ।

ततः शरच्चन्द्रकराभिरामैरुत्सर्पिभिः प्रांशुमिवांशुजालैः ।
बिभ्राणमानीलरुचं पिशङ्गीर्जटास्तडिल्लन्तमिवाम्बुवाहम् ॥ १ ॥

तत इति ॥ तत उपवेशनानन्तरं शरच्चन्द्रकराभिरामैः । आह्लादकैरित्यर्थः । उत्सर्पिभिरूर्ध्वं प्रसरिभिरंशुजालैः प्रभापटलैः प्रांशुमुन्नतमिव स्थितमित्युत्प्रेक्षा । पुनरानीलरुचं कृष्णवर्णं पिशङ्गीः पिङ्गलवर्णाः ॥ गौरादित्वात् ङीष् ॥ जटा बिभ्राणं धारयन्तमतएव तडित्वन्तं विद्युत्पुञ्जमम्बुवाहमिव स्थितमित्युत्प्रेक्षा । धर्मात्मजो युधिष्ठिर एतादृशं मुनिमापबाध इति चतुर्थश्लोकेनान्वयः ॥

प्रसादलक्ष्मीं दधतं समग्रां वपुःप्रकर्षेण जनातिगेन ।
प्रसह्य चेतःसु समासजन्तमसंस्तुतानामपि भावमार्द्रम् ॥ २ ॥

प्रसादेति ॥ पुनः समग्रां संपूर्णां प्रसादः सौम्यता तस्य लक्ष्मीं संपदं दधतम् । अलदद जनमतिनच्छतीति जनातिगेन लोकातिशायिना ॥ "अन्येष्वपि दृश्यते" इति डप्रत्ययः ॥ वपुःप्रकर्षेणाकारसंपदासंस्तुतानामपरिचितानामपि । व्यासोऽयमित्यनासाभिस्पर्शः ॥ "संस्तवः स्यात्परिचयः" इत्यमरः ॥ चेतःसु चित्तेष्वार्द्रं भावं क्षोदार्द्रभावमभिभावं प्रसह्य बलात्समासजन्तम् । जगयन्तमिति यावत् ॥ "ईदासजस्थां क्वौ" इत्युपधाक्षोपः ॥ प्रसह्याकारेऽयं सर्वोऽपि क्लिश्नातीति भावः ॥

अहृद्यताकारतया विविक्तां तन्त्रान्तमन्तःकरणस्य वृत्तिम् ।
माधुर्यविस्रम्भविशेषभाजा कृतोपसंभाषमिवेक्षितेन ॥ ३ ॥

अहृद्येति ॥ पुनरहृद्यताकारतया भाव्याकारत्वेन क्लिश्नान्तःकरणस्य वृत्तिं

Digitized by Google

विविक्तां पूताम् । शाम्तामिति यावत् ॥ "विविक्तौ पूतविजनौ" इत्यमरः ॥ तन्वन्तं प्रकटयन्तम् । आकृतिरेवास्य चित्तशुद्धिं कथयतीत्यर्थः । पुनर्मार्दुर्यं निसर्गसौम्यता विस्रम्भो विश्वासः ॥ "समौ विस्रम्भविश्वासौ" इत्यमरः ॥ तयोर्विशेषमतिशयं भजतीति तथोक्तेनेक्षितेन दर्शनेनैव कृतोपसंभाषा संभाषणं येन तमिवेत्युत्प्रेक्षा । दृष्टिविशेषेणैवोपसंभाषणमिव स्थितमित्यर्थः ॥ काशिकायां तु "उपसंभाषनमुपसान्त्वनम्" इति भाषणादिसूत्रेण ॥

धर्मात्मजो धर्मनिबन्धिनीनां प्रसूतिमेनःप्रणुदां श्रुतीनाम् ।
हेतुं तदभ्यागमने परीप्सुः सुखोपविष्टं मुनिमाबभाषे ॥ ४ ॥

धर्मेति ॥ पुनर्धर्मं निबध्नन्तीति धर्मनिबन्धिनीनामग्निहोत्रादिधर्मप्रतिपादिकानाम् ॥ एनःप्रणुदामपच्छिदाम् ॥ क्विप् ॥ श्रुतीनां वेदानाम् ॥ "श्रुतिः स्त्री वेद आम्नायः" इत्यमरः ॥ प्रसूतिं प्रभवं सुखेनोपविष्टं मुनिं तदभ्यागमने तस्य मुनेरागमने हेतुं कारणं परीप्सुर्जिज्ञासुः ॥ आप्नोतेः सन्नन्तादुप्रत्ययः । "आप्ज्याप्शासोः" इतीकारः । "अत्र लोपोऽभ्यासस्य" इत्यभ्यासलोपः ॥ आबभाष उवाच ॥

अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्धूतरजाः सवित्री ।
तुल्या भवद्दर्शनसंपदेषा वृष्टेर्दिवो वीतबलाहकायाः ॥ ५ ॥

अनाप्तेति ॥ अनाप्तपुण्योपचयैरकृतपुण्यसंग्रहैर्दुरापा दुर्लभा । फलस्य सवित्री । भेषजकरीत्यर्थः । निर्धूतरजा इतरजोगुणा । एकत्र रजो धूलिरन्यत्र गुणः ॥ "रजो रजोगुणे धूली परागार्तवयोरपि" इति विश्वः ॥ एषा भवद्दर्शनसंपत्संपधिः । लाभ इति यावत् ॥ संपदादिभ्यः क्विपो भावार्थत्वात् ॥ वीतबलाहकाया गतमेघाया दिव आकाशस्य संबन्धिन्या वृष्टेस्तुल्येत्युपमालंकारः । अनभ्रवृष्टिवदतर्कितोपपन्नं भवद्दर्शनं सर्वथा कस्यचिच्छ्रेयसो निदानमित्यर्थः ॥ वारि वहतीति वलाहकः । वृषोदरादित्वात्साधुः ॥

अद्य क्रियाः कामदुघाः क्रतूनां सत्याशिषः संप्रति भूमिदेवाः ।
आसंसृतेरस्मि जगत्सु जातस्त्वय्यागते यद्बहुमानपात्रम् ॥ ६ ॥

अद्येति ॥ अद्य क्रतूनां क्रिया अनुष्ठानानि । कामान्दुहन्तीति कामदुघाः । फलदा इत्यर्थः ॥ "दुहः कब्घश्च" इति कब्प्रत्ययो घादेशश्च ॥ संप्रत्यद्य भूमिदेवा ब्राह्मणाः ॥ "द्विजात्यग्रजन्मभूदेवबाडवाः । विप्रश्च ब्राह्मणः" इत्यमरः ॥ सत्याशिषो जाताः । ब्राह्मणाशिषोऽद्य फलिता इत्यर्थः । यतस्तव कारणात्त्वय्यागते सति । त्वदागमनेन निमित्तेनेत्यर्थः । अस्मीत्यहमर्थेऽव्ययम् ॥ "अस्मीत्यस्मदर्थानुवादेऽहमर्थेऽपि" इति गजव्याख्याने । "दासे कृतागसि भवत्युचितः

Digitized by Google

प्रसूनां पादप्रहार इति सुन्दरि नास्मि दूये" इति प्रयोगात् ॥ आसंसृतेरासंसारात् । यावत्संसारमित्यर्थः ॥ अभिविधावाङ्किल्पादसमासः ॥ जगत्सु बहुमानपात्रं बहुयोग्यतामाजनं जातः । सकलसत्कर्मफलभूतं तदाममनं येन मे जगन्मान्यत्वेति भावः ॥

श्रियं विकर्षत्यपहन्त्यघानि श्रेयः परिस्तौति तनोति कीर्तिम् ।
संदर्शनं लोकगुरोरमोघं तवात्मयोनेरिव किं न धत्ते ॥ ७ ॥

श्रियमिति ॥ आत्मयोनेर्ब्रह्मण इव लोकगुरोस्तवामोघमविफलं संदर्शनं श्रियं विकर्षत्याकृष्य ददाति । अघानि दुःखान्यपहन्ति ॥ "अंहोदुःखव्यसनेष्वघम्" इत्यमरः ॥ श्रेयः पुरुषार्थं परिस्तौति स्रवति ॥ धातूनामनेकार्थत्वात् । "परिस्तौति" इति पाठेऽपि स एवार्थः ॥ कीर्तिं तनोति । किं बहुना किं न धत्ते किं किं न करोति । सर्वं करोतीत्यर्थः ॥

श्योतन्मयूखेऽपि हिमद्युतौ मे न निर्वृतं निर्वृतिमेति चक्षुः ।
सप्तुञ्जितज्ञातिवियोगखेदं त्वत्सन्निधावुच्छ्वसतीव चेतः ॥ ८ ॥

श्योतदिति ॥ हे भगवन् । श्योतन्मयूखे सुधास्राविकरे हिमद्युतावित्यादावपि विषये न निर्वृतम् ॥ नञर्थस्य नञ्शब्दस्य सुप्सुपेति समासः ॥ मे चक्षुस्त्वत्सन्निधौ निर्वृतिं सुखमेति । तथा चेतश्च सप्तुञ्जितज्ञातिवियोगखेदं त्यक्तबन्धुविरहदुःखं सप्तुच्छ्वसतीवाह्लादेन प्राणितीवेत्युत्प्रेक्षा ॥ पूर्वार्धे तु निर्वृतिकारणे सत्यपीन्दावनिर्वृतिकथनाद्विशेषोक्तिः । तदुक्तम्— "तत्सामग्र्यामनिर्वृतिर्विशेषोक्तिर्निगद्यते" इति ॥

निरास्पदं प्रश्नकुतूहलित्वमस्मास्वधीनं किमु निःस्पृहाणाम् ।
तथापि कल्याणकरीं गिरं ते मां श्रोतुमिच्छा मुखरीकरोति ॥ ९ ॥

निरास्पदमिति ॥ प्रश्नकुतूहलित्वं निरास्पदम् । आगमनमयोजनमश्नो निरास्पद इत्यर्थः ॥ "आस्पदं प्रतिष्ठायाम्" इति निपातः ॥ प्रश्नानवकाशे हेतुमाह—निःस्पृहाणाम् । युष्मत्सदस्यानामित्यर्थः । अस्मास्वधीनमायत्तं किमु । न किंचिदस्मत्तो लभ्यमित्यर्थः ॥ आधारत्वविवक्षायां सप्तमी ॥ तथापि कल्याणकरीम् । अस्मद्धितैकहेतुमित्यर्थः । निःस्पृहत्वेः पारार्थ्यादिति भावः ॥ "कृत्यो हेतु–" इति टप्रत्यये ङीप् ॥ अतस्ते गिरं श्रोतुमिच्छा माम् । मुखं वागस्यास्तीति मुखरो निरन्तरभाषी ॥ "मुखकुक्षेभ्यो रो वक्तव्यः" इति रः ॥ "दुर्मुखे मुखराबद्धमुखौ" इत्यमरः ॥ उपन्यासत्वयः ॥ मुखरीकरोति । व्यापारयतीत्यर्थः । निःस्पृहस्यापि ते वाक्यमस्मद्धितकरत्वाच्छ्रोतव्यमिति भावः ॥

Digitized by Google

इत्युक्तवानुक्तिविशेषरम्यं मनः समाधाय जयोपपत्तौ ।
उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधे नरेन्द्रः ॥ १० ॥

इतीति ॥ इतीत्थमुक्तिविशेषरम्यमुक्तिवैचित्र्यचारु यथा तथोक्तवान् । उदारचेता महामना नरेन्द्रो द्वैपायनेन व्यासेन । द्वीपमयनं स्थानं जन्मभूमिर्यस्य स द्वीपायनः । स एव द्वैपायनः ॥ "प्रज्ञादिभ्यश्च" इति स्वार्थेऽण्प्रत्ययः । नापत्यार्थे "नडादिभ्यः फक्" । तेष्वेव पाठाद्गोत्रितार्थत्वाच्च ॥ जयोपपत्तौ मनः समाधाय । जयसिद्धिमपेक्ष्येत्यर्थः । इति वक्ष्यमाणप्रकारामुदारामर्थवतीं गिरमभिदध उक्तवान् ॥ दुहादित्वादप्रधाने कर्मणि लिट् । "प्रधानकर्मण्यारूयेये लादीनाहुर्द्विकर्मणाम् । अप्रधाने दुहादीनां ग्यन्ते कर्तुश्च कर्मणः" इति वचनात् ॥

आदौ तावत्तस्य माध्यस्थ्यताभङ्गदोषं युग्मेन परिहरति—

चिचीषतां जन्मवतामलघ्वीं यशोवतंसामुभयत्र भूतिम् ।
अभ्यर्हिता बन्धुषु तुल्यरूपा वृत्तिर्विशेषेण तपोधनानाम् ॥११॥

चिचीषतामिति ॥ अलघ्वीं गुर्वीम् ॥ "घोतो गुणवचनात्" इति ङीप् ॥ यशोवतंसां कीर्तिभूषणाम् । उभयत्रेह चामुत्र च भूतिं श्रेयश्चिचीषतां संचेतुं संग्रहीतुमिच्छताम् ॥ चिनोतेः सन्नन्ताच्छतृप्रत्ययः ॥ जन्मवतां शरीरिणां बन्धुषु विषये तुल्यरूपैकविधा वृत्तिर्व्यवहारोऽभ्यर्हितोचिता तपोधनानां स्वस्मत्सदृशां विशेषेण नियमेनाभ्यर्हिता ॥

तथापि निघ्नं नृप तावकीनैः प्रहीकृतं मे हृदयं गुणौघैः ।
वीतस्पृहाणामपि मुक्तिभाजां भवन्ति भव्येषु हि पक्षपाताः ॥१२॥

तथापीति ॥ तथापि तुल्यवृत्तौ चित्तेऽपि । हे नृप । तावकीनैस्त्वदीयैः ॥ "युष्मदस्मदोरन्यतरस्यां खञ्च" इति खञ्प्रत्ययः । "तवकममकावेकवचने" इति तवकादेशः ॥ गुणौघैः प्रहीकृतमावर्जितं मे हृदयं निघ्नं त्वदायत्तम् ॥ "अधीनो निघ्न आयत्तः" इत्यमरः ॥ ननु निःस्पृहस्य कोऽयं पक्षपात इत्याह—वीतेति ॥ वीतस्पृहाणां विरक्तानां मुक्तिभाजाम् । मुमुक्षूणामपीत्यर्थः । भवन्तीति भव्याः साधवः ॥ "भव्यगेय—" इत्यादिना कर्तरि निपातः ॥ तेषु पक्षपाताः स्नेहा भवन्ति । न तु साध्वनुग्रहो महतां माध्यस्थमञ्चक इति भावः ॥

अथ नृपस्य गुणवत्तां प्रकटयितुं धृतराष्ट्रस्य दुर्मेधामुद्घाटयति—

सुता न यूयं किमु तस्य राज्ञः सुयोधनं वा न गुणैरतीताः ।
यस्त्यक्तवान्वः स वृथा बलाद्वा मोहं विधत्ते विषयाभिलाषः ॥१३॥

Digitized by Google

सुता इति ॥ यूयं तस्य राज्ञो धृतराष्ट्रस्य सुताः पुत्रा न किंतु । अपि तु सुता एवेत्यर्थः । गुणैः क्षान्तिदानदाक्षिण्यादिभिः सुयोधनं नातीता नातिक्रान्ता वा । अतीता एवेत्यर्थः ॥ कर्तरि क्तः ॥ असुतत्वमगुणत्वं च रागे हेतुः । युष्मासु तथास्तीत्यर्थः ॥ उपालम्भे कारणमाह—य इति ॥ यो धृतराष्ट्रो वो युष्मान्मृषा निष्कारणमेव स्पर्द्धते ॥ यदि वयं सुता गुणाधिकाश्च तर्हि कथमस्यासीत्याह—बलादिति ॥ स विषयाभिलाषो भोगतृष्णा बलाद्दुस्त्यजत्वादिव ॥ "वा स्वादिक्रियोपमयोरेवार्थेऽपि समुच्चये" इति विश्वः ॥ मोहमविवेकं विषये । विषयाभिलाषाविरिक्तो न कश्चिद्युष्मत्त्यागहेतुरस्तीत्यर्थः ॥ अत्र कार्यकारणसमर्थनरूपोऽर्थान्तरन्यासः ॥

अथ राज्ञ उत्साहवर्धनाय अत्रोहार्निं सूचयति—

जहातु नैनं कथमर्थसिद्धिः संशय्य कर्णादिषु तिष्ठते यः ।
असाधुयोगा हि जयान्तरायाः प्रमाथिनीनां विपदां पदानि॥१४॥

जहात्विति ॥ एनं धृतराष्ट्रमर्थसिद्धिः कथं न जहातु । जहात्येवेत्यर्थः ॥ "प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च" इति प्राप्तकाले लोट् ॥ तस्य हानिकालः प्राप्त इत्यर्थः । कुतः । यो धृतराष्ट्रः संशय्य संदिह्य कर्णादिषु तिष्ठते । कर्णादीन्दुर्मन्त्रिणः संदिग्धार्थे निर्णेतृत्वेनावलम्बत इत्यर्थः ॥ "प्रकाशनस्थेयाख्ययोश्च" इति स्थेयाख्यायामात्मनेपदम् । "प्रकाशस्थेयाख्ययोश्च" इति तङ् ॥ तिष्ठतेऽस्मिन्निति स्थेयो विवादपदनिर्णेता । तथादि । असाधुयोगा दुर्जनसंसर्गा जयान्तराया जयविघातकाः । किंच प्रमाथिनीनामुन्मूलनशीलानां विपदां पदानि स्थानानि ॥ "पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः ॥ न केवलं जयघातिनः किं त्वनर्थकारिणश्चेत्यर्थः । धृतराष्ट्रोऽपि दुर्जनविषेयत्वादिनङ्क्षयतीति भावः ॥

एवं त्रयोरनर्थं सूचयित्वा राज्ञोऽर्थसिद्धिं सूचयति—

पथच्युतायां समितौ रिपूणां धर्म्यां दधानेन धुरं चिराय ।
त्वया विपत्स्वप्यविपत्तिरम्यमाविष्कृतं प्रेम परं गुणेषु ॥ १५ ॥

पथ इति ॥ रिपूणां समितौ समायाम् ॥ "समासभितिसंसदः" इत्यमरः ॥ पथच्युतायां मार्गान्नष्टायाम् । दुरात्मनो दुःशासनस्य क्रीव्रहणसाहसमङ्गीकृतवत्त्वादित्यर्थः । चिराय धर्म्यां धर्मादनपेताम् ॥ "धर्मात्यर्थन्यायादनपेते" इति यत्प्रत्ययः ॥ धुरं भारं दधानेन । कृच्छ्रेष्वपि धर्मादचलतेत्यर्थः । त्वया विपत्स्वपि । अविपत्स्विव सम्पत्स्विव रम्यं गुणेषु शास्त्रादिषु विषये परमुत्कृष्टं प्रेमाविष्कृतं प्रकटीकृतम् । दुःखेष्वपि सोढवता त्वया साधु कृतमिति भावः ॥

Digitized by Google

विधाय विध्वंसमनात्मनीनं शमैकवृत्तेर्भवतश्छलेन।
प्रकाशितत्वन्मतिशीलसाराः कृतोपकारा इव विद्विषस्ते॥ १६॥

विधायेति॥ किंच शम एवैका मुख्या वृत्तिर्यस्य तस्य। अपरोपतापिन इत्यर्थः। भवतश्छलेन कपटेन। आत्मने हित आत्मनीनः। स न भवतीत्यनात्मनीनः। स्वस्यैवानर्थहेतुरित्यर्थः। तम्॥ "आत्मन्विश्वजनभोगोत्तरपदात्खः" इति खप्रत्ययः॥ विध्वंसमपकारं विधाय कृत्वा। प्रकाशितः प्रख्यापितस्तन्मतिशीलयोस्तव मज्ञात्मभावयोः सारः प्रकर्षो यैस्ते तथोक्ताः। ते तव विद्विषः कृतोपकारा इवोपकृतवन्त इव। आता इति शेषः। अपकार उपकारायैव संहृत्तः। यदेषां दौर्जन्यं युष्मत्सौजन्यं च जगति मुष्यकमासीदित्यर्थः। विद्यमानस्यापि सुजनस्य चन्दनदारुण इव गुणाः परिभव एव प्रभुरा भवन्तीति भावः॥

अथ प्रयोजनान्तरमाह—

लभ्या धरित्री तव विक्रमेण ज्यायांश्च वीर्यात्प्रबलैर्विपक्षः।
अतः प्रकर्षाय विधिर्विधेयः प्रकर्षतन्त्रा हि रणे जयश्रीः॥१७॥

लभ्येति॥ तव त्वयेत्यर्थः॥ "कृत्यानां कर्तरि वा" इति षष्ठी॥ धरित्री विक्रमेण लभ्या प्राप्या। न च सुलभ्या तं विनेत्यर्थः। विपक्षश्च शत्रुरपि। वीर्यं शौर्यमस्त्राण्यायेयादीनि बलानि सैन्यानि तैर्ज्यायान्प्रबलतरः। अधिकतर इति यावत्॥ ज्येष्ठस्य "ज्यादादीयसः" इति ज्यादेशः॥ अतः प्रकर्षायाधिक्याय विधिरुपायो विधेयः कर्तव्यः। हि यस्माद्रणे जयश्रीः प्रकर्षतन्त्रा प्रकर्षप्रधाना। उत्कर्षायत्तेत्यर्थः॥ "तन्त्रं प्रधाने सिद्धान्ते" इत्यमरः॥ बलिन एव जयो न तु दुर्बलस्येति भावः॥

अथ "त्रिः—"इत्यादिना श्लोकचतुष्टयेन विपक्षज्यायस्त्वं वर्णयति—

त्रिःसप्तकृत्वो जगतीपतीनां हन्ता गुरुर्यस्य स जामदग्न्यः।
वीर्यावधूतः स्म तदा विवेद प्रकर्षमाधारवशं गुणानाम्॥ १८॥

त्रिःसप्तेति॥ त्रिराहृत्यान्सप्तवारांस्त्रिःसप्तकृत्वः। एकविंशतिकृत्व इत्यर्थः॥ त्रिःसप्तशब्दयोः सुप्सुपेति समासः। "संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्" इति कृत्वसुच्प्रत्ययः॥ जगतीपतीनां महीपतीनां हन्ता नाशको गुरुरस्त्रवेदोपदेष्टा सः। जमदग्नेरपत्यं पुमाञ्जामदग्न्यः। भार्गव इत्यर्थः॥ अतएव यञ्शब्दानपेक्षत्वम्। तदुक्तं काश्यपकाण्डे—"अप्रसिद्धानुभूतार्थविषयत्वञ्चशब्दोपादानं नापेक्षते" इति॥ जमदग्नेरपत्यं पुमाञ्जामदग्न्यः॥ "गर्गादिभ्यो यञ्" इति यञ्प्रत्ययः॥ यस्य भीष्मस्य वीर्यावधूतो विक्रमाभिभूतः। अम्बिकात्मजवर इत्यर्थः। तदा भग्नप्राप्तिसमये गुणानां शौर्यादीनां प्रक-

Digitized by Google

पंचमविभक्तयं वीर्यातिशयमाधारवशमाश्रयाधीनं विवेद जज्ञे स्म । स्वविषयाः स्वस्मिन्भीष्मे स्वस्यादपि प्रकर्षाधानदर्शनादिति भावः ॥ "स्म पादपूरणे भूतेऽर्थे च" इति विश्वः ॥

यस्मिन्ननैश्वर्यकृतव्यलीकः पराभवं प्राप्त इवान्तकोऽपि ।
धुन्वन्धनुः कस्य रणे न कुर्यान्मनो भयैकप्रवणं स भीष्मः ॥१९॥

यस्मिन्निति ॥ यस्मिन्भीष्मे विषये । अनीश्वरस्य भावोऽनैश्वर्यमसामर्थ्यम् ॥ "नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्" इति विकल्पाज्जश्चः पूर्वपदकृत्वभावः ॥ तेन कृतव्यलीको जनितवैलक्ष्यः ॥ "दुःखे वैलक्ष्ये व्यलीकम्" इति यादवः ॥ अन्तकोऽपि यमोऽपि पराभवं प्राप्त इव । भीष्मस्येच्छामरणस्वादन्तकोऽपि पराजित इवास्ते किमुतान्य इति भावः । स भीष्मो रणे धनुर्धुन्वन्कस्य मनो भयैकमवणं भव एकमवणमेकोन्मुखम् ॥ शिवभागवतवत्समासः ॥ न कुर्यात् । सर्वस्यापि मनसि भयं कुर्यादेवेत्यर्थः ।

सृजन्तमाजाविषुसंहतीर्वः सहेत कोपज्वलितं गुरुं कः ।
परिस्फुरल्लोलशिखाग्रजिह्वं जगज्जिघत्सन्तमिवान्तवह्निम् ॥२०॥

सृजन्तमिति ॥ आजौ रण इषुसंहतीर्वाणसङ्घान्सृजन्तं वर्षन्तं कोपज्वलितमतएव परिस्फुरन्त्यो लोलाश्च शिखाग्राण्येव जिह्वा यस्य तं तथोक्तं जगज्जोकं जिघत्सन्तमत्तुमिच्छन्तम् ॥ अदेः सन्नन्ताच्छतृप्रत्ययः । "लुङ्सनोर्घस्लृ" इति घस्लृआदेशः ॥ अन्तवह्निं कालाग्निमिव स्थितं गुरुं द्रोणं वो युष्माकं मध्ये कः सहेत सोढुं शक्नुयात् । न कोऽपीत्यर्थः ॥ "शकि लिङ् च" इति शक्यर्थे लिङ् ॥

निरीक्ष्य संरम्भनिरस्तधैर्यं राधेयमाराधितजामदग्न्यम् ।
असंस्तुतेषु प्रसभं भयेषु जायेत मृत्योरपि पक्षपातः ॥ २१ ॥

निरीक्ष्येति ॥ संरम्भेण कोपेन निरस्तं त्याजितं धैर्यं निर्विकारचित्तत्वं येन तं तथोक्तम् । आकारेणैव परैर्धैर्यापहारिणमित्यर्थः । आराधितजामदग्न्यं शुश्रूषितभार्गवम् । जामदग्न्यादधिगतास्त्ररहस्यमित्यर्थः । राधेयं राधासुतं कर्णम् ॥ "स्त्रीभ्यो ढक्" ॥ निरीक्ष्य मृत्योरप्यसंस्तुतेष्वपरिचितेषु ॥ "संस्तवः स्यात्परिचयः" इत्यमरः ॥ भयेषु प्रसभं पक्षपातः परिचयो जायेत । मृत्युरप्यस्माद्भीयात्किमुतान्य इति भावः ॥ संभावनायां लिङ् । अत्र जनिक्रियापेक्षया समानकर्तृकत्वाभावेऽपि पक्षपातक्रियापेक्षया तत्संभवार्थाश्रीरीक्ष्येति व्यञ्जिर्देशः । "समर्थनीयमधानोपसर्जनमवस्तुभयोक्तः" इति व्यक्तिविवेककारः ॥ अत्र भयसंबन्धरहितस्य मृत्योर्भयसंबन्धाभिधानादसंबन्धे संबन्धरूपातिशयोक्तिरलंकारः ॥

१ पक्षपातः

अथानन्तरं करणीयमागमनप्रयोजनं च युग्मेनाह—

यया समासादितसाधनेन सुदुश्चरामाचरता तपस्याम् ।
एते दुरापं समवाप्य वीर्यमुन्मूलितारः कपिकेतनेन ॥ २२ ॥

ययेति ॥ यया विद्यया ॥ करणेन ॥ सुदुश्चरामतिदुष्करां तपस्यां तपश्चर्याम् ॥ "कर्मणो रोमन्थतपोभ्यां वर्तिचरोः" इति क्यङ् । "अमत्यपात्" इति स्त्रियामप्रत्ययः ॥ आचरता। पशुपतिं प्रति तपः कुर्वतेत्यर्थः । अतएव समासादितं साधनं पाशुपतास्त्ररूपं येन तेन । कपिर्हनुमान्केतनं चिह्नं यस्य तेन । अर्जुनेनेत्यर्थः । दुरापमन्यस्य दुर्लभं वीर्यं तेजः समवाप्य । एते पूर्वोक्ता भीष्मादय उन्मूलितार उन्मूलयिष्यन्ते ॥ उन्मूलयतेर्ण्यन्तात्कर्मणि लुट् । अत्र विष्वदिदागमेऽपि तस्यासिद्धवदत्राभावादित्यसिद्धत्वात् "गेरनिटि" इति णिलोपः। तन्निमित्तस्यैव "अनिटि" इति निषेधात्। उक्तं च—"हृद्विभिन्दुक्षुद्रन्तेश्च पत्वं दीर्घश्चोक्तो यो मितां वा चिणोति । इट चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वल्निमित्तो विधाति" इति ॥

महत्त्वयोगाय महामहिम्नामाराधनीं तां नृप देवतानाम् ।
दातुं प्रदानोचित भूरिधाम्नीमुपागतः सिद्धिमिवास्मि विद्याम् २३

महत्त्वेति ॥ हे नृप । महत्त्वयोगाय प्रकर्षलाभाय महामहिम्नां महानुभावानां देवतानामिन्द्रादीनाम् । आराध्यतेऽनयेत्याराधनीं ताम् । प्रसादयित्रीमित्यर्थः ॥ करणे ल्युट् । ङीप् ॥ भूरिधाम्नीं महाप्रभावाम् ॥ "धाम देशे गृहे रश्मौ स्थाने जन्मप्रभावयोः" इति विश्वः ॥ "अन उपधालोपिनोऽन्यतरस्याम्" इति वा ङीप् ॥ विद्यामिन्द्रमन्त्ररूपां सिद्धिं साक्षात्कार्यसिद्धिमिवेति विद्याया अभोक्तृत्वोक्तिः । हे प्रदानोचित दानपात्र । अभूतफलभोक्तृत्वादस्य पात्रत्वोक्तिः । दातुमुपागतोऽस्मि ॥

इत्युक्तवन्तं व्रज साधयेति प्रमाणयन्वाक्यमजातशत्रोः ।
प्रसेदिवांसं तमुपाससाद वसन्निवान्ते विनयेन जिष्णुः ॥ २४ ॥

इतीति ॥ इत्युक्तवन्तं प्रसेदिवांसं प्रसन्नम् ॥ "भाषायां सदवसश्रुवः" इति क्रसुः ॥ तं मुनिं जिष्णुर्जयनशीलोऽर्जुनः ॥ "ग्लाजिस्थश्च—" इति ग्स्नुप्रत्ययः ॥ व्रज साधयानुतिष्ठेत्येवंरूपम् । अजातशत्रोर्धर्मराजस्य । स्वयमविद्वेषणशीलत्वादियं संज्ञा । वाक्यं प्रमाणयन् । तदादिष्टः सन्नित्यर्थः । अन्ते वसंश्छात्र इव ॥ "छात्रान्तेवासिनौ शिष्ये" इत्यमरः ॥ विनयेनानीदृत्येनोपाससाद समीपं प्राप ॥

निर्याय विद्याथ दिनादिरम्याद्रिम्नादिवार्कस्य मुखान्महर्षेः ।
पार्थानन वह्निकणावदाता दीप्तिः स्फुरत्पद्ममिवाभिपेदे ॥ २५ ॥

निर्यायेति ॥ अथ वह्निकणावदाता स्फुलिङ्गवदुज्ज्वला । देवतासाक्षिण्यादिति

Digitized by Google

भावः । विधेयेन्द्रमन्त्रकृपा । दिनादिरन्यादर्कस्य प्रभातभास्करस्य बिम्बादिव महर्षेर्व्यासस्य मुखाब्जिर्याय निर्गत ॥ समासेऽनञ्पूर्वे क्तो ल्यप् । दीप्तिरर्कदीधितिः । स्फुरद्विकसत्प्रभमिव । पार्थानलमर्जुनस्य मुखमभिपेदे प्रविष्टा ॥

योगं च तं योग्यतमाय तस्मै तपःप्रभावादिततार सद्यः ।
येनास्य तत्त्वेषु कृतेऽवभासे समुन्मिमीलेव चिराय चक्षुः ॥२६॥

योगं चेति ॥ स योग्यतमायार्हतमाय तस्मै पार्थाय तं वक्ष्यमाणमहिमानं योगं ध्यानं विधिं च ॥ "योगः संनहनोपायध्यानसंगतियुक्तिषु" इत्यमरः ॥ तपःप्रभावात्सद्यो विततार ददौ । चिरकालव्याप्तमपीति भावः । येन योगेन तत्त्वेषु प्रकृतिमहदादिषु । तथा च । मूलप्रकृतिर्महानहंकारो मनश्च पञ्च तन्मात्राणि पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च महाभूतानीति चतुर्विंशति तत्त्वानि । तत्त्वावभासे साक्षात्कारे कृते सत्यस्यार्जुनस्य चक्षुरक्षि चिराय समुन्मिमीलेवोन्मिषितमिवेत्युत्प्रेक्षा । तदा तस्य क्रोडपि महानसिलाज्ञानमञ्जनस्यात्यावभासश्चिरादन्धस्य दृष्टिलाभ इवाभवदिति भावः ॥

आकारमार्शसितभूरिलाभं दधानमन्तःकरणानुरूपम् ।
नियोजयिष्यन्विजयोदये तं तपःसमाधौ मुनिरित्युवाच ॥ २७ ॥

आकारमिति ॥ आर्शसित आस्यातो भूरिलाभोऽनेकश्रेयःप्राप्तिर्येन तं तपोरूपम् । महाभाग्यसूचकमित्यर्थः । अन्तःकरणशब्देन तद्दृढिरुत्साहो लक्ष्यते । तदनुरूपं तदनुकूलम् । उत्साहानुगुणव्यापारक्षममित्यर्थः । आकारं मूर्तिं दधानं तमर्जुनं मुनिर्विजयोदये विजयफलके तपःसमाधौ तपोनियमे ॥ "समाधिर्नियमे ध्याने नीवाके च समर्थने" इति विश्वः ॥ नियोजयिष्यन् । नियोजयितुमिच्छन्नित्यर्थः ॥ "लृट् शेषे च" इति लृट् । "लृटः सद्वा" इति सत्वम्त्ययः ॥ इति वक्ष्यमाणमुवाच ॥

अनेन योगेन विवृद्धतेजा निजां परस्मै पदवीमयच्छन् ।
समाचराचारमुपात्तशस्त्रो जपोपवासाभिषवैर्मुनीनाम् ॥ २८ ॥

अनेनेति ॥ अनेन स्वोपदिष्टेन योगेन विवृद्धतेजा निजां पदवीं परस्मा अयच्छन् । परस्य मयेसमवच्छित्यर्थः । उपात्तशस्त्रो नियुक्तीतायुधः सन् । हे अर्जुन । जपोपवासाभिषवैः स्वाध्यायानशनस्नानैर्मुनीनामाचारं समाचरानुतिष्ठ ॥

क्षत्रविशेषे तपःसिद्धिरित्यस्येन तं निदर्शयन्नाह—

करिष्यसे यत्र सुदुश्चराणि प्रसह्यसे गोत्रभिदस्त्रपांसि ।
शिलोच्चयं चारुशिलोच्चयं तमेष क्षमाक्षेष्यति गुह्यकस्त्वाम् ॥२९॥

१ सुदृढेक्षा. २ सुदुष्कराणि.

Digitized by Google

करिष्यत इति ॥ यत्र शिलोच्चये गोत्रभिद इन्द्रस्य मतल्लिकाये मसादाय मुदुधराणि वर्षाणि करिष्यते । धारुशिलोच्चयं रम्यशिखरं तं शिलोच्चयं गिरिमिन्द्रकीलम् ॥ "अद्रिगोत्रगिरिप्रस्थाचलशैलशिलोच्चयाः" इत्यमरः ॥ त्वामेष गुह्यको यक्षः । अनन्तरमेवास्य पुरःसादुर्भावादेष इति निर्देशः । क्षणात्प्रेक्ष्यति प्रापयिष्यति ॥

इति ब्रुवाणेन महेन्द्रसूनुं महर्षिणा तेन तिरोबभूवे ।
तं राजराजानुचरोऽस्य साक्षात्प्रदेशमादेशमिवाधितष्ठौ ॥ ३० ॥

इतीति ॥ इतीत्थं महेन्द्रसूनुमर्जुनं ब्रुवाणेनोक्तवता ॥ "वर्तमानसामीप्ये" इति भूते वर्तमानवत्मलयस्तिरोधानस्याविलम्बसूचनार्थः ॥ तेन महर्षिणा व्यासेन तिरोबभूवेऽन्तर्दधे ॥ भावे लिट् ॥ राजराजो यक्षराजः ॥ "राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः" इति विश्वः ॥ तस्यानुचरः पूर्वोक्तयक्षोऽस्य मुनेरादेशं साक्षादिव प्रदेशमर्जुनाधिष्ठितस्थानमधितष्ठौ । प्राप्त इत्यर्थः ॥ "स्थादिष्वभ्यासेन चाभ्यासस्य" इति षत्वम् ॥

कृतानतिर्व्याहृतसान्त्ववादे जातस्पृहः पुण्यजनः स जिष्णौ ।
इयाय सख्याविव संप्रसादं विश्वासयत्याशु सतां हि योगः ॥ ३१ ॥

कृतेति ॥ स पुण्यजनो यक्षः कृतानतिः कृतप्रणामः । जातस्पृहो जाता स्पृहाकाङ्क्षा यस्य स तथा सन् । व्याहृत उक्तः सान्त्ववादः प्रियवचनं येन तस्मिन् ॥ "व्याहार उक्तिर्लपितम्" इत्यमरः ॥ जिष्णावर्जुने सख्यौ सुहृदीव ॥ "अथ मित्रं सखा सुहृत्" इत्यमरः ॥ संप्रसादं विश्रम्भमियाय प्राप । तथाहि । सतां साधूनां योगः संगतिराशु विश्वासयति विश्वासं जनयति ॥ सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥

अथोष्णभासेव सुमेरुकुक्षान्विहीयमानानुदयाय तेन ।
बृहद्द्युतीन्दुःखकृतात्मलाभं तमः शनैः पाण्डुसुतान्प्रपेदे ॥ ३२ ॥

अथेति ॥ अथोष्णभासा सूर्येणोदयाय पुनरुद्गमाय विहीयमानांस्त्यज्यमानानिति तमःमाप्तिकारणोक्तिः । बृहद्द्युतीन् । सौवर्णत्वादीप्यमानानित्यर्थः । इति तमसः संकोचकारणोक्तिः । सुमेरुकुक्षानिव । अत्र सुमेरुग्रहणं कुक्षानां सौवर्णत्वद्योतनार्थम् । तेनार्जुनेनोदयाय श्रेयसे विहीयमानान्बृहद्द्युतीननर्घविषयकक्षान् ॥ पूर्ववद्विशेषणद्वयस्य प्रयोजनमनुसंधेयम् ॥ पाण्डुसुतान् । चतुर इति शेषः । दुःखेन कृच्छ्रेण कृत उपादित आत्मलाभ उत्पत्तिर्यस्य तत्तथोक्तम् । तेषां विवेकित्वात्कथंचिद्विलम्बोदयमित्यर्थः । तमः श्लोकोऽन्धकारश्च ॥ "तमोऽन्धकारे स्वर्भानौ तमः

१ नरेन्द्रसूनुम्. २ सदाः.

Digitized by Google

शोके गुणान्तरे" इत्युभयत्रापि विश्वः ॥ शनैर्मन्दं अपेदे। तेषां विवेकित्वाद्धीरतेति भावः ॥ अत्र तमःशब्दस्य श्लिष्टत्वाच्छेषानुप्राणितेयमुपमा ॥

असंशयालोचितकार्यनुन्नः प्रेम्णा समानीय विभज्यमानः ।
तुल्यादिभागादिव तन्मनोभिर्दुःखातिभारोऽपि लघुः स मेने ३३

असंशयेति ॥ असंशयमसंदिग्धं यथा तथालोचितं विवेचितं यत्कार्यं तेन नुन्नो निरस्त इति लघुलहेतूक्तिः ॥ "नुदविदोन्दत्रभाग्राहीभ्योऽन्यतरस्याम्" इति निघानत्वम् ॥ कार्यगौरवमालोच्य निरस्त इत्यर्थः । तथापि प्रेम्णा भ्रातृवात्सल्येन ॥ कर्मा ॥ समानीय पुनराकृष्य विभज्यमानः समशोकभागी क्रियमाणः । तुल्येन प्रेम्णा तुल्यदुःखत्वं भवतीति भावः । स पूर्वोक्तो दुःखमेवातिभारोऽपि । अतिभारश्रुतमपि दुःखमित्यर्थः। तन्मनोभिस्तेषां चतुर्णां पार्थानां मनोभिस्तुल्यादिभागादिव । पूर्वोक्तात्सैनकृतात्समविभागादिवेत्यर्थः । वस्तुतस्तु विवेकादेवेति भावः । पुनर्विभागग्रहणं तस्य हेतुत्वोत्प्रेक्षार्थमनुवादादोषः । लघुर्मेनेऽनेन । यथैकोऽनेकधा विभज्य बहुभिरुह्यमानो महानपि भारो लघुर्मन्यते तद्वदित्यर्थः ॥

अथैवं प्रेम्णाकृष्यमाणमपि शोकं विवेको निर्जिगायेत्याह—

धैर्येण विश्वास्यतया महर्षेस्तीव्रादरातिप्रभवाच्च मन्योः ।
वीर्यं च विद्वत्सु सुते मघोनः स तेषु न स्थानमवाप शोकः ॥३४॥

धैर्येणेति ॥ धैर्येण तेषां निसर्गतो निर्विकारचित्तत्वेन तथा महर्षेर्व्यासस्य । भवर्तकत्वेति शेषः । विश्वास्यतया । श्रद्धेयवचनत्वेनेत्यर्थः । अरातिप्रभवादरातिहेतुकाच्चीव्रादुःसहान्मन्योः क्रोधादुतोस्तथार्जुनप्रभावपरिज्ञानाच्चेति । हेत्वन्तरं विशेषणमुखेनाह— मघोनः सुतेऽर्जुने वीर्यम् ॥ "न लोक—" इत्यादिना षष्ठीप्रतिषेधः ॥ विद्वत्सु ज्ञातवत्स्विति यावत् ॥ "विदेः शतुर्वसुः" इति वैकल्पिको वस्वादेशः ॥ तेषु पार्थेषु स शोकः स्थानं स्थितिं नावाप न आप ॥

तान्भूरिधाम्नश्चतुरोऽपि दूरं विहाय यामानिव वासरस्य ।
एकौघभूतं तदशर्म कृष्णां विभावरीं ध्वान्तमिव प्रपेदे ॥ ३५ ॥

तानिति ॥ तत्पार्थस्थानवच्छर्म सुखम् ॥ "शर्मशातसुखानि च" इत्यमरः ॥ तद्विरुद्धमशर्म दुःखम् ॥ "नञ्" इति नञ्समासः ॥ भूरिधाम्नस्तेजस्विन इति हानिहेतुगर्भोक्तिः । चतुरस्तान्पार्थानपि वासरस्य भूरिधाम्नश्चतुरोऽपि यामान्प्रहरानिव । दूरं विहाय त्यक्त्वैकौघभूतमेकराशिभूतं सत् ॥ "प्रेम्णादयः कृतादिभिः" इत्यत्र कर्मणा-

१ अभिप्रेते.

Digitized by Google

रवः । " श्रेण्यादिराकृतिगणः " इति शाकटायनः ॥ कृष्णां विभावरीं कृष्णपक्षरात्रिं ध्वान्तमिव । कृष्णां द्रौपदीं ग्रपेदे ग्राप ॥

तुषारलेखाकुलितोत्पलाभे पर्यश्रुणी मङ्गलभङ्गभीरुः ।
अगूढभावापि विलोकने सा न लोचने मीलयितुं विषेहे ॥ २६ ॥

तुषारेति ॥ सा द्रौपदी विलोकनेऽर्जुनावलोकनेऽप्यूढभावागूढाभिप्रायापि । स्फुटाभिलाषिणीति यावत् ॥ " भावो लीलाक्रियाचेष्टाभूस्वभिप्रायजन्तुषु " इति वैजयन्ती ॥ मङ्गलभङ्गभीरुर्मङ्गलहानेर्भीता सती । पर्यश्रुणी परिगताश्रुके । बाष्पाकुले इत्यर्थः । अतएव तुषारलेखाकुलितोत्पलाभे हिमबिन्दुसहितेन्दीवरसन्निभे इत्युपमालंकारः । लोचने मीलयितुं न विषेहे न शशाक । अश्रुणोर्दृष्टिावरकत्वेऽपि तन्निपातस्यायङ्गलत्वाच्चक्षिवर्तकं निमीलनं सा न चकारेत्यर्थः ॥

अकृत्रिमप्रेमरसाभिरामं रामार्पितं दृष्टिविलोभि दृष्टम् ।
मनःप्रसादाञ्जलिना निकामं जग्राह पाथेयमिवेन्द्रसूनुः ॥ २७ ॥

अकृत्रिमेति ॥ इन्द्रसूनुरर्जुनः । क्रियया निवृत्तः कृत्रिमः ॥ " द्विगतः क्त्रिः " इति क्त्रिः । " त्रेर्मन्निलचश्च " इति मन्प्रत्ययः ॥ तद्विरुद्धम् । प्रेमैव रसः । अकृत्रिमेण प्रेमरसेनाभिरामम् । अन्यत्र प्रेमरसेन मधुरादिना चाभिरामम् । रामया रमण्यार्पितम् । दृष्टिं विलोभयतीति दृष्टिविलोभि । दृष्टिप्रियमित्यर्थः । दृष्टं दर्शनम् ॥ " नपुंसके भावे क्तः " ॥ मनःप्रसादः । प्रसन्नमन इत्यर्थः । सोऽञ्जलिरिवेत्युपमितसमासः । तेन मनःप्रसादाञ्जलिना । पथि साधु पाथेयं शम्बलमिव ॥ " पथ्यतिथिवसतिस्वपतेर्ढञ् " ॥ निकाममतिशयेन जग्राह । रामार्पितं पाथेयं पथि क्षेमाय भवतीत्यानमः ॥

धैर्यावसादेन हृतप्रसादा वन्यद्विपेनेव निदाघसिन्धुः ।
निरुद्धबाष्पोदयसन्नकण्ठमुवाच कृच्छ्रादिति राजपुत्री ॥ २८ ॥

धैर्येति ॥ वन्यद्विपेन । वन्यग्रहणमुच्छृङ्खलत्वद्योतनार्थम् । निदाघसिन्धुर्ग्रीष्मनदीव । निदाघग्रहणं दीर्घत्वद्योतनार्थम् । धैर्यावसादेन धैर्यभ्रंशेन ॥ कृच्छ्रात् ॥ हृतप्रसादा । क्षोभं गमितेत्यर्थः । राजपुत्री क्षत्रियसुता द्रौपदी । अतः क्षात्रयुक्तमेव वक्ष्यतीति भावः । निरुद्धबाष्पोदयं संरुद्धरोदनं सन्नकण्ठं हीनकण्ठस्वरम् ॥ अथ तयोरुभयोः कृतवह्वीक्षोः क्रियाविक्षेपणयोर्विक्षेपणसमासः ॥ कृच्छ्रात्कर्थाचिदिति वक्ष्यमाणमुवाच ॥

मन्नां द्विषच्छस्त्रनि पङ्कभूते संभावनां भूतिमिवोद्वरिष्यन् ।
आधिद्विषामा तपसां प्रसिद्धेरस्मद्विना मा भृशमुन्मनीभूः ॥ २९ ॥

१ भीवा.

Digitized by Google

मग्नामिति ॥ पङ्कभूते पङ्कोपमिते ॥ " भूतं स्मादौ पिशाचादौ न्याय्ये सत्योप मानयोः " इति विश्वः ॥ द्विषच्छमनि शत्रुकपटे मग्नाम् । दुरुद्धरामित्यर्थः । तेषा वर्मा योग्यताम् । गौरवमिति यावत् । भूतिं संपदमिव ॥ " भूतिर्भस्मनि संपदि " इत्यमरः ॥ उद्धरिष्यन् । उद्धारकस्त्वमेवेति शेषः । आधिद्विषां दुःखच्छिदां तप सामा मसिद्धेः सम्यक्सिद्धिपर्यन्तमस्महिना । अस्माभिर्विनेत्यर्थः ॥ " पृथग्विना— " इत्यादिना विकल्पात्पञ्चमी ॥ भूतं मोम्मनीथूः । अस्महिरहादुर्मना मा भूरित्यर्थः । दौर्मनस्यस्य तपःपरिपन्थित्वादिति भावः ॥ "माङि—" इत्याशीरर्थे लुङ् । " न माङ्योगे " इतडागममतिषेधः ॥ अनुन्मना उन्मनाः संपद्यमान उन्मनी ॥ अभूतत द्भावे च्विः । " अकर्मनशब्देतोरहोरजसां लोपश्च " इति सकारलोपः । " अस्त्र्यौ " इतीकारः ॥

अथानीत्सुक्यदाढर्यार्थं तस्य सर्वार्थसिद्धिनिदानत्वमाह—

यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसंस्थामतिवर्तितुं वा ।
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः ॥ ४० ॥

यश इति ॥ यशोऽधिगन्तुम् । कीर्तिं लब्धुमित्यर्थः । सुखस्य लिप्सया लब्धुमि च्छया वा । मनुष्यसंस्थां मनुष्यगणनामतिवर्तितुमतिक्रमितुम् । अमानुषं कर्म कर्तुं वे त्यर्थः । अभियोगभाजामभिनिवेशवतां निरुत्सुकानाम् । अदुर्मनायमानानामित्यर्थः । सिद्धिः पूर्वोक्तयशःसुखायर्थसिद्धिः समुत्सुकेवातुरकान्तेवाङ्कमन्तिकमुपैति । तस्मादस्महिरहदुःखमातपःसिद्धेः सोढव्यमिति भावः ॥

अथास्य मन्यूद्दीपनद्वारा तपःप्रहर्षि मथयितुमरिनिकारं तावच्चतुर्भिरुद्घाट यति—

लोकं विधात्रा विहितस्य गोप्तुं क्षत्रस्य मुष्णन्वसु जैत्रमोजः ।
तेजस्विताया विजयैकवृत्तेर्निघ्नन्प्रियं प्राणमिवाभिमानम् ॥ ४१ ॥

लोकमिति ॥ विधात्रा ब्रह्मणा लोकं गोप्तुं विहितस्य सृष्टस्य क्षत्रस्य क्षत्रियजातेः संबन्धि । जयसाधीलं जेतृ तदेव जैत्रम् ॥ जेतृशब्दान्नृजन्तात् "मन्त्रादिभ्यश्च" इति स्वा र्थेऽञ्प्रत्ययः ॥ ओजो बलं दीप्तिर्वा ॥ "ओजो बले च दीप्तौ च" इति विश्वः ॥ तदेव वसु धनमिति रूपकालंकारः । मुष्णन्नपहरन् । अरिनिकृतस्य कृतः क्षात्रं तेज इति भावः । किंच विजयैकहृत्तेर्विजयैकजीवितायाः । "क्षत्रियस्य विजितम्" इति स्मर न्नादिति भावः ॥ "हृषिवर्तनजीवने" इत्यमरः ॥ तेजस्विताया स्तेजस्विनामित्यर्थः । तेजस्विताव्यवोतनार्थं भावप्रधानो निर्देशः । प्रियं प्राणमिव । प्राणसममित्यर्थः । अभिमाननामकारं निघ्नन्नुच्चन् । तेजस्विनां प्राणहानिमाया मानहानिरिति भावः ॥

Digitized by Google

अधिक्षेपायतसहनं तेजः प्राणात्ययेष्वपि न त्याज्यमित्याह—

व्रीडानतैरासजनोपनीतः संशय्य कुच्छ्रेण नृपैः प्रपन्नः।
वितानभूतं विततं पृथिव्यां यशः समूहन्निव दिग्विकीर्णम्॥४२॥

व्रीडेति॥ पुनश्च। आसजनोपनीतः आवितः। प्रापित इत्यर्थः। तथापि संशय्य संदिग्ध। असंभावितदुःखेति भावः। व्रीडानतैः। जुगुप्सितदृष्टान्तभवनादिति भावः। नृपैर्देशान्तरस्थैः कुच्छ्रेण प्रपन्नः प्राप्तः। आसोक्तत्वात्कर्थंचिद्विश्वस्त इत्यर्थः। यः श्रव्यतामपि दुःसहः किमुतानुभवतामिति भावः। इत्येषा पूर्वेषां व्याख्या॥ अन्यथापि व्याख्यायते। आसजनोपनीतो ज्ञातिकृतः संशय्य कथमिदमन्याय्यमुपेक्ष्यमिति विचार्य व्रीडानतैः। जुगुप्सितकर्मदर्शनादिति भावः। नृपैः सभास्थैः कुच्छ्रेण प्रपन्नोऽङ्गीकृतः। गोत्रकलहेषु मध्यस्थैरुदासितव्यमिति बुद्ध्योपेक्षित इत्यर्थः। पक्षद्वयेऽपि प्रपन्न इत्यत्रासजनोपनीतत्वस्य पदार्थभूतस्य विशेषणगत्या हेतुत्वोक्त्या काव्यलिङ्गमलंकारः। पृथिव्यां वितानभूतमुल्लोचतुल्यम्॥ "अल्ली वितानमुल्लोचः" इत्यमरः॥ दिग्विकीर्णं दिगन्तलग्नम्। वितानमपि दिगन्तलग्नमिति भावः। विततं ग्रथितं यशः समूहन्निव संकोचयन्निवेत्युत्प्रेक्षा। अरातिपरिभूतस्य हृतः कीर्तिरिति भावः॥

वीर्यावदानेषु कृतावमर्षस्तन्वन्नभूतामिव संप्रतीतिम्।
कुर्वन्प्रयामक्षयमायतीनामर्कत्विषामद्य इवावशेषः॥ ४३॥

वीर्येति॥ पुनश्च। वीर्याण्येवावदानानि तेषु कृतावमर्षः कृतास्कन्दनः। पुराकृतपराक्रमोद्भूतान्यपि प्रयुञ्जतित्यर्थः॥ "अवदानं कर्म वृत्तम्" इत्यमरः॥ अतएव संप्रतीतिं रूपातिम्॥ "प्रतीते ग्रथितस्यातिवित्तविज्ञातविश्रुताः" इत्यमरः॥ अभूतामविद्यमानामिवेत्युत्प्रेक्षा। ततोऽप्यसत्त्वमुत्प्रेक्ष्यते। तन्वन्कुर्वन्। पुनश्चाद्योऽवशेषो दिनान्तोऽर्कत्विषामायतीनामुत्तरकालानां प्रयामक्षयं दैर्घ्यनाशं कुर्वन्निति श्रौती पूर्वेयमुपमा। अरिनिराकृतस्य हृतश्रियावस्थानमिति भावः॥

प्रसह्य योऽस्मासु परैः प्रयुक्तः स्मर्तुं न शक्यः किमुताधिकर्तुम्।
नवीकरिष्यत्युपशुष्यदार्द्रः स त्वद्विना मे हृदयं निकारः॥ ४४॥

प्रसह्येति॥ पुनश्च। परैः शत्रुभिरस्मासु प्रसह्य प्रयुक्त आचरितो यो निकारः परिभवः केशाकर्षणरूपः स्मर्तुं न शक्यः। अधिकर्तुमनुभवितुं किमुत। यस्य स्मरणमपि दुःसहमनुभवस्तु सुतरां दुःसह इति किमु वक्तव्यमित्यर्थः। स निकारस्त्वद्विना त्वया विना॥ "पृथग्विना—" इत्यादिना पञ्चमी॥ आर्द्रः सन्कृतश्चिदपि-

१ कृताभिमर्शः. २ वक्तुम्.

Digitized by Google

भूतात्पुराजमहार इव । त्वद्विरहदुःखात्पुनर्नवीकरिष्यति । नवीभविष्यतीत्यर्थः । उपशुष्यत् । त्वया विना शुष्कमिति भावः । दुःखस्तम्भनं शोषपदार्थो मे हृदयं नवीकरिष्यत्यार्द्रीकरिष्यति । व्रणमिवेति भावः । दुःखितस्य पुनर्दुःखोपचयः शोषमापद्यमपि दुःखहेतुं पुनरुद्भटयतीत्यर्थः ॥ अत्र शोषादिविशेषणसाम्याद्भग्नाशमस्तुत्यर्थमतीतेः समासोक्तिरलंकारः ॥

पुनः प्रकारान्तरेण मन्युमुद्दीपयति "प्राप्तः" इत्यादिभिस्त्रिभिः । तत्र वक्ष्यमाणमस्यभिज्ञानहेतुमिर्धनंजयं विशिनष्टि—

प्राप्तोऽभिमानव्यसनादसह्यं दन्तीव दन्तव्यसनाद्विकारम् ।
द्विषत्प्रतापान्तरितोरुतेजाः शरद्घनाकीर्ण इवादित्यः ॥ ४५ ॥

अभिमानस्य व्यसनाङ्गेषात् ॥ "व्यसनं विपदि भ्रंशे दोषे कामजकोपजे" इत्यमरः ॥ दन्तव्यसनादन्तभङ्गादन्तीवासह्यं विकारं वैरूप्यं प्राप्तः । अतो न मत्स्यभिज्ञायत इति भावः । एवमुत्तरत्राप्यनुसंधेयम् । पुनश्च । द्विषत्प्रतापेन शत्रुतेजसान्तरितं तिरस्कृतमुरु तेजः प्रतापो यस्य स तथोक्तः । अतएव शरद्घनाकीर्णः शरत्संपच्छब्दोऽह आदित्य इव स्थितः । तद्वदेवामत्स्यभिज्ञायमान इत्यर्थः । मध्याह्नस्तु नेषावरणेऽपि कर्वचित्मत्स्यभिज्ञायत एवेत्याशयेनोक्तमादित्यरिति ॥

सव्रीडमन्यैरिव निष्क्रियत्वान्नात्यर्थमस्त्रैरवभासमानः ।
यशःक्षयक्षीणजलार्णवाभस्वमन्यमाकारमिवाभिपन्नः ॥ ४६ ॥

सव्रीडेति ॥ पुनश्च । निष्क्रियत्वादकर्मण्यत्वात्सव्रीडमन्यैरिव सव्रीडैरतएव कन्दैरवदुभिरिव स्थितैरित्युत्प्रेक्षा ॥ "मृदाल्पापदुनिर्भाग्या मन्दाः स्युः" इत्यमरः ॥ अस्त्रैरस्त्रं नावभासमानः न प्रकाशमानः । पूर्वं तु नैवमिति भावः । किंतु यशःक्षयादेतोः क्षीणजलो योऽर्णवस्तदाभस्तत्सदृशस्वमन्यमाकारमभिपन्नः प्राप्त इव स्थित इवेत्युत्प्रेक्षा ॥ तस्य क्षीणजलार्णवाभ इत्युपमासंसृष्टिः ॥

दुःशासनाकर्षरजोविकीर्णैरभिर्विनाथैरिव भाग्यनाथैः ।
केशैः कदर्थीकृतवीर्यसारः कश्चित्स एवासि धनंजयस्त्वम् ॥४७॥

दुःशासनेति ॥ पुनश्च । दुःशासनस्य दुर्तुराकर्ष आकर्षणं स एव रजो धूलिः । आकिञ्चन्यहेतुत्वादिति भावः । तेन विकीर्णैर्विशिष्टैरतएव विनाथैरिव स्थितवतां मुख्याकर्मतरत्वमायत्त्वादनाथैरिव । स्थितैरित्युत्प्रेक्षा । अन्यथा कथमियं दुर्दशेति भावः । किंतु भाग्यनाथैर्दैवमात्रशरणैः । अन्यथा स्वरूपमपि लुप्येतेति भावः । धूलिः परिदृश्यमानैः । असंयमितैरिति भावः । केशैः शिरोरुहैः कृत्सितोऽर्थो

१ मवाम. २ अवाम्.

Digitized by Google

वस्तु कदर्थः॥ "अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु" इत्यमरः॥ "क्वोः कचत्पुरुषेऽपि" इति कुत्सदस्य कदादेशः॥ कदर्थीकृतौ गर्ह्यार्थीकृतौ वीर्यसारौ शौर्यबले यस्य स तथोक्तः। इत्थं पूर्वविलक्षणस्त्वं स एव धनंजयोऽसि कश्चित्॥ "कश्चित्कामप्रवेदने" इत्यमरः॥ स एव चेत्त्वं नैवमस्मात्पुरुषेक्षस इति भावः॥

अथाप्युपेक्षणे दोषमाह—

स क्षत्रियत्राणसहः सतां यस्तत्कार्मुकं कर्मसु यस्य शक्तिः।
वहन्द्वयीं येद्यफलेऽर्थजाते करोत्यसंस्कारहतामिवोक्तिम्॥ १८॥

स इति॥ क्षतात्त्रायत इति क्षत्रं क्षत्रियकुलम्॥ "सुपि" इति योगविभागात्कमत्ययः। प्रषोदरादित्वात्पूर्वपदस्याकारलोपः। अथवा क्षदिति क्विन्तोपपदात्कमत्ययः॥ क्षत्रे जातः क्षत्रियः॥ "क्षत्राद्घः" इति घमत्ययः॥ कर्मणे प्रभवतीति कार्मुकम्॥ "कर्मण उकञ्" इत्युकञ्प्रत्ययः॥ एवं स्थिते वाक्यार्थः कथ्यते। यः सतां साधूनाम्। सहत इति सहः॥ पचाद्यच्॥ यत्त्राणस्य सहत्राणसहो रक्षणक्षमः स एव क्षत्रियशब्दवाच्यः। तथा यस्य कार्मुकस्य कर्मसु रणक्रियासु शक्तिः। अस्तीति शेषः। तदेव कार्मुकशब्दवाच्यम्। अत्रैवेती शब्दौ हृस्वौ। नान्यत्रेत्यर्थः। एवं स्थिते द्वयीं द्विविधामुक्तिम्। द्वावियौ क्षत्रियकार्मुकशब्दावित्यर्थः। अफले। पूर्वोक्तावयवार्थशून्यावित्यर्थः। अर्थजाते। स्वाभिधेयसामान्यजातिमात्र इत्यर्थः॥ "जातं जात्योषजन्मसु" इति विश्वः॥ वहन्वर्तयन्। संस्कारहतामप्युत्पत्तिदूषितामिव करोतीत्युत्प्रेक्षा। तस्मात्त्वमस्मद्रक्षणेनोक्तदोषादात्मानं मोचयस्वेत्यर्थः॥

अथ त्वद्गुणा अपि नोज्जीवयेयुरित्याह—

वीतौजसः संनिधिमात्रशेषा भवत्कृतां भूतिमपेक्षमाणाः।
समानदुःखा इव नस्त्वदीयाः सरूपतां पार्थ गुणा भजन्ते॥ १९॥

वीतेति॥ हे पार्थ। वीतौजसो निष्प्रभाः संनिधिमात्रशेषाः सत्तामात्रावशिष्टा भवत्कृतां भवता करिष्यमाणाम्॥ "आशंसायां भूतवच्च" इति भूतवत्त्वमत्ययः॥ भूतिमभ्युदयमपेक्षमाणास्त्वदीया गुणाः समानदुःखाः समदुःखभाज इव नोऽस्माकं सरूपतां वीतौजस्त्वादिसाधर्म्यं भजन्त इत्युपमा। सा च समानदुःखा इवेत्युत्प्रेक्षया वीतौजस्त्वादिसंभावितयानुमाणितेत्यनुसंधेयम्॥

तथापि ममैव क्रोऽयं भार इत्यत आह—

आक्षिप्यमाणं रिपुभिः प्रमादान्नागैरिवाद्धनसटं मृगेन्द्रम्।
त्वां धूरियं योग्यतयाधिरूढा दीप्त्या दिनश्रीरिव तिग्मरश्मिम्॥ २०

१ अपि. २ अपेक्ष्यमाणा. ३ सामान्यदुःखाः. ४ समन्तात्. ५ घर्मरश्मिम्.

Digitized by Google

आश्लिष्येति ॥ प्रमादात्मद्वादीनत्वात् । नतु दौर्बल्यादिति भावः । रिपुभिराश्लिष्यमाणमधिश्लिष्यमाणमतएव प्रमादात् । नागैर्गजैः ॥ "ग्रहेभादिगजा नागाः" इति वैजयन्ती ॥ आसूनसटमाश्लिष्टकेसरम् ॥ "सटा जटाकेसरयोः" इति विश्वः ॥ क्रमेन्द्रं सिंहमिव स्थितम् । स्वामिनं धूः कार्यभारः । तिग्मरश्मिं सूर्यं दीक्ष्या दिनश्रीरिव । योग्यतया निर्वाहकतयाधिरूढारूढवती ॥ कर्तरि क्तः ॥ स्वदधीनेत्यर्थः ॥

पूर्वं निर्व्यवसायत्वं "स क्षत्रियः" इत्यादिना दोष उक्तः । संप्रति व्यवसायिनो गुणमाह—

करोति योऽशेषजनातिरिक्तां संभावनामर्थवतीं क्रियाभिः ।
संसत्सु जाते पुरुषाधिकारे न पूरणी तं समुपैति संख्या ॥ ५१ ॥

करोतीति ॥ यः पुमानशेषजनादितरजनादतिरिक्तामधिकाम् । सर्वातिशायिनीमित्यर्थः । संभावनां योग्यतां क्रियाभिश्चरितैरर्थवतीं सफलां करोति । तं पुमांसं संसत्सु सभासु ॥ "सभासमितिसंसदः" इत्यमरः ॥ पुरुषाधिकारे योग्यपुरुषगणनाप्रस्तावे जाते सति । पूर्यतेऽनेनेति पूरणी संख्या द्वित्वादिसंख्या न समुपैति न गच्छति । अद्वितीयो भवतीत्यर्थः । तस्मादसाधारणलाभाय त्वयापि महानुत्साह आस्थेय इति भावः ॥

अथ द्वाभ्यां क्षुब्धमिषक्षस्य शोषितस्यार्जुनस्य कर्तव्यमुपदिशति—

प्रियेषु यैः पार्थ विनोपपत्तेर्विचिन्त्यमानैः क्रममेति चेतः ।
तव प्रयातस्य जयाय तेषां क्रियादघानां मघवा विघातम् ॥ ५२ ॥

प्रियेष्विति ॥ हे पार्थ । प्रियेष्वस्मासु विषय उपपत्तेः कारणादिनैव विचिन्त्यमानैरकस्मादेवागच्छद्भिर्यैरुपेक्षितैः क्रमं खेदमेति । जयाय प्रयातस्य तव संबन्धिनां तेषामघानां व्यसनानाम् ॥ "दुःखैनोव्यसनेष्वघम्" इत्यमरः ॥ मघवेन्द्रः । योऽस्मानिरुपास्यत इति भावः । विघातं निवारणं क्रियात्करोतु ॥ आशिषि लिङ् ॥ तस्मादस्मच्चिन्तया न चेतः खेदयितव्यं जयार्थिना त्वया । अन्यथा तदसंभवादिति भावः ॥

मागाधिरायैकचरः प्रमादं वसन्नसंबाधशिवेऽपि देशे ।
मात्सर्यरागोपहतात्मनां हि स्खलन्ति साधुष्वपि मानसानि ॥ ५३ ॥

मेति ॥ असंबाधोऽसंकटः । विजन इत्यर्थः ॥ "संकटं ना तु संबाधः" इत्यमरः ॥ शिवो निर्बाधः ॥ द्वयोरप्यतरल चित्तेष्वत्यविवक्षायां विशेषणसमासः ॥ अस्मिन्नसंबाधशिवेऽपि देशे चिराय चिरमेकचर एकाकी वसन्प्रमादं दौर्बल्यं

१ क्षत्रियः. २ उपपत्त्या.

Digitized by Google

भागाः ॥ "इणो गा लुङि" इति गादेशः ॥ मन्नु निःस्पृहस्य ममाकिंचित्करः प्रमाद इति चाप्यभिप्रायेणाह—मात्सर्येति ॥ मत्सर एव मात्सर्यं द्वेषो रागः स्नेहस्तान्यामुपहतात्मनां रागद्वेषदूषितस्वभावानां मानसानि मनांसि साधुषु सज्जनेष्वपि विषये स्खलन्ति विकुर्वन्ते हि ॥ अत्र प्रमादनिषेधलब्धाप्रमादरूपकारणेनार्थमात्मिकरूपकार्यस्य व्यतिरेककारणसमर्थनाद्विधर्म्येण कार्यकारणसमर्थनरूपोऽर्थान्तरन्यासः ॥

निगमयति—

तदाशु कुर्वन्वचनं महर्षेर्मनोरथान्नः सफलीकुरुष्व ।
प्रत्यागतं त्वास्मि कृतार्थमेव स्तनोपपीडं परिरब्धुकामा ॥ ५४॥

तदिति ॥ तच्चस्मात्कारणात् । आशु शीघ्रं महर्षेर्वचनं कुर्वन् । तपस्यन्निति शेषः । नोऽस्माकं मनोरथान्सफलीकुरुष्व । अरिनिर्यातनेनास्मान्प्रतिष्ठापयेत्यर्थः ॥ सार्थनायां लोट् ॥ किंच कृतार्थं कृतकृत्यं प्रत्यागतमेव त्वा त्वाम् ॥ "स्वामौ द्वितीयायाः" इति त्वादेशः ॥ स्तनयोरुपपीड्य स्तनोपपीडम् ॥ "सप्तम्यां चोपपीडरुधकर्षः" इति णमुल् ॥ परिरब्धुं कामो यस्याः सा परिरब्धुकामास्मि । आश्लिष्टुमिच्छामीत्यर्थः ॥ "तुंकाममनसोरपि" इति मकारलोपः ॥ मात्कार्यसिद्धेः प्रमदाश्लिङ्गनमपि न भीतिदमिति भावः ॥

उदीरितां तामिति यज्ञसेन्या नवीकृतोद्बाहितविप्रकाराम् ।
आसाद्य वाचं स भृशं दिदीपे काष्ठामुदीचीमिव तिग्मरश्मिः ५५

उदीरितामिति । सोऽर्जुन इतीत्थं यज्ञसेनसुतापत्येन स्त्रिया द्रौपद्योदीरितामुक्ताम् । नवीकृतः पुनरुद्बाहनेन तथा प्रत्यायितोऽतएवोद्बाहितो मनसि निधापितश्च विप्रकारः परिभवो यया सा तां वाचमासाद्य । आकर्ण्येत्यर्थः । उदीचीं काष्ठां दिशम् ॥ "दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः" इत्यमरः ॥ तिग्मरश्मिरिव । भृशं दिदीपे जज्वाल । शुक्रोपेत्यर्थः ॥

अथाभिपश्यन्निव विद्विषः पुरः पुरोधसारोपितहेतिसंहतिः ।
बभार रम्योऽपि वपुः स भीषणं गतः क्रियां मन्त्र इवाभिचारिकीम् ५६

अथेति ॥ अथ विद्विषः शत्रून्पुरोऽभिपश्यन्निव स्थितस्तया पुरोधसा धौम्येनारोपिता समन्त्रं समाहिता हेतिसंहतिरायुधकलापो यस्य स तथोक्तः ॥ "हेतिर्ज्वालायुधे" इति वैजयन्ती ॥ सोऽर्जुनो रम्यः सौम्यः[1] सन्नपि । अभिचारः परहिंसा प्रयोजनं यस्याः साभिचारिकी ॥ "तदस्य प्रयोजनम्" इति ठक् ॥ तां क्रियां

१ भ्रुवोपपीडम्.

Digitized by Google

मतः । अभिचारकर्मणि नियुक्त इत्यर्थः । मन्त्र इव । रम्यः मङ्गत्या रमणीयः । भीषयत इति भीषणम् ॥ नन्द्यादित्वाल्लुमत्ययः ॥ वपुर्बभार । मन्त्राम्नो मन्त्रः मयोगभेदादिव । सोऽप्यवस्थाभेदाद्भीषणो वपुरेत्यर्थः ॥

उक्तमायुधारोपणं विद्युन्मन्मस्थानमाह त्रिभिः—

अविलङ्घ्यविकर्षणं परैः प्रथितज्यारवकर्म कार्मुकम् ।
अगतावरिदृष्टिगोचरं शितनिस्त्रिंशयुजौ महेषुधी ॥ ५७ ॥

अविलङ्घ्येति ॥ शत्रुभिरविलङ्घ्यमनतिक्रमणीयं विकर्षणं यस्य तत् । अमोघाकर्षणमित्यर्थः । किंच प्रथितो ज्यारवो गुणध्वनिः कर्म बाणमोक्षणादिकं च यस्य तत्कार्मुकं चोद्वहन्नित्यन्वयः । तथारीणां दृष्टिगोचरं दृष्टिपथमगतौ । आदेव्यनिर्वर्तित्वादस्येति भावः । निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः ॥ उमसये संख्यायास्तत्पुरुषस्योपसंख्यानात्समासाभ्यः ॥ तेन शितेन तीक्ष्णेन युक्त इति शितनिस्त्रिंशयुजौ ॥ " सत्सूद्विष–" इत्यादिना क्विप् ॥ महेषुधी महानिषङ्गौ । इषवो धीयन्तेऽनयोरिति विग्रहः ॥ " कर्मण्यधिकरणे च " इति किमत्ययः ॥ " तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः । तूणौ खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः" इत्यमरः ॥

यशसेव तिरोदधन्मुहुर्महसा गोत्रभिदायुधक्षतीः ।
कवचं च सरत्नमुद्वहञ्ज्वलितज्योतिरिवान्तरं दिवः ॥ ५८ ॥

यशसेति ॥ किंच । गोत्रभिद इन्द्रस्यायुधक्षतीर्वज्रप्रहाररन्ध्राणि । क्षान्दवदार्षमिति भावः । महसा तत्कान्त्या यशसेव मूर्तया कीर्त्येव मुहुस्तिरोदधदाच्छादयत् । सरत्नं रत्नसहितमतएव ज्वलितज्योतिर्दीप्ततारकम् ॥ " ज्योतिस्तारारुचिषा ज्वाका द्यद्युभार्थवरासु" इति वैजयन्ती ॥ दिवोऽन्तरं नभोमध्यमिवावस्थितम् ॥ " अन्तरं परिधानीये वासे स्त्रीयेऽन्तरात्मनि । छीवे मध्ये प्रकाशे च " इति वैजयन्ती ॥ कवचं चोद्वहन् ॥

अलकाधिपभृत्यदर्शितं शिवमुर्वीधरवर्त्म संप्रयान् ।
हृदयानि समाविवेश स क्षणमुद्बाष्पदृशां तपोभृताम् ॥ ५९ ॥

अलकेति ॥ सोऽर्जुनोऽलकाधिपभृत्येन यक्षेण दर्शितमतः शिवं निर्बाधमुर्वीधरवर्त्म हिमवन्मार्गं प्रति संप्रयान्प्रगच्छन् । क्षणमुद्बाष्पदृशां वियोगदुःखात्साश्रुनेत्राणां तपोभृतां हैतवनिवासिनां तपस्विनां हृदयानि समाविवेश । खेदयामासेत्यर्थः ॥ संपूर्वस्य विशतेः खेदार्थत्वमवसेयम् ॥

Digitized by Google

अनुजगुरथ दिव्यं दुन्दुभिध्वानमाशाः
सुरकुसुमनिपातैर्व्योम्नि लक्ष्मीर्वितेने ।
प्रियमिव कथयिष्यन्नालिलिङ्ग स्फुरन्तीं
भुवमनिभृतवेलावीचिबाहुः पयोधिः ॥ ६० ॥

अनुजगुरिति ॥ अथाशा दिशः । दिवि भवं दिव्यम् ॥ "दिवादिभ्यो यत्" ॥ दुन्दुभिध्वानमनुजगुर्दध्वनुः ॥ अनुगायतेर्लिट् ॥ व्योम्नि सुरकुसुमनिपातैर्लक्ष्मीर्वितेने । पुष्पवृष्टिमाजनिष्टेत्यर्थः । किंच । अनिभृताश्चञ्चला वेलायां कूले या वीचयस्ता एव बाहवो यस्य स तथोक्तः ॥ "वेला कूलविकारयोः" इति शाश्वतः॥ पयोधिः स्फुरन्तीमुल्लसन्तीं हर्षात्स्पन्दमानां च भुवं प्रियमिहं भारावतारणरूपं कथयिष्यन्निव । कथयितुमिवेत्यर्थः ॥ "लृट् शेषे च" इति चकारात्क्रियार्थायां क्रियायां लृट् ॥ आलिलिङ्ग । सर्वं चेदं शिवं दैवकार्यमहत्त्वादस्येति भावः ॥ अत्र विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वात्समासोक्तिरलंकारः । तत्र चापकृतयोर्भूमिसमुद्रयोः प्रतिपन्नाभ्यां नायकाभ्यां भेदे लक्षणातिशयोक्तिवधादालिङ्गनोक्तिरिति रहस्यम् । एवमतिशयोक्त्यनुप्राणिता समासोक्तिः । प्रियकथनात्स्नेहवज्जीववति तदङ्गभावं भजत इत्युभयोरङ्गाङ्गिभावेन संकर इति विवेचनीयम् ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथसमाख्यया
व्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये
वर्णनप्रस्थानो नाम तृतीयः सर्गः ।

चतुर्थः सर्गः ।

ततः स कूजत्कलहंसमेखलां सपाकसस्याहितपाण्डुतागुणाम् ।
उपाससादोपजनं जनप्रियः प्रियामिवासादितयौवनां भुवम् ॥ १ ॥

तत इति ॥ ततः प्रस्थानानन्तरं जनप्रियः सोऽर्जुनः । कलहंसा मेखला इवेत्युपमितसमासः । अन्यत्र कलहंसा इव ता इति विशेषणसमासः । कूजन्ती कलहंसमेखला यस्यास्ताम् । सह पाकेन वर्तन्त इति सपाकानि सस्यानि तैः सस्यैराहितः संपादितः पाण्डुतैव गुणो यस्यास्तां भुवमासादितयौवनां प्राप्तयौवनां प्रियामिव । उपजनं जनसमीपे । अन्यत्र सप्तमीसमासम् ॥ समीपार्थेऽव्ययीभावः ॥ उपाससादोपगतवान् ॥ उपमालंकारः ॥

१ नादिनीम्.

Digitized by Google

विनम्रशालिप्रसवौघशालिनीरपेतपङ्काः ससरोरुहाम्भसः ।
ननन्द पश्यन्नुपसीम स स्थलीरुपायनीभूतशरद्रुनश्रियः ॥ २ ॥

विनम्रेति ॥ सोऽर्जुनो विनम्रशालिप्रसवौघशालिनीरवनतकलमकलशोमशोभिनीरपेतपङ्का निष्पङ्काः ससरोरुहाण्यम्भांसि यासु तासपोक्ताः । उपायनीभूता अर्जुनं प्रत्युपहारीभूताः शरद्रुनश्रियः पूर्वोक्तशरदृर्मसंपदो यासु ताः । उपसीम ग्रामसीमासु ॥ विभक्त्यर्थेऽव्ययीभावः । समासान्तविधेरनित्यत्वात् "अनश्च" इति समासान्तो न भवति । केचित्तु "अप्यन्येषां काँठनवपुषां दुर्गमे ग्रामसीम्नि" इत्यादौ नपुंसकमयोगदर्शनात् "नपुंसकादन्यतरस्याम्" इति विकल्पाच्च साधुरित्याहुः॥ स्थलीरुचिमा इवः ॥ "जानपद–" इत्यादिना भवृत्रिमार्थे ङीप् ॥ पश्यन्नन्द अहर्ष ॥ अत्र शरद्रुनेषु तादात्म्येनारोप्यमाणस्योपायनस्य प्रकृतेर्नन्दनक्रियोपयोगित्वात्परिणामालंकारः ॥

निरीक्ष्यमाणा इव विस्मयाकुलैः सरोभिरुन्मीलितपद्मलोचनैः ।
हृतप्रियादृष्टिविलासविभ्रमा मनोऽस्य जह्रुः शफरीविवृत्तयः ॥ ३ ॥

निरीक्ष्यमाणा इति ॥ विस्मयाकुलैराश्चर्यरसाविष्टैरतएवोन्मीलितानि पद्मान्येव लोचनानि येषां तैः सरोभिर्निरीक्ष्यमाणा इव स्थिताः । हृताः प्रियादृष्टिविलासानां विभ्रमः शोभा याभिस्तास्तथोक्ता इति मनोहरणहेतूक्तिः ॥ "विभ्रमः संशये भ्रान्ती शोभायां च" इति वैजयन्ती ॥ शफरीविवृत्तयः शोणीस्फुरितान्यस्यार्जुनस्य मनो जह्रुः ॥

तुतोष पश्यन्कलमस्य सोऽधिकं सवारिजे वारिणि रामणीयकम् ।
सुदुर्लभे नार्हति कोऽभिनन्दितुं प्रकर्षलक्ष्मीमनुरूपसंगमे ॥ ४ ॥

तुतोषेति ॥ सोऽर्जुनः सवारिजे साम्बुजे वारिणि कलमस्य शालिविशेषस्य ॥ "शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमी" इत्यमरः ॥ रमणीयस्य भावो रामणीयकम् ॥ "गोपवादुरुपोत्तमाद्वुञ्" ॥ तत्पश्यन्नधिकं तुतोष । अनुरूपसंगमादिति भावः । तथाहि । सुदुर्लभेऽनुरूपसंगमे योग्यसमागमे लब्धे । सतीति शेषः । प्रकर्षलक्ष्मीं योग्यसमागमननिमित्तामुत्कर्षसंपदमभिनन्दितुं स्तोतुं को नार्हति । सर्वोऽप्यभिनन्दत्येवेत्यर्थः ॥ सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः॥

तुनोद तस्य स्थलपद्मिनीगतं वितर्कमाविष्कृतफेनसंतति ।
अवाप्तकिञ्जल्कविभेदमुग्धकैर्विवृत्तपाठीनपराहतं पयः ॥ ५ ॥

१ पलोमि. २ सदसि.

Digitized by Google

नुनोदेति ॥ आविष्कृता प्रकटीकृता फेनसंततिर्हिण्डीरसमूहो यस्य तच्चथोक्तम् ॥ "हिण्डीरोऽब्धिकफः फेनः" इत्यमरः ॥ अवाप्तः किञ्जल्कविभेदः केसरापगमो येन तच्चथोक्तम् । उच्चकैरुच्चकं यथा तथा विहतेन लुठितेन पाठीनेन मत्स्यविशेषेण पराहतं ताडितम् ॥ "सहस्रदंष्ट्रः पाठीनः" इत्यमरः ॥ पयः ॥ कर्दं ॥ तस्यार्जुनस्य स्खलपद्मिनीगतम् । तद्गोचरमित्यर्थः । वितर्कं संशयं नुनोद विच्छेद । पाठीनपराहत्या किञ्जल्कापायेन जलदर्शनात्स्थलपद्मिनीशङ्का निहचेत्यर्थः ॥ अत्र निश्चयोत्तरसंदेहालंकारः ॥

कृतोर्मिरेखं शिथिलत्वमायता शनैः शनैः शान्तरयेण वारिणा ।
निरीक्ष्य रेमे स समुद्रयोषितां तरङ्गितं क्षौमविपाण्डु सैकतम् ॥ ६ ॥

कृतेति ॥ सोऽर्जुनः शिथिलत्वमायता गच्छता । दिने दिने क्षीयमाणेनेत्यर्थः । अतएव शनैः शनैः शान्तरयेण । अन्यथोर्मिरेखानुदयादिति भावः । वारिणा । कृता ऊर्मयस्तरङ्गा एव रेखा राजयो यस्य तच्चथोक्तम् । तरङ्गा अस्य संजातास्तरङ्गितं भङ्गिमत् ॥ "तदस्य संजातं–" इतीतच् ॥ यत्क्षौमं दुकूलं तद्वद्विपाण्डु शुभ्रमित्युपमालंकारः । समुद्रयोषितां नदीनाम् । सिकतास्वास्तीति सैकतं पुलिनम् ॥ "सिकताशर्कराभ्यां च" इत्यण्प्रत्ययः ॥ "तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम्" इत्यमरः ॥ निरीक्ष्य रेमे तुतोष ॥

ततस्तिभिः श्लोकैर्नोत्पीं वर्णयति—

मनोरमं प्रापितमन्तरं भुवोरलंकृतं केसररेणुनाणुना ।
अलक्तताम्राधरपल्लवश्रियां समानयन्तीमिव बन्धुजीवकम् ॥ ७ ॥

मनोरमेति ॥ अणुना सूक्ष्मेण केसरेषु किञ्जल्केषु ॥ "किञ्जल्कः केसरोऽस्त्रियाम्" इत्यमरः ॥ यो रेणुः परागस्तेनालंकृतमत एव मनो रमयतीति मनोरमम् ॥ "कर्मण्यण्" इत्यण् ॥ भुवोरन्तरं प्रापितं भ्रूमध्ये निवेशितं बन्धुजीवकं बन्धूकपुष्पम् ॥ "बन्धूको बन्धुजीवकः" इत्यमरः ॥ अलक्तताम्रस्य लाक्षारागरक्तस्याधरपल्लवस्य श्रिया शोभया समानयन्तीं समीकुर्वतीमिव । साम्यपरीक्षां कुर्वतीमिवेत्यर्थः ॥ उत्प्रेक्षालंकारः ॥

नवातपालोहितमाहितं मुहुर्महानिवेशौ परितः पयोधरौ ।
चकासयन्तीमरविन्दजं रजः परिश्रमाम्भःपुलकेन सर्पता ॥ ८ ॥

नवेति ॥ महान्निवेशः स्थानं पयोरुहौ महानिवेशौ । पीवरावित्यर्थः । पयोधरौ परितः । स्तनयोः समन्तादित्यर्थः ॥ "अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि" इति द्वितीया ॥ मुहुराहितं निःशिप्तं नवातपालोहितं बालातपताम्रमरविन्दजं रजः परागं सर्पता प्रसरता परिश्रमाम्भःपुलकेन स्वेदोद्भवेन पुल-

Digitized by Google

केन चकासयन्तीं शोभयन्तीम् ॥ चकास्तेर्ण्यन्ताच्छतरि ङीप् ॥ अलंकरणं दुर्वतीम् । तत्रापि विकृतेति भावः ॥

कपोलसंश्लेषि विलोचनत्विषा विभूषयन्तीमवतंसकोत्पलम् ।
सुतेन पाण्डोः कलमस्य गोपिकां निरीक्ष्य मेने शरदः कृतार्थता ॥९॥

कपोलेति ॥ पुनः कपोलसंश्लेषि यदवतंसकोत्पलं कर्णोत्पलं तद्विलोचनत्विषा विभूषयन्तीम् । आभरणस्याप्याभरणमिति भावः । कलमम् । गोपायतीति गोपिका बालिकोच्यते ॥ ण्वुल्मत्ययः ॥ निरीक्ष्य पाण्डोः सुतेनार्जुनेन शरदः । कृतार्थाया भावः कृतार्थता साफल्यम् । शरदः सद्गुणसंपत्सिद्धिनियोगलाभादिति भावः ॥ "त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः" ॥ मेनेऽमानि ॥ मन्यतेः कर्मणि लिट् ॥

उपारताः पश्चिमरात्रिगोचरादपारयन्तः पतितुं जवेन गाम् ।
तमुत्सुकाश्चक्षुरवेक्षणोत्सुकं गवां गणाः प्रस्नुतपीवरौधसः ॥ १० ॥

उपारता इति ॥ पश्चिमा चासौ रात्रिश्चेति विशेषणसमासः । अपररात्र इत्यर्थः ॥ "पूर्वा दिक्पश्चिमं नभः" इत्यादिवदेकदेशिशब्दस्यैकदेशशब्दसामानाधिकरण्यादेकदेशे पर्यवसानं नतु पश्चिमं रात्रेरित्येकदेशिसमासः । तद्विधायके पूर्वापरादिसूत्रे पश्चिमशब्दाग्रहणादत्रैव "अहःसर्वैकदेश—" इत्यादिना न समासान्तोऽपि तस्यापि पूर्वापरादिसूत्रोक्तसमासविषयत्वादिति । अकाशवर्षस्वैकदेशिसमासमेवाश्रित्य समासान्तमाह— तन्मुग्ध्यम् । गावश्चरन्त्यत्रेति गोचरो गवां जन्तिष्ठानं वनम् । पश्चिमरात्रौ यो गोचरस्तस्मादुपारताः सन्निहत्या जवेन गां भुवं पतितुं यावितुमपारयन्तोऽशक्नुवन्तः प्रस्नुतपीवरौधसो वत्सस्मरणात्स्रवत्क्षीराः ॥ "ऊधस्तु क्लीबमापीनम्" इत्यमरः ॥ "ऊधसोऽनङ्" इति क्लीबार्थं कर्तव्यमिति नियमाज्ञानजादेयाः ॥ उत्सुका वत्सेक्षणोत्कण्ठिता गवां गणास्तमर्जुनमवेक्षणोत्सुकं दर्शनलालसं चक्रुः ॥ "स्वर्गेऽपश्चुदाम्बज्रादिक्षेत्रपृणिभूजले । क्षत्वरद्वचा स्त्रियां पुंसि गौः" इत्युभयत्राप्यमरः ॥ अत्र स्वभावोक्तिरलंकारः । "स्वभावोक्तिरलंकारो यथावद्वस्तुवर्णनम्" इति लक्षणात् ॥

परीतमुक्षापजये जयश्रिया नदन्तमुच्चैः क्षतसिन्धुरौधसम् ।
ददर्श पुष्टिं दधतं स शारदीं सविग्रहं दर्पमिवाधिपं गवाम् ॥११॥

परीतमिति ॥ सोऽर्जुनः उक्षापजये उक्षान्तरभङ्गे सति जयश्रिया परीतं वेष्टितमुच्चैरत्यन्तं नदन्तं क्षतसिन्धुरौधसं रुग्णसरिच्चटं शरदि भवां शारदीं पुष्टिमवयवोपचयं दधतं गवामधिपं महोक्षं सविग्रहं मूर्तिमन्तम् ॥ "कायो देहः क्लीबपुंसो शरीरं वर्म विग्रहः" इत्यमरः ॥ दर्पमिवेत्युत्प्रेक्षा । ददर्श ॥

१ निरीक्ष्य. २ मकुलपीवरौधसः.

Digitized by Google

विमुच्यमानैरपि तस्य मन्थरं गवां हिमानीविशदैः कदम्बकैः ।
शरन्नदीनां पुलिनैः कुतूहलं गलद्दुकूलैर्जघनैरिवादधे ॥ १२ ॥

विमुच्यमानैरिति ॥ हिमानीविशदैर्हिमसंघातशुभ्रैः ॥ "हिमानो हिमसंहतिः" इत्यमरः ॥ "इन्द्रवरुण-" इत्यादिना ङीष् । तत्संनियोगादानुगागमश्च ॥ गवां कदम्बकैः ॥ कर्तृभिः ॥ "कदम्बकं समूहे भीफले पुष्पविशेषके" इत्यमरः ॥ मन्थरं मन्दं विमुच्यमानैरपि । किमुतान्विमुच्यमानैरिति भावः । शरन्नदीनां संबन्धिभिः । शरद्वर्णनं प्राङ्निर्देश्यर्थं तत्र पुलिनादर्शनादिति भावः । पुलिनैः ॥ कर्तृभिः ॥ गलद्दुकूलैर्जघनैरिव तत्सार्वनस्य कुतूहलं कौतुकमादध आहितम् ॥

गतान्पशूनां सहजन्मबन्धुतां गुहाश्रयं प्रेम वनेषु बिभ्रतः ।
ददर्श गोपानुपधेनु पाण्डवः कृतानुकारानिव गोभिरार्जवे ॥ १३ ॥

गतानिति ॥ पाण्डवोऽर्जुनः पशूनां गवाम् । सह जन्म येषां ते सहजन्मानः सोदरास्त एव बन्धवस्तेषां भावस्तत्ता तां गतान् । पशुषु सोदराभिमानवत इत्यर्थः । गुहाश्रयं गुहविषयं प्रेम वनेषु बिभ्रतः । वनेषु गुहाभिमानिन इत्यर्थः । आर्जवे ऋजुत्वे विधेयत्वे । गोभिः पशुभिः कृतानुकारानानुकृतावस्थितानिवेत्युत्प्रेक्षा । ततो विधेयानित्यर्थः । गाः पातीति गोपा गोपालकाः ॥ "आतोऽनुपसर्गे कः" इति कप्रत्ययः ॥ तानुपधेनु धेनुसमीपे ॥ समीपार्थेऽव्ययीभावः ॥ ददर्श ॥ अमोरमेक्षानुप्राणिता स्वभावोक्तिरलंकारः ॥

अथ चतुर्भिर्वसुधीर्नर्तकीसाम्येन वर्णयति—

परिभ्रमन्मूर्धजषट्पदाकुलैः स्मितोदयादर्शितदन्तकेसरैः ।
मुखैश्चलत्कुण्डलरश्मिरञ्जितैर्नवातपासृष्टसरोजचारुभिः ॥ १४ ॥

परिभ्रमदिति ॥ मूर्धजाः षट्पदा इवेत्युपमितसमासः । सरोजचारुभिरित्युपमानुसारात् । परिभ्रमद्भिश्चलद्भिर्मूर्धजैः षट्पदैराकुलानि तैः । दन्ता एव केसरा इवेति पूर्ववत्समासः । स्मितोदयेनादर्शिता उपलक्षिता दन्तकेसरा यैस्तैस्तथोक्तैः । चलत्कुण्डलरश्मिरञ्जितैश्चलकनककर्णवेष्टनप्रभानुलिप्तैरतएव नवातपासृष्टं बालातपस्पृष्टं यत्सरोजं तद्वच्चारुभिर्मुखैरुपलक्षिताः ॥

निषद्धनिःश्वासविकम्पिताधरा लता इव प्रस्फुरितैकपल्लवाः ।
व्यपोढपार्श्वैर्वरपर्वतस्त्रिका विकर्षणैः पाणिविहारहारिभिः ॥ १५ ॥

निषद्धेति ॥ निषद्धेनानुरुद्धेन निःश्वासेन विकम्पिता अधरा यासां ताश्चथो-

१ मवृद्ध.

Digitized by Google

क्काः । अतएव स्फुरितैकपक्षवाः । प्रचलितैकपक्षवा इत्यर्थः ॥ "कचिस्संख्या-शब्दस्य इतिविषये वीप्सार्थत्वं सप्तपर्णादिवत्" इति कैयटः ॥ लता इव स्थिताः । दैवादेकपक्षस्फुरणस्यापि लोके संभवादुपमेयेऽपि नोत्प्रेक्षा । किंच । व्यपोढानि विपरीतानि पार्श्वानि वेपु तैः पाणिविहाररहारिभिः पाणिविक्षेपमनोहरैः ॥ "अ-ङ्गहारोऽङ्गविक्षेपः" इत्यमरः ॥ विकर्षणैर्मन्थगुणकर्षणैरपवर्तितभ्रिकाः संचलित-नितम्बाः । यद्यपि "वृतुवर्षाप्रावरे भ्रिकम्" इत्यमरस्यापाप्यत्र नितम्बो लक्ष्यते तथैकत्वादिति भावः ॥

व्रजाजिरेष्वम्बुदनादशङ्किनीः शिखण्डिनामुन्मदयत्सु योषितः।
मुहुः प्रणुन्नेषु मथां विवर्तनैर्नदत्सु कुम्भेषु मृदङ्गमन्थरम् ॥ १६ ॥

व्रजेति ॥ व्रजाजिरेषु गोष्ठमाङ्गनेषु ॥ अधिकरणे सप्तमी ॥ "व्रजो गोष्ठाध्व-दुन्देषु" इति विश्वः ॥ अम्बुदनादशङ्किनीर्गर्जितभ्रमवतीरिति भ्रान्तिमदलंकारः ॥ शिखण्डिनां योषितो मयूरीः । योषिद्ग्रहणं मीलध्यातिशयार्थम् । उन्मद-यत्सून्मदाः कुर्वत्सु ॥ "तत्करोति–" इति ण्यन्ताच्छतुप्रत्ययः ॥ मथां मन्थनदण्डा-नाम् ॥ "वैशाखमन्थमन्थानमन्थानो मन्थदण्डके" इत्यमरः ॥ विवर्तनैः परि-भ्रमणैर्मुहुः मणुन्नेषु कम्पितेष्विति स्वभावोक्तिः । कुम्भेषु कलशेषु मृदङ्गवन्म-न्थरमीषच्छब्दत्सु स्तनवत्सु सत्स्विति नाट्यसाम्योक्तिः ॥ भावलक्षणे सप्तमीयम् ॥

स मन्थरावल्गितपीवरस्तनीः परिश्रमक्लान्तविलोचनोत्पलाः ।
निरीक्षितुं नोपरराम वल्लवीरभिप्रवृत्ता इव वारयोषितः ॥ १७ ॥

स इति ॥ मन्थरं मन्दमावल्गिताश्चलिताः पीवराः स्तना यासां तास्तथोक्ताः ॥ "स्त्राङ्गोपसर्जनादसंयोगोपधात्" इति ङीष् ॥ परिश्रमेण क्लान्तानि ग्लानानि विलोचनोत्पलानि यासां तास्तथोक्ता वल्लवीर्गोपीः ॥ "गोपे गोपालगोसंख्यगो-धुनाभीरवल्लवाः" इत्यमरः ॥ अभिप्रवृत्ता वृत्यन्तीः ॥ "गत्यर्थाकर्मक–" इ-त्यादिना कर्तरि क्तः । "गतिबुद्धिपूजार्थेभ्यश्च" इति चकाराद्वर्तमानार्थत्वम् ॥ वारयोषितो वेश्या इव ॥ "वारस्त्री गणिका वेश्या" इत्यमरः ॥ सोऽर्जुनो नि-रीक्षितुम् ॥ ईक्षतेस्तुमुन् ॥ नोपरराम न विरमति स्म ॥ "उपाच्च" । "विभाषाकर्म-काद्" इति परस्मैपदम् ॥ अत्र चतुःश्लोक्यामुपमास्वभावोक्त्योः संसृष्टिः ॥

पपात पूर्वी जहतो विजिह्मतां वृषोपभुक्तान्तिकसस्यसंपदः ।
रथाङ्गसीमन्तितसान्द्रकर्दमान्प्रसक्तसंपातपृथक्कृतान्पथः ॥ १८ ॥

पपाताति ॥ सोऽर्जुनः पूर्वी प्राङ्मेण्यां विजिह्मतां वक्रतां जहतस्त्यजतः । शरदि स्निग्धदृश्यत्वेन रमणीयत्वादिति भावः ॥ जहातेः शतृप्रत्ययः ॥ वृषोपभु-

१ पृथुश्रोणान्.

Digitized by Google

क्लान्तिकृतस्यसंपदो हृषभचरितमाप्तसस्यसमृद्धीन् ॥" "सुकृते हृषभे हृषः" इत्यमरः ॥ सीमन्ता इव सीमन्ताश्चक्राङ्गपद्धतयः सीमन्तवन्तः कृताः सीमन्तिताः ॥ मत्वन्तात् "तत्करोति–" इति णिचि कृः । आविष्टवद्भावाम्मतुपो लुक् ॥ रथाङ्गैश्चक्रैः सीमन्तिताः सान्द्राः कर्दमा घनीभूताः पङ्का येषु ताम्रसक्तसंपातेन संततसंचारेण पृथक्कृतान्यथो मार्गान्यपात जगामेति स्वभावोक्तिः ॥

जनैरुपग्राममनिन्द्यकर्मभिर्विविक्तभावेङ्गितभूषणैर्वृताः ।
भृशं ददर्शाश्रममण्डपोपमाः सपुष्पहासाः स निवेशवीरुधः ॥ १९ ॥

जनैरिति ॥ सोऽर्जुन उपग्रामं ग्रामेषु ॥ विभक्तयर्थेऽव्ययीभावः ॥ अनिन्द्यकर्मभिरनिषिद्धहत्तिभिः । हृत्तिश्चैकत्र कृष्यादिरन्यत्र शिलोञ्छादिः । विविक्ताभ्येकाग्राणि भावोऽभिप्राय इङ्गितं चेष्टा भूषणमलंकारश्च येषां तैस्तथोक्तैर्जनैर्वृताः । अधिष्ठिता इत्यर्थः । अतएवाश्रमेषु मुनिस्थानेषु ये मण्डपास्तदुपमाः ॥ "मण्डपोऽस्त्री जनाश्रयः" इत्यमरः ॥ सपुष्पहासाः पुष्पविकाशसहिताः ॥ "तेन सह–" इत्यादिना बहुव्रीहिः ॥ निवेशवीरुधो गृहगुल्मिनीः ॥ "वीरुधो वल्लिगुल्मिन्यौ" इति वैजयन्ती ॥ भृशं सादरं ददर्श ॥ उपमालंकारः ॥

ततः स संप्रेक्ष्य शरद्गुणश्रियं शरद्गुणालोकनलोलचक्षुषम् ।
उवाच यक्षस्तमनोदितोऽपि गां न हीङ्गितज्ञोऽवसरेऽवसीदति ॥ २० ॥

तत इति ॥ ततः स पूर्वोक्तो यक्षः शरद्गुणश्रियं संप्रेक्ष्य । दर्शनीयां वर्णनीयां च विचार्येत्यर्थः । शरद्गुणालोकने लोलचक्षुषं सतृष्णदृष्टिम् ॥ "लोलश्चलसतृष्णयोः" इत्यमरः ॥ तमर्जुनमनोदितोऽप्यपृच्छोऽपि गां वाचमुवाच । तथाहि । इङ्गितज्ञो भावज्ञः ॥ "इङ्गितं हृद्गतो भावः" इति विश्वः ॥ अवसर उक्तिप्रयोग्ये काले नावसीदति न वाचं यच्छति । "नापृष्टः कस्यचिद्ब्रूयात्" इति निषेधस्तत्तदाकाङ्क्षितोक्तिविषय इति भावः ॥ सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥

इयं शिवाया नियतेरिवायतिः कृतार्थयन्ती जगतः फलैः क्रिया ।
जयश्रियं पार्थ पृथूकरोतु ते शरत्प्रसन्नाम्बुरनम्बुवारिदा ॥ २१ ॥

इयमिति ॥ हे पार्थ । शिवायाः कल्याणकारिण्या नियतेः ॥ "दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः" इत्यमरः ॥ शुभावहदैवसायतिः फलदानकालः सैव जगतः क्रिया कृष्यादिकर्माणि फलैर्लाभैः ॥ "लाभनिष्पत्तियोगेषु, बीजभावे धने फलम्" इति वैजयन्ती ॥ कृतार्थयन्ती सफलयन्ती प्रसन्नाम्बुर्निर्मलोदकानम्बुवारिदा निर्जलमेघा । अनेन विशेषणद्वयेन यावापृथिव्योराद्यन्तकृत्यं सूचयति । इयं शरत्ते जयश्रियं पृथूकरोतु ॥ आशीरर्थे लोट् ॥

Digitized by Google

उपैति सस्यं परिणामरम्यतां नदीरनौद्धत्यमपङ्कुता महीम् ।
नवैर्गुणैः संप्रति संस्तवस्थिरं तिरोहितं प्रेम घनागमश्रियः ॥ २२ ॥

उपैतीति ॥ सस्यं श्रीखादिकं परिणामेन परिपाकेन रम्यतामुपैति । नदीरनौद्धत्यं नम्यदपत्वमुपैति । महीमपङ्कता निष्पङ्कत्वमुपैति । तथाहि । संप्रति नवैर्गुणैः पूर्वोक्तैः शरद्गुणैः संस्तवेन परिचयेन स्थिरं दृढमपि घनागमश्रियः प्रावृडलक्ष्म्याः संबन्धि । तद्विषयमित्यर्थः । प्रेम तिरोहितम् । निरर्थकं कृतमित्यर्थः । गुणतन्त्राः प्रेमाणो न परिचयतन्त्रा इति भावः ॥ वास्तवालंकारः ॥

पतन्ति नास्मिन्विशदाः पतत्रिणो धृतेन्द्रचापा न पयोदपङ्क्तयः ।
तथापि पुष्णाति नभः श्रियं परां न रम्यमाहार्यमपेक्षते गुणम् ॥२३॥

पतन्तीति ॥ अस्मिन्नभसि विशदाः पतत्रिणो बलाका न पतन्ति न प्रसरन्ति । धृतेन्द्रचापाः पयोदपङ्क्तयश्च न पतन्ति । तथापि श्रीकारणाभावेऽपि नभः परां श्रियं शोभां पुष्णाति । तथाहि । रम्यं स्वभावसुन्दरं वस्त्वाहार्यमारोप्यमाणं गुणं नापेक्षते । तत्र स्वभावसिद्ध समर्थत्वादिति भावः ॥ अत्रार्थान्तरन्यासः ॥

विपाण्डुभिर्म्लानतया पयोधरैश्च्युताचिराभागुणहेमदामभिः ।
इयं कदम्बानिलभर्तुरत्यये न दिग्वधूनां कृशता न राजते ॥ २४ ॥

विपाण्डुभिरिति ॥ कदम्बानिलशब्देन वर्षर्तुरुपलक्ष्यते । स एव भर्ता तस्यात्यये विरहे म्लानतया निर्जलतया दुर्बलतया च विपाण्डुभिश्च्युताश्चिराभा विद्युत्ता गुणा एव हेमदामानि सुवर्णसूत्राभरणानि येषां तैः पयोधरैरम्भोदैः । अन्यत्र स्तनैः । उपलक्षितानाम् ॥ "स्तनाम्भोदौ पयोधरौ" इति वैजयन्ती ॥ दिश एव वध्वस्तासामियं कृशता न राजत इति न । किंतु राजत एव भर्तृवियुक्तत्वात् । "आर्तावें मुदिते हृष्टा प्रोषिते मलिना कृशा" इति स्मरणादिति भावः ॥ सामान्यतः प्रसक्तस्मरणं संकार्यसंकेन नञ्नाकूय द्वितीयेन निषेधति । यथाह वामनः— "संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ" इति ॥ अत्र रूपकालंकारः स्फुट एव ॥

विहाय वाञ्छामुदिते मदात्ययादरक्तकण्ठस्य रुते शिखण्डिनः ।
श्रुतिः श्रयत्युन्मदहंसनिःस्वनं गुणाः प्रियत्वेऽधिकृता न संस्तवः॥२५॥

विहायेति ॥ मदात्ययाभ्मदक्षयादरक्तकण्ठस्याभाव्यस्वरस्य । कण्ठशब्देनात्र शब्दः स्वरो लक्ष्यते । शिखण्डिनो मयूरस्य संबन्धिन्युदिते उच्चैस्वरे रुते कूजिते वाञ्छां विहाय । श्रुतिः श्रोत्रम् ॥ "कर्णशब्दश्रुती श्रोत्रं श्रुतिः स्त्री भवणं श्रवः" इत्यमरः ॥ उन्मदहंसनिःस्वनं मत्तमरालकूजितं श्रयति भजते ॥ नन्वकाण्डे परिचितपरिहारेणापरिचिते कथं प्रीत्युदय इत्याशङ्क्याहार्थान्तरं न्यस्यति— गुणा इति ॥ प्री-

Digitized by Google

जातीति प्रियः॥ "इगुपधज्ञाप्रीकिरः कः" इति कप्रत्ययः॥ प्रियत्वे प्रीतिकरणे गुणा अधिकृता नियुक्ताः। संस्तवः परिचयो नाधिकृतो न समर्थः। प्रेमाधाने गुणवत्त्वं प्रयोजकं न परिचय इत्यर्थः॥

अमी पृथुस्तम्बभृतः पिशङ्गतां गता विपाकेन फलस्य शालयः।
विकासि वप्राम्भसि गन्धसूचितं नमन्ति निघ्रातुमिवासितोत्पलम्॥२६

अमी इति॥ अमी पृथूस्तम्बान्गुच्छान्बिभ्रतीति पृथुस्तम्बभृतः॥ "स्तम्बो गुच्छस्तृणादिनः" इत्यमरः॥ फलस्य प्रसवस्य विपाकेन परिणामेन पिशङ्गतां गताः शालयो व्रीहिविशेषाः। वप्राम्भसि केदाराम्बुके॥ "पुंनपुंसकयोर्वप्रः केदारः क्षेत्रम्" इत्यमरः॥ विकसतीति विकासि विकसितं गन्धेन सूचितं ज्ञापितमसितोत्पलं निघ्रातुमिव नमन्ति॥ "निघ्यातुमिव" इति पाठे द्रष्टुमित्यर्थः। निर्वर्णयितुं वा॥ "निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्" इत्यमरः॥ अत्र फलभाराक्रमनस्य निघ्राणफलकत्वमुत्प्रेक्ष्यत इति फलोत्प्रेक्षा॥

अथ चतुर्भिः कलापकमाह—

मृणालिनीनामनुरञ्जितं त्विषा विभिन्नमम्भोजपलाशशोभया।
पयः स्फुरच्छालिशिखापिशङ्गितं द्रुतं धनुःखण्डमिवाहिविद्विषः॥२७

मृणालिनीनामिति॥ मृणालिनीनां पद्मलतानां त्विषा हरितवर्णेनानुरञ्जितम्। तद्वर्णतामापादितमित्यर्थः। तथाम्भोजपलाशशोभया पद्मदलकान्त्या। आरुण्येनेत्यर्थः। विभिन्नं मिश्रितम्। तथा स्फुरच्छालिशिखापिशङ्गितं स्फुरद्भिः फलमञ्जरीभिः पिङ्गलीकृतमित्यर्थं नानावर्णत्वाद्द्रुतं विगलितमर्हविद्विषो हनुमतोरिन्द्रस्य॥ "सर्पे हनुमतोरप्यहिः" इति वैजयन्ती॥ धनुःखण्डमिव स्थितम्॥ "नित्यं समासेऽनुत्तरपदस्थस्य" इति विसर्जनीयस्य पत्वम्॥ पयो वप्राम्भोऽपदिश्य व्याजीकृत्य। भावताभिलाषागामिना संबन्धः॥ अत्र धनुःखण्डस्य द्रुतस्य लोकेऽप्रसिद्धत्वादुत्प्रेक्षेयं नोपमा॥

विपाण्डु संध्यानमिवानिलोद्धतं निरुन्धतीः सप्तपलाशजं रजः।
अनाविलोन्मीलितघ्राणचक्षुषः सपुष्पहासा वनराजियोषितः॥२८॥

विपाण्डुमिति॥ विपाण्डु शुभ्रमनिलोद्धतमनिलोत्क्षिप्तम्। सप्त सप्त पलाशानि पत्राणि पर्वसु येषां ते इक्षाः सप्तपलाशाः॥ क्वचित्संख्याशब्दस्य द्वित्वविषये द्वीप्सार्थत्वं सप्तपर्णादिवदित्युक्तम्॥ तेषां पुष्पाणि सप्तपलाशानि॥ "द्विहीनं प्रसवे सर्वम्" इत्यमरः॥ "फले लुक्" इत्यणो लुक्॥ तेषु जातं सप्तपलाशजं रजः परागं संध्यानमुच्चरीयमिव॥ "संध्यानमुच्चरीयं च" इत्यमरः॥ निरुन्धतीर्नि-

Digitized by Google

वारयन्तीः । आहतवतीरिति यावत् । अनाविलान्यकलुषाण्युन्मीलितानि च यानि नीलसैरेयकाणि चक्षूंषीव यासां तास्तथोक्ताः ॥ "नीलस्त्वर्धगलो दासी याजओदनपाक्यपि" इति धन्वन्तरिः ॥ पुष्पाणि हासा इव तैः सह वर्तन्त इति सपुष्पहासाः । वनराजयो योषित इव वनराजियोषितः । ता अपदिश्येत्यन्वयः ॥ अत्र संभ्यानमिवेत्युपमैवान्यत्रोपमितसमासे लिङ्गम् । यथा काचित्केनचित्काश्मुकेनाश्लिष्टं स्तनांशुकं निरुन्धे तद्वदिति भावः ॥

अदीपितं वैद्युतजातवेदसा सिताम्बुदच्छेदतिरोहितातपम् ।
ततान्तरं सान्तरवारिशीकरैः शिवं नभोवर्त्म सरोजवायुभिः ॥२९॥

अदीपितमिति ॥ वैद्युतजातवेदसा वैद्युताग्निनादीपितमप्रकाशितम् । विद्युत्प्रकाशस्य दृष्टिविघातकत्वाच्चन्द्रादित्यं गुण इति भावः । सिताम्बुदानां छेदैः खण्डैस्तिरोहितातपम् । न दृष्टिबाधो नाभ्यातपबाध इति भावः । सान्तरवारिशीकरैर्विरलाम्बुकणैस्तत्तान्तरं व्याप्तमध्यं सरोजवायुभिः शिवं रम्यं नभोवर्त्म चापदिश्येति ॥ स्वभावोक्तिरलंकारः ॥

सितच्छदानामपदिश्य धावतां रुतैरमीषां ग्रथिताः पतत्रिणाम् ।
प्रकुर्वते वारिदरोधनिर्गताः परस्परालापमिवामला दिशः ॥ ३० ॥

सितेति ॥ अपदिश्य धावतामिति पूर्वश्लोकत्रयोक्तं पयःप्रभृतिकमुद्दिश्य धावतामेषां सितच्छदानां पतत्रिणां हंसानाम् ॥ "हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः" इत्यमरः ॥ रुतैः शब्दैर्ग्रथिता इव ॥ "ग्रथितं गुम्फितं इव्यम्" इत्यमरः ॥ वारिदरोधनिर्गता मेघोपरोधनिर्मुक्ता अतएवामलाः प्रसन्ना दिशः परस्पराऽपं प्रकुर्वत इव । दिशा मेघोपरोधनिर्मुक्ताश्चिराद्दुष्कूसिता इति हंसकूजितव्याजेन परस्परमालपन्तीत्युत्प्रेक्षा ॥

विहारधूमेरभिघोषमुत्सुकाः शरीरजेभ्यश्च्युतयूथपङ्क्तयः ।
असक्तमूधांसि पयः क्षरन्त्यपूरुपायनानीव नयन्ति धेनवः ॥ ३१ ॥

विहारेति ॥ विहारधूमेः । अपरराह्णगोचरादित्यर्थः । आगच्छन्त्य इति शेषः । अभिघोषमुत्सुका व्रजं प्रत्युत्कण्ठिताः । वत्सप्रेम्णेति भावः ॥ "घोष आभीरपल्ली स्यात्" इत्यमरः ॥ च्युता त्रुटिता यूथानां कुलानां पङ्क्तिः श्रेणिर्बन्धो यासां तास्तथोक्ताः ॥ "सजातीयैः कुलं यूथम्" इत्यमरः ॥ अमूर्धनवोऽसक्तमप्रतिबन्धं पयः क्षीरं क्षरन्ति स्रवन्ति । वत्सस्मरणात्प्रस्रवन्तीत्यर्थः ॥ क्षरतेः शतृप्रत्ययः ॥ ऊधांसि शरीरजेभ्योऽवयवेभ्य उपायनानीवातिथोपकारिणीवेत्युत्प्रेक्षा । नयन्ति प्रापयन्ति । यथा लोके कुत्रचित्स्थवासादेस्तत्र मातरः किंचित्साधयमानयन्ति तद्वदिति भावः ॥

१ क्षीः.

Digitized by Google

जगत्प्रसूतिर्जगदेकपावनी व्रजोपकण्ठं तनयैरुपेयुषी।
द्युतिं समग्रां समितिर्गवामसावुपेति मन्त्रैरिव संहिताहुतिः॥ ३२॥

जगदिति॥ जगत्प्रसूतिर्जगत्कारणम्। आज्यादिहविर्द्वारेणेति भावः। जगतामेकपावनी मुख्यशोधनी व्रजोपकण्ठं गोष्ठान्तिकम्॥ "दूरान्तिकार्थैभ्यो द्वितीया च" इति द्वितीया॥ "उपकण्ठान्तिकाभ्यर्णाभ्यासाः" इत्यमरः॥ तनयैर्वत्सैरुपेयुषी संगता॥ "उपेयिवाननाश्वाननूचानश्च" इति कसुमत्ययान्तो निपातः॥ "उगितश्च" इति ङीप्॥ असौ गवां समितिः संहतिः। मन्त्रैर्ऋग्यजुरादिभिः॥ "मन्त्रो मृगादिषूक्तिः" इति वैजयन्ती॥ संहिता योजिताहुतिरिव। समग्रां द्युतिमुपैति। आहुतिरपि जगत्प्रसूतिर्जगदेकपावनी च। "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इति स्मरणादिति भावः॥

कृतावधानं जितबर्हिणध्वनौ सुरक्तगोपीजनगीतनिःस्वने।
इदं जिघत्सामपहाय भूयसीं न सस्यमभ्येति मृगीकदम्बकम्॥ ३३॥

कृतेति॥ जितबर्हिणध्वनौ। केकानुकारिणीत्यर्थः। एतेन षड्जस्वरमायं गायतीति गम्यते। यथाह मातङ्गः—"षड्जं मयूरो वदति" इति। गाः पान्तीति गोपास्तेषां भार्या गोप्यः॥ "आतोऽनुपसर्गे कः" इति कमत्ययः। "पुंयोगादाख्यायाम्" इति ङीप्॥ ता एव जनः। सुरक्तो मधुरकण्ठो यो गोपीजनस्तस्य गीतनिःस्वने गाने कृतावधानमेकाग्रचित्तमिदं पुरोवर्ति मृगीकदम्बकम्॥ कर्तृ॥ भूयसीमतिमहतीं जिघत्सामत्तुमिच्छाम्॥ अदेः सन्नन्तादुमत्ययः। "लुङ्सनोर्घस्लृ" इति घस्लरादेशः॥ अपहाय हित्वा सस्यं नाभ्येति नोपैति। गीतासक्तया क्षुधामपि न गणयतीत्यर्थः॥

असावनास्थापरयावधीरितः सरोरुहिण्या शिरसा नमन्नपि।
उपैति शुष्यन्कलमः सहाम्भसा मनोभुवा तप्त इवाभिपाण्डुताम्॥ ३४॥

असाविति॥ शिरसाग्रेण मूर्ध्नावनमनमप्यनास्थापरयानादरपरया सरोरुहिण्यावधीरितोऽवज्ञातः। अम्भसा। सहचरभूतेनेति भावः। शुष्यन्नसौ कलमः शालिविशेषः। मनोभुवा तप्त इव कामार्त इव। अभिपाण्डुतामुपैति॥ अनास्थापरयेति प्रकृतसरोरुहिणीविशेषणसामर्थ्यादप्रस्तुतनायिकामतीतेः समासोक्तिः। उपेक्ष्यमाणायाः सरोरुहिण्याः प्रतीयमानया नायिकया शुद्धभेदेऽप्यभेद-

१ वाल्मी.

Digitized by Google

लक्षणातिशयोक्तिमहिम्नावधीरणक्रियासंबन्धाभिर्वदन्ती मनोज्ञया तत्र इवेत्युत्प्रेक्षा । निर्वाहिकेत्यतिशयोक्त्यनुप्राणिततमासोक्त्युपमयोरङ्गाङ्गिभावेन संकरः ॥

अमी समुद्धूतसरोजरेणुना हृताहृतासारकणेन वायुना ।
उपागमे दुश्चरिता इवापदां गतिं न निश्चेतुमलं शिलीमुखाः ॥२५॥

अमी इति ॥ समुद्धूतसरोजरेणुनेति सौरभ्योक्तिः । हृतासारकणेनोपात्ताम्बुकणेनेति शैत्योक्तिः ॥ "धारासंपात आसारः" इत्यमरः ॥ वायुना हृता आकृष्टा अमी शिलीमुखा भृङ्गाः । आपदामुपागमे राजादिभयागमे दुश्चरिता दुष्टकर्माणश्चौरादय इव । गम्यत इति गतिं गन्तव्यदेशम् ॥ "देशोपायगमे गतिः" इति वैजयन्ती ॥ निश्चेतुं नालं न समर्थाः । एकत्र वायोः सार्वभौमत्वेनोपादानादनिश्चयादन्यत्र भयान्धत्वादिति भावः ॥

मुखैरसौ विद्रुमभङ्गलोहितैः शिखाः पिशङ्गीः कलमस्य बिभ्रती ।
शुकावलिर्व्यक्तशिरीषकोमला धनुश्श्रियं गोत्रभिदोऽनुगच्छति ॥२६॥

मुखैरिति ॥ विद्रुमभङ्गलोहितैर्मुखैः पिशङ्गीः पिशङ्गवर्णाः कलमस्य शिखाः शस्यशूकानि बिभ्रती व्यक्तशिरीषकोमला विकसितशिरीषसवर्णासौ शुकावलिर्नोभिद इन्द्रस्य धनुषः श्रियमनुगच्छत्यनुकरोति । नानावर्णत्वादिन्द्रधनुरिवाभातीत्युपमालंकारः ॥

इति कथयति तत्र नातिदूरादथ ददृशे पिहितोष्णरश्मिबिम्बः ।
विगलितजलभारशुक्लभासां निचय इवाम्बुमुचां नगाधिराजः ॥ २७॥

इतीति ॥ अथ तत्र तस्मिन्पूर्वोक्तयज्ञे इतीत्थं कथयति सति नातिदूरादनतिदूरात् । ईषदूर इत्यर्थः ॥ नञर्थस्य नशब्दस्य सुप्सुपेति समासः ॥ पिहितोष्णरश्मिबिम्बस्तिरोहितार्कमण्डल इत्यौत्प्रेक्षिकी । नगाधिराजो हिमाद्रिर्विगलितो जलभारो वेषां ते तथोक्ताः । अतएव शुक्लभासः ॥ द्वयोरन्यतरस्य विशेष्यस्वविधया विशेषणसमासः ॥ तेषां विगलितजलभारशुक्लभासां शुभ्राणामम्बुमुचां निचय इव मेघसमूहमिव ददृशे ददृशे ॥

तमतनुवनराजिश्यामितोपत्यकान्तं
नगमुपरि हिमानीगौरमासाद्य जिष्णुः ।
व्यपगतमदरागस्यानुसस्मार लक्ष्मी-
मसितमधरवासो बिभ्रतः सीरपाणेः ॥ २८ ॥

तमिति ॥ जिष्णुरर्जुनोऽतनुभिर्महतीभिर्वनराजिभिः श्यामिताः श्यामला उप-

Digitized by Google

त्यकान्ता आसक्तभूमिप्रदेशा यस्य तं तथोक्तम् ॥ "उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका" इत्यमरः ॥ "उपाधिभ्यां त्यकञासञ्कारुडयोः" इति त्यकन्प्रत्ययः ॥ उपरि हिमानीभिर्हिमसंघातैर्नीरं शुभ्रं नगं हिमाद्रिमासाद्य । व्यपगतो निवृत्तो मदरागो यस्य तस्य । असितं नीलमधरं वास उत्तरीयं बिभ्रतो धृतवतः । सीरं हलं पाणौ यस्य तस्य सीरपाणेर्हलायुधस्य ॥ "हलायुधः । नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली । संकर्षणः सीरपाणिः" इत्यमरः ॥ "सप्तमीविशेषणे—" इति ज्ञापकाद्बहुव्रीहिः । "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ स्तः" इति सप्तम्याः परनिपातः ॥ लक्ष्मीं शोभामनुसस्मार स्मृतवान् ॥ अत्र सदृशदर्शनेन सदृशान्तरस्य स्मरणात्स्मरणालंकारः । "सदृशं सदृशानुभवायत्र स्मर्यते तत्स्मरणम्" इति विद्याधरः ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथसमाख्यया व्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये शरद्वर्णनो नाम चतुर्थः सर्गः ।

पञ्चमः सर्गः ।

अथ हिमवद्वर्णनमारभते । तत्र पञ्चदशभिः कुलकमाह—

अथ जयाय नु मेरुमहीभृतो रभसया नु दिगन्तदिदृक्षया ।
अभिययौ स हिमाचलमुच्छ्रितं समुदितं नु विलङ्घयितुं नभः ॥ १ ॥

अथेति ॥ अथानन्तरं सोऽर्जुनो मेरुमहीभृतो हेमाद्रेर्जयाय नु जयार्थं वा ॥ नुशब्दोऽत्र वितर्के ॥ "नु पृच्छायां वितर्के च" इत्यमरः ॥ रभसो वेगः ॥ "रभसो वेगहर्षयोः" इति वैजयन्ती ॥ तद्वत्या रभसया । अतीवोत्कटतयेति यावत् ॥ अर्शआदित्वादच्प्रत्ययः ॥ दिगन्तानां दिदृक्षया नु द्रष्टुमिच्छया वा । नभोऽन्तरालं विलङ्घयितुं व्यतिक्रमितुं वा । समुदितम् । समुत्पतितमिव स्थितमित्यर्थः । कुतः । उच्छ्रितमुन्नतं हिमस्याचलं हिमाचलमभिययौ ॥ अत्राभियोतितानेकफलविधिश्लौक्ष्ण्यगुणनिमित्तोदितादिक्रियोत्प्रेक्षा । सा च व्यञ्जकाप्रयोगात्प्रतीयमानेति संक्षेपः ॥ हुतविलम्बितं हृतम्—"हुतविलम्बितमाहुर्नभौ भरौ" इति लक्षणात् ॥

तपनमण्डलदीपितमेकतः सततनैशतमोवृतमन्यतः ।
हसितभिन्नतमिस्रचयं पुरः शिवमिवानुगतं गजचर्मणा ॥ २ ॥

तपनेति ॥ एकतः एकस्मिन्भागे ॥ सार्वविभक्तिकस्तसिः ॥ तपनमण्डलेन दी-

Digitized by Google

पितं प्रकाशितम् । अन्यतोऽन्यस्मिन्भागे सततेनानिच्छेन नैशेन निशिभवेन तमसा हृतम् । एकत्राह्ना राज्ञा चान्यत्र संगतमित्यर्थः । अतएव पुरोऽग्रे हसितेनाट्टहासेन भिन्नतमिस्रचयं निरस्ततमस्तोमं तथा गजचर्मणानुगतं पश्चाद्गतम् ॥ "पश्चात्साट्टपयोरनु" इत्यमरः ॥ शिवमिव स्थितम् ॥ तपनतेजःप्रसारोऽव्यस्य कारणमिव कुत्रचित्परिसमाप्यत इति महत्त्वातिशयोक्तिः ॥

क्षितिनभःसुरलोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैः ।
प्रथयितुं विभुतामभिनिर्मितं प्रतिनिधिं जगतामिव शंभुना ॥ २ ॥

क्षितीति ॥ परस्परेऽन्योन्ये ॥ "कर्मव्यतिहारे सर्वनाम्नो द्वे भवतः" इति वक्तव्यत्वात्परशब्दस्य द्विर्भावः । "समासवच्च बहुलं यदा समासवत्प्रथमैकवचनं तदा पूर्वपदस्य" इति वक्तव्यत्वात्प्रथमैकवचनम् । सुद्। कस्कादित्वाद्विसर्जनीयस्य सत्वं बहुवचनं चान्योन्यशब्दवत् । यथा माघे—"अन्योन्येषां पुष्करैरायुधाग्रैः" इति ॥ अदृष्टाः परस्परे यैस्तेऽदृष्टपरस्पराःस्तैस्तथोक्तैः । क्षिती नभसि सुरलोके च निवसन्तीति तैस्तथोक्तैः । भूर्भुवःस्वर्लोकवासिभिरित्यर्थः । कृतनिकेतं कृतास्पदम् । अतएव शंभुना विभुतां स्वसामर्थ्यं प्रथयितुमभिनिर्मितं जगतां प्रतिनिधिं प्रतिकृतिमिव स्थितमित्युत्प्रेक्षा ॥ "प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात्" इत्यमरः ॥ त्रैलोक्यश्लाघ्योपममपरिच्छेद्यं चेति भावः ॥

भुजगराजसितेन नभःश्रिता कनकराजिविराजितसानुना ।
सभुदितं निचयेन तडित्वतीं लघयता शरदम्बुदसंहतिम् ॥ ४ ॥

भुजगेति ॥ पुनश्च । भुजगराजसितेन शेषादिधवलेन नभःश्रिता गगनस्पृशा कनकस्य राशिभी रेखाभिर्विराजिताः सानवो यस्य तेन तथोक्तेन । अतएव तडित्वतीं शरदम्बुदसंहतिं लघयता लघूकुर्वता । तृजन्तेनेत्यर्थः ॥ अतएवोपमालंकारः ॥ निचयेन शिखरसमुचयेन सभुदितं सभृतम् ॥

मणिमयूखचयांशुकभासुराः सुरवधूपरिभुक्तलतागृहाः ।
दधतमुच्चशिलान्तरगोपुराः पुर इवोदितपुष्पवना भुवः ॥ ५ ॥

मणीति ॥ पुनः । मणिमयूखचया एवांशुकानि पल्यवस्त्राणीव तैर्भासुराः । सुरवधूभिः परिभुक्ता लतागृहाणीव यासु तास्तथोक्ताः । उच्चानि शिलान्तराणि शिलाविवराणि गोपुराणीव यासु ताः । उदितान्यूर्जितानि पुष्पाणां वनानि यासु ताः । अतएव पुर इव नगराणीव स्थिताः । भुवो दधतम् ॥

१ ख.

Digitized by Google

अविरतोज्झितवारिविपाण्डुभिर्विरहितैरचिरद्युतितेजसा।
उदितपक्षमिवारतनिःस्वनैः पृथुनितम्बविलम्बिभिरम्बुदैः ॥ ६ ॥

अविरतेति ॥ पुनश्च। अविरतमविच्छिन्नमुज्झितं वारि यैस्तेऽविरतोज्झितवारयः। दृष्टिमन्त इत्यर्थः। अतएव विपाण्डवश्च तैरविरतोज्झितवारिविपाण्डुभिः। अतो हिमवत्पक्षत्वं संभवतीति भावः। अचिरद्युतितेजसा विरहितैर्विद्युत्तेजोरहितैः। आरतनिःस्वनैः प्रच्छान्तगर्जितैश्च। अन्यथा पक्षत्वहानिः स्यादिति भावः। पृथुनितम्बविलम्बिभिः महाकटकसन्निभैः ॥ "कटकोऽस्त्री नितम्बोऽद्रेः" इत्यमरः ॥ अम्बुदैरुदितपक्षं संजातपक्षमिव स्थितम्। प्राक्छिन्नपक्षस्यापि हिमाद्रेर्मेघसाम्बुदसंबन्धात्पुनः पक्षोत्थानमुत्प्रेक्ष्यते ॥

दधतमाकरिभिः करिभिः क्षतैः समवतारसमैरसमैस्तटैः।
विविधकामहिता महिताम्भसः स्फुटसरोजवना जवना नदीः ॥ ७ ॥

दधतमिति ॥ पुनश्च। आकरः खनिरेषामस्तीति योनित्वेनेत्याकरिभिराकरजैः ॥ "खनिः स्त्रियामाकरः स्यात्" इत्यमरः ॥ करिभिर्गजैः ॥ कर्तृभिः ॥ क्षतैर्व्रणैः समवतारेषु तीर्थेषु समैरविषमैरसमैरसदृशैरतादृशैः। अनुपमैरित्यर्थः। तटैरुपलक्षिताः तथा महिताम्भसः स्वाभ्योदका अतएव विविधेभ्यः कामेभ्योऽवगाहनाद्युपभोगेभ्यो हिता अनुकूलाः ॥ "चतुर्थी तदर्थ–" इत्यादिना समासः ॥ स्फुटानि विकसितानि सरोजवनानि यासु ता जवना वेगवतीः ॥ "युवजूभ्य–" इत्यादिना युच् ॥ नदीर्दीर्घतम् ॥ यमकहृद्यनुप्रासभेदत्वात्सयमेवालंकारः। अर्थालंकारस्त्वव्यक्तयः। तस्यातिदुष्करत्वाद्रसपोषोऽपि नाद्रियते। तदुक्तम्— "प्रायशो यमके चित्ते रसदृष्टिर्न युज्यते" ॥

नवविनिद्रजपाकुसुमत्विषां द्युतिमतां निकरेण महाऽमनाम्।
विहितसांध्यमयूखमिव क्वचिन्निचितकाञ्चनभित्तिषु सानुषु ॥ ८ ॥

नवेति ॥ पुनश्च। नवानि विनिद्राणि च यानि जपाकुसुमानि ताम्रपुष्पिकाकुसुमानि तेषां त्विष इव त्विषो येषां ते तेषाम् ॥ "ओदूपुष्पं जपापुष्पं रूपिका ताम्रपुष्पिका" इति वाग्भटः ॥ द्युतिमतां महाऽमनां मणीनाम्। पद्मरागाणामित्यर्थः। विशेषणसामर्थ्यात्। निकरेण समूहेन हेतुना क्वचिन्निचिताः संघट्टिताः काञ्चनभित्तयो येषु तेषु सानुषु विहिताः सांध्याः संध्यायां भवा मयूखा यस्मिंस्तमिव स्थितम्। काञ्चनभित्तिषु पद्मरागप्रभाप्रसरादुदितसंध्याराग इव भातीत्युत्प्रेक्षा ॥

पृथुकदम्बकदम्बकराजितं ग्रथितमालतमालवनाकुलम्।
लघुतुषारतुषारजलच्युतं धृतसदानसदाननदन्तिनम् ॥ ९ ॥

१ द्युतं; च्युतं.

Digitized by Google

पृथ्विति ॥ पुनश्च। पृथुभिः कदम्बकदम्बकैर्नीपकुसुमसमूहैः स्तवकैः राजितम् ॥ "कदम्बमाहुः सिद्धार्थे नीपे च निकुरम्बके" इत्युभयत्रापि विश्वः ॥ ग्रथितमालैर्बद्धपङ्क्तिभिस्तमालवनैस्तापिञ्छवनैराकुलमाकीर्णम् ॥ "कालस्कन्धस्तमालः स्यात्तापिञ्छोऽपि" इत्यमरः ॥ लघुतुषारमरुपसीकरं पशुपारजलं हिमोदकं द्योतति वर्णयति तं तथोक्तम् ॥ "तुषारौ हिमसीकरौ" इति शाश्वतः ॥ "अन्येभ्योऽपि दृश्यते" इति क्विप् ॥ सदानाः समदाः सदाननाः शोभनाननाश्च ये दन्तिनस्तैः पृक्ता येन तं तथोक्तम् ॥

रहितरत्नचयान्न शिलोच्चयानपलताभवना न दरीभुवः।
विपुलिनाम्बुरुहा न सरिद्भुवः कुसुमान्दधतं न महीरुहः ॥ १० ॥

रहितेति ॥ पुनश्च ॥ रहितरत्नचयान्रहितः परित्यक्तो रत्नचयो यैस्तान्रत्नराशिरहिताञ्छिलोच्चयाञ्छिलाराशीन न दधतम् । अपलताभवना लतागृहरहिता दरीभुवो गुहामदेशाश्च दधतम् ॥ "दरी तु कन्दरो वा स्त्री देवखातविले गुहा" इत्यमरः ॥ विगतानि पुलिनान्यम्बुरुहाणि च यासां ताः । सरितो वध्व इव ताः सरिद्भुवः दधतम् ॥ अत्र सरितां वध्वीपम्यात्पुलिनाम्बुरुहाणां वदनजघनीपम्यं गम्यते ॥ कुसुमाम्महीरुहो द्रुमांश्च दधतम् । किंतु रत्नादिसंपन्नानेव शिलोच्चयादीन्दधतमित्यर्थः ॥ महाविभाषया नात्र नञ्समासः ॥

व्यधितसिन्धुमनीरसनैः शनैरमरलोकवधूजघनैर्घनैः।
फलभृतामभितो विततं ततं दयितरम्यलतावकुलैः कुलैः ॥ ११ ॥

व्यधितेति ॥ पुनश्च । अनीरसनैरनिर्मेखलैः । तरसनैरित्यर्थः । घनैर्निबिडैरमरलोकवधूजघनैः शनैर्मन्दंमन्दं व्यधितसिन्धुं शोभितनदीकम् । अयमपरः स्वर्ग इति भावः । दयिताः प्रिया रम्या लता वीरुधो वकुलाः केसराश्च येषां तैस्तथोक्तैः ॥ "विशारदो मधमन्धो वकुलः सर्वकेसरः" इति वैजयन्ते ॥ फलभृतां कुलैरभितस्ततं व्याप्तं तथा विततं विस्तृतम् ॥

सशुरचापमनेकमणिप्रभैरपपयोविशदं हिमपाण्डुभिः।
अविचलं शिखरैरुपबिभ्रतं ध्वनितसूचितमम्बुमुचां चयम् ॥ १२ ॥

सशुरेति ॥ अनेका विचित्रा मणिप्रभा येषां तैस्तथोक्तैः । हिमेन पाण्डुभिः शिखरैः सशुरचापं सेन्द्रचापम् । अपपयो निर्जलोऽतएव विशदश्च तमपपयोविशदम् । अविचलं देवाद्रिमचलं च । अतः शिखरमङ्गत्वाद्भूदित्यर्थः । किंतु ध्वनितेन गर्जितेन सूचितं ज्ञापितमम्बुमुचां चयमुपबिभ्रतम् ॥ अत्र कविकल्पितसादृश्याच्छिखरैर्मेघसंदेहे मेघविभ्रमसंदेहालंकारः ॥

१ अविचलम्,

Digitized by Google

विकचवारिरुहं दधतं सरः सकलहंसगणं शुचि मानसम् ।
शिवमगात्मजया च कृतेर्ष्यया सकलहं सगणं शुचिमानसम् ॥ १३ ॥

विकचेति ॥ पुनश्च । विकचवारिरुहम् । नित्यविकसितारविन्दमित्यर्थः । हृद्यिसा-मर्थ्यात् । कलहंसगणैः सह वर्तत इति सकलहंसगणम् ॥ "कादम्बः कलहंसः स्यात्" इत्यमरः ॥ यद्वा । सकला सर्वे हंसगणा यस्मिंस्तत्तथोक्तम् । शुचि निम-र्मलं मानसं मानसाख्यं सरो दधतम् । किंच । कृतेर्ष्यया । कृतश्चिन्मिथात्कुपितये-त्यर्थः । अगात्मजया पार्वत्या सकलहं सविवादं सगणं समथयम् ॥ "गणाः प्रमथसं-ख्यौघाः" इति वैजयन्ती ॥ शुचिमानसमविद्याविनिर्मुक्तचित्तं शिवं च दधतम् ॥ एतेन सकलशैलवैलक्षण्यमस्योक्तम् ॥

ग्रहविमानगणानभितो दिवं ज्वलयतौषधिजेन कृशानुना ।
मुहुरनुस्मरयन्तमनुक्षपं त्रिपुरदाहमुमापतिसेविनः ॥ १४ ॥

ग्रहेति ॥ दिवमभितो दिवोऽभितम् ॥ "अभितःपरितः–" इत्यादिना द्वितीया ॥ ग्रहाश्चन्द्रादयो विमानानि देवयानानि च ॥ "व्योमयानं विमानोऽस्त्री" इत्य-मरः ॥ तेषां गणान्ज्वलयता प्रदीपयता ॥ "मितां ह्रस्वः" इति ह्रस्वः ॥ ओषधि-जेन तृणाविशेषजन्येन कृशानुनानुक्षपं प्रतिक्षपम् ॥ वीप्सायामव्ययीभावः ॥ उमा-पतिसेविनः प्रमथादीन् ॥ "गतिबुद्धि–" इत्यादिना द्विकर्मत्वम् । त्रयाणां पुराणां समाहारस्त्रिपुरम् ॥ "तद्धितार्थ–" इत्यादिना समासः । "पात्रादिभ्यः प्रतिषेधो व-क्तव्यः" इति स्त्रीलिङ्गप्रतिषेधः ॥ तस्य दाहं त्रिपुरदाहं मुहुरनुस्मरयन्तम् ॥ ननु "अधीगर्थ–" इत्यादिना दाहमित्यत्र षष्ठी किं न स्यात् । तस्याः शेषार्थे विधाना-च्छेषस्याविवक्षितत्वात् ॥ अत्र "कविसंमतसाहश्यात्स्मृतिः" इति स्मरणालंकारः ॥

विततशीकरराशिभिरुच्छ्रितैरुपलरोधविवर्तिभिरम्बुभिः ।
दधतमुन्नतसानुसमुद्धतां धृतसितव्यजनामिव जाह्नवीम् ॥ १५ ॥

विततेति ॥ विततशीकरराशिभिर्विस्तृतशीकरपुञ्जैरुच्छ्रितैरुत्पतितैः । कृतः । उपलरोधेनाविवर्तिभिरम्बुभिर्हेतुभिः । धृतसितव्यजनामिव गृहीतामलचामरामिव स्त्रियमिवोत्प्रेक्षा । उन्नतसानुषु सद्युद्धतां वहन्तीं जाह्नवीं गङ्गां दधतम् ॥

अनुचरेण धनाधिपतेरथो नगविलोकनविस्मितमानसः ।
स जगदे वचनं प्रियमादरान्मुखरतावसरे हि विराजते ॥ १६ ॥

अनुचरेणेति ॥ अथोऽनन्तरम् ॥ "मङ्गलानन्तरारम्भप्रश्नकात्स्न्येष्वथो अथ" इत्यमरः ॥ धनाधिपतेरनुचरेण यक्षेण नगविलोकनविस्मितमानसः सोऽर्जुनः ।

Digitized by Google

आदरात्प्रियं वचनं जगदे गदितः ॥ गदतेर्दुषर्वस्य दुरादिस्वात्मघाने कर्मणि क्विप् ॥ अपृष्टपरिभाषणदोषं परिहरति— सुखरतेति ॥ सुखरता वाचालत्वम् । अपृष्टपरिभाषित्वमिति यावत् । अवसरे श्रोतुराकाङ्क्षासमये विराजते हि । आकाङ्क्षितमपृष्टोऽपि ब्रूयादिति भावः ॥

अलमेष विलोकितः प्रजानां सहसा संततिमंहसां विहन्तुम् ।
घनवर्त्म सहस्रधैव कुर्वन्हिमगौरैरचलाधिपः शिरोभिः ॥ १७ ॥

अलमिति ॥ हिमेन गौरैः शुभ्रैः शिरोभिः शिखरैर्घनवर्त्म खं सहस्रधा कुर्वन्विपाटयन्निवेत्युत्प्रेक्षा । एषोऽचलाधिपो हिमवान्प्रजानां लोकितो दृष्टमात्र एव प्रजानामंहसां संततिं पापसंघातं सहसा विहन्तुमलं समर्थः ॥ "पर्याप्तिवचनेष्वलमर्थेषु" इति तुमुन् ॥ औपच्छन्दसिकं हृत्यम्— "पर्यन्तेयौ तयैव शेषं चौपच्छन्दसिकं बुधैरिष्टकम्" इति स्मरणात् ॥

इह दुरधिगमैः किंचिदेवागमैः सततमसुतरं वर्णयन्त्यन्तरम् ।
अमुमतिविपिनं वेद दिव्यापिनं पुरुषमिव परं पद्मयोनिः परम् ॥ १८ ॥

इहेति ॥ इहास्मिन्पर्वते । असुतरं न भवतीत्यसुतरम् । दुस्तरमित्यर्थः ॥ तरतेः सुखमत्ययः ॥ अन्तरं मध्यभागम् । पुरुषे त्वन्तरं तत्त्वम् । दुरधिगमैर्दुर्ग्रहैर्दुःखेनाधिगन्तुमशक्यैरागमैः पुराणादिभिः किंचिदेव सततं वर्णयन्ति । न तु कदाचित्सम्यक्षेणापि निःशेषं ज्ञातुमशक्यत्वादिति भावः । किंत्वतिविपिनमतिगहनं दिव्यापिनमद्रिं गिरिं परं पुरुषं परमात्मानमिव परं केवलम् ॥ "परमव्ययमिच्छन्ति" इति विष्णुः ॥ पद्मयोनिर्ब्रह्मैव वेद । आम्य इत्यर्थः ॥ "विदो लटो वा" इति जसादेशः ॥ अत्रोपमानोपमेयभावः संसृष्टिः ॥ क्षमाहृत्यम्—"सुरगरसयतिर्नौ भरौ गः क्षमा" ॥

रुचिरपल्लवपुष्पलतागृहैरुपलसज्जलजैर्जलराशिभिः ।
नवति संततमुत्सुकतामयं धृतिमतीरुपकान्तमपि स्त्रियः ॥ १९ ॥

रुचिरपल्लवेति ॥ अयं गिरिः । रुचिराणि पल्लवानि पुष्पाणि च येषां ते तथाभूता लतागृहा येषु तैस्तथोक्तैरुपलसज्जलजैर्जलराशिभिः सरोभिः ॥ करणैः ॥ उपकान्तं कान्तसमीपे धृतिमतीर्धैर्यवतीरपि समीपस्थानपि प्रियान्न गणयन्तीः । मानिनीरित्यर्थः । स्त्रियः संततमुत्सुकतां नवति । तासां मानग्रन्थिं शिथिलयतीत्यर्थः । अथवा । उपकान्तं धृतिमतीस्तद्दृढमतीरपि सुरतदृशा अपि पुनरुत्सुकतां नवतीत्यर्थः ॥ उपजातिपाथुरीपकरणवातिलयोर्मिश्रः ॥ हृत्यमुक्तम् ॥

१ दुर्गः.

Digitized by Google

सुलभैः सदा नयवतायवता निधिगुह्यकाधिपरमैः परमैः ।
अमुना धनैः क्षितिभृतातिभृता समतीत्य भाति जगती जगती॥२०॥

सुलभैरिति ॥ नयवता नीतिमतायवता भाग्यवता च सदा सुलभैः । नाम्नैरित्यर्थः ॥ "अथः शुभावहो विधिः" इत्यमरः ॥ निधीनां महापद्मादीनाम् ॥ "अब्जी पद्मो महापद्मः शङ्खो मकरकच्छपौ । मुकुन्दकुन्दनीलाश्च वर्चाः स्युर्निधयो नव" इत्यमरः ॥ गुह्यकानां चाधिपं कुबेरं रमयन्तीति तथोक्तैः ॥ "कर्मण्यण्" ॥ परमैरुत्कृष्टैर्धनैः ॥ करणैः ॥ अमुना क्षितिभृता हेतुनातिभृता पूर्णा सती जगती मही जगती स्वर्गपाताललोकौ समतीत्यातीत्य भाति । अमानुषैरपि दुर्लभाः संपदोऽत्र संभवन्तीति भावः ॥ अत्र धनाधिपतेरिति पदार्थस्य विशेषणगत्या जगदतिक्रमणहेतुत्वोक्त्या काव्यलिङ्गम् । तस्य यमकेन संसृष्टिः ॥ प्रमिताक्षराहृत्तम्— "प्रमिताक्षरा सजससैरुदिता" इति लक्षणात् ॥

अखिलमिदमुष्य गौरीगुरोस्त्रिभुवनमपि नैति मन्ये तुलाम् ।
अधिवसति सदा यदेनं जनैरविदितविभवो भवानीपतिः ॥ २१ ॥

अखिलमिति ॥ अमुष्य गौरीगुरोर्हिमवत इदमखिलम् । त्रयाणां भुवनानां समाहारस्त्रिभुवनमपि ॥ "तद्धितार्थ–" इत्यादिना समासः । पात्रादित्वात्स्त्रीत्वप्रतिषेधः ॥ तुलां साम्यं नैतीति मन्ये । यतो जनैरविदितविभवोऽज्ञातमहिमा भवानीपतिः सदैनं गिरिमधिवसति । अस्मिन्वसतीत्यर्थः ॥ "उपान्वध्याङ्वसः" इति कर्मत्वम् ॥ अतोऽयं धर्मक्षेत्रमिति भावः ॥ प्रभाहृत्तम्— "स्वरसरविरतिर्नौ सरौ प्रभा" इति लक्षणात् ॥

वीतजन्मजरसं परं शुचि ब्रह्मणः पदमुपैतुमिच्छताम् ।
आगमादिव तमोपहादितः संभवन्ति मतयो भवच्छिदः ॥ २२ ॥

वीतेति ॥ वीते निहते जन्मजरसी यस्य तद्वीतजन्मजरसम् ॥ "जराया जरसन्यतरस्याम्" इति जरसादेशः । अत्र तदन्तविधेरणुत्वात्परत्वेन स्वादेशबाधकत्वाच्च । तथाहि । "ङाऽसिङसामिनात्स्याः" इति स्वादेशबाधनात् । "परत्वाज्जरसादेशं बभाषे भाष्यकृत्स्वयम् । सूत्रकारमते यत्तु ज्ञापकात्परबाधनम् ॥ भवेत्तदपि ङाऽस्योर्न पुनर्ङसि संभवेत् । मतद्वयेऽपि तत्तुल्यं ङसि यत्पूर्वबाधनम् ॥ परत्वाज्जरसादेशस्तस्मात्स्वादेशबाधनात् । ज्ञापकं चात्र ङाऽस्योर्बाधादेशाविनादिति ॥ ईकारदीर्घयोस्तत्र वैयर्थ्यं तनु तौ विना । एत्वे सवर्णदीर्घे च रूपसिद्धिर्भवेद्यतः ॥ व्यर्थसूत्रात्परत्यागाद्येन तज्ज्ञापकं फणी । स्वातन्त्र्याज्जरसादेशे जगौ पूर्वस्य बाधनात् ॥ समर्थनमपश्यद्भिः भाष्यकैयटयोः स्फुटः" । एवं च यदत्र जरस इति केषांचित्पाठान्तरकल्पनं तदज्ञानविजृम्भितमेव । ब्रह्मणः परमात्मनः

Digitized by Google

संबन्धि परमुत्कृष्टं शुचि निष्कलङ्कम् । पदत इति पदं स्थानं तादात्म्यलक्षणम् । मुक्तिमित्यर्थः । उपैतुं प्राप्तुमिच्छतां मुमुक्षूणामागमाच्छास्त्रादिव । तमोऽपहन्तीति तमोऽपहादविद्यानिवर्तकत्वात् ॥ "अपे क्लेशतमसोः" इति क्विप्प्रत्ययः ॥ इतोऽस्माद्गिरेः । भवं छिन्दन्तीति भवच्छिदः संसारनिवर्तकाः ॥ "सत्सूद्विष–" इत्यादिना क्विप् ॥ मतयस्तत्त्वज्ञानानि संभवन्ति । क्षेत्रविशेषस्यापि ज्ञानोपपादकत्वादित्याशयः । न च केवलं भोगभूमिः किंतु मुक्तिक्षेत्रमपीति तात्पर्यार्थः ॥ रथोद्धतावृत्तम् । तल्लक्षणम्—"राजरावियं रथोद्धता लगौ" इति ॥

दिव्यस्त्रीणां सचरणलाक्षारागा रागायाते निपतितपुष्पापीडाः ।
पीडाभाजः कुसुमचिताः साशंसं शंसन्त्यस्मिन्सुरतविशेषं शय्याः २३

दिव्येति ॥ अस्मिन्गिरौ । चरणलाक्षारागैः सह वर्तन्ते तास्तथोक्ताः । वेत्रुकपुरुषापितादिवन्वेषु स्त्रियः पादतलस्पर्शाच्चरणागाङ्किता इत्यर्थः । निपतिता व्यानतकरणे स्त्रीणामधोमुखत्वान्मूर्ध्नः पुष्पापीडाः कुसुमशेखरा यासु तास्तथोक्ताः ॥ "शिखास्वापीडशेखरौ" इत्यमरः ॥ पीडाभाजो विमर्दभाजः । भङ्गिमत्य इत्यर्थः । भ्रमरमेखलोल्लितादौ सर्वतः कटिपरिभ्रमणसंभवादिति भावः । कुसुमैश्चिताः कुसुमचिताः । इममार्जारादिकरणेषु स्तनयुगायवयवानां शय्यातलस्थापित्वान्मार्दवाय कुसुमचिताः । कुसुमास्तृता इत्यर्थः । दिव्यस्त्रीणां संबन्धिन्यः । शेरत आसितेति शय्यास्तल्पानि ॥ "संज्ञायां समजनिषद–" इत्यादिना क्यप् ॥ रागायाते रागोद्रेके सति यः साशंसः सतृष्णः सुरतविशेषस्तम् ॥ जातावेकवचनम् ॥ सुरतविशेषानित्यर्थः । शंसन्ति सूचयन्ति । विदुष्यन्तीत्यर्थः ॥ अत्र लाक्षारागादिपदार्थानां सुरतविशेषशंसनं प्रति विशेषणगत्या हेतुत्वोक्त्या काव्यलिङ्गमलंकारो वमकेन संसृज्यते ॥ जलधरमालावृत्तम्— "म्भौ स्मौ चेत्स्याज्जलधरमाला क्ष्माता" इति लक्षणात् ॥ वेत्रुकादिवन्धलक्षणं तु रतिरहस्ये—"न्यस्तहस्तयुगला निजे पदे योषिदेति कटिरूढवल्लभा । अग्रतो यदि शनैरधोमुखी वेत्रुकं द्रुपवदुच्यते प्रिये ॥ स्वेच्छया भ्रमति वल्लभेऽपि या योषिदाचरति वल्लभायितम् । ध्यानतं रतमिदं यदि प्रिया स्यादधोमुखचतुष्पदाकृतिः ॥ तत्कटिं समधिरुह्य वल्लभः स्वाङ्घ्रिपादिपशुसंस्थितिस्थितः । चक्रवद्भ्रमति कुक्षितम्बिका भ्रामरं निगदितं सतुद्यते ॥ सर्वतः कटिपरिभ्रमो यदि श्रेक्षपूर्वमिदमुक्तमारतम् । भूगतस्तनयुगास्यमस्तकाङ्घ्रियुता स्वयमधोमुखी स्त्रियम् । क्रामति स्मरकरङ्कमेहने वल्लभे करिरतं तदुच्यते" ॥ "मस्तारिते पाणिपादे शय्यास्थिमुखोरसि । उन्नतायाः स्त्रियाः कट्यां मार्जारीकरणं विदुः" इति ग्रन्थान्तरे ॥

शुनसंपदा समधिगम्य परं महिमानमत्र महिते जगताम् ।
नवशालिनि श्रिय इवाधिपतौ विरमन्ति न ज्वलितुमौषधयः ॥ २४ ॥

१ वक्त्रः ।

Digitized by Google

गुणेति ॥ जनतां महिते जनभिः पूजिते पूज्यमाने ॥ "मतिबुद्धि–" इत्यादिना वर्तमाने क्तः । "क्तस्य च वर्तमाने" इति षष्ठी ॥ अत्र हिमवत्पीयूषयत्नगज्योतींषि नयशास्त्रिन्यधिपतौ नीतिसंपन्ने राज्ञि श्रियः संपद इव गुणसंपदा सेव्यगुणसंपत्त्या । अन्यत्र संख्यादिगुणसंपदा । परं महिमानम् । उभयत्रापि प्रकाशसामर्थ्यम् । समधिगम्य व्यक्तिं प्रकाशितुं न विरमन्ति । अविरतं व्यक्तीस्यर्थः । अन्यत्र राज्ञादावेवेति भावः ॥

कुररीगणः कृतरवस्तरवः कुसुमानताः सकमलं कमलम् ।
इह सिन्धवश्च वरणावरणाः करिणां मुदे सनलदानलदाः ॥ २५ ॥

कुररीति ॥ इहाद्रौ कुररीगण उत्क्रोशसङ्घः ॥ "उत्क्रोशकुररौ समौ" इत्यमरः ॥ कृतरवः कृतारवः । तरवः द्रुमैरानताः । कमलं जलं सकमलं सपद्मम् ॥ "कमलं जलपद्मयोः" इति विश्वः ॥ वरणा द्रुमा आवरणं यासां ता वरणावरणाः ॥ "वरणो वरुणः सेतुस्त्रिकक्षाकः कुमारकः" इत्यमरः ॥ सनलदाः सोशीराः ॥ "खुलेऽस्त्रोशीरमस्त्रियाम् । अभयं नलदं सेव्यम्" इत्यमरः ॥ अनलं संतापं यन्ति खण्डयन्ति शमयन्तीत्यनलदाः । सनलदाश्च ता अनलदाः सिन्धवो नद्यः करिणां मुदे । भवन्तीति शेषः । न कृष्णाम्बुकवैपरीत्यमिति भावः ॥

सादृश्यं गतमपनिद्रचूतगन्धै-
रामोदं मदजलसेकजं दधानः ।
एतस्मिन्मदयति कोकिलानकाले
लीनालिः सुरकरिणां कपोलकाषः ॥ २६ ॥

सादृश्यमिति ॥ एतस्मिन्पर्वतेऽपनिद्रचूतगन्धैः सादृश्यं गतं फुल्लाम्रपुष्पसदृशं मदजलसेकजमामोदं परिमलं दधानो बिभ्राणः । अतएव लीनालिः संसक्तभृङ्गः सुरकरिणाम् । कष्यते अनेनेति काषः । कपोलानां काषः कपोलस्थानं द्रुमस्कन्धादि । अकाले वसन्तातिरिक्ते कालेऽपि कोकिलान्मदयति ॥ "मितां ह्रस्वः" इति ह्रस्वः ॥ अत्र वसन्तरूपकारणाभावेऽपि मदास्यकार्योत्पत्तिकथनाद्विभावनालंकारः । तदुक्तम्—"कारणेन विना कार्यस्योत्पत्तिः स्याद्विभावना" इति । सा च चूतगन्धैः सादृश्यमित्युपमया सामोदं दधान इति पदार्थहेतुकाव्यलिङ्गेन चाक्षाद्विभावेन संकीर्यते । किंच कोकिलानां मदगन्धकचूतगन्धाघ्राणा भ्रान्तिमदलंकारो व्यज्यते ॥ मदर्पणशीलम्—"शौ शौ मदिदमयतिः मदर्पणीवम्" इति लक्षणात् ॥

Digitized by Google

सनाकवनितं नितम्बरुचिरं चिरं मुनिनदैर्नदैर्दृतमप्रुम् ।
मता फणवतोऽवतो रसपरा परास्तवसुधा सुधाधिवसति ॥ २७ ॥

सनाकेति ॥ पुनश्च । सनाकवनितं साप्सरस्कं नितम्बैः कटकै रुचिरं मुनिनदैः मुखोपैर्नदैः मवाहैर्दृतमप्रुम् । अप्रुष्मिन्निरावित्यर्थः ॥ "उपान्वध्याङ्वसः" इति कर्मत्वम् ॥ अवतोऽधोलोकरक्षकस्य फणवतो नागराजस्य मतेष्टा ॥ "मतिबुद्धि—" इत्यादिना वर्तमाने क्तः । तथोगात्षष्ठी ॥ रसेन परोत्कृष्टा परास्तवसुधा यत्कर्तृकेति सुधासूतं चिरमधिवसति । अतोऽन्यत्र भूमण्डले कुत्रापि सुधा नास्तीत्यर्थः । मेरुप्रभावोऽयं गिरिरिति भावः ॥ अत्र प्रस्तुतविशेषणसामर्थ्यादप्रस्तुतमेरुप्रतीतेः समासोक्तिरलंकारः । स च यमकेन संसृज्यते ॥ जलोद्धतगतिहृच्छ्रु—"रसैर्भसजसा जलोद्धतगतिः" इति लक्षणात् ॥

श्रीमल्लताभवनमोषधयः प्रदीपाः
शय्या नवानि हरिचन्दनपल्लवानि ।
अस्मिन्नतिश्रमनुदश्च सरोजवाताः
स्मर्तुं दिशन्ति न दिवः सुरसुन्दरीभ्यः ॥ २८ ॥

श्रीमदिति ॥ अस्मिन्गन्धौ श्रीमत्समृद्धिमल्लता एव भवनम् । ओषधयस्तृणज्योतींष्येव प्रदीपाः । नवानि हरिचन्दनपल्लवानि सुरतरुकिसलयान्येव शय्याः ॥ "हरिचन्दनमाख्यातं गोधीर्षे सुरपादपे" इति विश्वः ॥ रतिश्रमनुदः सुरतश्रमहारिणः सरोजवाताश्च । सुरसुन्दरीभ्यः ॥ क्रियाग्रहणाच्चतुर्थी ॥ दिवो दिवम् ॥ "अपीनर्ध—" इत्यादिना कर्मणि षष्ठी ॥ स्मर्तुं न दिशन्ति । विस्मारयन्तीत्यर्थः । स्वर्गादप्यतिरिच्यतेऽसाविति भावः ॥ अत्र पूर्वार्धे रूपकमपि स्फुटमेव ॥

ईशार्धमम्भसि चिराय तपश्चरन्त्या
यादोविलङ्घनविलोलविलोचनायाः ।
आलम्बताग्रकरमत्र भवो भवान्याः
श्योतन्निदाघसलिलाकुलिना करेण ॥ २९ ॥

ईशार्धमिति ॥ ईशायेतीशार्धं यथा तथेति क्रियाविशेषणम् ॥ "अर्धेन सह निष्पत्तयाः सर्वलिङ्गता च वक्तव्या" ॥ चिराय चिरमम्भसि तपश्चरन्त्या अतएव यादोविलङ्घनविलोलविलोचनाया जलजन्तुविघट्टितचञ्चलेक्षणायाः । तपसोऽप्यधिकर-

१ मूर्ति. २ विश्व. ३ मुक्त्.

Digitized by Google

ऽपि विलोभयन्त्येति भावः ॥ "यादांसि जलजन्तवः" इत्यमरः ॥ भवाम्बा भवपत्न्याः । मयोगकालापेक्षोऽयं निर्देशः ॥ "इन्द्रवरुणभव—" इत्यादिना ङीष् । आनुगागमश्च ॥ करैकदेशस्यापि करत्वादग्रभासौ करभेति समानाधिकरणे समासः । अतएव वामनः—"हस्ताग्राग्रहस्तयोर्गुणगुणिनोर्भेदाभेदौ" इति ॥ तमग्रकरं भवः शिवः श्रोतस्त्रिदाधसलिलाङ्गुलिना स्रवत्स्वेदाङ्गुलिनेति सात्त्विकोक्तिः । करेणाग्र गिरावालम्बत गृहीतवान् ॥ अत्राङ्गुलातीतहृत्तान्तस्य प्रत्यक्षवदभिधानाद्भाविकालंकारः—"अतीतानागते यत्र प्रत्यक्षवदवस्थिते । अत्यद्भुतार्थकार्यत्वाद्भाविकं तदुदाहृतम्" इति लक्षणात् ॥ वसन्ततिलकाहृत्तम्—"उक्ता वसन्ततिलका तभजाजगौ गः" इति तल्लक्षणात् ॥

येनापविद्धसलिलः स्फुटनागसद्मा
देवासुरैरमृतमम्बुनिधिर्मथन्ये ।
व्यावर्तनैरहिपतेरयमाहिताङ्कः
स्वं व्यालिखन्निव विभाति स मन्दराद्रिः ॥ २० ॥

येनेति ॥ देवाश्चासुराश्च तैर्देवासुरैः ॥ "येषां च विरोधः शाश्वतिकः" इति नैकपद्भावः । एषां यतः कार्यत एव विरोधो न गोव्याघ्रादिवच्छाश्वतिक इत्याहुः ॥ येन मन्दराद्रिणा । मन्यदण्डीकृतेनेति भावः । अपविद्धसलिलः क्षिप्तजलोऽतएव स्फुटं नागसद्म पातालं यस्मिन्सोऽम्बुनिधिरमृतं ममन्थे मथितः ॥ मथ्नातेर्द्विकर्मकत्वादुद्दादित्वादप्रधाने कर्मणि लिट् ॥ अहिपतेः । मन्थगुणीकृतस्य वासुकेरित्यर्थः । "मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम्" इति भारतवचनात् । व्यावर्तनैर्वेष्टनैराहिताङ्कः कृतचिह्नः सोऽयं मन्दराद्रिः समाकाशं व्यालिखन्व्यापादयन्निव विभाति ॥ अत्रोत्प्रेक्षातदुपादानेनैव ललेखनेनोत्प्रेक्षणादद्भुपाद्यगुणनिमित्ता क्रियास्वरूपोत्प्रेक्षा ॥

नीतोच्छ्रायं मुहुररिशिरःश्मेरुशृङ्गै-
रानीलाभैर्विरचितपरभागा रत्नैः ।
ज्योत्स्नाशङ्कामिह वितरति हंसश्येनी
मध्येऽप्यङ्गः स्फटिकरजतभित्तिच्छाया ॥ २१ ॥

नीतेति ॥ इहाद्रावरिशिरःश्मेरुण्यांशोरुशृङ्गैर्मयूखैः । संक्रान्तैरित्यर्थः । नीतोच्छ्रायमुच्छ्रायं नीता । विस्तारितेत्यर्थः । तथानीलाभैरसितप्रभरत्नैरिन्द्रनीलैर्विरचितपरभागा । तत्संनिधानाच्छुभ्रोत्कर्षेत्यर्थः । हंस इव श्येनी श्वेतवर्णा ॥ "विशदश्वेतपाण्डराः" इत्यमरः ॥ "वर्णादनुदात्तात्तोपधात्तो नः" इति श्येनशब्दा-

Digitized by Google

ष्णीद् । सकारस्य च मकारः ॥ स्फटिकानां रजतानां च भिन्नयस्त्रासां छाया कान्तिः । अहो मध्ये । मध्याह्नेऽपीत्यर्थः । मुहुर्म्योत्स्नायाह्नां वितरति । म्योत्स्नाकृते भ्रान्तिं जनयतीति भ्रान्तिमदलंकारः ॥

दधत इव विलासशालि नृत्यं मृदु पतता पवनेन कंम्पितानि ।
इह ललितविलासिनीजनभ्रूगतिकुटिलेषु पयःसु पङ्कजानि ॥ ३२ ॥

दधत इति ॥ इहाह्नौ मृदु पतता मन्दं वहता पवनेन कम्पितानि पङ्कजानि ललितविलासिनीजनस्य भ्रूगतिवत्कुटिलेषु । ईषच्चलितेष्वित्यर्थः । पयःसु विलासशालि नृत्यं दधत इव । सविलासं नृत्यन्तीवेत्युत्प्रेक्षा ॥ पुष्पिताग्राहचत् ॥

अस्मिन्नगृह्णत पिनाकभृता सलील-
मावद्धवेपथुरधीरविलोचनायाः ।
विन्यस्तमङ्गलमहौषधिरीश्वरायाः
सस्तोरगप्रतिसरेण करेण पाणिः ॥ ३३ ॥

अस्मिन्निति ॥ अस्मिन्नद्रौ पिनाकभृता शिवेनाधीरविलोचनायाश्चकितनेत्रायाः । उरगदर्शनादिति भावः । ईश्वरायाः गौर्याः ॥ "स्येशसास-" इत्यादिना वरङ् । पुंयोगविवक्षायामाच्च ङीप् ॥ आवद्धवेपथुः प्राप्तकम्प इति सात्त्विकोक्तिः ॥ "द्विरोष्ठ्यपूर्" इत्यपुच्छब्दस्यः ॥ विन्यस्ता मङ्गलमहौषधिर्यवाङ्कुरादि यस्मिन्स पाणिः । सस्तो नक्षित उरग एव प्रतिसरः कौतुकसूत्रं यस्य तेन ॥ "आहुः प्रतिसरौ हस्तसूत्रे माल्ये च मण्डने" इति विश्वः ॥ करेण सलीलमगृह्णतेति देवस्य पार्वतीपरिजनमपर्णनम् ॥ ईश्वरायेत्यत्र स्वप्नुग्रहमानोक्तिरित्यपीमरसञ्चयम् ॥ भाविकमेवालंकारः ॥

कामद्रिर्घनपदवीमनेकसंख्यै-
स्तेजोभिः शुचिमणिजन्मभिर्विभिन्नः ।
उत्सानां व्यभिचरतीव सप्तसप्तेः
पर्यन्तस्थिह निचयः सहस्रसंख्याम् ॥ ३४ ॥

कामद्रिरिति ॥ घनपदवीमाकाशं कामद्रिर्व्याप्नुवानैरनेकसंख्यैः । परः सहस्रैरित्यर्थः ॥ क्वचित् "अनेकपदैः" इति पाठस्तु सामादिक एव । वैपर्यादिहयाज्ञायेति ॥ शुचिमणिजन्मभ्यः स्फटिकेभ्यो जन्म येषां तैः ॥ "जन्मापुष्पपदो

१ ङीप्नोद.

Digitized by Google

बहुव्रीहिर्व्यधिकरणोऽपीष्यते" इति वामनः ॥ तेजोभिर्विभिन्नो विभोऽतएव पर्यस्यन्प्रसर्पन्निद्राद्रौ तप्तसप्तेः सवितुरुत्साणां किरणानां निचयो निकरः। सहस्रमिति संख्या सहस्रसंख्या तासु। स्तनियतामिति शेषः। व्यभिचरत्यतिक्रामतीवेत्युत्प्रेक्षा ॥

व्यधत्त यस्मिन्पुरमुज्झगोपुरं पुरां विजेतुर्धृतये धनाधिपः।
स एष कैलास उपान्तसर्पिणः करोत्यकालास्तमयं विवस्वतः ॥२५॥

व्यधत्तेति ॥ यस्मिन्कैलासे धनाधिपः कुबेरः पुरां त्रिजेतुः शिवस्य धृतये संतोषायोज्झगोपुरमुज्झतपुरद्वारम् ॥ "पुरद्वारं तु गोपुरम्" इत्यमरः ॥ पुरमलकाख्यां पुरीं व्यधत्त निर्मितवान्। तस्मात्स्वित्यादिति भावः। स एष कैलास उपान्तसर्पिणः प्रान्तचारिणो विवस्वतोऽकाले प्रसिद्धेतरकालेऽस्तमयं करोतीवेत्युत्प्रेक्षा। वस्तुतस्तु तत्कारणाभावाद्दृष्यब्रकामयोगाद्गम्योत्प्रेक्षा। सा चोपान्तवर्तितया संबन्धे संबन्धलक्षणातिशयोक्त्युत्थापितेति विवेकः॥ अस्तमिति मकारान्तमव्ययम्। तस्य पचाद्यजन्तेनायशब्देन षष्ठीसमासः ॥ वंशस्थं वृत्तमुक्तम् ॥

नानारत्नज्योतिषां संनिपातैश्छन्नेष्वन्तःसानु वप्रान्तरेषु।
बद्धांबद्धां भित्तिशङ्कामसुष्मिन्नावानावान्मातरिश्वा निहन्ति॥२६॥

नानेति ॥ अमुष्मिन्कैलासेऽन्तःसानु। सानुप्रियर्थः ॥ विभक्तयर्थेऽव्ययीभावः ॥ नानारत्नज्योतिषां संनिपातैर्व्यतिकरैश्छन्नेषु छादितेषु ॥ "वा दान्तशान्त–" इत्यादिना निपातः ॥ वप्रान्तरेषु कटकान्तरेषु बद्धांबद्धामभीष्णबद्धाम्। दृढोत्पादितामित्यर्थः ॥ "नित्यदीप्तयोः" इति नित्यार्थे द्विर्भावः। "नित्यमाभीष्ण्ये" इति काधिका ॥ एकपदं चैतत् ॥ भित्तिशङ्कां भित्तिरिति संदेहमावानावानभीष्ण्यमापतन् ॥ आङ्पूर्वाद्धाधातोः क्तमत्ययः ॥ द्विर्भावादि पूर्ववत् ॥ मातर्यन्तरिक्षे श्वयति गच्छतीति मातरिश्वा वायुः ॥ कनिन्प्रत्ययः। "तत्पुरुषे कृति बहुलम्" इत्यलुक् ॥ निहन्ति निवर्तयति। वायुसंचाराद्भित्त्यभावोऽवधार्यत इत्यर्थः। अतो निश्चयान्तः संदेहालंकारः ॥ शालिनीवृत्तम् ॥

रम्या नवद्युतिरपैति न शाद्वलेभ्यः
श्यामीभवन्त्यनुदिनं नलिनीवनानि।
अस्मिन्विचित्रकुसुमस्तवकाचितानां
शाखाभृतां परिणमन्ति न पल्लवानि ॥ २७ ॥

रम्येति ॥ अस्मिन्नद्रौ। शादाः शब्दानि सन्त्येष्विति शाद्वलास्तेभ्यः ॥ "शाद्वलः शादहरिते" इत्यमरः ॥ मतुवादाद्वलच् ॥ रम्या नवा द्युतिर्नापैति।

Digitized by Google

किंतु नित्येत्यर्थः । नलिनीवनान्यनुदिनं सर्वदा श्यामीभवन्ति । न कदाचित्या-ण्डरीभवन्तीत्यर्थः । विचित्रद्रुमस्तवकैराचितानां व्याप्तानां शाखाभुतां तरूणां पल्लवानि न परिजग्मिरे । न जीर्णानि भवन्तीत्यर्थः । सर्वदा नूतनान्येवेत्यर्थः ॥ अत्र प्रस्तुतस्यैव तद्वस्तुगतकान्तिस्थैर्यरूपकार्यवर्णनात्प्रस्तुतमिव कारणं कथिद-साधारणः कैलासस्य महिमावगम्यत इति पर्यायोक्तिरलंकारः । तदुक्तम्—"कारणं गम्यते यत्र प्रस्तुतात्कार्यवर्णनात् । प्रस्तुतत्वेन संबन्धस्तत्पर्यायोक्तमुच्यते" इति ॥

परिसरविषयेषु लीढमुक्ता हरितृणोद्गमशङ्कया मृगीभिः ।
इह नवशुककोमला मणीनां रविकरसंवलिताः फलन्ति भासः॥३८॥

परिसरेति ॥ इहाद्रौ परिसरविषयेषु पर्यन्तदेशेषु ॥ "विषयो देशे" इति निपातः ॥ मृगीभिर्हरितृणोद्गमशङ्कया नीलतृष्णाङ्कुरभ्रान्त्येति भ्रान्तिमदलंकारः । लीढा पूर्वमास्वादिताः पश्चान्मुक्ता लीढमुक्ताः । दग्धमरुद इत्यादिवत् "पूर्वकाल—" इत्यादिना समानाधिकरणसमासः ॥ नवशुककोमलाः । शुकसदृशा इत्यर्थः । मणीनां मरकतमणीनां भासो रविकरैः संवलिता मिश्रिताः सत्यः फलन्ति संपूर्णयन्ति । वर्धन्त इति यावत् ॥

उत्फुल्लस्थलनलिनीवनादमुष्मा-
दुद्भूतः सरसिजसंभवः परागः ।
वात्याभिर्वियति विवर्तितः समन्ता-
दाधत्ते कनकमयातपत्रलक्ष्मीम् ॥ ३९ ॥

उत्फुल्लेति ॥ वात्याभिर्वातसमूहैः ॥ "वातादिभ्यो यत्" इति यत्प्रत्ययः ॥ अमुष्मादुत्फुल्लस्थलनलिनीवनात् । जलपतितस्य परागस्योत्थानासंभवात्स्थलग्रहणम् ॥ उत्फुल्लसंफुल्लयोरुपसंख्यानाज्जिघ्रादेशत्वम् ॥ उद्भूत उत्थापितो वियति समन्ताद्विवर्तितः परिभ्रामितः । अन्तराले तु दृश्यमान एवेति भावः । सरसिजसंभवः पद्मोद्भवः परागः ॥ रूढ्यभिप्रायेणात्र सरसिजशब्दप्रयोगो द्रष्टव्यः ॥ कनकमयातपत्रलक्ष्मीमाधत्ते ॥ अत्र परागस्यातपत्रलक्ष्मीसंबन्धासंभवात्तत्सदृशीं लक्ष्मीमिति प्रतिबिम्बेनालेपादसंभविधर्मसंबन्धेयं निदर्शना । तदुक्तम्— "असंभवद्धर्मयोगादुपमानोपमेययोः । प्रतिबिम्बक्रियागम्या यत्र सा स्यान्निदर्शना" इति ॥

इह सनियमयोः सुरापगायामुपसि सयावकसव्यपादरेखा ।
कथयति शिवयोः शरीरयोगं विषमपदा पदवी विवर्तनेषु ॥ ४० ॥

१ मयम. २ विद्रुमस्तव. ३ वीचिभिर्वा. ४ उद्भूत. ५ निपातनेषु.

Digitized by Google

इतेति ॥ इहाद्रावुपसि प्रभाते सुरापगायां लक्षणया तत्कच्छे सपादका सालक्तका सव्यपादस्य रेखा वामचरणमुद्रा यस्यां सा ॥ "पादोऽस्त्री तुरीयांशः" इत्यमरः ॥ तथा विपमाणि महदल्पानि पदानि यस्यां सा विवर्तनेषु प्रदक्षिणक्रियासु पदवी । शिवयोः प्रदक्षिणपद्धतिरित्यर्थः । सनियमयोः । संध्यायां भजमतोरित्यर्थः । शिवा च शिवश्च तयोः शिवयोरुमाशंकरयोः ॥ "पुमान्स्त्रिया" इत्येकशेषः ॥ शरीरयोगमर्धाङ्गसंघटनारूपं कथयति । सनियमयोरिति नियमविषयेऽपि विरहासहाविह विहरतः शिवाविति भावः ॥ अत्र पदवीविशेषणपदार्थयोः कथनं प्रति हेतुत्वात्काव्यलिङ्गमलंकारः ॥

संमूर्च्छतां रजतभित्तिमयूखजालै-
रालोलपादपलतान्तरनिर्गतानाम् ।
घर्मच्युतेरिह मुहुः पटलानि धाम्ना-
मादर्शमण्डलनिभानि समुल्लसन्ति ॥ ४१ ॥

संमूर्च्छतामिति ॥ इहाद्रौ रजतभित्तिमयूखजालैः संमूर्च्छतां बहुलीभवतामालोलानां पादपलतानां तरुशाखानामन्तरेषु रन्ध्रेषु निर्गतानां प्रसृतानां घर्मच्युतेरुष्णांशोर्धाम्ना तेजसामादर्शमण्डलनिभानि दर्पणबिम्बसदृशानीत्युपमालंकारः । पटलानि मण्डलानि मुहुर्वारंवारं समुल्लसन्ति पुनः पुनः स्फुरन्ति । न तु सातत्येन सतानामालोलत्वाभावात् । तच्च नान्यपुत्पपाणादिभावानां संभवतीति भावः ॥

शुक्लैर्मयूखनिचयैः परिवीतमूर्ति-
र्वप्राभिघातपरिमण्डलितोरुदेहः ।
शृङ्गाण्यमुष्य भजते गणभर्तुरुक्षा
कुर्वन्वधूजनमनःसु शशाङ्कशङ्काम् ॥ ४२ ॥

शुक्लैरिति ॥ शुक्लैर्मयूखनिचयैः शुभ्रकिरणसमूहैः परिवीतमूर्तिर्व्याप्तदेहः । वप्राभिघातेन वप्रक्रीडया परिमण्डलितो वर्तुलीकृत उरुदेहो बृहच्छरीरो यस्य तादृशो गणभर्तुः प्रमथनाथस्योक्षा वृषभः ॥ "उक्षानडुान्वलीवर्दः ऋषभो वृषभो वृषः" इत्यमरः ॥ वधूजनमनःसु शशाङ्कशङ्कां चन्द्रभ्रान्तिं कुर्वन् । तेषां मौग्ध्यादिति भावः । अमुष्याद्रेः शृङ्गाणि भजते सेवते ॥ अत्र शशाङ्कशब्दस्य संदेहार्थत्वे संदेहालंकारः । भ्रान्तिपरत्वे भ्रान्तिमदलंकारः । यथेच्छसि तथास्तु । न चोक्ता विशेषणोत्थेन काव्यलिङ्गेनाङ्गाङ्गिभावेन संकीर्यते ॥

Digitized by Google

संप्रति लब्धजन्म शनकैः कथमपि लघुनि
क्षीणपयस्युपेयुषि भिदां जलधरपटले ।
खण्डितविग्रहं बलभिदो धनुरिह विविधाः
पूरयितुं भवन्ति विभवः शिखरमणिरुचः ॥ ४३ ॥

संप्रतीति ॥ इहाद्रौ विविधा नानावर्णाः शिखरमणिरुचः संप्रति । शरदीत्यर्थः । लघुन्यगुरुणि कृतः क्षीणपयस्यतएव भिदां भेदम् ॥ "भिद्भिदादिभ्योऽङ्" इत्यङ्प्रत्ययः ॥ उपेयुषि गते जलधरपटले मेघमण्डले कथमपि घनकैर्लब्धजन्म । उत्पन्नमित्यर्थः । अतएव खण्डितविग्रहं छिन्नस्वरूपं बलभिद इन्द्रस्य धनुः पूरयितुं विभवः समर्था भवन्ति ॥ अत्रेन्द्रधनुषो मणिरुचीनामसंबन्धे संबन्धकथनादतिशयोक्तिरलंकारः ॥ वंशपत्रपतितं हरिणम्—"विद्रुतविलंबपत्रपतितं भरतमलनैः" इति लक्षणात् ॥

क्षपितनवलतातरुप्रवालै-
रमृतलवस्रुतिशालिभिर्मयूखैः ।
सततमसितयामिनीषु शंभो-
रिन्दुलेखा शमलयतीह वनान्तमिन्दुलेखा ॥ ४४ ॥

क्षपितेति ॥ इहाद्रौ शंभोरिन्दुलेखा । क्षपितानि सिक्तानि नवानि लतानां तरूणां च प्रवालानि यैस्तैः । अमृतलवस्रुत्यामृतबिन्दुनिःस्यन्देन शालन्ते ये तैर्मयूखैः सततं सर्वकालमसितयामिनीषु कृष्णपक्षरात्रिष्वपि वनान्तममलयति धवलयति । अन्यत्र नैतदस्तीति व्यतिरेको व्यज्यते ॥

क्षिपति योऽम्बुवनं विततां बृहद्बृहतिकामिव रौचनिकीं रुचम् ।
अयमनेकहिरण्मयकन्दरस्तव पितुर्दयितो जगतीधरः ॥ ४५ ॥

क्षिपतीति ॥ अथ योऽद्रिरम्बुवनं विततां रौचनिकीं रुचम् । सौवर्णीमित्यर्थः । रोचनया रक्तां रौचनिकीम् ॥ "लाक्षारोचनाशकलकर्दमाद्रिक" इति ठक् । "ठिड्ढाणञ्-" इत्यादिना ङीप् ॥ बृहेमेते —बृहद्बृहतिकां महोत्तरासङ्गमिव ॥ "ही मायारोचरासङ्गौ समौ बृहतिका तथा" इत्यमरः ॥ क्षिपति प्रसारयति । अनेका हिरण्मय्यः कन्दरा यस्य सः ॥ हिरण्मयशब्दो "दाण्डिनायन-" इत्यादिना निपातनात्साधुः ॥ अयम् । पुरोवर्तिगिरिरित्यर्थः । तव पितुरिन्द्रस्य दयितः प्रियः । जगन्ति धरो जगतीधरः । वस्ते मन्तव्य इन्द्रक्रीडाक्रम इत्यर्थः ॥

१ वपत्यपि. २ पुस्तिम्.

Digitized by Google

सक्किं जवादपनयत्यनिले लतानां
वैरोचनैर्द्विगुणिताः सहसा मयूखैः ।
रोधोभुवां मुहुरमुत्र हिरण्मयीनां
भासस्तडिद्विलसितानि विडम्बयन्ति ॥ ४६ ॥

सक्किमिति ॥ अमुष्मान्मुष्मिन्नद्रावनिले जवाज्झटिति लतानां सक्किमन्योन्यसङ्गमपनयति सति । सहसा इडादैरोचनैः सावित्रैर्मयूखैर्द्विगुणिता द्विराहृत्ताः कृता इति द्विगुणिताः ॥ "गुणस्त्वाहृत्तिशब्दादिष्विन्द्रियाप्रख्यतन्तुषु" इति वैजयन्ती ॥ हिरण्मयीनां हिरण्यविकाराणाम् ॥ "दार्ण्डिनायन-" इत्यादिना निपातनात्साधुः ॥ रोधोभुवां तटभुवां भासो मुहुस्तडिद्विलसितानि विडम्बयन्ति । अनुकुर्वन्तीत्यर्थः ॥ उपमालंकारः ॥

कृपणकम्पनिरस्तमहाहिभिः क्षणविमत्तमतङ्गजवर्जितैः ।
इह मदस्रपितैरनुमीयते सुरगजस्य गतं हरिचन्दनैः ॥ ४७ ॥

कृपणेति ॥ इहाद्रौ कृपणेन कृच्छ्रयनेन यः कम्पस्तेन निरस्ता महाहयो महासर्पा यैस्तैः । क्षणं विमत्तमतङ्गजवर्जितैर्मत्तमतङ्गजरहितैः । स्रुतैः । मदस्रपितैः । ऐरावतमदसिक्तैरित्यर्थः ॥ "मितां ह्रस्वः" इति ह्रस्वः ॥ हरिचन्दनैश्चन्दनद्रुमैः सुरगजस्यैरावतस्य गतं मार्गमनुमीयते ॥ हरिचन्दनविशेषणैः काव्यलिङ्गमुन्नेयम् ॥

जलदजालघनैरसिताश्मनामुपहतप्रचयेह मरीचिभिः ।
भवति दीप्तिरदीपितकन्दरा तिमिरसंवलितेव विवस्वतः ॥ ४८ ॥

जलदेति ॥ इहास्मिन्नद्रौ जलदजालघनैर्मेघसङ्घैरसिताश्मनामिन्द्रनीलानां मरीचिभिर्दीधितिभिः ॥ "भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्" इत्यमरः ॥ उपहतप्रचया विघटितसंघाता अतएवादीपितकन्दरा अप्रकाशितगह्वरा विवस्वतो दीप्तिस्तिमिरैः संवलिता व्याप्तेव भवतीत्युत्प्रेक्षा ॥

भव्यो भवन्नपि मुनेरिह शासनेन
क्षान्त्रे स्थितः पथि तपस्य हतप्रमादः ।
प्रायेण सत्यपि हितार्थकरे विधौ हि
श्रेयांसि लब्धुमसुखानि विनान्तरायैः ॥ ४९ ॥

भव्य इति ॥ इहाद्रौ भव्यः क्षान्तो भवन्नपि मुनेर्व्यासस्य शासनेनेन्द्रारावन-

Digitized by Google

रूपेण शास्त्रे पथि शास्त्रियमार्गे स्थितः । गृहीतमन्त्र एवेत्यर्थः । इतमदादीऽमत्तः सन् । तपस्व तपश्चर्यां कुरु ॥ तपस्येति " कर्मणो रोमन्थतपोभ्यां वर्तिचरोः " इति क्यङ् । तदन्ताद्धातोर्लोट् ॥ न च सर्वभूतहितकारिणो मे प्रमादः किं करिष्यतीति विश्वसितव्यमित्यर्थान्तरमाह—हि यस्मात्मायेन बाहुल्येन ॥ " प्रायो बहुत्वनम्रते बहुतौ बाहुल्यतुल्ययोः " इति हेमचन्द्रः ॥ हितमर्थं करोतीति तच्छिल्पिनी व्यापारे सति । अन्तरायैर्विघ्नैर्विना श्रेयांसि सन्तु मङ्गलानि । अशक्या नीत्यर्थः ॥ अतएव " शकधृष—" इत्यादिना समानकर्तृकेषु तुमुन् ॥ अकारणवैरिणः सर्वत्र सर्वस्यापि सन्तीति भावः ॥

मा भूवन्नपथहरास्तवेन्द्रियाश्वाः
संतापे दिशतु शिवः शिवां प्रसक्तिम् ।
रक्षन्तस्तपसि बलं च लोकपालाः
कल्याणीमधिकफलां क्रियां क्रियासुः ॥ ५० ॥

मा भूवन्निति ॥ तवेन्द्रियाण्येवाश्वास्ते । अपथेन इरन्तीत्यपथहरा मा भूवन् । शास्त्रपथं मा निनीषुरित्यर्थः ॥ "माङि लुङ्" इत्याडागमे लुङ् ॥ संतापे तपःक्लेशे सति शिवः शिवां सापीयसीं प्रसक्तिं प्रवृत्तिमुत्साहं दिशतु । किंचेति चार्थः । लोकपाला इन्द्रादयस्तपसि विषये बलं शक्तिं रक्षन्तो वर्धयन्तः सन्तः कल्याणीं साध्वीं क्रियामनुष्ठानमधिकफलां क्रियासुः कुर्वन्तु ॥ करोतेराशिषि लोट ॥

इत्युक्ता सपदि हितं प्रियं प्रियार्हे
धाम स्वं गतवति राजराजभृत्ये ।
सोत्कण्ठं किमपि पृथासुतः प्रदध्यौ
संधत्ते भुशमरतिं हि सद्वियोगः ॥ ५१ ॥

इतीति ॥ प्रियार्हे राजराजभृत्य इति पूर्वोक्तम् । हितं प्रियं वचनमिति शेषः । उक्त्वा सपदि स्वं स्वकीयं धाम स्थानं गतवति सति । पृथासुतोऽर्जुनः सोत्कण्ठं सौत्सुक्यं किमपि प्रदध्यौ चिन्तयामास । तथाहि । सद्वियोगः सुजनविरहो भुशमरतिं व्यथां संधत्ते । करोतीत्यर्थः ॥ अर्थान्तरन्यासः ॥

तमनतिशयनीयं सर्वतः सारयोगा-
दविरहितमनेकेनाङ्गभाजा फलेन ।

१ ङयः. २ मपृच्छत्.

Digitized by Google

अकृशमकृशलक्ष्मीश्वेतसांशंसितं स
स्वमिव पुरुषकारं शैलमभ्याससाद ॥ ५२ ॥

तमिति ॥ अकृशाः पूर्णा लक्ष्म्यः शोभा यस्य सोऽकृशलक्ष्मीरिति बहुव्रीहिः । एवं च "उरःप्रभृतिभ्यः—" इति कप्प्रत्ययानवकाशः । तत्र लक्ष्मीशब्दस्यैकवचनान्तपाठात् । नापि "नपुंसके" इत्यस्यावकाशः । उरःप्रभृतिपाठसामर्थ्यादेव वैषयिकस्तु वैभाषिक इत्यविरोधः ॥ सोऽर्जुनः सर्वतः सर्वत्र सारयोगाद्दृढत्वसमवायात् ॥ "सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु" इत्युभयत्राप्यमरः ॥ अनतिशयनीयमनतिक्रमणीयमनेकेन बहुनाङ्गभाजा समीपं गतेन । शीघ्रभाविनेति यावत् । फलेन कार्यसिद्ध्याविरहितमशून्यम् । कार्यसिद्धेरवश्यं साधकमित्यर्थः । अकृशमतनुं चेतसार्शंसितं मानुमिष्टं शैलमिन्द्रकीलं स्वमात्मीयम् । पुरुषस्य कारः कर्म तं पुरुषकारमुत्कृष्टविशेषणविशिष्टं पौरुषमिवाभ्याससादाधिष्ठितवान् ॥ मालिनीवृत्तम् ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथसमाख्यया
व्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये
इन्द्रकीलवर्णनो नाम पञ्चमः सर्गः ।

षष्ठः सर्गः ।

रुचिराकृतिः कनकसानुमथो परमः पुमानिव पतिं पतताम् ।
धृतसत्पथस्त्रिपथगामभितः स तमारुरोह पुरुहूतसुतः ॥ १ ॥

रुचिराकृतिरिति ॥ अथो आसादनानन्तरं रुचिराकृतिः सौम्यविग्रहो धृतसत्पथोऽवलम्बितसन्मार्गः । आकारानुरूपगुणवानित्यर्थः । "यत्राकृतिस्तत्र गुणा वसन्ति" इति सामुद्रिकाः । उपमानेऽपि समानमेतत् ॥ स पुरुहूतसुतोऽर्जुनः । कनकस्य विकाराः सानवो यस्य तं कनकसानुम् । गरुडसादृश्यार्थं विशेषणमेतत् ॥ "समुदाये विकारपक्षोऽयम्" इति बहुव्रीहिरुत्तरपदलोपश्च ॥ तमिन्द्रकीलम् । परमः पुमान्विष्णुः पततां पक्षिणां पतिं गरुडमिव । त्रिभिः,पथिभिर्गच्छतीति त्रिपथगा भागीरथी ॥ "अन्येष्वपि दृश्यते" इति डप्रत्ययः । उपपदसमासश्च ॥ तामभितोऽभिमुखमारुरोह ॥ "समीपोभयतःशीघ्रसाकल्याभिमुखेऽभितः" इत्यमरः ॥ अभितोऽरादृश्यम्— "अभितोऽरा सजलसैकदिशा" इति लक्षणात् ॥

Digitized by Google

अथास्य कार्यसिद्धिनिमित्तानि सूचयन्मार्गं वर्णयति—

तमनिन्द्यवन्दिन इवेन्द्रसुतं विहितालिनिकणजयध्वनयः ।
पवनेरिताकुलविजिह्मशिखा जगतीरुहोऽवचकरुः कुसुमैः ॥ २ ॥

तमिति ॥ विहिता अलिनिकणा जयध्वनय इव यैस्ते तथोक्ताः । पवनेरिताः पवनेन वायुना धुनातएवाकुला लोला विजिह्मा वक्राश्च शिखा अग्राणि येषां ते तथोक्ताः ॥ "शिखा ज्वाला केकिमौल्योः शिखाशास्त्राग्रमौलिषु" इति वैजयन्ती ॥ जगतीरुहो भूरुहः ॥ क्विप् ॥ अनिन्या अनवद्या ये वन्दिनः स्तुतिपाठकास्त इव । तमिन्द्रसुतमर्जुनं कुसुमैरवचकरुः । अभिवन्नुपरिसर्पः ॥ "ऋच्छत्यृताम्" इति गुणः । अत्र किरतेर्वृक्षपर्यत्वात्कुसुमानां करणत्वम् । विक्षेपार्थत्वे तु कर्मत्वमेव । यथा—"कटाक्षान्वामा किरति" इति दृश्यते च । धातूनामर्थभेदात्कारकव्यवस्थाः । यथा सिञ्चतेः क्षरणार्द्रीकरणयोरर्थयोर्द्रव्यस्य कर्मत्वकरणत्वे । यथा—"मेघोऽमृतं सिञ्चति," "गौः पयश्च सिञ्चति," "मेघा अमृतैर्वसुधाः" इति । अत्र वाक्ये समासगतयोरुपमयोः साध्यसाधनभावादङ्गाङ्गिभावेन संकरः ॥

अवधूतपङ्कजपरागकणास्तनुजाह्नवीसलिलवीचिभिदः ।
परिरेभिरेऽभिमुखमेत्य सुखाः सुहृदः सखायमिव तं मरुतः ॥३॥

अवधूतेति ॥ अवधूताः प्रसारिताः पङ्कजपरागकणा यैस्ते तथोक्ताः इति सीरस्वामी । तनूर्जाह्नव्याः सलिलवीचीर्भिन्दन्तीति तथोक्ता इति शैत्योक्तिः । सुखयन्तीति सुखाः सुखस्पर्शा इति मान्योक्तिः ॥ पचाद्यच् ॥ मरुतो वातास्तमर्जुनं सुहृदः सखायमिवाभिमुखमेत्यागत्य परिरेभिरे आलिङ्गितवन्तः ॥

उदितोपलस्खलनसंवलिताः स्फुटहंससारसविरावयुजः ।
मुदमस्य माङ्गलिकतूर्यकृतां ध्वनयः प्रतेनुरनुवप्रमपाम् ॥ ४ ॥

उदितेति ॥ उदितोपलेषून्नतपाषाणेषु स्खलनेन प्रतिघातेन संवलिताश्चूर्णिताः । अतस्तूर्यघोष इव घुमघुमायमाना इत्यर्थः । स्फुटैर्हंसानां सारसानां च विरावैर्युज्यन्त इति तथोक्ताः ॥ क्विप् ॥ अनुवप्रमपाम् । अन्तः पतन्तीनामिति शेषः । ध्वनयोऽस्यार्जुनस्य मङ्गलं प्रयोजनमेषां ते माङ्गलिकाः ॥ "प्रयोजनम्" इति ठञ् ॥ तैस्तूर्यैः कृतां मुदं हर्षं प्रतेनुः ॥ अत्रान्यस्यान्यकार्यकारणासंभवात्तूर्यकृतामुत्तरस्यां मुदमिति प्रतिषिध्येनान्योपादिदर्शनालंकारः ॥

अवरुग्णतुङ्गसुरदारुतरौ निचये पुरः सुरसरित्पयसाम् ।
स ददर्श वेतसवनाचरितां प्रणतिं बलीयसि समृद्धिकरीम् ॥ ५ ॥

१ निवृत्ति.

Digitized by Google

अवरुग्नेति ॥ सोऽर्जुनः पुरोऽग्रेऽवरुग्नतुङ्गसुरदारुतरौ भक्तोन्नतदेवदारुद्रुमे बलीयसि बलवत्तरे ॥ मत्वन्तादीयसुनि "विन्मतोर्लुक्" इति मतोर्लुक् ॥ सुरसरित्पयसां निचये पूरे विषये वेतसवनेन वानीरवनेनाचरिताम् ॥ "अथ वेतसे। रथाङ्गपुष्पविदुरधीतवानीरवञ्जुलाः" इत्यमरः ॥ सद्यद्धिकरीं श्रेयस्करीम्। लोके यथादृष्टामित्यर्थः। मणतिं ददर्श। या सर्वलोकरक्षान्तभूतेति भावः ॥

प्रबभूव नालमवलोकयितुं परितः सरोजरजसारुणितम्।
सरिदुत्तरीयमिव संहतिमत्स तरङ्गभङ्गि कलहंसकुलम् ॥ ६ ॥

प्रबभूवेति ॥ सोऽर्जुनः परितः सरोजरजसा कमलरेणुनारुणितं पाटलितमुत्तरीयं च कुसुमादिनारुणितं संहतिमत्निरन्ध्रं तरङ्गभङ्गि वारितरङ्गशोभि सरिदुत्तरीयं स्नानांशुकमिव स्थितं कलहंसकुलं कादम्बकुलमवलोकयितुमुलमत्यर्थं न प्रबभूव न शशाक। तत्सौन्दर्योद्वेलतादिति भावः ॥

दधति क्षतीः परिणतद्विरदे मुदितालियोषिति मदस्रुतिभिः।
अधिकां स रोधसि बबन्ध धृतिं महते रुजन्नपि गुणाय महान्॥७॥

दधतीति ॥ सोऽर्जुनः क्षतीः क्षतानि दधति धारयति। कुतः। परिणतास्तिर्यगदन्तप्रहारिणो द्विरदा यस्मिंस्तस्मिन् ॥ "तिर्यगदन्तप्रहारस्तु गजः परिणतो मतः" इति हलायुधः ॥ मदस्रुतिभिर्मुदितालियोषिति रोधस्यधिकां धृतिं प्रीतिं बबन्ध। निश्चलीकृतवानित्यर्थः। तथाहि। महाञ्जनो रुजन्पीडयन्नपि महते गुणायोत्कर्षाय भवति। महत्कृता पीडापि शुभावहैवेत्यर्थः। तथुक्तं गजरुग्नसापि रोधसः प्रीतिकरत्वमिति भावः ॥

अनुहेमवप्रमरुणैः समतां गतमूर्मिभिः सहचरं पृथुभिः।
स रथाङ्गनामवनितां करुणैरनुबभ्रतीमभिननन्द रुतैः ॥ ८ ॥

अनुहेमेति ॥ सोऽर्जुनोऽनुहेमवप्रं कनकसानुसमीपे ॥ समीपार्थेऽव्ययीभावः ॥ अरुणैः। कनककान्त्युपरञ्जनादिति भावः। पृथुभिरूर्मिभिः समतां तुल्यरूपतां गतम्। सादृश्यादुर्वचनीयमिति भावः। सह भूतं सहचरं प्रियम् ॥ सहशब्दस्य पर्यायजन्तेन चरशब्देन समासः ॥ करुणैर्दीनै रुतैः कूजितैरनुबभ्रतीमन्विष्यन्तीं रथाङ्गनामवनितां चक्रवाकीमभिननन्द। प्रकृष्टप्रेमदर्शनात्कस्य नामन्द इति भावः ॥ अत्र तावद्भूमीनां स्वभावत्यत्यागेनारुण्यस्वीकाराद्यद्गुणालंकारः—"तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाश्रयात्" इति लक्षणाच्चन्मूला चेयं चक्रवाक्याः स्वकान्ते तरङ्गभ्रान्तिरिति तद्गुणभ्रान्तिमतोरङ्गाङ्गिभावेन संकरः ॥

Digitized by Google

सितवाजिने निजगदू रुचयश्चलवीचिरागरचनापटवः ।
मणिजालमम्भसि निमग्नमपि स्फुरितं मनोगतमिवाकृतयः ॥९॥

सितवाजिन इति ॥ चलवीचीनां रागो रञ्जनं वर्णान्तरापादनं तस्य रचना क्रिया तत्र पटवः समर्था रुचयः प्रभाः । अम्भसि निमग्नमपि मणिजालम् । स्वाश्रयभूतमिति भावः । मनोगतं स्फुरितं रोषादिविकारमाकृतयो भ्रूभङ्गादिवाह्यविकारा इव । सितवाजिनेऽर्जुनाय निजगदुः । ज्ञापयामासुरित्यर्थः । आकृत्या हि मनोगतं विचक्षणा जानन्तीति भावः ॥

उपलाहतोद्धततरङ्गधूतं जविना विधूतविततं मरुता ।
स ददर्श केतकशिखाविशदं सरितः प्रहासमिव फेनमपाम् ॥१०॥

उपलेति ॥ उपलैराहता अतएवोद्धताश्च ये तरङ्गास्तैर्धूतम् । निर्गमरोधादित्यर्थः । जविना वेगवता मरुता वातेन विधूतं विततं च केतकस्य शिखा तद्वद्विशदमपां फेनं हिण्डीरम् ॥ "हिण्डीरोऽब्धिकफः फेनः" इत्यमरः ॥ सरितः प्रहासमट्टहासमिवेत्युत्प्रेक्षा । सोऽर्जुनो ददर्श ॥

बहु बर्हिचन्द्रकनिभं विदधे धृतिमस्य दानपयसां पटलम् ।
अवगाढमीक्षितुमिवेभपतिं विकसद्विलोचनशतं सरितः ॥ ११ ॥

बहिति ॥ बर्हिचन्द्रकनिभं मयूरमेचकसदृशम् ॥ "समौ चन्द्रकमेचकौ" इत्यमरः ॥ बहनेकधा दानपयसां पटलम् ॥ जातावेकवचनम् ॥ बहवो मदाम्बुबिन्दव इत्यर्थः । अवगाढमन्तः प्रविष्टम् ॥ गाहेः कर्तरि क्तः ॥ इभपतिमीक्षितुं विकसदुत्पिपत्सरितो विलोचनशतमिवेत्युत्प्रेक्षा । असावर्जुनस्य धृतिं प्रीतिं विदधे ॥

प्रतिबोधजृम्भणविभिन्नमुखी पुलिने सरोरुहदृशा ददृशे ।
पतदच्छमौक्तिकमणिप्रकरा गलदश्रुबिन्दुरिव शुक्तिवधूः ॥१२॥

प्रतिबोधेति ॥ प्रतिबोधः स्फुटनं निद्रापगमश्च तत्र यज्जृम्भणमुच्छ्वसनता जृम्भा च तेन विभिन्नमुखी विश्लिष्टाग्रा विहस्य वा । अतएव पतन्मसरलच्छो मौक्तिकमणीनां मकरः स्रोतो यस्याः सा तथोक्ता । अतएव गलदश्रुबिन्दुरिव स्थितेत्युत्प्रेक्षा । शुक्तिर्वधूरिव । पुलिने । अपतीव इवेति भावः । सरोरुहदृशार्जुनेन ददृशे दृष्टा ॥ अत्र प्रतिबोधादिविशिष्टमौपाचानां मकतानां शुक्तिवध्वौपम्याकरकरोः साधकबाधकाभावात्संदेहालंकारः । तत्सापेक्षा चाक्षुषज्ञानोत्प्रेक्षेति तयोरङ्गाङ्गिभावः ॥

Digitized by Google

शुचिरप्सु विद्रुमलताविटपस्तनुसान्द्रफेनलवसंवलितः ।
स्मरदायिनः स्मरयति स्म भृशं दयिताधरस्य दशनांशुभृतः॥१३॥

शुचिरिति ॥ अप्सु शुचिः स्वच्छस्तनुना सान्द्रेण च फेनस्य लवेन शकलेन संवलितः संगतो विद्रुमलताया विटपः पल्लवः ॥ "विटपः पल्लवे पिण्डे विस्तारे स्तम्बशाखयोः" इति विश्वः ॥ स्मरदायिनः कामोद्दीपकस्य दशनांशुभृतः । दन्तकान्तिकलितस्येत्यर्थः । दयिताधरस्य ॥ "अधीगर्थ–" इत्यादिना षष्ठी ॥ भृशं स्मरयति स्म ॥ "स्मृ स्मे" इति भूतार्थे स्मृ । "मितां ह्रस्वः" इति ह्रस्वः ॥ स्मरणालंकारः ॥

उपलभ्य चञ्चलतरङ्गधृतं मदगन्धमुत्थितवतां पयसः ।
प्रतिदन्तिनामिव स संबुबुधे करियादसामभिमुखान्करिणः ॥१४॥

उपलभ्येति ॥ सोऽर्जुनश्चञ्चलतरङ्गैर्धृतम् । तत्संक्रान्तमित्यर्थः । मदगन्धमुपलभ्याघ्राय पयस उत्थितवताम् । रोषादिति शेषः । करिणां यादसाम् ॥ आकृपारादिषु द्रष्टव्यः ॥ प्रतिदन्तिनामिवाभिमुखान् । अभियातानित्यर्थः । करिणः संबुबुधे । ददर्शेत्यर्थः ॥

स जगाम विस्मयमुदीक्ष्य पुरः सहसा समुत्पिपतिषोः फणिनः ।
प्रहितं दिवि प्रजविभिः श्वसितैः शरदभ्रविभ्रममपां पटलम्॥१५॥

स इति ॥ सोऽर्जुनः पुरोऽग्रे सहसा समुत्पिपतिषोः समुत्पतितुमिच्छोः ॥ पतेः सन्नन्तादुमत्ययः । "तनिपतिदरिद्राभ्यः सन इट्वा वक्तव्यः" इति विकल्पादिडागमः ॥ फणिनः प्रजविभिरतिवेगवद्भिः श्वसितैः फूत्कारैर्दिव्याकाशे प्रहितं प्रेरितं शरदभ्रस्य विभ्रम इव विभ्रमः सौन्दर्यं यस्य तत् । भ्रमभ्रम्याप्यकं चेत्यर्थः । अपां पटलं पुर उदीक्ष्य विस्मयं जगाम ॥ अत्रोपमानुप्राणिता समावोक्तिरलंकारः ॥

स ततार सैकतवतीरभितः शफरीपरिस्फुरितचारुदृशः ।
ललिताः सखीरिव बृहज्जघनाः सुरनिम्नगामुपयतीः सरितः॥१६॥

स इति ॥ सोऽर्जुनः सैकतवतीः पुलिनवतीरभितः शफरीणां मत्स्यीनां परिस्फुरितान्येव चारवो दृशो यासां ताः । सुरनिम्नगां गङ्गामुपयतीर्भजन्तीः ॥ इकः प्रतुरुक्तिसत्त्वान्नीप् ॥ अतएव बृहज्जघना ललिताः सखीरिव स्थिताः सरितस्तारारोहणमकृते ॥

अधिरुह्य पुष्पभरनम्रशिखैः परितः परिष्कृततलां तरुभिः ।
मनसः प्रसत्तिमिव मूर्ध्नि गिरेः शुचिमाससाद स वनान्तभुवम्॥१७

Digitized by Google

अधिरुरोहेति ॥ सोऽर्जुनोऽधिरुरुक्ष । अर्याद्रिरिमिति शेषः । पुष्पभरेण नम्रशिखैर्नगाग्रैस्तरुभिः परितः परिष्कृततलां भूषितस्वरूपाम् ॥ "अधःस्वरूपयोरस्त्री तलम्" इत्यमरः ॥ "संपर्युपेभ्यः करोतौ भूषणे" इति सुडागमः ॥ शुचिं शुद्धाम् । अतएव मनसः प्रसत्तिमिव मूर्तं मनःप्रसादमिव स्थितां तद्धेतौ तद्व्यञ्जकत्वेन । गिरेर्भूमिं वनान्तसुवमाससाद ॥ अन्तःशब्दः स्वरूपवचनः । "अन्तोऽव्यवसितेऽन्तौ स्वरूपे निश्चयेऽन्तिके" इति वैजयन्ती ॥

अनुसानु पुष्पितलतावितताः फलितोरुभूरुहविविक्तवनः ।
धृतिमाततान तनयस्य हरेस्तपसेऽधिवस्तुमचलामचलः ॥ १८ ॥

अनुसानुष्विति ॥ अनुसानु प्रतिसानु ॥ वीप्सार्थेऽव्ययीभावः ॥ पुष्पिताः संजातपुष्पा लताविततयो यस्मिन्सः । फलिता उरुभूरुहा येषु तानि विविक्तानि विजनानि पूतानि वा वनानि यस्मिन्स तथोक्तः ॥ "विविक्तौ पूतविजनौ" इत्यमरः ॥ अचल इन्द्रकीलो हरेस्तनयस्यार्जुनस्य तपसे तपश्चर्यार्थमधिवस्तुमधिष्ठातुम् ॥ क्रियापेक्षया समानकर्तृकत्वात्तुमुन् ॥ अचलां धृतिमुत्साहमाततान ॥ अत्राचलविशेषणपदार्थस्य धृतिकरणहेतुत्वात्काव्यलिङ्गमलंकारः ॥

प्रणिधाय तत्र विधिनाथ धियं दधतः पुरातनमुनेर्मुनिताम् ।
श्रममादधावसुकरं न तपः किमिवावसादकरमात्मवताम् ॥ १९ ॥

प्रणिधायेति ॥ अथ तमाप्तौ विधिना योगशास्त्रानुसारेण धियं चित्तवृत्तिं प्रणिधाय ध्येयविषये धियं नियम्य ॥ "नेर्गद-" इत्यादिना नत्वम् ॥ मुनितां दक्षत्वम् इत्यर्थः । पुरातनमुनेः । अर्जुनस्येत्यर्थः ॥ असुकरं दुष्करं तपः श्रमं खेदं नादधौ न चकार । तथाहि । आत्मवतां मनस्विनामवसादकरमशान्तिजनकं किमिव न किंचिदित्यर्थः ॥ इवशब्दो वाक्यालंकारे ॥

शमयन्धृतेन्द्रियशमैकसुखः शुचिभिर्गुणैरघमयं स तमः ।
प्रतिवासरं सुकृतिभिर्ववृधे विमलः कलाभिरिव शीतरुचिः ॥२०॥

शमयन्निति ॥ धृतमिन्द्रियशमो विषयव्यावृत्तिरेवैकं मुख्यं सुखमाददो येन स तथोक्तः । आत्माराम इत्यर्थः । अन्यत्र धृतं कृतमिन्द्रियशमः संतापनिवर्तनमेकमद्वितीयं सुखमाददथ येन स तथोक्तः । शुचिभिर्निर्मलैर्गुणैर्मैत्र्यादिभिः । अन्यत्र क्षान्त्यादिभिः । अघमयं पापरूपं तमोऽज्ञानम् । अन्यत्रान्धकारं च । शमयन्निवर्तयन् । विमलोऽभङ्गिनः पापरहितः । शुक्लोऽन्यत्र । सोऽर्जुनः प्रतिवासरं सुकृतिभिः सुकृद्भिः । ज्ञानीत्यर्थः ॥ क्विप् ॥ कलाभिः शीतरुचिश्चन्द्र इव । ववृधे ॥

Digitized by Google

अधरीचकार च विवेकगुणादगुणेषु तस्य धियमस्तवतः।
प्रतिघातिनीं विषयसङ्गरतिं निरुपप्लवः शमसुखानुभवः ॥ २१ ॥

अधरीचकारेति ॥ किं चेति चार्थः। विवेकस्तत्त्वावधारणं स एव गुणस्तस्मात्। तेन हेतुनेत्यर्थः ॥ "विभाषा गुणेऽस्त्रियाम्" इति पञ्चमी ॥ अगुणेषु कामक्रोधादिदोषेषु विषये ॥ तद्विरोधेन नञ्समासः ॥ धियं चित्तवृत्तिमस्तवतो निवारितवतस्तस्यार्जुनस्य निरुपप्लवो निर्बाधः शमसुखानुभवः शान्त्यानन्दानुभवः प्रतिघातिनीं सोपप्लवां विषयसङ्गरतिं शब्दादिषु भोगरुचिमधरीचकार। विषयनिःस्पृहं चकारेत्यर्थः। उत्कृष्टसुखलाभस्यापकृष्टवैराग्यहेतुत्वादिति भावः ॥

मनसा जपैः प्रणतिभिः प्रयतः समुपेयिवानधिपतिं स दिवः।
सहजेतरौ जयशमौ दधती बिभरांबभूव युगपन्महसी ॥ २२ ॥

मनसेति ॥ प्रयतोऽहिंसादिनिरतो मनसा ध्यानेन जपैर्विधिपुरस्सरान्प्राग्भ्यासैः प्रणतिभिर्नमस्कारैः। एवं मनोवाक्कायकर्मभिर्दिवोऽधिपतिमिन्द्रं समुपेयिवानुपसेदिवान्सोऽर्जुनः सहजेतरौ नैसर्गिकागन्तुकौ। जीयतेऽनेनेति जयो वीररसः ॥ "एरच्" इत्यच् ॥ शाम्यतेऽनेनेति शमः। जयश्च शमौ च जयशमौ वीरशान्तिरसौ दधती पुष्णती महसी तेजसी युगपद्विभरांबभूव बभार ॥ "भीह्रीभृहुवाम्—" इति विकल्पादाम्त्वम् ॥ अत्र युगपद्वीरशान्ताधिकरणत्वाभिधानादस्य लोकोत्तमहिमत्वं व्यज्यते॥

शिरसा हरिन्मणिनिभः स वहन्कृतजन्मनोऽभिषवणेन जटाः।
उपमां ययावरुणदीधितिभिः परिमृष्टमूर्धनि तमालतरौ ॥ २३ ॥

शिरसेति ॥ हरिन्मणिनिभो मरकतमणिश्यामोऽभिषवणेन स्नानेन कृतजन्मनो जनिताः ॥ अतः पिशङ्गीरिति भावः। जटाः शिरसा वहन्सोऽर्जुनोऽरुणस्यादूरोर्दीधितिभिः परिमृष्टमूर्धनि व्याप्तशिरसि तमालतरौ। उपमां तमालतरोः सादृश्यम्। यथावित्यार्थीयमुपमा ॥ तरोरौपम्याधिकरणत्वाच्चदपेक्षया सप्तमी ॥

धृतदेहतिरप्यधृतजिह्ममतिश्चरितैर्मुनीनधरयञ्शुचिभिः।
रजयांचकार विरजाः स मृगान्क्रमिवेशते रमयितुं न गुणाः॥२४॥

धृतेति ॥ धृतदेहतिर्धृतायुधोऽप्यधृता जिह्ममतिः कुटिलमतिर्येन सः। शुचिभिश्चरितैर्मुनीनधरयंस्तिरस्कुर्वन्। वेषेणैव भीषणो न तु कर्मणेति भावः। कुतः। विरजा रजोगुणरहितः सोऽर्जुनो मृगान्मृगयांचकार रमयामास ॥ "रञ्जेर्णौ युमरमणे नलोपो वक्तव्यः" इति नलोपः ॥ तथाहि। गुणा दयादयः क्रमिव।

१ गुरुन्.

Digitized by Google

रमयितुं नेशते। कं वा वशीकर्तुं न शक्नुवन्तीति भावः। शुद्धिरेव हि परं विश्वासबीजं परस्य न वेषो, नापि संस्तव इति भावः॥

अथास्य अभिलषितसिद्धिमाह—अनुकूलेत्यादिना॥

अनुकूलपातिनमचण्डगतिं किरता सुगन्धिमभितः पवनम्।
अवधीरितार्तवगुणं सुखतां नयता रुचां निचयमंशुमतः॥ २५॥

अनुकूलपातिनं न तु प्रतिकूलपातिनमचण्डगतिं मन्दगामिनं सुगन्धिम्॥ गन्धस्येत्वे तदेकान्तग्रहणेऽपि कवीनां निरङ्कुशत्वात्समासान्तः। अथवा केचिदागन्तुकत्वेऽप्येकवचनेन समासान्तमिच्छन्ति॥ पवनमभितः किरता। प्रवर्तयतेत्यर्थः। ऋतुरत्र प्राप्त आर्तवः॥ "ऋतोरण्" इत्यण्प्रत्ययः॥ स चासौ गुणस्तिग्मत्वरूपः सोऽवधीरितस्तिरस्कृतो यस्य तमंशुमतो रुचां निचयं सुखतां सुखस्पर्शतां नयता भावयता॥ नयतेर्द्विकर्मकत्वम्॥

नवपल्लवाञ्जलिभृतः प्रचये हृहतस्तरून्गमयतावनतिम्।
स्तृणता तृणैः प्रतिनिशं मृदुभिः शयनीयतामुपयतीं वसुधाम्॥ २६

नवेति॥ प्रचये पुष्पावचयमसङ्गे नवपल्लवा एवाञ्जलयस्तान्बिभ्रतीति तथोक्तान्हृहत उच्चांस्तरूनवनतिं गमयता॥ "गतिबुद्धि—" इत्यादिना तरूणां कर्मत्वम्॥ प्रतिनिशं निशि निशि शयनीयतामुपयतीम्। शयनस्थानीयतामित्यर्थः। वसुधां मृदुभिस्तृणैः स्तृणताच्छादयता॥

पतितैरपेतजलदान्नभसः पृषतैरपां शमयता च रजः।
स दयालुनेव परिगाढकृशः परिचर्ययानुजगृहे तपसा॥ २७॥

पतितैरिति॥ अपेतजलदान्निरभ्रान्नभसः पतितैरपां पृषतैर्जलबिन्दुभी रजश्च शमयता तपसा॥ कर्त्रा॥ दयालुनेवेत्युत्प्रेक्षा। दयालुत्वं सूचयति—परिगाढकृशोऽतिक्षीणः सोऽर्जुनः परिचर्ययोक्तविधया शुभूषयानुजगृहेऽनुगृहीतः। अनुग्रहोऽत्र सहकारित्वमेव सर्वभूतानुकूल्यसिद्ध्यर्थपरोक्षं तपोऽस्येति भावः॥ अत्र श्लोकत्रयस्याप्येकवाक्यत्वादुत्प्रेक्षैव प्रधानालंकारः॥

महते फलाय तदवेक्ष्य शिवं विकसन्निमित्तकुसुमं स पुरः।
न जगाम विस्मयवशं वशिनां न निहन्ति धैर्यमनुभावगुणः॥ २८॥

महत इति॥ सोऽर्जुनो महते फलाय श्रेयसे तस्माय च विकसत्पूर्वोक्तं शिवं निमित्तमेव कुसुमं पुरोऽग्रेऽवेक्ष्य विस्मयवशं न जगाम। तथाहि। वशिनामनुभा-

१ अनुलोम. २ हि हस्ति.

Digitized by Google

व एव गुणः स च धैर्यं न निहन्ति । विस्मयादिविकारं न जनयतीत्यर्थः । "तपः क्षरति विस्मयात्" इति स्मरणादिति भावः ॥

तदभूरिवासरकृतं सुकृतैरुपलभ्य वैभवमनन्यभवम् ।
उपतस्थुरास्थितविषादधियः शतयज्वनो वनचरा वसतिम्॥२९॥

तदिति ॥ सुकृतैस्तपोभिः ॥ करणैः ॥ अभूरिभिः कतिपयैरेव वासरैः कृतं तत्पूर्वोक्तं वैभवमतोऽन्यस्य न भवतीत्यनन्यभवम् । अन्यस्यासाध्यमित्यर्थः ॥ पचाद्यजन्तोत्करपदेन नञ्समासः ॥ उपलभ्य निश्चित्यास्थितविषादाः प्राप्तखेदा धियो येषां ते वनचराः ॥ "तत्पुरुषे कृति बहुलम्" इति बहुलग्रहणात्टच् ॥ शतेन शतस्य वा मखानां यज्वनः शतक्रतोः ॥ अत्र संख्येयविशेषलाभो यजिसंनिधानादवगन्तव्यः ॥ "यज्वा तु विधिनेष्टवान्" इत्यमरः ॥ "सुयजोर्ङ्वनिप्" ॥ वसतिमुपतस्थुः प्रापुः ॥

विदिताः प्रविश्य विहितानतयः शिथिलीकृतेऽधिकृतकृत्यविधौ ।
अनपेतकालमभिरामकथाः कथयांबभूवुरिति गोत्रभिदे ॥ ३० ॥

विदिता इति ॥ वनचरा इत्यनुवर्तनीयम् । विदिता ज्ञाताः । अनुमतमवेक्षाः सन्त इत्यर्थः । प्रविश्य विहितानतयः कृतप्रणामा अधिकृतकृत्यस्य नियुक्तकर्मणः पौरस्त्यक्षणात्मकस्य विधावनुष्ठाने शिथिलीकृते सति । अनपेतकालमनतिक्रान्तकालं यथा तथा गोत्रभिदे शक्रायेति वक्ष्यमाणप्रकारेणाभिरामकथाः श्राव्यवाचः ॥ "चिन्तिपूजिकथिकुम्बिचर्चश्च" इत्यङ्प्रत्ययः ॥ कथयांबभूवुः ॥

शुचिवल्कवीतवपुरन्यतमस्तिमिरच्छिदामिव गिरौ भवतः ।
महते जयाय मघवन्ननघः पुरुषस्तपस्यति तपञ्जगतीम् ॥ ३१ ॥

शुचीति ॥ शुचिना वल्केन वल्कलेन वीतमाच्छादितं वपुर्यस्य सः । तिमिरच्छिदां सूर्यादीनामन्यतम इव स्थित इत्युत्प्रेक्षा । अनघः पुरुषः । हे मघवन् । भवतो गिराविन्द्रकीले जगतीं भुवं तपस्तापयन्महते जयाय तपस्तप्यति तपश्चरति ॥ "कर्मणो रोमन्थ–" इत्यादिना क्यङि सटि ॥

जयाय तपस्यतीत्युक्तम् । तत्र हेतुमाह—

स बिभर्ति भीषणभुजङ्गभुजः पृथु विद्विषां भयविधायि धनुः ।
अमलेन तस्य धृतसञ्चरिताश्चरितेन चातिशयिता मुनयः ॥३२॥

स इति ॥ भीषयेते इति भीषणौ ॥ नन्द्यादित्वाल्ल्युप्रत्ययः ॥ तौ च तौ भुजङ्गौ

१ भूत.

Digitized by Google

च तावित्र शुजी यस्य स तथोक्तः पुरुषो विद्विषां भयविधायि पृथु धनुर्बिभर्ति। अतो अयार्थीत्यर्थः। अमलेन तस्य पुरुषस्य चरितेन कृतानि सचरितानि यैस्ते मुनयोऽतिशयिता अतिक्रान्ताः॥

अथास्य तपःसिद्धिं वर्णयति—मरुत इत्यादिना॥

मरुतः शिवा नवतृणा जगती विमलं नभो रजसि वृष्टिरपाम्।
गुणसंपदानुगुणतां गमितः कुरुतेऽस्य भक्तिमिव भूतगणः॥२३॥

मरुतो वाताः शिवाः सुखाः। जगती पृथ्वी नवतृणा। शयनासनाद्यनुकूलेत्यर्थः। नभो विमलं नीहारादिरहितम्। रजसि सत्यपां दृष्टिः। भवतीति शेषः। किंबहुना। अस्य पुरुषस्य गुणसंपदा भूतहितादिगुणसंपत्त्यानुगुणतामनुकूलतां गमितः। वशीकृत इत्यर्थः। भूतगणः पृथिव्यादिपञ्चकं भक्तिं सेवां कुरुत इवेत्युत्प्रेक्षा॥

इतरेतरानभिभवेन मृगास्तमुपासते गुरुमिवान्तसदः।
विनमन्ति चास्य तरवः प्रचये परवान्स तेन भवतेव नगः॥२४॥

इतरेतरेति॥ किं च। मृगाः पशवस्तम्। अन्तेऽन्तिके सीदन्तीत्यन्तसदोऽन्तेवासिनः॥ "सत्सूद्विष—" इति क्विप्॥ गुरुमिवेतरेतरेषामनभिभवेनाद्रोहेणोपासते सेवन्ते। प्रचये पुष्पावचये तरवोऽस्य विनमन्ति। करमर्पया भवन्तीत्यर्थः॥ अस्येति लेशन्यसामान्ये षष्ठी॥ किंबहुना। स नग इन्द्रकीलो भवतेव तेन परवान्पराधीनः स्वाश्रितकस्यापि तवेव तत्सातिशयो वर्तत इत्यर्थः॥

उरु सत्त्वमाह विपरिश्रमता परमं वपुः प्रथयतीव जयम्।
शमिनोऽपि तस्य नवसंगमने विभुतानुषङ्गि भयमेति जनः॥२५॥

उरीति॥ किं च। विपरिश्रमतायासेऽपि अमराद्रित्यमुरु महत्सत्त्वमन्तःसारमाह। दुर्वहस्य भ्रमणायासंभवादिति भावः। परमं वपुर्जयं प्रथयति च। आकारेणैव जिष्णुत्वं नव्यत इत्यर्थः। शमिनः शान्तस्यापि तस्य नवसंगमनेऽपूर्वभाग्नी जनो विद्युतायाः प्रभावस्यानुषङ्गि व्यापकम्। न तु हिंसकत्वानुषङ्गीति भावः। भयमिति। शान्तोद्भवं पराभवं गमयतीति भावः॥

अथेदृशोऽसौ क इति वेत्तच्च चिन्त्य इत्याह—

ऋषिवंशजः स यदि दैत्यकुले यदि वान्वये महति भूमिभृताम्।
चरतस्तपस्तव वनेऽद्य सहा न वयं निरूपयितुमस्य गतिम्॥२६॥

ऋषीति॥ स पुरुषः। ऋषिवंशजो वेति शेषः। काहुर्वा। यदि वा दैत्यकुले।

१ भूमिभृताम्.

Digitized by Google

जात इति शेषः। यदि वा महति भूमिभृतामन्वये जातः। तव वनेषु तपश्चरतोऽस्य मौर्ति स्वरूपं निरूपयितुं वयम्। सहस्व इति सहाः॥ पचाद्यच्॥ न सहाः। स्म इति शेषः॥

अपृष्टपरिभाषणापराधं परिहरति—

विगणय्य कारणमनेकगुणं निजयाथवा कथितमल्पतया।
असदप्यदः सहितुमर्हसि नः क्व वनेचराः क्व निपुणा मतयः॥३७॥

विगणय्येति॥ अनेकगुणं बहुफलम्। इन्द्रस्याप्यनेकफलसाधकत्वेन योग्यमित्यर्थः॥ कारणं तपोरूपं विगणय्य विचार्य। अथवा निजया नैसर्गिक्याल्पतया बालिश्येन वा कथितं नोऽस्माकमदः इदम्। वचनमित्यर्थः। असदसाध्वपि सहितुं सोढुम्॥ "तीषसह–" इत्यादिना विकल्पादिडागमः॥ अर्हसि योग्योऽसि। तर्हि सदेव किं नोक्तं तत्राहुः। वनेचराः क्व निपुणा मतयो विवेकबुद्धयः क्व। नोभयं संगच्छत इत्यर्थः। अज्ञानेनापराध्यन्तीति भावः॥ अर्थान्तरन्यासोऽलंकारः॥

अधिगम्य गुह्यकगणादिति तन्मनसः प्रियं प्रियसुतस्य तपः।
निजुगोप हर्षमुदितं मघवा नयवर्त्मगाः प्रभवतां हि धियः॥३८॥

अधिगम्येति॥ मघवेन्द्र इति पूर्वोक्तं गुह्यकगणात्तन्मनसः प्रियं प्रियसुतस्यार्जुनस्य तपोऽधिगम्य ज्ञात्वा॥ गुह्यपेक्षया समानकर्तृकत्वात्त्वाप्रत्ययनिर्देशः॥ उदितं तत्तपसो देवकार्यार्थत्वादुत्पन्नं हर्षं निजुगोप गोपायामास। तथा हि। प्रभवतां प्रभूणां धियो नयवर्त्मगा नीतिमार्गानुसारिण्यो हि। अन्यथा मन्त्रभेदे कार्यहानिः स्यादिति भावः॥

प्रणिधाय चित्तमथ भक्तितया विदितेऽप्यपूर्व इव तत्र हरिः।
उपलब्धुमस्य नियमस्थिरतां सुरसुन्दरीरिति वचोऽभिदधे॥३९॥

प्रणिधायेति॥ अथ हरिरिन्द्रश्चित्तं प्रणिधाय विषयान्तरपरिहारेणात्मन्यवस्थाप्य तत्र तस्मिन्नर्जुने भक्तितया विदिते सत्यपि॥ उपलब्धुमे तृतीया॥ अपूर्व इव। अविदित इवेत्यर्थः॥ "पूर्वादिभ्यो नवभ्यो वा" इति विकल्पात्स्मिनादेशः॥ अस्यार्जुनस्य नियमस्थिरतां दार्ढ्यमुपलब्धुम्। परीक्षितुमित्यर्थः। लोकमतीत्यर्थमिति भावः। सुरसुन्दरीरिति वक्ष्यमाणप्रकारं वचोऽभिदधे॥

सुकुमारमेकमणु मर्मभिदामतिदूरगं युतममोघतया।
अविलक्ष्यमस्त्रमपरं कतमं विजयाय यूयमिव चित्तभुवः॥४०॥

सुकुमारमिति॥ मर्मभिदां मर्मच्छेदिनाम्। अस्त्राणां मध्य इत्यर्थः॥ "यतश्च नि-

Digitized by Google

वारिजम्" इति षष्ठी ॥ अपरमन्यत्कृतमस्य ॥ "वा बहूनां जातिपरिग्रहे कृतम्" ॥ युवमिव सुकुमारं न तु कठिनम् । अन्यत्तु कठिनं भवति । तयैकं न बहु । तस्यैकं भवति । तथापि सूक्ष्मं न स्थूलम् । अलक्ष्यमवेक्षितुमादिति भावः । तच्च लक्ष्यमवेक्षि । तथातिदूरगं दूरलक्ष्यभेदि । तच्च समीपलक्ष्यभेदि । तथामोघतयामोघस्वभावेन युतं युक्तम् । न कदाचिदप्यभिचरतीति भावः । अन्यत्तु कदाचिदपि लक्ष्यादपराध्यति । तथाविलक्ष्यमसत्प्रतिकारम् । अन्यद्विषमानप्रतीकारमस्त्रं विबुधः कामस्य ॥ कर्तरि षष्ठी ॥ विजयायास्तीति शेषः । न किंचिदस्तीत्यर्थः ॥ अत्रोपमालंकारः । साभिप्रायविशेषणत्वात्परिकरालंकारश्च । तयोरुभयोरङ्गाङ्गिभावेन संकरः ॥

असामर्थ्यशङ्कां परिहरति—

भववीतये हतबृहत्तमसामवबोधवारि रजसः शमनम् ।
परिपीयमाणमिव वोऽसकलैरवसादमेति नयनाञ्जलिभिः ॥ ४१ ॥

भवेति ॥ भववीतये संसारनिवृत्तये हतबृहत्तमसां निरस्तमहामोहानां योगिनां संबन्धि रजो गुणः । रजो धूलिरिति श्लिष्टरूपकम् । तस्य शमनं निवर्तकमवबोधस्तत्त्वज्ञानमेव वारि तद्वो युष्माकमसकलैरसमग्रैर्नयमान्येवाञ्जलयस्तैः परिपीयमाणमिवेत्युत्प्रेक्षा । अवसादं तपःक्षयमेति । सुकृतानपि बध्नतीनां वः कथमसामर्थ्यमिति भावः ॥ अत्रोत्प्रेक्षारूपकयोः संकरः ॥

बहुधा गतां जगति भूतसृजा कमनीयतां संभृहृत्य पुरा ।
उपपादिता विदधता भवतीः सुरसद्मयानसुमुखी जनता ॥ ४२ ॥

बहुधेति ॥ किं च । पुरा जगति बहुधा गतां नानासुखेन विसर्कीर्णां कमनीयतां चन्द्रायुपमानद्रव्यगतलावण्यं समभिहृत्य संगृह्य भवतीर्विदधता भूतसृजा ब्रह्मणा जनता जनसमूहः ॥ "ग्रामजन–" इत्यादिना तल् ॥ सुरसद्मयानसुमुखी स्वर्लोकयात्रामवलोपपादिता कृता । स्वर्गस्यापि परमसादात्सर्वलोकश्लाघ्यत्वम् । वासां वः कथमसामर्थ्यमिति भावः ॥ अत्राप्सरसां प्रकीर्णकावयवसंग्रहासंबन्धेऽपि तत्संबन्धाभिधानादतिशयोक्तिः ॥

अथ कार्यशक्तिमाह—

तदुपेक्ष विप्रयत तस्य तपः कृतिभिः कलासु सहिताः सचिवैः ।
इतवीतरागमनसां ननु वः सुखसङ्गिनं प्रति सुखावजितिः ॥ ४३ ॥

तदिति ॥ तच्चात्तसमर्थत्वात्कलासु गीतवाद्यादिषु कृतिभिः कृतज्ञैः सचिवैर्ग-

१ अनुगृह्य.

Digitized by Google

न्धर्वैः सहिता उपेत्य तस्य पुरुषस्य तपो विघ्नयत विघ्नवत्कुरुत । विहतेत्यर्थः ॥ विघ्नवच्छब्दान्मत्वन्तात् "तत्करोति" इति णिचि क्विप् । णाविष्ठवद्भावान्मतुपो लुक् ॥ न चास्रासामर्थ्यशङ्का कार्येत्यर्थान्तरन्यासेनाह— हतेति ॥ नन्वु संबोधने । हे अप्सरसः । हतानि वशीकृतानि वीतरागाणां निस्पृहाणां मुमुक्षूणां मनांसि चित्तानि याभिस्तासां वो युष्माकमप्सरसां सुखसङ्गिनं पुरुषं प्रति सुखाभिलाषिणं मत्स्वजितिर्विजयः सुखा न हु दुःकरा खलु । तेनायं सुखार्थी न मुमुक्षुरित्युक्तम् ।

अथ सुखसङ्गित्वलिङ्गमाह—

अविसृष्यमेतदभिलष्यति स द्विषतां वधेन विषयाभिरतिम् ।
भववीतये न हि तथा स विधिः क शरासनं क च विमुक्तिपथः॥४४

अविसृष्येति ॥ हे अप्सरसः । स पुरुषो द्विषतां शत्रूणां वधेन शत्रुहननद्वारा विषयाभिरतिं विषयसुखमभिलष्यति वाञ्छति ॥ "वा भ्राश-" इत्यादिना श्यन्मत्ययः ॥ एतद्विषयसक्तत्वमविसृष्यमसंदिग्धम् ॥ "ऋदुपधाच्चाकृपिचृतेः" इति क्यप् ॥ हि यस्मात्स विधिः "स बिभर्ति भीषणभुजङ्गभुजः" इत्यादिश्लोकोक्तोऽनुष्ठानमकारो भववीतये संसारमुक्तये न भवति । कुत इत्याह—शरासनं धनुः क विमुक्तेः पन्थाश्च क । परस्परं विरुद्धमित्यर्थः । न खलु हिंसासाध्या मुक्तिरिति भावः ॥ अर्थान्तरन्यासोऽलंकारः ॥

न च शापभयमपि संभाव्यमस्मादित्याह—

पृथुधाम्नि तत्र परिबोधि च मा भवतीभिरन्यमुनिवद्विकृतिः ।
स्वयशांसि विक्रमवतामवतां न वधूष्वघानि विसृपन्ति धियः॥४५

पृथ्विति ॥ पृथुधाम्नि महातेजसि तत्र तस्मिन्पुरुषविषयेऽन्यमुनिवदन्यस्मिन्मुनाविव ॥ "तत्र तस्येव" इति वतिप्रत्ययः ॥ विकृतिः कोपविकारश्च भवतीभिर्मा परिबोधि मा विज्ञायि । मा शङ्कीति यावत् ॥ बुध्यतेः कर्मणि लुङ् । माङ्योगादाशीरर्थेऽडागमाभावश्च ॥ तथा हि । स्वयशांसवतां रक्षताम् । यशोधनानामित्यर्थः । विक्रमवतां धियश्चित्तानि वधूषु स्त्रीविषयेष्वघानि व्यसनानि ॥ "दुःखैनोव्यसनेष्वघम्" इति वैजयन्ती ॥ न विसृपन्ति ॥ अर्थान्तरन्यासः ॥ स्त्रीहिंसायाः शूराणां यशोहानिकरत्वान्न सर्वथा यो हिनस्ति स इत्यर्थः ॥

आशंसितापचितिचारु पुरः सुराणा-
मादेशमित्यभिमुखं समवाप्य भर्तुः ।

१ विषयातिरतवत्. २ पशुः.

Digitized by Google

लेभे परां द्युतिममर्त्यवधूसमूहः
संभावना ह्यधिकृतस्य तनोति तेजः ॥ ४६ ॥

आर्यासितेति ॥ अमर्त्यवधूसमूहोऽप्सरसां गणः सुराणां पुरोऽग्र आर्यासितापचितिभिरपेक्षितसंभावनाभिश्चारु यथा तथा ॥ "सपार्चयोरपचितिः" इत्यमरः ॥ अभिमुखं समक्षं भर्तुः स्वामिन इति पूर्वोक्तमादेशं नियोगं समवाप्य परां द्युतिं लेभे । तथा हि । अधिकृतस्य कचिदधिकारे नियुक्तस्य संभावना स्वामिकृता पूजा तेजः कान्तिं तनोति ॥

प्रणतिमथ विधाय प्रस्थिताः सद्मनस्ताः
स्तनभरनमिताङ्गीरङ्गनाः प्रीतिभाजः ।
अचलनलिनलक्ष्मीहारि नालं बभूव
स्तिमितममरभर्तुर्द्रष्टुमक्ष्णां सहस्रम् ॥ ४७ ॥

प्रणतिमिति ॥ अथ प्रणतिं विधाय सद्मन इन्द्रभवनात्प्रस्थिताः प्रचलिताः स्तनभरैर्नमितान्यङ्गानि यासां ताः ॥ "अङ्गगात्रकण्ठेभ्यो बलच्यसू" इति ङीप् ॥ प्रीतिभाजः स्वामिसंभावनया संतुष्टाश्चा अङ्गना अचलनलिनानां स्थिरकमलानां लक्ष्मीर्हरतीति तच्चोक्तम् । तद्भवनोदरमित्यर्थः । कुतः । स्तिमितं विस्मयनिश्चलममरभर्तुरक्ष्णां सहस्रम् ॥ कर्तृ ॥ द्रष्टुमलं समर्थं न बभूव । तासां सौन्दर्यसागरलोहेलत्वादिति भावः ॥ अत्रोपमालंकारः ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथसमाख्यया व्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये द्युतिप्रस्थानो नाम षष्ठः सर्गः ।

सप्तमः सर्गः ।

श्रीमद्भिः सरथगजैः सुराङ्गनानां युक्तानामथ सचिवैस्त्रिलोकभर्तुः ।
संमूर्च्छन्नलघुविमानरन्ध्रभिन्नः प्रस्थानं समभिदधे मृदङ्गनादः ॥ १ ॥

श्रीमद्भिरिति ॥ अथ प्रस्थानानन्तरं श्रीमद्भिः शोभावद्भिः । सह रथगजेन सरथगजाद्यैः ॥ "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः ॥ त्रयाणां लोकानां

१ क्षीरेन्द्र.

Digitized by Google

भर्तुस्त्रिलोकभर्तुरिन्द्रस्य ॥ "तदितार्थ–" इत्यादिनोत्तरपदसमासः ॥ सचिवैर्मन्धर्वैर्गानां सुराङ्गनानां मज्जानं गमनमलघुषु महत्सु विमानरन्ध्रेषु विमानानां छिद्रेषु छदरेषु भित्तिः प्रतिध्वानैरनेकीभूतानामतएव संभूयोर्ध्वमम्बामुवन्मुदङ्गनादः समभिदध आचख्यौ । पौरेभ्य इति शेषः ॥ अस्मिन्सर्गे महर्षिणीछन्दस्–"स्रौ जौ मस्लिदक्षयतिः महर्षिणीयम्" इति लक्षणात् ॥

सोत्कण्ठैरमरगणैरनुप्रकीर्णान्निर्याय ज्वलितरुचः पुरान्मघोनः ।
रामाणामुपरि विवस्वतः स्थितानां नासेदे चरितगुणत्वमातपत्रैः ॥२॥

सोत्कण्ठैरिति ॥ सोत्कण्ठैः । अवेक्षणोत्सुकैरित्यर्थः । अमरगणैरनुप्रकीर्णादाकीर्णाज्ज्वलितरुचो दीप्तप्रभान्मघोन इन्द्रस्य पुरादमरावत्या निर्याय निर्गत्य ॥ यातेः क्त्वो ल्यप् ॥ विवस्वत उपरि स्थितानां रामाणाम् । आतपात्रायन्त इत्यातपत्रैः ॥ "सुपि–" इति योगविभागात्कमजयः ॥ चरितगुणत्वं सार्थकत्वं नासेदे न प्रापे । आतपत्राणां संभवादिति भावः ॥

धूतानामभिमुखपातिभिः समीरैरायासादविशदलोचनोत्पलानाम् ।
आनिन्ये मदजनितां श्रियं वधूनामुष्णांशुद्युतिजनितः कपोलरागः॥३

धूतानामिति ॥ अभिमुखपातिभिः समीरैः प्रतिकूलवायुभिर्धूतानामिति दुर्निमित्तसूचनम् । आयासाद्गतिश्रमात्कृतादविशदलोचनोत्पलानां वधूनामुष्णांशुद्युतिजनित आतपकृतः । कपोलानां रागः पाटलत्वम् । मदेन जनितां श्रियम् । तत्सदृशीं श्रियमित्यर्थः ॥ अत एव निदर्शनालंकारः ॥ आनिन्य आनीतवान् । वधूरिति शेषः ॥ आङ्पूर्वान्नयतेः कर्तरि लिट् । नकारानुबन्धत्वादात्मनेपदम् ॥

तिष्ठद्भिः कथमपि देवतानुभावादाकृष्टैः प्रजविभिरायतं तुरङ्गैः ।
नेमीनामसति विवर्तने रथौघैरासेदे वियति विमानवत्प्रवृत्तिः ॥ ४ ॥

तिष्ठद्भिरिति ॥ कथमपि वादय् ॥ "कथमादौ तथाप्यन्ते यत्ने गौरवबाढयोः" इति वैजयन्ती ॥ देवतानामनुभावाच्चिष्ठद्भिः । अपतद्भिरित्यर्थः । रथविशेषणमेतत् । प्रजविभिर्वेगवद्भिस्तुरङ्गैरायतं दूरमाकृष्टे रथौघैर्विषयत्वाकाशे नेमीनां चक्रधाराणाम् ॥ "चक्रधारा प्रधिर्नेमिः" इति यादवः ॥ विवर्तने भ्रमणेऽसति विमानवद्विमानानामिवेत्युपमा ॥ "तत्र तस्येव" इति वतिप्रत्ययः ॥ महर्षिभिर्विरासेदे प्राप्ता ॥ सदेः कर्मणि लिट् ॥

कान्तानां कृतपुलकः स्तनाङ्गरागे वक्त्रेषु च्युततिलकेषु मौक्तिकाभः ।
संपेदे श्रमसलिलोद्गमो विभूषा रम्याणां विकृतिरपि श्रियं तनोति५

१ विदितार्थम्. २ नमसि.

Digitized by Google

कान्तानामिति ॥ कान्तानां स्त्रीणामङ्गरागे कृतपुलको जनितोद्भेदः । कुतरोमाञ्च इत्यर्थः । च्युताः प्रमृष्टास्तिलका येषां तेषु वक्त्रेषु मौक्तिकाभः श्रमसलिलोद्गमः स्वेदोद्भेदो विभूषा भूषणं संपदे संपन्नः ॥ कर्तरि क्विप् ॥ तथाहि । रम्याणां स्वभावसुन्दराणां विकृतिरपि श्रियं तनोति । अतः स्वेदस्यापि विभूषणत्वमुपपद्यत इति भावः ॥

राजद्भिः पथि मरुतामभिन्नरूपैरुल्कार्चिः स्फुटगतिभिर्ध्वजांशुकानाम्
तेजोभिः कनकनिकाषराजिगौरैरायामः क्रियत इव स्म सातिरेकः॥६

राजद्भिरिति ॥ मरुतां पथ्याकाशे राजद्भिर्दीप्यमानैरभिन्नरूपैरविच्छिन्नाकारैरतएवोल्कानामर्चीषीव स्फुटगतीनि दीप्तमार्गाणि येषां तैः । कनकस्य निकाषः कषणं तस्य राजी रेखा तद्वद्गौरैररुणैः ॥ "गौरः पीतेऽरुणे श्वेते" इति विश्वः ॥ ध्वजांशुकानां तेजोभिः पताकाकान्तिभिरायामस्तेषामेव दैर्घ्यं सातिरेकः सातिशयः क्रियते स्मेव कृत इव । दीर्घा ध्वजपटाः स्वतेजःप्रसारेण दीर्घतमा इव लक्ष्यन्त इवेत्युत्प्रेक्षा । सा चोल्कांशुपमानुप्राणिता ॥

रामाणामवजितमाल्यसौकुमार्ये संप्राप्ते वपुषि सहत्वमातपस्य ।
मन्दैर्वैरधिगतविस्मयैः प्रतीये कल्याणी विधिषु विचिन्त्रता विधातुः॥७

रामाणामिति ॥ माल्यैव माल्यं तस्य सौकुमार्यमवजितं येन तस्मिन् । कुसुमादपि मनोहर इत्यर्थः । रामाणां वपुष्यातपस्य ॥ कृत्योगे कर्मणि षष्ठी ॥ सहत इति सहः क्षमः ॥ पचाद्यच् ॥ तस्य भावः सहत्वम् । तत्संप्राप्ते सत्यधिगतविस्मयैः संप्राप्ताश्चर्यैर्मन्दैर्विधातुर्विधिषु सृष्टिषु कल्याणी साध्वी श्रेयसी । उपकारकत्वादिति भावः । विचित्रता नानाविधत्वं प्रतीयेऽवगता ज्ञाता ॥ प्रतिपूर्वादिणः कर्मणि क्विप् ॥

सिन्दूरैः कृतरुचयः सहेमकक्ष्याः स्रोतोभिस्त्रिदशगजा मदं क्षरन्तः ।
साद्रत्वं ययुररुणांशुरागभिन्नैर्वर्षद्भिः स्फुरितशतह्रदैः पयोदैः ॥ ८ ॥

सिन्दूरैरिति ॥ सिन्दूरैर्नागसंभवाख्यै रागद्रव्यैः ॥ "सिन्दूरं नागसंभवम्" इत्यमरः ॥ कृतरुचयः । अलंकृता इत्यर्थः । सह हेम्नः कक्ष्याभिर्मध्येबन्धनैः सहेमकक्ष्याः ॥ "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः ॥ "कक्ष्या मकोष्ठे हर्म्यादेः काञ्च्यां बध्येभबन्धने" इत्यमरः ॥ स्रोतोभिः सप्तभिर्मदनाडीभिः ॥ "करात्कट्याश्च नेत्राच्च नेभाभ्यां च मदच्युतिः" इति पालकाव्ये । करात्सारम्भाभ्यामित्यर्थः ॥ मदं क्षरन्तो वर्षन्तस्त्रिदशगजा अरुणस्यार्कस्यांशूनां रागेणारुण्येन भिन्नैः संसृष्टैर्वर्षद्भिः स्फुरितशतह्रदैः स्फुरितशतविद्युद्भिः पयोदैः साद्रत्वं ययुरित्युपमालंकारः ॥

Digitized by Google

अत्यर्थं दुरुपसदादुपेत्य दूरं पर्यन्तादहिममयूखमण्डलस्य।
आशानामुपरिचितामिवैकवेणीं रम्योर्मित्रिदशनदीं ययुर्बलानि ॥ ९ ॥

अत्यर्थमिति ॥ बलानि सैन्यान्यत्यर्थं दुरुपसदादुःसहादहिममयूखमण्डलस्य सूर्यबिम्बस्य पर्यन्तात्समीपादूरमुपेत्यागत्याशानामुपरिचितां गुम्फितामेकवेणीमिव स्थितामित्युत्प्रेक्षा। रम्या ऊर्मयस्तरङ्गा भङ्गयश्च यस्यास्तां त्रिदशनदीं मन्दाकिनीं ययुः प्रापुः ॥

आमत्तभ्रमरकुलाकुलानि धुन्वद्धुतग्रथितरजांसि पङ्कजानि।
कान्तानां गगननदीतरङ्गशीतः संतापं विरमयति स्म मातरिश्वा ॥ १० ॥

आमत्तेति ॥ आमत्तैर्भ्रमरकुलैराकुलान्युद्भूतान्युत्थापितानि ग्रथितान्यन्योन्यसंबद्धानि च रजांसि येषु तानि पङ्कजानि धुन्वन्कम्पयन्। सुरभिरित्यर्थः। गगननदीतरङ्गैः शीतो मातरिश्वा वायुः। कान्तानां संतापं विरमयति स्म शमयामास ॥ मातर्यन्तरिक्षे श्वयतीति निरुक्तिः ॥

संभिन्नैरिभतुरगावगाहनेन प्राप्योर्वीरनुपदवीं विमानपङ्क्तीः।
तत्पूर्वं प्रतिविदधे सुरापगाया वप्रान्तस्खलितविवर्तनं पयोभिः ॥ ११ ॥

संभिन्नैरिति ॥ इभतुरगावगाहनेन इस्त्यश्वावलोडनेन संभिन्नैः संक्षुभितैः सुरापगायाः पयोभिः ॥ कर्तृभिः ॥ पदवीमनु। पदव्यामित्यर्थः ॥ "लक्षणेत्थंभूत-" इत्यादिना कर्मप्रवचनीयत्वाद्द्वितीया ॥ उर्वीर्विपुला विमानपङ्क्तीः प्राप्य। तदेव पूर्वं तत्पूर्वमिदं प्रथमं यथा तथाकाशगङ्गायास्तटाभावादिति भावः। वमान्तेषु रोधोभूमिषु स्खलितानि तैर्विवर्तनं प्रत्यावृत्तिर्वमान्तस्खलितविवर्तनं तटान्तस्खलनमतिवर्तनम् ॥ "वमः पितरि केदारे वमः प्राकाररोधसोः" इति वैजयन्ती ॥ प्रतिविदधे चक्र इत्यतिशयोक्तिः ॥

क्रान्तानां ग्रहचरितात्पथो रथानामक्षाग्रक्षतसुरवेश्मवेदिकानाम्।
निःसङ्गं प्रधिभिरुपाददे विवृत्तिः संपीडक्षुभितजलेषु तोयदेषु ॥ १२ ॥

क्रान्तानामिति ॥ ग्रहैः सूर्यादिभिश्चरितादाभितात् ॥ कर्मणि क्तः ॥ पथो मार्गात्क्रान्तानां निष्क्रान्तानामक्षाश्चक्रधारा दारुविशेषास्तेषामग्रैः क्षता दारिताः सुरवेश्मवेदिका यैस्तेषां रथानां प्रधिभिर्नेमिभिश्च क्रान्तैः ॥ "चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमान्" इत्यमरः ॥ संपीडेन नोदनेन क्षुभितानि जलानि

१ स्खलन.

Digitized by Google

वेषां तेषु तोयदेषु निःसङ्गममतिघातं यथा तथा विद्युतिः परिश्रमजमपादादे स्तीक्ष्तेत्यतिशयोक्तिः स्वभावोक्त्या संसृज्यते ॥

तप्तानामुपदधिरे विषाणभिन्नाः प्रह्लादं सुरकरिणां घनाः क्षरन्तः।
युक्तानां खलु महतां परोपकारे कल्याणी भवति रुजस्स्वपि प्रवृत्तिः१३

तप्तानामिति ॥ विषाणभिन्ना गजदन्तक्षतवताः ॥ "विषाणं दन्तशृङ्गयोः" इति हलायुधः ॥ अत एव क्षरन्तः स्रवन्तो घनास्तप्तानां सुरकरिणां प्रह्लादमुपदधिरे उपचक्रिरे। तथाहि। परोपकारे युक्तानामासक्तानां रुजस्स्वपि पीडयस्स्वपि विषये कल्याणी हितकारिणी खलु प्रवृत्तिर्व्यापारो भवतीत्यर्थान्तरन्यासोऽलंकारः। ततो युक्तं मेघानां गजदन्तक्षतानामपि तदाह्लादकत्वमिति भावः ॥

संवाता मुहुरनिलेन नीयमाने दिव्यस्त्रीजघनवरांशुके विवृत्तिम्।
पर्यस्तद्युमणिमेखलांशुजालं संजज्ञे युतकमिवान्तरीयमूर्वोः॥ १४ ॥

संवातेति ॥ संवाता संवृता ॥ वातेर्गत्यर्थत्वाच्छन्नमित्यर्थः ॥ अनिलेन। दिव्यस्त्रीणां जघनेषु वरं श्रेष्ठं पर्यंशुकं तस्मिन्विवृत्तिमपसारं मुहुर्नीयमाने सति पर्यस्तस्मसरत्द्युमणिमेखलांशुजालमूर्वोर्युतकं चलनाख्यमिव ॥ "युतकं संभवे युग्मे यौतके चलनेऽपि च" इति विश्वः ॥ अन्तरे भवमन्तरीयमधोंऽशुकम् ॥ "नद्यादिभ्यश्च" इति छप्रत्ययः ॥ "अन्तरीयोपसंव्यानपरिधानाग्र्यधोंऽशुके" इत्यमरः ॥ संजज्ञे संजातम् ॥ जनिधातोः कर्तरि लिट् ॥ उत्प्रेक्षालंकारः ॥

प्रत्यार्द्रीकृतविलकास्तुषारपातैः प्रह्लादं शमितपरिश्रमा दिशन्तः।
क्रान्तानां बहुमतिमाययुः पयोदा नाल्पीयान्बहु सुकृतं हिनस्ति दोषः

प्रत्यार्द्रीकृतेति ॥ तुषारपातैः शीकरवर्षैः ॥ "तुषारो हिमशीकरौ" इति विश्वः ॥ प्रत्यार्द्रीकृतविलका मार्जितविशेषकापि शमितपरिश्रमाः प्रह्लादमानन्दं दिशन्तः पयोदाः क्रान्तानाम् ॥ कर्तरि षष्ठी ॥ बहुमतिं संमानमाययुः । तथाहि। अल्पीयान्स्वल्पो दोषो बहु प्रभूतं सुकृतमुपकारं न हिनस्ति न हन्ति ॥ अर्थान्तरन्यासोऽलंकारः ॥

वातस्य प्रथिततरङ्गसैकतामे विच्छेदं विषयसि वारिवाहजाले।
आतेनुस्त्रिदशवधूजनाङ्गभाजां संधानं सुरधनुषः प्रभा मणीनाम्१५

वातस्येति ॥ प्रथिततरङ्गं पद्मोमि यत्सैकतं तत्सामेवाभा यस्य तस्मिन्विगतानि

१ अत्यार्द्रीकृत.

Digitized by Google

पयांसि यस्मात्तस्मिन्निर्जले ॥ "श्वेतादिभाषा" इत्यादिना विकल्पात्कप्प्रत्ययान्तः। उदः मधुतिपाठस्तु पयःशब्दस्यैकवचनान्तस्यैवेति न कश्चिद्विरोधः ॥ वारिवाहजाले मेघवृन्दे विच्छेदं पुटिं यातस्य सुरधनुष इन्द्रचापस्य भिदाप्रभृतिजनानुभाजां नवीनानाम् । तदङ्गसङ्गिविभूषामणीनामित्यर्थः । प्रभाः कान्तयः संघानमातेनुश्चक्रुः ॥ अत्रापरत्नप्रभाणामिन्द्रधनुषोऽसंबन्धेऽपि संबन्धाभिधानादतिशयोक्तिरलंकारः ॥

संसिद्धाविति करणीयसंनिबद्धैरालापैः पिपतिषतां विलङ्घ्य वीथीम् ।
आसेदे दशशतलोचनध्वजिन्या जीमूतैरपिहितसानुरिन्द्रकीलः ॥१७॥

संसिद्धाविति ॥ संसिद्धौ कार्यसिद्धिविषय इतीत्थंभावेना प्रकारेण । कर्तव्यमिति करणीयं तेन संनिबद्धैः । संयोजितैरित्यर्थः । आलापैराभाषणैरुपलक्षितया॥ "स्यादाभाषणमालापः" इत्यमरः ॥ दशशतानि संख्या येषु तानि लोचनानि यस्य सः । सहस्रलोचन इत्यर्थः । तस्य ध्वजिन्या सेनया पिपतिषतां पक्षिणां वीथीं मार्गम् ॥ "पित्सन्तो नभसङ्गमाः" इत्यमरः ॥ "तनिपति–" इत्यादिना विकल्पादिडागमः ॥ विलङ्घ्य जीमूतैर्जीवस्योदकस्य मूतः पटवन्धो येषां ते तैः ॥ पृषोदरादित्वात्साधुः ॥ अपिहितसानुराच्छादिततटः । उच्चत इत्यर्थः । इन्द्रकील आसेदे प्राप्तः ॥ सीदतेः कर्मणि लिट् ॥

आकीर्णा मुखनलिनैर्विलासिनीनामुद्भूतस्फुटविशदातपत्रफेना ।
सा तूर्यध्वनितगभीरमापतन्ती भूभर्तुः शिरसि नभोनदीव रेजे ॥१८॥

आकीर्णेति ॥ विलासिनीनां मुखनलिनैः ॥ उपमितसमासः ॥ आकीर्णा व्याप्ता उद्भूतान्यूर्ध्वमुत्क्षिप्तानि स्फुटान्यसंकुचितानि विशदातपत्राणि श्वेतच्छत्राणि फेना इव यस्यास्तथोक्ता तूर्यध्वनितैर्वाद्ययोषैर्गभीरं यथा तथा भूभर्तुरिन्द्रकीलस्य शिरस्यापतन्ती सा सेना नभोनदीव रेजे ॥

सेतुत्वं दधति पयोमुचां वितानेसंरम्भादभिपततो रथाञ्चवेन।
आनिन्युर्नियमितरश्मिभुग्नघोणाः कुच्छ्रेण क्षितिमवनामिनस्तुरङ्गाः॥

सेतुत्वमिति ॥ पयोमुचां वितानेसेतुत्वं दधति सति संरम्भादाद्येपाञ्चवेनाभिपततः। मेघवृन्दमधरीकृत्य धावत इत्यर्थः। तथाभूतान्रथाञ्जियमितैराकृष्टैः रश्मिभिः प्रग्रहैर्भुग्ना आकुञ्चिता घोणाः मोवा येषां ते ॥ "कुञ्चितं नतम् । आविद्धं कुटिलं भुग्नं वेष्टितं वक्रम्" इत्यमरः । "किरणप्रग्रहौ रश्मी" इत्यमरः । "घोणा तु श्रोत्रमक्षिपाम्" इत्यमरः ॥ अवनमन्तीत्यवनामिनोऽवनतपूर्वकायास्तुरङ्गाः कुच्छ्रेण महता प्रयत्नेन क्षितिमानिन्युरिति स्वभावोक्तिः ॥

१ आगदन्ती.

Digitized by Google

माहेन्द्रं नगमभितः करेणुवर्याः पर्यन्तस्थितजलदा दिवः पतन्तः ।
साङ्गत्यं निलयननिष्प्रकम्पपक्षैराजग्मुर्जलनिधिशायिभिर्नगेन्द्रैः ॥२०

माहेन्द्रमिति ॥ माहेन्द्रं नगमभित इन्द्रकीलाभिमुखम् ॥ "अभितःपरितः—" इत्यादिना द्वितीया ॥ दिवोऽन्तरिक्षात्पतन्तोऽवतरन्तः पर्यन्तस्थिताः पार्श्वस्था जलदा येषां ते करेणुवर्याः करेणुषु वर्याः । श्रेष्ठा इत्यर्थः ॥ "न निर्धारणे" इति षष्ठीसमासनिषेधात् "सप्तमी" इति योगविभागात्सप्तमीसमासः ॥ निलयने स्थाने निष्प्रकम्पपक्षैर्निश्चलपक्षैर्जलनिधिशायिभिर्नगेन्द्रैर्मैनाकादिभिः साङ्गत्यमाजग्मुरित्युपमा ॥

उत्सङ्गे समविषमे सर्म महाद्रेः क्रान्तानां वियदभिपातलाघवेन ।
आमूलादुपनदि सैकतेषु लेभे सामग्र्यं खुरपदवी तुरङ्गमाणाम् ॥२१॥

उत्सङ्ग इति ॥ महाद्रेरुत्सङ्गे मूर्ध्नि विषमे यत्समविषमं समं च विषमं च निम्नोन्नतं तस्मिन् ॥ द्वन्द्वैकवद्भावः ॥ वियदभिपातलाघवेन गगनसंचारपाटवेन सममेकरूपम् । आरोहावरोहरहितमित्यर्थः ॥ क्रान्तानां गच्छतां तुरङ्गमाणां खुरपदवी खुरपङ्क्तिरुपनदि नदीसमीपे ॥ "अव्ययीभावश्च" इति नपुंसकत्वादूस्वत्वम् ॥ सैकतेष्वामूलाग्मूलमारभ्य । आदित आरभ्येति यावत् । समग्रस्य भावः सामग्र्यं लेभे । सैकतादन्यत्र निम्नेषु गमनचारेण सममदेशवर्तिषमे खुरस्पर्शाभावाद्विच्छिन्ना खुरसरणिः । सैकतेषु तु सर्वत्र समत्वादविच्छिन्नेत्यर्थः ॥

सध्वानं निपतितनिर्झरासु मन्द्रैः संमूर्च्छन्प्रतिनिनदैरधित्यकासु ।
उद्धीवैर्घनरवशङ्कया मयूरैः सोत्कण्ठं ध्वनिरुपशुश्रुवे रथानाम् ॥२२॥

सध्वानमिति ॥ सध्वानं सशब्दं निपतिता निर्झराः प्रवाहा यासु तासु ॥ "प्रवाहो निर्झरो झरः" इत्यमरः ॥ अधित्यकासु नगोर्ध्वभूमिषु ॥ "भूमिरूर्ध्वमधित्यका" इत्यमरः ॥ "उपाधिभ्यां—" इत्यादिना त्यकन्प्रत्ययः ॥ मन्द्रैर्गम्भीरैः ॥ "कले मन्द्रस्तु गम्भीरे" इत्यमरः ॥ प्रतिनिनदैः प्रतिध्वनिभिः संमूर्च्छन्वर्धमानो रथानां ध्वनिर्घनरवशङ्कया मेघगर्जितभ्रमेणेति भ्रान्तिमदलंकारः ॥ उद्धीवैर्मयूरैः सोत्कण्ठमुपशुश्रुव उपशुश्रुवे ॥ शृणोतेः कर्मणि लिट् ॥

संभिन्नामविरलपातिभिर्मयूखैर्नीलानां श्रुशमुपमेखलं मणीनाम् ।
विच्छिन्नामिव वनिता नभोन्तराले वप्राग्भःश्रुतिमवलोकयांबभूवुः ॥

संभिन्नामिति ॥ अविरलपातिभिर्निरन्तरमसारिभिरुपमेखलम् । मेखलातटेऽित्यर्थः ॥ "अथ मेखला । श्रोणिस्थानेऽद्रिकटके काञ्चिदाम्नेऽसिबन्धने" इति

Digitized by Google

Digitized by Google

Digitized by Google

यादवः ॥ नीलानां मणीनां मयूखैर्भृशं संभिन्नामेकीभूतामतएव नभोन्तराले विच्छिन्नमिव स्थितामित्युत्प्रेक्षा । वमाम्भःस्रुतिं वमोदकधारां वनिता अवलोकयांचक्रुः । वमाम्भःस्रुतेः स्वधर्मित्यागेनेन्द्रनीलानां नीलिमस्वीकाररूपतनुत्वापिता विच्छेदोत्प्रेक्षेति तयोरङ्गाङ्गिभावेन संकरः । तेन च मैत्यादिच्छेदभ्रमरूपो भ्रान्तिमान्व्यज्यते ॥

आसन्नद्विपपदवीमदानिलाय क्रुध्यन्तो धियमवमत्य धूर्गतानाम् ।
सव्याजं निजकरिणीभिराचितचित्ताः प्रस्थानं सुरकरिणः कथंचिदीयुः ॥ २४

आसन्नेति ॥ धुरं गतास्तेषां धूर्गतानां नियन्तॄणां धियमवमत्यागणयित्वा । अवज्ञायेति यावत् । आसन्नायां द्विपपदव्यां वनगजमार्गे यो मदानिलस्तस्मै क्रुध्यन्तस्तं प्रति क्रुध्यन्तः ॥ "क्रुधद्रुह—" इत्यादिना संप्रदानत्वाच्चतुर्थी ॥ सव्याजं सकपटं निजकरिणीभिराचितचित्ता आकृष्टचित्ताः सुरकरिणो देवनागाः प्रस्थानं गमनं कथंचित्कष्टेनेयुरभिलेषुः ॥

नीरन्ध्रं पथिषु रजो रथाङ्गनुन्नं पर्यस्यन्नवसलिलारुणं वहन्ती ।
आतेने वनगहनानि वाहिनी सा घर्मान्तक्षुभितजलेव जह्नुकन्या ॥ २५

नीरन्ध्रमिति ॥ नीरन्ध्रं सान्द्रं पथिषु रथाङ्गैश्चक्रैर्नुन्नं प्रेरितम् ॥ "नुद्यतुन्नास्तनिघ्नूवविद्धास्तप्तप्रेरिताः समाः" इत्यमरः ॥ पर्यस्यत्परसरन्नवसलिलमिवारुणं रजो वहन्ती सा वाहिनी सेना । घर्मान्ते ग्रीष्मे क्षुभितजला । कलुषोदकेत्यर्थः । जह्नुकन्या गङ्गेव । वनानि फलकुसुमप्रधानानि गहनानि जीर्णानि च तानि च तानि वनगहनान्यातेने व्याप्तानि ॥ अत्र समासगतवाक्यगतोपमयोः सजातीयपयोरङ्गाङ्गिभावेन संकरः ॥

संभोगक्षमगहनामथोपगङ्गं बिभ्राणां ज्वलितमणीनि सैकतानि ।
अभ्यूषुर्द्युतकुसुमाचितां सहाया वृत्रारेरविरलशाद्वलां धरित्रीम् २६

संभोगेति ॥ अथ वृत्रारेः शक्रस्य सहायाः सचिवा गन्धर्वा उपगङ्गं गङ्गासमीपे ॥ अव्ययीभावस्य नपुंसकत्वात्स्वत्वम् ॥ संभोगक्षमगहनामुपभोगयोग्यवनां ज्वलिता मणयो येषु तानि सैकतानि बिभ्राणाम् ॥ भूवः कर्तरि लटः शानच् ॥ द्युतिः स्वयं पतितैः कुसुमैराचितां व्याप्तामविरलाः सान्द्राः शाद्वलाः शादमाया यस्यां सा तां धरित्रीमभ्यूषुरधिवसेयुः ॥ वसतेर्यजादित्वात्संप्रसारणम् ॥ अत्र धरित्रीविशेषणानामर्थापत्तिहेतुत्वादनेकपदार्थहेतुकं काव्यलिङ्गमलंकारः ॥

१ धुवम्.

Digitized by Google

भूभर्तुः समधिकमादधे तदोर्व्याः श्रीमत्तां हरिसखवाहिनीनिवेशः ।
संसक्तौ किमसुलभं महोदयानामुच्छ्रायं नयति यदृच्छयापि योगः २७

भूभर्तुरिति ॥ तदा हरिसखवाहिनीनिवेशो गन्धर्वसेनाधिविरम् ॥ "निवेशः शिविरोद्वादविन्यासेषु मकीर्तितः" इति शाश्वतः ॥ भूभर्तुः पर्वतस्योर्व्याः समधिकं पूर्वस्मादभ्यधिकं यथा तथा श्रीमत्तां । श्रियमित्यर्थः । आदधे जनयामास । तथाहि । महोदयानां महात्मनां संसक्तौ सम्यक्संबन्धे ॥ "संसक्तौ" इति पाठे तु सम्यक्सेवायाम् ॥ किमसुलभम् । न किंचिदुर्लभमित्यर्थः । यतः । यदृच्छया दैवायोगोऽप्युच्छ्रायमुत्कर्षं नयति ॥ अत्र प्रकृतयदृच्छया योगस्योत्कर्षाभिधानादप्राकृतमङ्गियोगस्तु स्वकर्षापायकत्वे कैमुतिकन्यायेनार्थापत्तिरिति प्राकरणिकादप्राकरणिकस्यार्थापत्तिरलंकारः । तदुक्तम्— "एकस्य वस्तुनो भावाभावौ वस्त्वन्तरस्य पतेद् । कैमुत्येन यतः सा स्यादर्थापत्तिरलंक्रिया" इति ॥

सामोदाः कुसुमतरुश्रियो विविक्ताःसंपत्तिः किसलयशालिनीलतानाम्
साकल्यं ययुरमराङ्गनोपभुक्ताः सा लक्ष्मीरुपकुरुते यया परेषाम् २८

सामोदा इति ॥ सामोदाः ससौरभाः कुसुमप्रधानास्तरवः ॥ शाकपार्थिवादिषु ह्रस्वः ॥ तेषां श्रियः सद्वृक्षो विविक्ता विजनप्रदेशाः ॥ "विविक्तविजनच्छन्ननिःशलाकासवा रहः" इत्यमरः ॥ किसलयशालिनीलतानां नवपल्लवयुतवल्लीनां संपत्तिरेवा अमराङ्गनोपभुक्ताः सत्यः साकल्यं ययुः । तथाहि । यया लक्ष्म्या ॥ करणे ॥ परेषामुपकुरुते । लक्ष्मीवानिति शेषः । सा लक्ष्मीर्नान्येति भावः ॥ परेषामित्यत्र "अनुकरोति भगवतो नारायणस्य"इत्यादिवत्क्रियायोगे हि संबन्धसामान्ये षष्ठी ॥

क्लान्तोऽपि त्रिदशवधूजनः पुरस्ताल्लीनाहिवसितविलोलपल्लवानाम् ।
सेव्यानां इतविनयैरिवाश्रितानां संपर्कं परिहरति स्म चन्दनानाम् २९

क्लान्त इति ॥ क्लान्तोऽपि त्रिदशवधूजनः पुरस्तादग्रे लीनानां संश्लिष्टानामहीनां सर्पाणां निःश्वासैर्विलोलाः पल्लवा येषां तेषां चन्दनानां संपर्कं हतविनयैर्दुर्जनैः कुत्सितैराश्रितानां संश्रितानां सेव्यानां सधूनां संपर्कमिव परिहरति स्म । दुष्टसंसर्गो हि सज्जनस्यापि त्याज्य इति भावः ॥

उत्सृष्टध्वजकृपकट्टा धरित्रीमार्गीता विदिनयैः श्रमं विनेतुम् ।
आक्षिप्तद्रुमसहना युगान्तवातैः पर्यस्ता गिरय इव द्विपा विरेजुः ॥ ३० ॥

उत्सृष्टेति ॥ उत्सृष्टा आक्षिप्ता ध्वजाः कृपा आस्तरणानि कट्टा यत्सस्तद्वन्तो न येषां ते ॥ "भवेन्नास्तरणं वर्मः परिस्तोमः हयो हयोः" इत्यमरः ॥ विदि-

Digitized by Google

तनयैः शिक्षाभिर्वन्दनभिः भयं विनेतुं क्षममपनेतुं धरित्रीमानीताः । निवेदयमाना इत्यर्थः । द्विपा युगान्तवातैराक्षिप्ताम्युद्भूतानि द्रुमाणां गहनानि वनानि येभ्यस्ते पर्यस्ता विपर्यासिता गिरय इव विरेजुः शुशुभिरे ॥

प्रस्थानश्रमजनितां विहाय निद्रामासुक्ते गजपतिना सदानपङ्के ।
शय्यान्ते कुलमलिनां क्षणं विलीनं संरम्भच्युतमिव शृङ्गलं चकाशे१ ॥१

प्रस्थानेति ॥ गजपतिना प्रस्थानश्रमेण गमनक्लेशेन जनितां निद्रां विहायासुक्ते ऽतएव सदानपङ्के गजमदयुक्ते शय्यान्ते शयनीयमदेशे क्षणं विलीनं लग्नमलिनां कुलं संरम्भेणोत्थानसंभ्रमेण च्युतं भ्रष्टं शृङ्गलं निगडमिवेत्युत्प्रेक्षा ॥ "अथ शृङ्गले । अन्दुको निगडोऽस्त्री स्यात्" इत्यमरः ॥ चकाशे शुशुभे ॥

आयस्तः सुरसरिदोघरुद्धवर्त्मा संप्रातुं वनगजदानगन्धि रोधः ।
मूर्धानं निहितशिताङ्कुशं विधुन्वन्यन्तारं न विगणयांचकार नागः॥२२

आयस्त इति ॥ वनगजदानस्य गन्धोऽस्यास्तीति तथोक्तं रोधः । परकूलमित्यर्थः । संप्रातुं गन्तुमायस्त उत्सुकः । प्रयत्नं कुर्वाण इत्यर्थः ॥ "यसु प्रयत्ने" इति धातोः कर्तरि क्तः ॥ किंतु सुरसरिदोघेन गङ्गाप्रवाहेन रुद्धं वर्त्म यस्य सः । नागो गजो निहितो दत्तः शितस्तीक्ष्णोऽङ्कुशो यस्मिन् ॥ "अङ्कुशोऽस्त्री द्वयोः क्रियाम्" इत्यमरः ॥ तं मूर्धानं विधुन्वन् । रोषादिति भावः । यन्तारं न विगणयांचकार न विगणयामास ॥

आरोढुः समवनतस्य पीतशेषे साशङ्कं पयसि समीरिते करेण ।
संमार्जन्नरुणमदस्रुती कपोलौ सस्यन्दे मद इव सीकरः करेणोः॥२३॥

आरोढुरिति ॥ समवनतस्य जलपानार्थमानतपूर्वकायस्य करेणोर्गजस्य ॥ "करेणुरिभ्यां स्त्री नेभे" इत्यमरः ॥ करेण पीतस्य शेषे पयस्यारोढुर्हस्तिपकास्साशङ्कं सभयं समीरिते । क्षिप्ते सतीत्यर्थः । सीकरोऽम्बुकणः । अरुणे मदस्रुती मदधारे पयोस्ती कपोलौ संमार्जन्मधुनन् ॥ "मृजेरजादौ संक्रमे विभाषाद्वर्द्धिरूक्ष्या" इति वृद्धिः ॥ मद इव सस्यन्दे क्षवन्मदसंपृक्तस्य मदसादृश्यान्मदोपमा ॥

आघ्राय क्षणमतितृष्यतापि रोषादुत्तीरं निहितविवृत्तलोचनेन ।
संघृक्तं वनकरिणां मदाम्बुसेकैर्नाचेमे हिममपि वारि वारणेन ॥२४॥

आघ्रायेति ॥ अतितृष्यतात्यतिपिपासतापि क्षणमाघ्राय रोषादुत्तीरं परतीरे ॥ प्रथमार्थेऽव्ययीभावः ॥ निहिते विहिते घूर्णिते लोचने यस्य तेन । अतिगज-

१ विलीनम्. २ अतिरोषात्.

Digitized by Google

दिरदसेवेति भावः । वारणेन हिमं शीतलमपि घनकरिणां मदाम्बुसेकैर्दानवारामिः संपृक्तं वारि नाचेमे न पीतम् ॥ "चमू अदने" इति धातोः कर्मणि क्विप् ॥

प्रध्योतन्मदसुरभीणि निम्नगायाः क्रीडन्तो गजपतयः पयांसि कृत्वा ।
किञ्जल्कव्यवहिततामप्रदानलेखैरुत्तेरुः सरसिजगन्धिभिः कपोलैः॥२५

प्रध्योतदिति ॥ क्रीडन्तो विहरन्तो गजपतयो निम्नगाया गङ्गायाः पयांसि प्रध्योतद्भिः क्षरद्भिर्मदैः सुरभीणि कृत्वा किञ्जल्कैः केसरैर्व्यवहितास्तिरोहितास्ताम्रास्ताम्रवर्णा दानलेखा मदराजयो येषु तैरतएव सरसिजगन्धिभिः कपोलैरुपलक्षिताः सन्त उत्तेरुर्निर्जग्मुः ॥ अत्र मदसरसिजगन्धयोः समयोर्विनिमयोक्त्या समपरिवृत्तिरलंकारः । तेन गजानां निम्नगायाश्च परिमलव्यत्ययानन्तरसंरम्भो व्यज्यते ॥

आकीर्णं बलरजसा घनारुणेन प्रक्षोभैः सपदि तरङ्गितं तटेषु ।
मातङ्गोन्मथितसरोजरेणुपिङ्गं मांज्जिष्ठं वसनमिवाम्बु निर्बभासे॥२६॥

आकीर्णमिति ॥ घनारुणेन सान्द्रलोहितेन ॥ विशेषणसमासः ॥ बलरजसा सेनापरागेणाकीर्णं सपदि प्रक्षोभैराकोडनैस्तटेषु तीरेषु तरङ्गितं संजाततरङ्गम् ॥ तारकादित्वादितच् ॥ यद्वा । तरङ्गवत्कृतम् ॥ मत्वन्तात् "तत्करोति" इति णिचि कर्मणि क्तः । आविष्टवद्भावाम्मतुपो लुक् ॥ तथा मातङ्गैरुन्मथितानां लुलितानां सरोजानां रेणुभिः पिङ्गं पिशङ्गमम्बु माञ्जिष्ठेन महारजनेनारक्तं माञ्जिष्ठं वसनमिव निर्बभासे ॥ "तेन रक्तम्–" इत्यण् ॥ "माञ्जिष्ठम्" इत्यत्र "कौशेयम्" इति वा पाठः । तत्र कौशमब्दाद्दक् ॥ "कौशेयं कृमिकोशोत्थम्" इत्यमरः ॥

श्रीमद्भिर्नियमितकन्धरापरान्तैः संसक्तैरगुरुवनेषु साङ्गहारम् ।
संप्रापे निभृतमदाम्बुभिर्गजेन्द्रैः प्रस्यन्दिप्रचलितगण्डशैलशोभा॥२७॥

श्रीमद्भिरिति ॥ श्रीमद्भिः शोभावद्भिर्नियमिताः कन्धरा अपरान्ताश्चरमपादाग्राणि च येषां तैः ॥ "अपरः पश्चिमः पादः" इति वैजयन्ती ॥ अगुरुवनेषु साङ्गहारं साङ्गविक्षेपं यथा तथा संसक्तैर्निश्चलानि मदाम्बूनि येषां तैर्गजेन्द्रैः प्रस्यन्दिनो जलस्राविणः प्रचलिता ये गण्डशैलास्थूलोपलास्तेषां शोभा संप्रापे भाग्या ॥ कर्मणि क्विप् ॥ "गण्डशैलास्तु च्युताः स्थूलोपला गिरेः" इत्यमरः ॥ अत्राभ्यस्याभ्यशोभाभाग्यसंभवाच्चसदृशी शोभेति प्रतिबिम्बत्वात्तेषामिदमर्थनालंकारः ॥

१ क्रीडन्मम्.

Digitized by Google

निःशेषं प्रशमितरेणु वारणानां स्रोतोभिर्मदजलमुज्झतामजस्रम्।
आमोदं व्यवहितभूरिपुष्पगन्धो भिन्नैलासुरभिमुवाह गन्धवाहः ३८

निःशेषमिति॥ गन्धं वहतीति गन्धवाहो वायुः॥ कर्मण्यण्॥ निःशेषं यथा तथा प्रशमितो रेणुर्येन तन्मदजलं स्रोतोभिर्मदनाडीभिरजस्रमुज्झतां वर्षतां वारणानां संबन्धिनं व्यवहितस्तिरस्कृतो भूरिर्बहुलः पुष्पगन्धो येन सः। भिन्नाः फुल्ला एला लताविशेषाः॥ "पृथ्वीका चन्द्रबालैला" इत्यमरः॥ तत्पुष्पाणि चैलाः॥ "पुष्पे जातीमधूतयः स्वलिङ्गा व्रीहयः फले" इत्यमरः॥ भिन्नैलावत्सुरभिं सुगन्धिं घ्राणेन्द्रियतर्पणमित्युपमा। आमोदं परिमलमुवाह वहति स्म॥

सादृश्यं दधति गभीरमेघघोषैरुन्निद्रक्षुभितमृगाधिपश्रुतानि।
आतेनुश्चकितचकोरनीलकण्ठान्कच्छान्तानमरमहेभबृंहितानि॥३९॥

सादृश्यमिति॥ गभीरैर्मेघघोषैः सान्द्रगर्जितैः सादृश्यं दधतीत्युपमा॥ दधातेः शतृमत्ययः। "वा नपुंसकस्य" इति विकल्पाच्छुमभावः॥ उन्निद्रा बृंहितश्रवणादेव मनुद्राः क्षुभिताः संरब्धाश्च ये मृगाधिपास्तैः श्रुतान्याकर्णितानि। न तु मनुद्रानीति भावः। अमरमहेभबृंहितानि। महान्तश्चासौ इभो गजाधेति महेभाः। अमराणां महेभास्तेषां बृंहितानि गर्जितानि कच्छान्तानतूपमदेशान्॥ "जलप्रायमनूपं स्यात्पुंसि कच्छलथाविधः" इत्यमरः॥ चकिता गर्जितसदृक्षा संभ्रान्ताश्चकोराः पक्षिविशेषा नीलकण्ठा मयूराश्च येषु तांस्तथाभूतानातेनुः॥ भ्रान्तिमदलंकारः॥

शाखावसक्तकमनीयपरिच्छदानामध्वश्रमातुरवधूजनसेवितानाम्।
जज्ञे निवेशनविभागपरिष्कृतानां लक्ष्मीः पुरोपवनजा वनपादपानाम्॥ ४०॥

शाखेति॥ परिच्छाद्यतेऽनेनेति परिच्छदः परिकरो वसनाभरणादिः॥ "पुंसि संज्ञायां घः प्रायेण" इति घप्रत्ययः। "छादेर्घेऽद्व्युपसर्गस्य" इति ह्रस्वत्वम्॥ शाखास्ववसक्ताः कमनीयाः परिच्छदा येषां तेषामध्वनि श्रमस्तेनातुरैः पीडितैर्वधूजनैः सेवितानां निवेशनविभागैरावसतिकावच्छेदैः परिष्कृतानामलंकृतानाम्॥ "संपर्युपेभ्यः—" इत्यादिना सुट्॥ वनपादपानामरण्यद्रुमाणां पुरे यदुपवनं कृत्रिमवनं तत्र जाता पुरोपवनजा लक्ष्मीः शोभा जज्ञे जाता॥ अन्योन्यलक्ष्मीसंबन्धासंभवात्सदृक्षीति सादृश्यापेक्षोपादसंभवे तद्वस्तुसंबन्धेयं निदर्शना॥ वसन्ततिलकावृत्तम्—"उक्ता वसन्ततिलका तभजा जगौ गः" इति लक्षणात्॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथसमाख्यया व्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये सुराङ्गनागमनो नाम सप्तमः सर्गः।

१ वन्यम्।

Digitized by Google

अष्टमः सर्गः ।

अथ स्वमायाकृतमन्दिरोज्ज्वलं ज्वलन्मणि व्योमसदां सनातनम् ।
सुराङ्गना गोपतिचापगोपुरं पुरं वनानां विजिहीर्षया जहुः ॥ १ ॥

अथेति ॥ अथ निवेशनानन्तरं सुराङ्गना अप्सरसः स्वमायया स्वेच्छाविशेषेण कृतैर्निर्मितैर्मन्दिरैरुज्ज्वलं दीप्तं ज्वलन्तो मणयो यस्मिंस्तद्व्योमसदां गन्धर्वाणां सनातनं सदातनम् ॥ "सार्वचिरम्-" इत्यादिना भावार्थे ट्युप्रत्ययः ॥ गोपतिरिन्द्रस्तच्चापवर्णानि गोपुराणि यस्य तत्तथोक्तमित्युपमा । पुरं नगरं वनानां विजिहीर्षया वनानि विहर्तुमिच्छया ॥ कर्मणि षष्ठी ॥ जहुस्तत्यजुः ॥ जहातेर्लिट् ॥ अत्र ज्वलंज्वलदिति पुरंपुरमिति चासकृद्वृत्त्यनुप्रासाद्वृत्त्या छेकानुप्रासः । अन्यत्र तद्वैपरीत्या वृत्त्यनुप्रास इति तयोरुपमायाश्च संसृष्टिः ॥ अस्मिन्सर्गे वंशस्थं वृत्तम्—"जतौ तु वंशस्थमुदीरितं जरौ" इति लक्षणात् ॥

यथायथं ताः सहिता नभश्चरैः प्रभाभिरुद्भासितशैलवीरुधः ।
वनं विशन्त्यो वनजायतेक्षणाः क्षणद्युतीनां दधुरेकरूपताम् ॥ २ ॥

यथायथमिति ॥ यथायथं यथास्वम् । स्वकीयमनतिक्रम्येत्यर्थः ॥ "यथास्वं तु यथायथम्" इत्यमरः ॥ नपुंसकत्वाद्भस्वत्वम् ॥ नभश्चरैर्गन्धर्वैर्मयैश्च सहिताः प्रभाभिः स्वदीप्तिभिरुद्भासिताः शैलवीरुधो याभिस्ताः पूर्वोक्ता वनजायतेक्षणाः पद्मलोचनाः स्त्रियो वनं विशन्त्यः क्षणं द्युतिर्यासां तासां क्षणद्युतीनां विद्युतामेकरूपतां समानरूपतां दधुः । मुहुर्मुहुरन्तराले तासां स्फुरणस्य क्षणिकत्वादिति भावः ॥ श्लेषानुप्राणितेयमुपमा । श्लेषत्वमिति केचित् । उभयथाप्यनुप्रासेन संसर्गः ॥

निवृत्तवृत्तोरुपयोधरक्रमः प्रवृत्तनिर्ह्रादिविभूषणारवः ।
नितम्बिनीनां भृशमादधे धृतिं नभःप्रयाणादवनौ परिक्रमः ॥३॥

निवृत्तेति ॥ निवृत्तो गतो वृत्तस्य वर्तुलस्योरुपयोधरस्य क्रमो यस्मिन्त्पादप्रक्षेपेषु । विभ्रान्तिसंभवादिति भावः । किंच । प्रवृत्तो जातो निर्ह्रादिविभूषणानां नूपुरादीनामारवो यस्मिन्सः । अवनौ पृथिव्यां परिक्रमः संचारो नितम्बिनीनां नभःप्रयाणाद्भृशमधिकम् ॥ "पञ्चमी विभक्ते" इति पञ्चमी ॥ धृतिं संतोषमादधे ॥ अत्र विभिन्नपरिक्रमस्य धृत्या दानहेतुत्वात्काव्यलिङ्गमलंकारः ॥

घनानि कामं कुसुमानि बिभ्रतः करप्रचेयान्यपहाय शाखिनः ।
पुरोऽभिसस्रे सुरसुन्दरीजनैर्यथोत्सवेच्छा हि गुणेषु कामिनः ॥ ४ ॥

१ त्यक्त्वा.

Digitized by Google

घनानीति ॥ घनानि सान्द्राणि । न तु विरलानि । करभोपमानि इस्तग्राह्याण्युचितानि ॥ "कृत्यैरधिकार्थवचने" इति तृतीयासमासः ॥ कामं कुसुमानि बिभ्रतो नवकुसुमिताभ्यां स्तनाभ्यामुपहाय सुरसुन्दरीजनैः पुरोऽग्रेऽभिसृतेऽभिगतम् ॥ भावे क्तिच् ॥ तथा हि । कामिनो गुणेष्वतिशयेषु विषय उत्तरमुत्तरम् ॥ वीप्सार्थेऽव्ययीभावः ॥ यथोत्तरमिच्छा येषां ते यथोत्तरेच्छा उत्तरोत्तराभिलाषुका हि ॥ अत्र परिकरोत्थापितोऽर्थान्तरन्यासोऽलंकारः ॥

तनूरलक्तारुणपाणिपल्लवाः स्फुरन्नखांशूत्करमञ्जरीभृतः ।
विलासिनीबाहुलता वनालयो विलेपनामोदहृताः सिषेविरे ॥ ५ ॥

तनूरिति ॥ विलेपनामोदैर्हृता आकृष्टा वनालयो वनभूम्नास्तनूः कृशा अलक्तैररुणाः पाणय एव पल्लवा यासां ताः स्फुरन्तो नखांशूनामुत्कराः पुञ्जा एव मञ्जर्यस्ता बिभ्रतीति तथोक्ताः ॥ क्विप् ॥ विलासिनीनां बाहव एव लतास्ताः सिषेविरे ॥ अत्र समस्तवस्तुविषयरूपकालंकारः । बाहवयवानां लतावयवानां पल्लवादीनामपि निरूपणादिति ॥

निपीयमानस्तबका शिलीमुखैरशोकयष्टिश्चलबालपल्लवा ।
विडम्बयन्ती दहशे वधूजनैरमन्ददष्टौष्ठकरावधूननम् ॥ ६ ॥

निपीयमानेति ॥ शिलीमुखैरलिभिः ॥ "अलिवाणौ शिलीमुखौ" इत्यमरः ॥ निपीयमानः स्तवको गुच्छो यस्याः सा चला बालपल्लवा यस्याः सा । अतएवामन्दं दष्टं ओष्ठो यस्मिंस्तत्करावधूननं करकम्पनं तद्विडम्बयन्ती । स्तवकपानेनौष्ठदंशनं पल्लवचलनेन करावधूननं चानुकुर्वतीत्यर्थः ॥ धूनो ण्यन्तानुट् । णिचि धूष्मीञ्नोर्नुम्वक्तव्यः ॥ अशोकयष्टिः । अशोकशाखेत्यर्थः । वधूजनैर्ददृशे दृष्टा ॥ अत्र विडम्बयन्तीति प्रस्तुताशोकशाखाविभूषणभूतोपमामद्दिश्याप्रस्तुतनायिकाभ्रमातीतेः समासोक्तिः । उचितप्रस्तुतत्वेनोपमयाङ्गाङ्गिभावेन संकीर्यते ॥

अथ कश्चिन्मधुकराक्रान्तां कांचिदाह—

करौ धुनाना नवपल्लवाकृती वृथा कृथा मानिनि मा परिश्रमम् ।
उपेयुषी कल्पलताभिशङ्कया कथं न्वितस्त्रस्यति षट्पदावलिः ॥ ७ ॥

करावितिं ॥ मानपरिहारेण मधुपाश्रयणे तु न कश्चिद्दोष इत्याशयेन संबोधयति—हे मानिनीति । नवपल्लवसदृशाकृतिरिवाकृतिर्ययोरित्युपमा । तौ करौ धुनाना ॥ धूनः कर्तरि लटः शानच् ॥ वृथा व्यर्थं परिश्रमं मा कृथा मा कुरुष्व ॥ करोतेराशीर्लिङि माङि लुङ् ॥ वृथात्वे हेतुमाह—कल्पलताभिशङ्कया कल्पवल्लीभ्रमेणेति भ्रान्तिमदलंकारः । उपेयुष्युपगता षट्पदावलिः कथं न्वितस्त्रस्यति

Digitized by Google

विभेति । न त्रस्यत्येवेत्यर्थः ॥ "वा भाषा-" इत्यादिना विकल्पेन श्यन्नस्त्यर्थः ॥ अत्र कान्तापरिभवमयार्थ्यरूपकार्थस्य पद्मदावलेः कल्पवल्लीभ्रमनिबन्धनविन्यासरूपकारणसमर्थनात्कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासो भ्रान्तिमताङ्गङ्गिभावेन संकीर्णः समुपमया संसृज्यते ॥

अथ काचित्सखी कांचित्सखयऽपितामाह—

जहीहि कोपं दयितोऽनुगम्यतां पुरोऽनुशेते तव चञ्चलं मनः ।
इति प्रियं कांचिदुपैतुमिच्छतीं पुरानुनिन्ये निपुणः सखीजनः॥८॥

जहीहीति ॥ प्रियमुपैतुं स्वयमेवानुसर्तुमिच्छतीम् ॥ "आच्छीनद्योर्नुम्" इति विकल्पान्नुमभावः ॥ कांचिन्नायिकां निपुणमिचक्षः सखीजनः । कोपं जहीहि त्यज॥ "आ च हौ" इति विकल्पादीकारादेशः ॥ दयितोऽनुगम्यतामनुसियताम् ॥ उभयथापि भार्यनायां लोट् ॥ अन्यथा चञ्चलमस्थिरं तव मनः पुरोऽनुशेतेऽग्रेऽनुसयिष्यते । अनुतप्स्यत इत्यर्थः ॥ "यावत्पुरानिपातयोर्लट्" इति लट् ॥ इत्यनेन प्रकारेण पुरा पूर्वमेवानुनिन्ये प्रसादयामास ॥

अथ चतुर्भिः श्लोकैः कलापकमाह—

समुन्नतैः काशदुकूलशालिभिः परिक्रणत्सारसपङ्क्तिमेखलैः ।
प्रतीरदेशैः स्वकलत्रचारुभिर्विभूषिताः कुञ्जसमुद्रयोषितः ॥ ९ ॥

समुन्नतैरिति ॥ समुन्नतैः काशान्येव शालङ्कुमानि तानि दुकूलानीव तैः शालन्त इति तथोक्तैः सारसपङ्क्तयो मेखला इव ताः परिक्रणन्त्यो येषु ते तैः स्वेषां कलत्राणि श्रोण्यस्तद्वच्चारवस्तैः ॥ "कलत्रं श्रोणिभार्ययोः" इत्यमरः ॥ प्रतीरदेशैर्विभूषितास्तटमर्दक्षैर्भूषिताः कुञ्जसमुद्रयोषितः । वनन्यइत्यर्थः ॥ अत्र तीरादीनां कलत्रादीपम्योपमेयत्वायोपच्छन्दसामर्थ्याच्च नदीनां योषिदौपम्यं गम्यते ॥

विदूरपातेन भिदामुपेयुषश्च्युताः प्रवाहादभितः प्रसारिणः ।
प्रियाङ्गशीताः शुचिमौक्तिकस्विषो वनप्रहासा इव वारिबिन्दवः १०

विदूरेति ॥ विदूरपातेन भिदां भेदम् ॥ "भिद्रिदादिभ्योऽङ्" ॥ उपेयुष उपगतात्मवाहाच्युता अतएवाभितः प्रसारिणः प्रसर्पन्त इति प्रियाया अङ्ग उत्सङ्ग इव शीताः शीतलाः शुचीनां मौक्तिकानां स्विच इव स्विषो येषां ते । किंच वनस्य प्रहासा इव स्विता इत्युत्प्रेक्षा । वारिबिन्दवश्च॥अत्रोपमयोरुभयोरुत्प्रेक्षायाश्च संसृष्टिः॥

संसीजनं प्रेम गुरूकृतादरं निरीक्षमाणा इव नम्रमूर्तयः ।
स्थिरद्विरेफाञ्जनशारितोदरैर्विसारिभिः पुष्पविलोचनैर्लताः॥११॥

१ काञ्चनमम् २ विकासिभिः.

Digitized by Google

सखीति ॥ द्वौ रेफौ वर्णविशेषौ येषां ते द्विरेफाः । भ्रमरशब्देन तदर्थो लक्ष्यते ॥ "द्वयक्षरं मासमिति विदधाति" इति भाष्यकारः ॥ स्थिरा निश्चला द्विरेफा एवाञ्जनानि तैः शारितानि शबलीकृतान्युदराणि येषां तैः ॥ "शारः शबलवातयोः" इति विश्वः ॥ विसारिभिर्विस्तृतैः पुष्पाण्येव विलोचनानि तैः प्रेम्णा गुरुकृत आदरो यस्मिन्कर्मणि तत्तथा सखीजनं निरीक्षमाणाः पश्यन्त्य इव स्थिताः । कुतः । नम्रमूर्तयोऽवनताङ्ग्यो लताश्च ॥ अत्र रूपकोत्प्रेक्षयोः संकरः ॥

उपेयुषीणां बृहतीरधित्यका मनांसि जह्रुः सुरराजयोषिताम् ।
कपोलकाषैः करिणां मदारुणैरुपाहितश्यामरुचश्च चन्दनाः ॥१२॥

उपेयुषीणामिति ॥ मदेनारुणैरव्यक्तरागैः ॥ "अव्यक्तरागस्त्वरुणः" इत्यमरः ॥ करिणां कपोलानां काषैः कषणैरुपाहितश्यामरुचो जनितकृष्णवर्णा इति तद्भूषणालंकारः । चन्दना मलयजाः ॥ "गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्" इत्यमरः ॥ बृहतीरधित्यका ऊर्ध्वभूमीरुपेयुषीणां सुरराजयोषितां मनांसि जह्रुः ॥ अत्र चतुःश्लोक्या नद्यादीनां विशिष्टानामेवाप्सरोमनोहरणहेतुत्वोक्त्या काव्यलिङ्गमुन्मेषम् ॥

स्वगोचरे सत्यपि चित्तहारिणा विलोभ्यमानाः प्रसवेन शाखिनाम् ।
नभश्चराणामुपकर्तुमिच्छतां प्रियाणि चक्रुः प्रणयेन योषितः॥१३॥

स्वगोचर इति ॥ चित्तहारिणा मनोहरेण शाखिनां प्रसवेन पुष्पजातेन विलोभ्यमाना आकृष्यमाणा योषितः स्वगोचरे स्वविषये । स्वकरग्रहे सत्यपीत्यर्थः । प्रसव इति शेषः । उपकर्तुं परिचरितुमिच्छतां नभश्चराणां गन्धर्वाणां प्रणयेन सहायदेतुना प्रियाणि चक्रुः । स्वकरग्राह्यमपि प्रसवं स्वकान्तप्रियार्थं तरीयमानमेवाग्रहीदित्यर्थः ॥

प्रयच्छतोच्चैः कुसुमानि मानिनी विपक्षगोत्रं दयितेन लम्भिता ।
न किंचिदूचे चरणेन केवलं लिलेख बाष्पाकुललोचना भुवम्॥१४

प्रयच्छतेति ॥ कुसुमानि प्रयच्छता ददता दयितेनोच्चैरुच्चैस्तरां विपक्षगोत्रं सपत्नीनामधेयं लम्भिता प्रापिता । तत्प्राप्ताहेत्यर्थः ॥ "नाम गोत्रं कुलं गोत्रम्" इति शाश्वतः ॥ मानिन्यतएव न किंचिदूचे ॥ कर्तरि लिट् ॥ किंतु केवलं बाष्पाकुललोचना सती चरणेन भुवं लिलेख । गोत्रस्खलनजनितेप्यनिमित्तनिर्वेदादिति भावः । मानिन्यतएव न किंचिदूच इत्युक्तम् । तदुक्तं दशरूपके—"तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्यादमामना । तत्र चिन्ताश्रुनिश्वासवैवर्ण्योच्छ्वासदीनता" इति ॥

Digitized by Google

प्रियेऽपरा यच्छति वाचमुन्मुखी निबद्धदृष्टिः शिथिलाकुलोच्चया ।
समादधे नांशुकमाहितं वृथा विवेद पुष्पेषु न पाणिपल्लवम् ॥१५॥

प्रिय इति ॥ वाचं यच्छति ददति । समाकूपतीत्यर्थः ॥ दानः शब्दसमः । "पाघ्रा–" इत्यादिना यच्छादेशः ॥ प्रिये निबद्धदृष्टिरतएवोन्मुखी शिथिलः श्लथ आकुलश्चलितश्च तादृश उच्चयो नीवीबन्धो यस्याः सा ॥ "नारीकटयंशुकग्रन्थौ नीविः स्यादुच्चयोऽस्त्रियाम्" इति मार्तण्डः ॥ अपराम्या रूपंशुकं न समादधे न बबन्ध । रागपारवश्यादिति भावः । पुष्पेषु वृथा व्यर्थमाहितमारोपितम् । अस्थाने प्रसारितमित्यर्थः । पाणिपल्लवं च न विवेद । प्रियासक्तचित्तत्वादिति भावः ॥ एषा च प्रगल्भा नायिका ॥ "पाणिपल्लवम्" इत्यत्रान्यतरसाधकबाधकप्रमाणाभावादुपमारूपकयोः संदेहसंकरः ॥

सलीलमासक्तलतान्तभूषणं समासजन्त्या कुसुमावतंसकम् ।
स्तनोपपीडं नुनुदे नितम्बिना घनेन कश्चिज्जघनेन कान्तया॥१६॥

सलीलमिति ॥ आसक्ता लतान्ताः पल्लवा भूषणं यस्य तत् । पल्लवैः सह ग्रथितमित्यर्थः । कुसुमावतंसकं पुष्पशेखरम् । कान्तदत्तमिति भावः । सलीलं समासजन्त्या शिरसि प्रतिदधत्या ॥ "दंशसञ्जस्वञां शपि" इति नलोपः ॥ कान्तया कश्चित्स्तनाभ्यामुपपीड्यते स्तनोपपीडम् ॥ "सप्तम्याः च–" इत्यादिना जघनस्य जघः ॥ नितम्बिना ॥ मध्यंसायामिनिः ॥ घनेन निविडेन जघनेन ॥ "पश्चात्तिम्बः स्त्रीकट्याः स्त्रीवे तु जघनं पुरः" इत्यमरः ॥ नुनुदे नुन्नः । अंशुकातिरेकादिति भावः ॥ एषा च प्रगल्भैव ॥

अथ युग्मेनाह—

कलत्रभारेण विलोलनीविना गलद्दुकूलस्तनशालिनोरसा ।
वलिव्यपायस्फुटरोमराजिना निरायतत्वादुदरेण ताम्यता ॥ १७ ॥

कलत्रेति ॥ विलोलनीविना गात्रोद्वमनादिश्लिष्टवस्त्रग्रन्थिना कलत्रभारेण श्रोणिभारेण ॥ "कलत्रं श्रोणिभार्ययोः" इत्यमरः ॥ तथा गलत्स्रंसमानं दुकूलं वास्त्रं स्तनाभ्यां शालत इति तथोक्तेनोरसा तथा वलिव्यपायेन भङ्गिभिन्नत्वा स्फुटा रोमराजिर्यस्मिंस्तेन निरायतत्वादप्रसारितत्वाच्चाम्यता तद्भवतोदरेण चोपलक्षितया ॥ स्वभावोक्तिरलंकारः ॥

विलम्बमानाकुलकेशपाशया कयाचिदाविष्कृतबाहुमूलया ।
तरुप्रसूनान्यपदिश्य सादरं मनोभिनाथस्य मनः समाददे ॥ १८ ॥

१ पत्रान्त.

Digitized by Google

विलम्बमानेति ॥ विलम्बमानो विस्रंसमान आकुलो विप्लुलितश्च केशपाशो यस्यास्तया विच्छुतबाहुमूलया दर्शितकक्षमदेशया कयाचित्कान्तया तरुप्रसूनान्यपदिश्य । प्रसूनग्रहणं व्याजीकृत्येत्यर्थः ॥ "व्याजोऽपदेशो लक्ष्यं च" इत्यमरः ॥ सादरं साभिलाषं मनोभिनाथस्य मियस्य मनः समादद आचकृषे ॥ कर्मणि लिट् ॥ सर्वाङ्गसौभगदर्शनात्स्वयोग्यं प्रियमनल्पमेति भावः ॥ अत्र प्रियमनोहरणहेतुभिः कान्ताविशेषणपदार्थैः काव्यलिङ्गमुपस्थितमपि स्वभावोक्त्या सहाङ्गाङ्गिभावेन संकीर्यते ॥

व्यपोहितुं लोचनतो मुखानिलैरपारयन्तं किल पुष्पजं रजः ।
पयोधरेणोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तनी ॥ १९ ॥

व्यपोहितुमिति ॥ उन्नतौ च पीवरौ च स्तनौ यस्याः सोन्नतपीवरस्तनी ॥ "स्वाङ्गाच्च-" इत्यादिना ङीप् ॥ काचिल्लोचनतः स्तनेभ्यश्च पुष्पजं रजः परागं मुखानिलैः फूत्कारमारुतैर्व्यपोहितुमपनेतुमपारयन्तं किलाशक्नुवन्तं किलेत्यलीके । वस्तुतस्तदादास्यस्पर्शलोभादपारयन्तमित्यर्थः । प्रियमुन्मना उत्सुका सत्यतएव पयोधरेणोरसि जघान । तत्कपटपरिज्ञानजन्यादौत्सुक्यादिति भावः । इमनस्थानत्वादुरसीति सप्तमी । इयं च प्रगल्भैव ॥

इमान्यसूनीत्यपवर्जिते शनैर्यथाभिरामं कुसुमाग्रपल्लवे ।
विहाय निःसारतयेव भूरुहान्पदं वनश्रीर्वनितासु संदधे ॥ २० ॥

इमानीति ॥ यथाभिरामम् ॥ वीप्सायामव्ययीभावः ॥ कुसुमान्यग्रपल्लवानि च कुसुमाग्रपल्लवं तस्मिन् ॥ जातिरप्राणिनामित्येकवद्भावात्पुंसकत्वम् ॥ इमान्यसूनीतीत्थम् । निर्देशपूर्वकमित्यर्थः ॥ इदमदसी संनिकृष्टविप्रकृष्टार्थे ॥ शनैरपवर्जितेऽप्यचिते सति वनश्रीर्निःसारतयेवेति हेतूत्प्रेक्षा । भूरुहांस्तत्रैवाविहाय वनितासु पदं संदधे ॥ अत्र वनितागतायाः पुष्पप्रसाधनसंभाव्यमानाया लक्ष्म्या विषयभूताया निगरणेन विषयेण वनश्रियो वनितागतस्योत्प्रेक्षया संबन्धेऽसंबन्धरूपा भेदेऽभेदरूपा सातिशयोक्तिरलंकारः— "विषयस्यानुपादानाद्विषय्यध्यवसाय्यते । यत्र सातिशयोक्तिः स्यात्कविमौढोक्तिजीविता" इति लक्षणात् ॥

प्रवालभङ्गारुणपाणिपल्लवः परागपाण्डूकृतपीवरस्तनः ।
महीरुहः पुष्पसुगन्धिरादद वपुर्गुणोच्छ्रायमिवाङ्गनाजनः ॥ २१ ॥

प्रवालेति ॥ प्रवालभङ्गेन पल्लवलवेनारुणः पाणिपल्लवो यस्य तत् । रसरक्तनादित्यर्थः । परागेण पुष्परजसा पाण्डूकृतौ पीवरौ स्तनौ यस्य सः पुष्पैः सुगन्धिः सुरभिरङ्गनाजनो महीरुहो दक्षजातादपुर्गुणस्य स्वदेहगतस्योच्छ्रायः पाणिपल्लवा-

Digitized by Google

दन्यादेर्य उत्कर्षस्तमाददे लब्धवानित्युत्प्रेक्षा । वस्तुतस्तु स्वाभाविक एव प्रभाक्रमङ्गादिभिरभिव्यज्यत इति भावः ॥ "उत्कृष्टः आय उच्छ्राये" इति घञन्तेन आदिसमासः । न तूपसृष्टाद्धञन्तस्यः । "श्रीणीह्रयोऽनुपसर्गे" इति प्रतिषेधात् ॥

पञ्चभिः कुलकमाह—

वरोरुभिर्वारणहस्तपीवरैश्चिराय खिन्नान्नवपल्लवश्रियः ।
समेऽपि यातुं चरणाननीश्वरान्मदादिव प्रस्खलतः पदे पदे ॥२२॥

वरोरुभिरिति ॥ अनुसानु साक्षुषु पङ्क्तिर्मे ततः सकाशाद्गुरुणा खेदेन मन्थरमकसं विनिर्यतीनां निर्गच्छन्तीनां सुराङ्गनानां संबन्धिभिर्वारणहस्तपीवरैः करिकरस्थूलैः । वराश्च ते उरवश्चेति तैः । चिराय खिन्नान् । किं च नवपल्लवानां श्रीरिव श्रीर्येषां तान् । तद्वन्मृदुनिरवयैः । अतएव समे समस्थलेऽपि । किं पुनर्विषम इति भावः । यातुं गन्तुमनीश्वरानशक्तानतएव मदादिव पदे पदे ॥ दीप्तायां द्विर्भावः ॥ प्रस्खलतश्चरणान् ॥ मदादिवेत्युपमा ॥

विसारिकाश्रीमणिरश्मिलब्धया मनोहरोच्छ्रायनितम्बशोभया ।
स्थितानि जित्वा नवसैकतद्युतिं श्रमातिरिक्तैर्जघनानि गौरवैः॥२३

विसारीति ॥ विसारिभिः काञ्चीमणिरश्मिभिर्लब्धया । तज्जनितयेत्यर्थः । मनोहर उच्छ्राय उत्सेधो येषां तेषां नितम्बानां शोभया ॥ करणेन ॥ नवसैकतानां द्युतिं शोभां जित्वा स्थितानि । तत्तुल्यानीत्यर्थः ॥ अतएवोपमालंकारः ॥ श्रमेणातिरिक्तैरतिशयितैर्गौरवैर्गुरुत्वैरेवकारेणोत्कर्षव्यवच्छेदः । नितरां भारोपमस्थितानि । तत्तुल्यानीत्यर्थः । जघनानि च ॥ उच्छ्रायो व्याख्यातः ॥

समुच्छ्वसत्पङ्कजकोशकोमलैरुपाहितश्रोण्युपनीवि नाभिभिः ।
दधन्ति मध्येऽङ्गवलीविभङ्गिषु स्तनातिभाराद्उदराणि नम्रताम्॥२४

समुच्छ्वसदिति ॥ समुच्छ्वसत्पङ्कजकोशकोमलैरुल्लसत्कमलमुकुलैरिव । मुग्धैरित्युपमा । नाभिभिः प्रतारिकाख्यैः ॥ "अव नाभिसंज्ञं वराङ्गं यस्य संज्ञा प्रतारिका" इति केचित् ॥ पुंल्लिङ्गतायां तु कविरेव प्रमाणम् । उपनीवि नीवीसमीपे । उपाहितश्रोणि जघनस्थलं तथा वल्लीविभङ्गिषूर्मिमत्सु मध्येषु जघनस्थलेषु स्तनातिभाराद्गुरुत्वं दधन्ति बिभ्राणानि ॥ "वा नपुंसकस्य" इति विकल्पे हुप्रागमः ॥ उदराणि च ॥

समानकान्तीनि सुपारभूषणैः सरोरुहैरस्फुटपत्रपङ्क्तिभिः ।
चितानि घर्माम्बुकणैः समन्ततो मुखान्यनुत्फुल्लविलोचनानि च२५

Digitized by Google

समानेति ॥ किंच । घर्माम्बुकणैः स्वेदोदकबिन्दुभिः समन्ततश्चितानि व्याप्तान्यतएव स्फुटविलोचनान्यविकसदक्षीण्यतएव तुषारधूपर्णैः शीकरपरिहतैः ॥ "तुषारो हिमशीकरौ" इत्यमरः ॥ अस्फुटपद्मपङ्क्तिभिरविकचदलावलिभिः ॥ "व्याकोशविकचस्फुटाः" इत्यमरः ॥ सरोरुहैः समानकान्तीनीत्युपमा । मुखानि च ॥

विनिर्यतीनां गुरुखेदमन्थरं सुराङ्गनानामनुसानुवर्त्मनः ।
सविस्मयं रूपयतो नभश्चरान्विवेश तत्पूर्वमिवेक्षणादरः ॥ २६ ॥

विनिर्यतीनामिति ॥ सविस्मयं रूपयतः पूर्वोक्तचरणादीनि वर्णयतो नभश्चरान्व्यर्थीस्तत्पूर्वमिव तदेव प्रथमं यथेत्युत्प्रेक्षा । ईक्षणादर आलोकनकौतुकं विवेश ॥ पूर्वार्धं व्याख्यातम् ॥ अत्र कुलके स्वभावोक्तिरुत्प्रेक्षाङ्गम् ॥

संप्रति सलिलक्रीडावर्णनमारभते—

अथ स्फुरन्मीनविधूतपङ्कजा विपङ्कतीरस्खलितोर्मिसंहतिः ।
पयोऽवगाढुं कलहंसनादिनी समाजुहावेव वधूः सुरापगा ॥ २७ ॥

अथेति ॥ अथ पुष्पावचयानन्तरं स्फुरद्भिश्चलद्भिर्मीनैर्विधूतपङ्कजेति सहोक्त्यलङ्कारेणोक्तिः । विपङ्कं पङ्करहितम् । विहारयोग्यमिति यावत् । तत्र तीरे स्खलिता विचलितोर्मिसंहतिर्यस्याः सेति हस्तसंज्ञोक्तिः । कलहंसनादिनी कादम्बक्ष्वडतीति वाग्व्यापारोक्तिः । अतएव सुरापगा गङ्गा वधूरप्सरसः पयोऽवगाढुमवगाहितुम् ॥ गाहेरुदितत्वादिट्किल्पः ॥ समाजुहावेवाकारयामासेवेत्युत्प्रेक्षा ॥ "हूतिराकारणाह्वानम्" इत्यमरः ॥ हूयतेस्क्तिन् । "अभ्यस्तस्य च" इति संप्रसारणम् ॥

प्रशान्तघर्माभिभवः शनैर्विवान्विलासिनीभ्यः परिसृष्टपङ्कजः ।
ददौ भुजालम्बमिवाप्तशीकरस्तरङ्गमालान्तरगोचरोऽनिलः ॥ २८ ॥

प्रशान्तेति ॥ प्रशान्तघर्माभिभवः प्रशान्तोष्णबाधः ॥ "वा दान्तशान्त–" इत्यादिना निपातनात्साधुः ॥ शनैर्विवान्मन्दं वहन् ॥ वातेः शतृप्रत्ययः ॥ परिसृष्टपङ्कजः । पद्मगन्धीत्यर्थः । आप्तशीकरः । कृतः । तरङ्गमालानामन्तरे मध्ये गोचरः स्थानं यस्य सोऽनिलो विलासिनीभ्यो भुजालम्बं ददाविवेत्युत्प्रेक्षा । विभिन्नवायुसंपर्कात्पयोऽम्भसुरित्यर्थः ॥

गतैः सहावैः कलहंसविक्रमं कलभ्रभारैः पुलिनं श्रितम्बिभिः ।
मुखैः सरोजानि च दीर्घलोचनैः सुरस्त्रियः साम्यमुगाम्निरासिरे[2] २९

१ परिखेद. २ विभ्रमम्.

Digitized by Google

नतैरिति ॥ सुरस्त्रियोऽप्सरसः सदावैः सविलासैर्गतैर्गतिभिः ॥ नपुंसके भावे क्तः ॥ कलहंसानां विक्रमं गतिम् । विलासविधुरमिति शेषः । तथा नितम्बिभिः श्रवणनितम्बैः कठिनभारैर्जघनभारैः पुलिनम् । नितम्बभारशून्यमित्यर्थः । तथा दीर्घलोचनैर्मृगैः सरोजानि च । अलोचनानीति शेषः । साम्यगुणात्समानगुणत्वाभिरासिरे निरस्तवत्यः । गुणवद्गुणयोः कुतः साम्यमिति भावः ॥ अस्यतेः कर्तरि क्विप् ॥ "उपसर्गादसत्यूह्योर्वा" इति विकल्पादात्मनेपदम् ॥

विभिन्नपर्यन्तगमीनपक्ष्मयः पुरो[1] विगाढाः सखिभिर्मरुत्वतः ।
कथंचिदापः सुरसुन्दरीजनैः सभीतिभिस्तत्प्रथमं प्रपेदिरे ॥ ३० ॥

विभिन्नेति ॥ विभिन्ना विच्युतसंघाताः पर्यन्तगाः प्रान्तगता मीनानां पक्ष्मयो यासां ताः । कुतः । मरुत्वतः सखिभिरिन्द्रस्य सचिवैर्गन्धर्वैः पुरः पूर्वं विगाढाः प्रविष्टाः । तासां विश्वासार्थं गर्तत्राणादिपरीक्षार्थं चेति भावः । सभीतिभिरप्रविष्टविषयत्वात्तासभयैः ॥ "विषादिभिः" इति पाठेऽप्ययमेवार्थो लभ्यः ॥ सुरसुन्दरीजनैस्तदेवावगाहनं प्रथमं यथा तथातत्व कथंचिद्भयात्कृच्छ्रेणापः प्रपेदिरे जगाहिरे ॥

विगाढमात्रे रमणीभिरम्भसि प्रयत्नसंवाहितपीवरोरुभिः ।
विभिद्यमाना विससार सारसानुदस्य तीरेषु तरङ्गसंहतिः ॥३१॥

विगाढेति ॥ प्रयत्नेन संवाहिताः संचारिताः पीवराः स्थूला ऊरवो याभिस्तासु रमणीभिरम्भसि विगाढमात्रे प्रविष्ट एव सति ॥ सुप्सुपेति समासः ॥ "मात्रं कात्स्न्र्येऽवधारणे" इत्यमरः ॥ विभिद्यमाना स्वयं विशीर्यमाणा ॥ कर्मकर्तरि शानच् ॥ तरङ्गसंहतिस्तीरेषु सारसान्यस्यन्विशेषान् ॥ "सारसो मैथुनी कामी गोनर्दः पुष्करादरः" इति यादवः ॥ यद्वा। सारसान्हंसान् ॥ "चक्राङ्गः सारसो हंसः" इति शब्दार्णवे ॥ उदस्योत्सार्य विससार विततार ॥

शिलाघनैर्नाकसदामुरःस्थलैर्बृहन्निवेशैश्च वधूपयोधरैः ।
तटाभिनीतेन[2] विभिन्नवीचिना रुषेव भेजे कलुषत्वमम्भसा ॥३२॥

शिलेति ॥ शिलावद्घनैः कठिनैर्नाकसदां गन्धर्वाणामुरःस्थलैर्बृहन्निवेशैर्महासंस्थानैः । अतिस्थूलैरित्यर्थः । वधूपयोधरैश्च तटमभितो नीतेन प्रापितेनातएव विभिन्नवीचिना भङ्गोर्मिताम्भसा ॥ कर्त्रा ॥ रुषेवेति हेतूत्प्रेक्षा ॥ कलुषत्वमाविलत्वम् ॥ अम्भःशोणश्च श्रूयते । भेजे ॥ कर्मणि क्विप् ॥ यथा कश्चिन्मृदुस्वभावः केनचित्कठिनादिना साङ्घर्षं ताडयित्वा निष्कासितः क्षुभ्यति तद्वदिति भावः । कलुष-

१ पुरोऽवगाढाः. २ तटान्तनीतेन.

Digitized by Google

त्वमिश्रत्व वाच्यमतीयमानयोरभेदाध्यवसायः । अन्यथा शुद्धवाच्यसाविकत्वस्य रोषहेतुकत्वानुत्प्रेक्षानुविधानादिति ॥

विधूतकेशाः परिलोलितस्रजः सुराङ्गनानां प्रविलुप्तचन्दनाः ।
अतिप्रसङ्गादिहितागसो मुहुः प्रकम्पमीयुः सभया इवोर्मयः॥२३॥

विधूतेति ॥ विधूता विशिष्टाः केशा यैस्ते परिलोलिता विलोलिताः स्रजो यैस्ते प्रविलुप्तचन्दनाः प्रमृष्टाङ्गरागा अतिप्रसङ्गादविच्छेदसङ्गात्सुराङ्गनानां विहितागसः कृतमण्डनस्खलनरूपापराधा अतएवोर्मयस्तरङ्गाः । सभया इव स्त्रीभ्यो भीता इव मुहुः प्रकम्पमीयुः । स्वाभाविकस्य कम्पस्य भयहेतुकत्वमुत्प्रेक्ष्यते । यद्वा । सुराङ्गनानां विधूतकेशा इत्यादियोजना ॥ सापेक्षत्वेऽपि गमकत्वात्समासः॥ स्त्रीसंग्रहजसाहसमपराधः । भयं तु राजादिभ्य इति ॥

विपक्षचित्तोन्मथना नखव्रणास्तिरोहिता विभ्रममण्डनेन ये ।
हृतस्य शेषानिव कुङ्कुमस्य तान्विकत्थनीयान्दधुरन्यथा स्त्रियः २४

विपक्षेति ॥ विपक्षस्य सपत्नीजनस्य चित्तानामुन्मथनाः । व्यथका इत्यर्थः ॥ बहुलग्रहणात्कर्तरि ल्युट् ॥ ये नखव्रणा नखक्षतानि ॥ "व्रणोऽस्त्रियाम्" इत्यमरः ॥ विभ्रमस्य सौन्दर्यस्य मण्डनम् ॥ तादर्थ्येऽप्यनयासादिवत्पष्ठीसमासः । न तु चतुर्थीसमासो यूपदार्वादिवत्प्रकृतिविकाराभावादिति ॥ तेन कुङ्कुमलेपादिना तिरोहिताच्छन्ना हृतस्य क्षालितस्य कुङ्कुमस्य । व्यञ्जकत्वेन शेषानिवावशिष्टलेखानिव स्थितानित्युत्प्रेक्षा । विकत्थनीयान्भर्तृत्वाद्भाग्यस्य व्यञ्जकत्वेन श्लाघनीयांस्ताननखव्रणान्स्त्रियोऽन्यथा दधुः । मकारं दधुरित्यर्थः ॥

अथ युग्मेनाह—सरोजेत्यादिना ॥

सरोजपत्रे नु विलीनषट्पदे विलोलदृष्टेः स्विदमू विलोचने ।
शिरोरुहाः स्विन्नतपक्ष्मसंततेर्दिरेफवृन्दं नु निशब्दनिश्चलम् ॥२५॥

अमू पुरोवर्तिनी विलीनषट्पदे संसक्तभृङ्गे । सकर्मनिकत्वमप्यस्योरर्थसिद्धमित्युपमानं विशिष्यते । सरोजपत्रे नु । यद्वा । विलोलदृष्टेरथवलाक्ष्या विलोचने स्वित् ॥ नुःस्वित्शब्दौ वितर्के ॥ किंच । नतपक्ष्मसंततेरथवलाक्ष्याः शिरोरुहाः स्विन्निशब्दं नीरवं च तन्निश्चलं च तद्दिरेफवृन्दं नु ॥

अयूढहासस्फुटदन्तकेसरं मुखं स्विदेतद्विकसन्नु पङ्कजम् ।
इति प्रलीनां नलिनीवने सखीं विदांबभूवुः सुचिरेण योषितः॥२६

१ अवलुप्त. २ परिलीन. ३ विशाल.

Digitized by Google

अगूढेति ॥ किंच । अगूढहासं व्यक्तस्मितं तेन स्फुटा दन्ताः केसरा इव दन्तकेसरा यस्य तन्मुखं स्यात् । बहु । विकसत्पङ्कजं न्वितीत्यस्य । संशयेनेति शेषः । मलिनीवने मलीनां निगूढां सखीं योषितः सुचिरेणातिविलम्ब्य विदांबभूवुर्विदुः । निश्चिक्युरित्यर्थः ॥ "उपविदजागृभ्योऽन्यतरस्याम्" इति विकल्पादाम्प्रत्ययः ॥ अत्र युग्मे निश्चयान्तसंदेहालंकारः ॥

प्रियेण संग्रथ्य विपक्षसंनिधावुपाहितां वक्षसि पीवरस्तने ।
स्रजं न काचिद्विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥२७

प्रियेणेति ॥ काचित्प्रियेण संग्रथ्य स्वयमेव रचयित्वा विपक्षसंनिधौ सपत्नीजनसमक्षं पीवरस्तने वक्षस्युपाहितां स्रजं मालां जलाविलाम् । मुदितामपीत्यर्थः । तां न विजहौ न तत्याज । न च निर्गुणायां तत्र का प्रीतिरिति वाच्यमित्यर्थान्तरन्यासेनाह—गुणाः प्रेम्णि वसन्ति । वस्तुनि न वसन्ति हि । यस्मेमास्यदं तदेव गुणवत् । अन्यत्तु गुणवदपि निर्गुणमेव । प्रेम तु न वस्तुपरीक्षामपेक्षत इति भावः ॥

असंशयं न्यस्तमुपान्तरक्ततां यदेव रोद्धुं रमणीभिरञ्जनम् ।
हृतेऽपि तस्मिन्सलिलेन शुक्लतां निरास रागो नयनेषु न श्रियम् ॥२८

असंशयमिति ॥ स्त्रीणां नेत्रशोभार्थमञ्जनधारणमभ्युपेत्यारोपणमाद्रक्तवर्णत्वं चाक्ष्णां ततः शुक्लत्वातिरोधानं च निश्चितमित्युत्प्रेक्षते । रमणीभिर्यदञ्जनं न्यस्तम् । तदिति शेषः । यत्तदोर्नित्यसंबन्धात् । तदञ्जनमुपान्तयो रक्ततां रोद्धुं प्रतिबन्धुमेव न्यस्तम् । न तु शोभार्थमित्यर्थः । अन्यथा रागाभिव्याप्त्या शुक्लत्वातिरोधानं स्यादित्यर्थः । असंशयमित्युत्प्रेक्षाव्यञ्जकम् । संशयस्याप्यभावः । नात्र संशयोऽस्तीत्यर्थः ॥ अर्थाभावेऽव्ययीभावः ॥ कृत एतदिति चेत्तत्तस्मिन्नञ्जने सलिलेन हृते क्षालिते सत्यपि रागः पूर्वोक्त एवोपान्तरक्तता किंतु प्रतिबन्धाभावादभितो व्याप्येत्याशयः । नयनेषु शुक्लतां निरास निरस्तवान् ॥ अस्यतेर्लिट् ॥ श्रियं शोभां तु न निरास । अतः शुक्लत्वतिरोधिरागनिरोधार्थमेवेदमञ्जनं स्यात् । नतु शोभार्थम् । तस्मात्तदभावेऽपि सद्भावादित्यर्थः । अत्रानपनयेऽपि तत्रयनानां राग एवालंकारोऽनूदिति भावः ॥ अत्राञ्जनन्यासमद्यत्र तस्य शोभार्थत्वनिषेधेन रागरोधार्थत्वोत्प्रेक्षणमुदितम् । उत्तरार्धे तस्यैव समर्थनात् । एवमुपान्तरक्ततां रोद्धुं यदञ्जनं न्यस्तमित्येकान्वये विध्यनुवादविरोधः स्यात् ॥

पुरिं वहन्तो वनितावतंसका हृवाः प्रलोभादिव वेगिभिर्जलैः ।
उपप्लुतास्तत्क्षणशोचनीयतां प्रयुताधिकाराः सचिवा इवाययुः ॥२९॥

१ अर्थाभावेऽव्ययीभाव.

Digitized by Google

युतिमिति ॥ युतिं शोभां तेजश्च वहन्तो वेगिभिर्जविभिर्जसैरङ्गैश्च । दलयोरभेदात् ॥ "जलं गोकवले नीरे क्लीवेरे च जडेऽन्यवत्" इति विश्वः ॥ अलोभान्मोहाकृता गृहीता उपकृता मुदिताः ॥ यद्वा कर्तरि क्तः ॥ प्रथमाना इत्यर्थः। अन्यत्र। धनग्रहबन्धनादिना पीडिता धनितावतंसकाम्युताधिकाराः भ्रष्टाधिकाराः सचिवा इव तत्सदृशं शोचनीयतामापयुः प्रापुः ॥

विपत्रलेखा निरलक्तकाधरा निरञ्जनाक्षीरपि बिभ्रतीः श्रियम् ।
निरीक्ष्य रामा बुबुधे नभश्चरैरलंकृतं तद्वपुषैव मण्डनम् ॥ ४० ॥

विपत्रेति ॥ विगताः पत्रलेखास्तिलकविशेषा यासां ता विपत्रलेखाः । निरलक्तकाः क्षालितरागा अधरा यासां ताः । निरञ्जनान्यक्षीणि यासां ता निरञ्जनाक्षीरपि ॥ बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् । "षिद्गौरादिभ्यश्च" इति ङीप् ॥ तथापि श्रियं बिभ्रतीः शोभाकारणाभावेऽपि शोभमाना इति विभावनालंकारः ॥ रामा निरीक्ष्य नभश्चरैर्गन्धर्वैस्तासां वपुषैव मण्डनमलंकृतम्। नतु मण्डनेन तद्वपुरित्यक्षरार्थः । इति बुबुधे ज्ञातम् ॥ कर्मणि लिट् ॥स्वभावरमणीयानां किमलंकरणैरिति भावः ॥

तथा न पूर्वं कृतभूषणादरः प्रियानुरागेण विलासिनीजनः ।
यथा जलार्द्रो नखमण्डनश्रिया ददाह दृष्टोभ्रं विपक्षयोषिताम् ॥४१

तयेति ॥ विलासिनीजनः पूर्वं जलविहारात्प्राक्प्रियानुरागेण कृतो भूषणेष्वादर आसक्तिर्येन सः । अनुरक्तप्रियत्वात्सम्यक्प्रसाधितः सज्जीकृतश्चेत्यर्थः । प्रियस्यानुरागेण च विपक्षयोषितां सपत्नीनां दृष्टभ्रूभ्रूपि तथा न ददाह न दुःसीचकार । यथा जलार्द्रः सन् । नखशब्देन नखक्षतानि लक्ष्यन्ते । तान्येव मण्डनं तस्य श्रिया । तत्कृतशोभयेत्यर्थः । विपक्षयोषितां सपत्नीनां दृष्टभ्रूभ्रूपि यथा ददाह तापयामास । मण्डनान्तरादपि नखमण्डनानुरागादपि । तदनुभाव एव सपत्नीनां दुःखहेतुरिति भावः ॥ जलार्द्रो ददाहेति विरुद्धकार्योत्पत्तिरूपो विषमालंकारः । विरुद्धकार्योत्पत्तिश्च यथार्थस्वभावो भवेत्—"विरूपघटना वा स्याद्विषमालंकृतिर्लिप्सा" इति लक्षणात् ॥

शुभाननाः साम्बुरुहेषु भीरवो विलोलहाराश्चलफेनपङ्क्तिषु ।
नितान्तगौर्यो हतकुङ्कुमेष्वलं न लेभिरे ताः परभागमूर्मिषु ॥४२॥

शुभेति ॥ शुभानना विलोलहारा नितान्तगौर्योऽङ्गनाः ॥ "गौरोऽरुणे सिते पीते" इति वैजयन्ती ॥ भीरवस्ताः स्त्रियः साम्बुरुहेषु चलाः फेनपङ्क्तयो येषु तेषु हतानि कुङ्कुमानि यैस्तेषु । कुङ्कुमसंगमारुणेष्वित्यर्थः । ऊर्मिषु विषयेष्वलमत्यर्थं

१ दलाक्षनाक्षीः. २ भिवः. ३ प्रतिपक्षयोषिताम्.

Digitized by Google

परभागं गुणोत्कर्षं न लेभिरे ॥ "परभागो गुणोत्कर्षः" इति यादवः ॥ तासामूर्वीनां चारुत्वादिगुणसाम्याच्च कथिद्विशेषो लक्ष्यत इत्यर्थः ॥ अतएव सामान्यालंकारः—"सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैक्यता" इति लक्षणात् । शुभानतत्वसाम्बुदत्वापुभयविशेषणानां क्रमेणोभयस्मिन्समन्वयाद्यथासंख्यालंकारश्च—"यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयात्" इति काव्यप्रकाशे लक्षणात् । अनयोरङ्गाङ्गिभावेन संकरः ॥

ह्रदाम्भसि व्यस्तवधूकराहते रवं मृदङ्गध्वनिधीरमुज्झति ।
मुहुस्तनैस्तालसमं समादृदे मनोरमं नृत्यमिव प्रवेपितम् ॥ ४३ ॥

ह्रदेति ॥ व्यस्ताभ्यां विपर्यासिताभ्यां वधूकराभ्यामाहते । एकेन करेणोत्साहाभ्येन ताडित इत्यर्थः । ह्रदाम्भसि मृदङ्गध्वनिवद्धीरं गम्भीरं रवमुज्झति सति । तथा ध्वनति सतीत्यर्थः । मुहुस्तनैस्तालो गीतवाद्यनृत्यानां कालपरिच्छेदः ॥ "तालः कालक्रियामानम्" इत्यमरः ॥ तत्र सममनुरूपं मनोरमं नृत्यमिव प्रवेपितं प्रकम्पितम् ॥ भावे क्तः ॥ समादृदे स्वीकृतम् ॥ उपमालंकारः ॥

श्रिया हसद्भिः कमलानि सस्मितैरलंकृताम्बुः प्रतिमागतैर्मुखैः ।
कृतानुकूल्या सुरराजयोषितां प्रसादसाफल्यमवाप जाह्नवी ॥४४॥

श्रियेति ॥ श्रिया शोभया कमलानि हसद्भिः । कमलसदृशैरित्यर्थः ॥ "हसीर्ष्यत्स्यूषयि" इति दण्डिना सदृशपर्यायपरा उक्ताः ॥ सस्मितैः प्रतिमागतैः । प्रतिबिम्बगतैरित्यर्थः ॥ "प्रतिमानं प्रतिबिम्बं प्रतिमा" इत्यमरः ॥ सुखैरलंकृताम्बूनि यस्याः सा । किं च सुरराजयोषितां कृतमानुकूल्यं विहारानुपकारो यया सा । इत्थं योषिद्भिरुपकृता स्वयं च तासामुपचिकीर्षुर्जाह्नवी गङ्गा प्रसादस्य स्वच्छत्वस्य साफल्यम् ॥ अर्थैकदेशवृत्तिसमासनिर्वाहः ॥ अवाप । अमलताम्भसि विहारबिम्बग्रहणयोरसंभवादित्यर्थः । स्वच्छा एव हि परैरुपकियन्ते स्वयं चोपकुर्वते तेषामिति भावः ॥ "कृतानुकारा" इति पाठेऽनुकारोऽनुकूलकरणमुपकार इत्येवं व्याख्येयम् ॥ अत्र जाह्नवीविशेषणपदार्थस्य साफल्यं प्रति हेतुत्वात्काव्यलिङ्गमलंकारः ॥

परिस्फुरन्मीनविघट्टितोरवः सुराङ्गनास्नासविलोलदृष्टयः ।
उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम् ४५

परीति ॥ परितः स्फुरद्भिर्विपर्यस्यमानैर्मीनैर्विघट्टिता ऊरवो यासां ता अतएव भयविलोलदृष्टयो भयविकलचेष्टाः कम्पितपाणिपल्लवाश्च सुराङ्गनाः सखीजनस्यापि विलोकनीयतामुपाययुः । किमुत निजजनस्येति भावः ॥ स्वभावोक्तिरलंकारः ॥

Digitized by Google

भयादिवाश्लिष्य झषाहतेऽम्भसि प्रियं मुदानन्दयति स्म मानिनी।
अकृत्रिमप्रेमरसाहितैर्मनो हरन्ति रामाः कृतकैरपीहितैः ॥ ४६ ॥

भयादिति ॥ मानिनी । दुर्लभस्वयंग्रहणेति भावः । अम्भसि जले झषेण मत्स्येनाहते सति ॥ "पृथुलोमा झषो मत्स्यः" इत्यमरः ॥ भयादिव । वस्तुतस्तु न तथेति भावः । किंतु मुदीप्तसुकर्त्यनैवाश्लिष्य प्रियमानन्दयति स्म । तथाहि । रामाः स्त्रियोऽकृत्रिमोऽनारोपितो यः प्रेमैव रसस्तेनाहितैर्जनितैः कृतकैः । कृत्रिमैरपीत्यर्थः । ईहितैश्चेष्टितैर्मनो हरन्ति । आरोपितमपि भयं प्रेममूलत्वान्मनोहरं बभूवेत्यर्थः ॥ अत्राल्पानुभवेन भयेन सहजरागनिगूहनान्मीलनालंकारः—"मीलनं वस्तुना यत्र वस्त्वन्तरनिगूहनम्" इति लक्षणान्तरसंभवादर्थान्तरन्यासेन संसृज्यते॥

तिरोहितान्तानि नितान्तमाकुलैरपां विगाहादलकैः प्रसारिभिः।
ययुर्वधूनां वदनानि तुल्यतां द्विरेफवृन्दान्तरितैः सरोरुहैः ॥ ४७ ॥

तिरोहितेति ॥ अपां विगाहान्नितान्तमाकुलैर्विकीर्णैः प्रसारिभिरायतैरलकैः केशैस्तिरोहितान्तानि छन्नभान्तानि वधूनां वदनानि द्विरेफवृन्दैरन्तरितानि छन्नानि सरोरुहाणि तैः सरोरुहैस्तुल्यतां ययुरित्युपमालंकारः ॥

करौ धुनाना नवपल्लवाकृती पयस्यगाधे किल जातसंभ्रमा।
सखीषु निर्वाप्यमधार्ष्यदूषितं प्रियाङ्गसंश्लेषमवाप मानिनी ॥४८॥

करावितिं ॥ मानिनी पयस्यगाधे सति । किलेत्यलीके । मज्जनभयादिवेत्यर्थः । जातसंभ्रमोत्पन्नभयात एव नवपल्लवाकृती करौ धुनाना कम्पयन्ती ॥ धुनोतेः कर्मादिकात्कर्तरि लटः शानच् ॥ सखीषु विषये निर्वाप्यमवाप्यम् । अनिन्द्यमित्यर्थः । धार्ष्यदूषितश्च न भवतीत्यधार्ष्यदूषितम् । वस्तुतो रागमूलमपि भयमूलत्वारोपादिति भावः । प्रियाङ्गसंश्लेषमवाप ॥ अत्रापि तुल्यात्रेन भयेनागन्तुकेन सहजानुरागनिगूहनान्मीलनालंकारः । तदुक्तं काव्यप्रकाशे—"समानलक्षणं वस्तु वस्तुना यत्र गूह्यते । निजेनागन्तुना वापि तन्मीलनमुदाहृतम् ॥

प्रियैः सलीलं करवारिवारितः प्रवृद्धनिःश्वासविकम्पितस्तनः।
सविभ्रमाधूतकराग्रपल्लवो यथार्थतामाप विलासिनीजनः ॥४९॥

प्रियैरिति ॥ प्रियैः कामिभिः सलीलं करवारिभिरञ्जलिजलैर्वारितोऽवरुद्धः । सिक्त इत्यर्थः । प्रवृद्धैः संततैर्निःश्वासैर्विकम्पितौ कम्पितौ स्तनौ यस्य सः । सविभ्रमं सविलासमाधूतानि करानपल्लवानि पाणिपल्लवानि येन सः । विलसनशीला वि-

१ विद्वानतः.

Digitized by Google

लासिनी ॥ "वौ कपलसकत्थसम्भः" इति घिनुण्प्रत्ययः ॥ सैव जनः ॥ जाताद्वैरूपवचनम् ॥ यथार्थतामाप । उत्करीत्यानेकविलासवत्तया यथार्थनामकत्वमवापेत्यर्थः ॥ क्वचिद्रूढ्यमानार्थस्य नाम्नो न प्रयोगः । यथा माघे—"चिराय यार्थ्यबलम्भि दिग्गजैः" इति । क्वचित्प्रयुज्यते च । यथा रघुवंशे—"परंतपो नाम यथार्थनामा" इति । नैषधेऽपि—"स जयसरिसार्थसार्थकीकृतनामा किल भीमभूपतिः" इति ॥ स्वभावोक्तिरलंकारः ॥

उदस्य धैर्यं दयितेन सादरं प्रसादितायाः करवारिवारितम् ।
मुखं निमीलन्नयनं नतभ्रुवः श्रियं सपत्नीवदनादिवाददे ॥ ५० ॥

उदस्येति ॥ दयितेन धैर्यं काठिन्यमुदस्यापनीय । अनुनीयेत्यर्थः । सादरं यथा तथा प्रसादितायाः सौमनस्यं गमिताया नतभ्रुवः स्त्रियः संबन्धि करवारिभिर्वारितमवरुद्धमतएव निमीलती नयने यस्य तन्मुखं सपत्नीवदनादिव श्रियमाददे जग्राह । तदानीं तद्वदनस्य निःश्रीकत्वात्तदीयश्रीग्रहणमुत्प्रेक्ष्यते ॥

विहस्य पाणौ विधृते धृताम्भसि प्रियेण वध्वा मदनार्द्रचेतसः ।
सखीव काञ्ची पयसा घनीकृता बभार वीतोज्झयबन्धमंशुकम् ॥ ५१ ॥

विहस्येति ॥ धृताम्भसि प्रियसेचनार्थं गृहीतजले पाणौ । अञ्जलाविसर्थः । प्रियेण विहस्य विधृतेऽवलम्बिते सति । अतएव मदनार्द्रचेतसः । मदनपरवशाया इत्यर्थः । वध्वाः संबन्धि वीतोज्झयबन्धं मुक्तनीविग्रन्थि । स्रंसमानमित्यर्थः । अंशुकं पयसा घनीकृता काञ्ची सखीव बभार जग्राह । स्त्रीणां किल स्त्रीष्वेवायत्तं लज्जारक्षणमिति भावः ॥

निरञ्जने साचिविलोकितं दृशावयावकं वेपथुरोष्ठपल्लवम् ।
नतभ्रुवो मण्डयति स्म विग्रहे बलिक्रिया चातिलकं तदास्पदम् ५२

निरञ्जने इति ॥ नतभ्रुवोऽङ्गनाया विग्रहे वपुषि निरञ्जने निर्धौतकज्जले दृशौ विलोचने ॥ कर्म ॥ साचिविलोकितं तिर्यगीक्षणम् ॥ कर्तृ ॥ मण्डयति स्म ॥ "तिर्यग्नर्वे साचि तिरः" इत्यमरः ॥ अयावकं क्षालितलाक्षारागमोष्ठपल्लवं वेपथुः कम्पो मण्डयति स्म ॥ "द्वितोऽथुच्" इत्यथुच्प्रत्ययः ॥ अतिलकं तिलकरहितं तदास्पदं तिलकस्थानं ललाटम् ॥ "आस्पदं प्रतिष्ठायाम्" इति निपातः ॥ बलिक्रिया देवताबन्धश्च मण्डयति स्म । तदा निरलंकारसाङ्गनाशरीरस्य तच्छरीरविकारैरेवालंकारः समजनीत्यर्थः ॥

निमीलदाकेकरलोलचक्षुषां प्रियोपकण्ठं कृतगात्रवेपथुः ।
निमज्जतीनां श्वसितोद्धतस्तनः श्रमो नु तासां मदनो नु पप्रथे ५३

Digitized by Google

निमीलदिति ॥ प्रियोपकण्ठं प्रियसमीपे ॥ अत्यन्तसंयोगे द्वितीया ॥ निमज्जतीनां विगाहमानानामतएव निमीलन्ति निमिषन्त्याकेकराण्याकेकरवन्ति लोलानि चक्षूंषि यासां तासाम् ॥ आकेकरलक्षणं तु नृत्यविलासे—"दृष्टिराकेकरा किंचित्स्फुटापाङ्गे प्रसारिता। भीमिताधंपुटा लोके ताराण्यावर्तनोत्तरा" इति ॥ तासां स्त्रीणाम् ।कृतो गात्राणां वेपथुः कम्पो येन सः। श्वसितैर्नि:श्वासैरुद्धतावुत्पतितौ स्तनौ येन सः। श्रमः खेदो नु मदनो नु मदो वा प्रादुर्बभूव ॥ निमज्जनभियसंनिधानरूपो भयकारणसंभवाभेदनिमीलनगात्रकम्पनिःश्वासधारणाश्च संदेहः। स एवालंकारः ॥

प्रियेण सिक्ता चरमं विपक्षतश्चुकोप काचिन्न तुतोष सान्त्वनैः।
जनस्य रूढप्रणयस्य चेतसः किमप्यमर्षोऽनुनये भृशायते ॥ ५४ ॥

प्रियेणेति ॥ काचित्प्रियेण विपक्षतः सपत्नीतश्चरमं पश्चात्सिक्ता सती चुकोप ॥ "पृष्ठं तु चरमं तनोः" इत्यमरः ॥ सान्त्वनैरनुनयैर्न तुतोष। तथाहि। रूढप्रणयस्य गाढप्रेम्णो जनस्य संबन्धी चेतसो मनसोऽमर्षः प्रकोपः किमपि कुतोऽपि हेतोरनुनये सति भृशायते गाढो भवति ॥ "भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः" इति क्यङ् ॥ अन्यत्र शान्तिहेतुरनुनयोऽत्र प्रकोपायैव भवति। तत्र कारणं तु न ज्ञायत इत्यर्थः ॥

इत्थं विहृत्य वनिताभिरुदस्यमानं पीनस्तनोरुजघनस्थलशालिनीभिः।
उत्सार्पितोर्मिचयलङ्घिततीरदेशमौत्सुक्यनुन्नमिव वारि पुरः प्रतस्थे ५५

इत्थमिति ॥ पीनैः स्तनैकरुभिर्जघनस्थलैश्च शालन्त इति तथोक्ताभिरिति सलिलनोदनसामर्थ्योक्तिः ॥ स्थलस्य साक्षादप्राप्यत्वात्र द्वन्द्वैकवद्भावः ॥ वनिताभिरित्थं विहृत्योदस्यमानं नुद्यमानमुत्सार्पितैरुपरिभावं प्रापितैरूर्मिचयैर्लङ्घिततीरदेशो येन तद्वारि। औत्सुक्यं विहारासहिष्णुत्वं तेन नुन्नं प्रेरितमिवेत्युत्प्रेक्षा ॥ "नुदविद–" इत्यादिना निष्ठानत्वम् ॥ पुरोऽग्रे प्रतस्थे। स्वजनवदिति भावः ॥

तीरान्तराणि मिथुनानि रथाङ्गनाम्नां
नीत्वा विलोलितसरोजवनश्रियस्ताः।
संरेजिरे सुरसरिज्जलधौतहारा-
स्तारावितानतरला इव यामवत्यः ॥ ५६ ॥

तीरान्तराणीति ॥ रथाङ्गनाम्नां मिथुनानि चक्रवाकद्वन्द्वान्यन्यानि तीराणि

१ उत्सार्पितोर्मि. २ तीराम्बरेषु.

Digitized by Google

तीरान्तराणि नीत्वा । नियोज्येत्यर्थः ॥ अविदितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः ॥ विलोलिता विलुलिताः सरोजवनश्रियो याभिस्ताः सुरसरिज्जलैर्मौक्तहाराः स्खलितमुक्तावलयस्ताः स्त्रियस्तारावितानैरुडुगणैस्तरला भासुराः ॥ "तरलो भासुरे हीरे चञ्चलेऽपि" इति वैजयन्ती ॥ वामवस्यो राज्ञय इव । संरेजिरे शुशुभिरे ॥

संक्रान्तचन्दनरसाहितवर्णभेदं
विच्छिन्नभूषणमणिप्रकरांशुचित्रम् ।
वद्धोर्मि नाकवनितापरिभुक्तमुक्तं
सिन्धोर्बभार सलिलं शयनीयलक्ष्मीम् ॥ ५७ ॥

संक्रान्तेति ॥ संक्रान्तैश्चन्दनरसैर्मलयजद्रवैराहितो वर्णभेदो रूपान्तरं यस्य तत् । विच्छिन्नानि त्रुटितानि यानि भूषणानि तेषां ये मणिप्रकरा मणिगणास्तेषामंशुभिश्चित्रं नानावर्णम् । वद्धोर्मि तरलं तरङ्गितं नाकवनिताभिः परिभुक्तमुक्तं पूर्वं परिभुक्तं पश्चान्मुक्तम् ॥ "पूर्वकाल—" इत्यादिना तत्पुरुषः ॥ सिन्धोर्गङ्गायाः सलिलम् । शेरतेऽत्रेति शयनीयं तल्पम् ॥ बहुलग्रहणात्साधुः ॥ तस्य लक्ष्मीं बभार ॥ अतएव निदर्शनालंकारः । लक्षणं तूक्तम् ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथसमाख्यया व्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये सुराङ्गनाविहारो नामाष्टमः सर्गः ।

नवमः सर्गः ।

वीक्ष्य रन्तुमनसः सुरनारीरासक्तचित्रपरिधानविभूषाः ।
तत्प्रियार्थमिव यातुमथास्तं भानुमानुपपयोधि ललम्बे ॥ १ ॥

वीक्ष्येति ॥ अथ जलक्रीडानन्तरं भानुमानंशुमान्सूर्य आसक्तचित्रपरिधानविभूषाः स्वीकृतविविधवस्त्राभरणाः । सुरतसंनार्हं वहन्तीरित्यर्थः । अतएव रन्तुमनसः ॥ "समानकर्तृकेषु तुमुन्" । "तुमर्थेषदवश्यं मः कृत्ये तुं काममनसोरपि" इति मकारलोपः ॥ सुरनारीः । वीक्ष्य तासां प्रियार्थं तत्प्रियार्थमिव । अवसरदानरूपं प्रियं कर्तुमित्येवमर्थः ॥ फलोत्प्रेक्षेयम् ॥ अस्तमदर्शनम् ॥ मकारान्तमव्ययमेतत् ॥ यातुं गन्तुमुपपयोधि पयोधिसमीपे ललम्बे तस्थिवे ॥ अस्मिन्सर्गे स्वागतावृत्तम्—"स्वानतेति रलगाद्गुरुयुग्मम्" इति लक्षणात् ॥

Digitized by Google

मध्यमोपलनिभे लसदंशावेकतश्च्युतिमुपेयुषि भानौ ।
द्यौरुवाह परिवृत्तिविलोलां हारयष्टिमिव वासरलक्ष्मीम् ॥ २ ॥

मध्येति ॥ मध्यमोपलनिभे नायकमणिसदृशे ॥ " निभसंकाशनीकाशप्रतिकोपमादयः " इत्यमरः । " शर्करायां ह्रपत्पुत्रे पुंस्यश्मन्युपलो मणौ " इति वैजयन्ती ॥ लसदंशौ प्रसरद्रश्मौ भानावेकत एकस्मिन्भागे च्युतिं स्खलतामुपेयुषि प्राप्ते सति द्यौः परिवृत्त्या मध्याद्वातिक्रमेण विलोलां गत्वरीम् । अन्यत्र तिर्यगाहृत्या मुहुश्चलन्तीम् । वासरलक्ष्मीं हारयष्टिं मुक्तावलीमिवोवाह वहति स्म ॥

अंशुपाणिभिरतीव पिपासुः पद्मजं मधु भृशं रसयित्वा ।
क्षीवतामिव गतः क्षितिमेष्यंल्लोहितं वपुरुवाह पतङ्गः ॥ ३ ॥

अंशुपाणिभिरिति ॥ पतङ्गः सूर्यः ॥ " पतङ्गौ पक्षिसूर्यौ च " इत्यमरः ॥ अतीव निर्भरम् ॥ " अत्यतीव च निर्भरे " इत्यमरः ॥ पातुमिच्छुः पिपासुस्तृषितः सन् ॥ पिबतेः सन्नन्तादुप्रत्ययः ॥ अंशव एव पाणयस्तैः पद्मेषु जातं पद्मजं मधु मध्वेव ॥ मधिति श्लिष्टं रूपकम् । मकरन्दमयमित्यर्थः ॥ " मधु मद्ये पुष्परसे " इत्यमरः ॥ भृशमत्यन्तं रसयित्वास्वाद्य क्षीवतां मत्तत्वं गत इवेत्युत्प्रेक्षा ॥ " मत्ते शौण्डोत्कटक्षीबाः " इत्यमरः ॥ क्षितिमेष्यन्नभिप्यंल्लोहितं रक्तं वपुरुवाह । यथा मत्तः क्षितौ लुण्ठति रज्यते च तद्वदिति भावः । सूर्यस्य क्षितिविलम्बनमस्तमय इत्यागमः ॥ अत्र रूपकोत्प्रेक्षयोः सापेक्षत्वादङ्गाङ्गिभावेन संकरः ॥

गम्यतामुपगते नयनानां लोहितायति सहस्रमरीचौ ।
आससाद विरहव्य धरित्रीं चक्रवाकहृदयान्यभितापः ॥ ४ ॥

गम्यतामिति ॥ सहस्रमरीचौ सूर्ये । लोहितो भवतीति लोहितायति ॥ " लोहितादिडाज्भ्यः क्यष् " इति क्यष् । " वा क्यषः " इति परस्मैपदे शतृप्रत्ययः ॥ अतएव नयनानां गम्यतामुपगते दर्शनीयतां प्राप्ते सत्यभितापो धरित्रीं विरहव्य विहाय ॥ " व्यपि लघुपूर्वात् " इत्ययादेशः ॥ चक्रवाकहृदयान्याससाद प्राप ॥ अत्र धरित्र्या यादृशस्तीव्रार्ककरकृतसंतापस्तादृक्चक्रवाकहृदयेषु विरहसंतापः संजात इति परमार्थः । परंतु तदुपक्रमानन्तरमेतत्सर्वविभावात्स एवात्र संक्रान्त इत्यभेदाध्यवसायेनोपदेशः । अतएव भेदेऽभेदरूपातिशयोक्तिरलंकारः ॥

मुक्तमूलघुरुज्झितपूर्वः पश्चिमे नभसि संभृतताम्रः ।
सामि मज्जति रवौ न विरेजे खिन्नजिह्म इव रश्मिसमूहः ॥ ५ ॥

१ अवापः.

Digitized by Google

मुक्तेति ॥ रवौ सामि भजत्यर्थासन्नमिते सति ॥ "सामि स्वर्धं जुगुप्सायाम्" इत्यमरः॥ मुक्तं त्यक्तमार्यं मूलमाश्रयभूतो रविः । अन्यत्र स्वामी । येन सोऽतएव लघुरत्यक्तश्च मुक्तमूललघुरुज्झितपूर्वस्यक्तपूर्वदिक्कः । अन्यत्र त्यक्तपूर्वजनः । पश्चिमे नभसि पश्चिमनभोभागे।अन्यत्र कचिच्चपले । संभृतः संहतः सन् । अतएव साम्द्रश्च रश्मिसमूहः । आश्रितजनश्च ध्वन्यते । दुःखेन खिन्नः सन् । जिह्मो दीन इव न विरेजे ॥ अत्र मुक्तस्वादिप्रस्तुतविशेषणसाम्यादप्रस्तुताश्रितजनप्रतीतेः समासोक्तिः । तत्र वाच्यस्य रश्मिसमूहस्याचेतनस्यापि प्रतीयमानेन चेतनेनाभेदाभिधानादुःखितत्वानुत्प्रेक्षेति तयोरङ्गाङ्गिभावेन संकरः ॥

कान्तदूत्य इव कुङ्कुमताम्राः सायमण्डनमभि त्वरयन्त्यः ।
सादरं ददृशिरे वनिताभिः सौधजालपतिता रविभासः ॥ ६ ॥

कान्तेति ॥ कुङ्कुमवत्कुङ्कुमेन वा ताम्राः सायस्य सायंकालस्य ॥ "सायं साये प्रगे प्रातः" इत्यमरः ॥ यन्मण्डनं तदभि तदुद्दिश्य त्वरयन्त्यस्त्वरां कारयन्त्यः सौधानां जालैर्गवाक्षैः पतिताः प्रविष्टाः ॥ "जालं गवाक्षमानायः" इति वैजयन्ती ॥ रविभासः सूर्यरश्मयः कान्तानां प्रेयसां दूत्य इव वनिताभिः सादरं यथा तथा ददृशिरे दृष्टाः । सायंतनार्कभासां प्रियसमागमसूचकत्वादेव दूत्या इव तासु स्त्रीणामादरोऽभवदित्यर्थः ॥

अग्रसानुषु नितान्तपिशङ्गैर्भूरुहान्मृदुकरैरवलम्ब्य ।
अस्तशैलगहनं नु विवस्वानाविवेश जलधिं नु महीं नु ॥ ७ ॥

अग्रेति ॥ विवस्वान्सूर्योऽग्रेऽस्तशैलशिखरे ये मानवस्तेषु ये भूरुहास्तान्नितान्तपिशङ्गैरत्यन्तारुणैर्मृदुभिः करैरिव करैरंशुहस्तैरिति श्लिष्टरूपकम् ॥ "बलिहस्तांशवः कराः" इत्यमरः ॥ यद्वा । करैर्मृदु श्लथमवलम्ब्य । अस्त इति शैलोऽस्तशैलः ॥ "अस्तस्तु चरमक्ष्माभृत्" इत्यमरः ॥ तस्य गहनं काननं नु जलधिं नु महीं न्याविवेश । तपनस्य पतनसंदेह एव दृष्टः । पतनं तु क्व चास्य तत्र ज्ञायते । शीघ्रगमनादित्यर्थः ॥ अत्र तपने पतनस्यारोप्यमाणस्य गहनाद्यनेकविषयत्वेन संदेहात्संदेहालंकारः । उत्प्रेक्षेति केचित् ॥

आकुलश्वलपतत्रिकुलानामारवैरनुदितौषसरागः ।
आययावहरिदश्वविपाण्डुस्तुल्यतां दिनमुखेन दिनान्तः ॥ ८ ॥

आकुल इति ॥ चलानां कुलायेभ्यः कुलायान्मति चलतां पतत्रिकुलानामारवैः शब्दैराकुलो व्याप्तः ॥ अनुदितस्तन्नेनाभावमात्रमुषःशब्देन संध्यामात्रं च विव-

१ नवमपि. २ सुप्रवान्. ३ दिनास्यः.

Digitized by Google

ख्यते ॥ उपसि भव औषसः ॥ "संधिवेला–" इत्यादिना योगविभागादण्प्रत्ययः । अन्यथा कालाइञ्स्यात् ॥ तथा चानुदितौषसराग इत्यविद्यमानसंध्यारागः इत्यर्थः। एकत्रापगमादन्यत्रानुदयाच्चेति भावः । अहरिदंशोऽविद्यमानसूर्यः । एकत्रानुदयादन्यत्रास्तमयाच्चेति भावः । अतएव विपाण्डुः । तिमिरानुदयादिति शेषः । दिनान्तः सायंकालो दिनमुखेन प्रातःकालेन तुल्यतामाययौ । तद्वद्भूयेत्यर्थः ॥ अतएवोपमालंकारः ॥

आस्थितः स्थगितवारिदपङ्क्त्या संध्यया गगनपश्चिमभागः ।
सोर्मिविद्रुमवितानविभासा रञ्जितस्य जलधेः श्रियमूहे ॥ ९ ॥

आस्थित इति ॥ स्थगितवारिदपङ्क्त्या पिहितमेघवृन्दया संध्ययास्थित आक्रान्तो व्याप्तो गगनपश्चिमभागः । सोर्मिः । ऊर्मिसंक्रान्तेत्यर्थः । तया विद्रुमवितानविभासा प्रवालमकरकान्त्या रञ्जितस्य स्वसावर्ण्यमापादितस्य जलधेः श्रियमूहे । संध्याया रक्तवर्णत्वादिति भावः ॥ वहतेः कर्तरि लिट् ॥ तत्सदृशीं श्रियमुवाहेत्यर्थः ॥ अतएव निदर्शनालंकारः ॥

प्राञ्जलावपि जने नतमूर्ध्नि प्रेम तत्प्रवणचेतसि हित्वा ।
संध्ययानुविदधे विरमन्त्या चापलेन सुजनेतरमैत्री ॥ १० ॥

प्राञ्जलाविति ॥ प्रवद्धोऽञ्जलिर्येन तस्मिन्प्राञ्जलौ बद्धाञ्जलौ ॥ "तौ युतावञ्जलिः पुमान्" इत्यमरः ॥ प्रादिभ्यो धातुजस्य बहुव्रीहिर्वाच्यो वाचोत्तरपदलोपश्च ॥ नतमूर्ध्नि नमस्कुर्वाणे तत्प्रवणं तत्र संध्यायामेवाहितं चेतो यस्य तस्मिन्नेवंविधेऽपि जने विषये प्रेम हित्वा विहाय विरमन्त्या निवर्तमानया ॥ "व्याङ्परिभ्यो रमः" इति परस्मैपदम् । संध्यया चापलेनास्थैर्येण ॥ युवादित्वादण्प्रत्ययः ॥ सुजनादितरो दुर्जनस्तस्य मैत्री सख्यमनुविदधेऽनुचक्रे ॥ कर्मणि लिट् ॥ यथा दुर्जनमैत्री क्लिश्नन्तमपि जहाति तद्वत्संध्यापि सेवकं जनमहासीदित्यर्थः । मित्रस्य कर्म मैत्री ॥ अणञ्तान्ङीप् ॥ अत्र संध्यादुर्जनमैत्र्योश्चापलं समानधर्मोऽनुविधानम् । अतएवार्थरूपेणोपमा ॥

औषसातपभयादपलीनं वासरच्छविविरामपटीयः ।
संनिपत्य शनकैरिव निम्नादन्धकारमुदवाप समानि ॥ ११ ॥

औषसेति ॥ औषसात्पाभातिकादातपाद्भयं तस्मादिवेत्युत्प्रेक्षा । अपलीनं क्वचिद्गूढं वासरच्छवेरातपस्य विरामादेतोः पटीयः प्रभविष्णुतरम् । अन्धं करोतीत्यन्धकारं ध्वान्तम् ॥ "अन्धकारोऽस्त्रियां ध्वान्तम्" इत्यमरः ॥ अथ संध्यापगमनानन्तरं

१ विमर्दैः.

Digitized by Google

ज्ञमकैर्मन्दमन्दं निम्नात्संनिपत्यागत्य समानि समस्थलान्युदवाप व्यानशे ॥ अ
प्रस्तुतान्धकारविशेषणसाम्यादप्रस्तुतार्थप्रतीतेः समासोक्तिरलंकारः । उत्प्रेक्षा त्व
मूलः स्यात् ॥

एकतामिव गतस्य विवेकः कस्यचिन्न महतोऽप्युपलेभे ।
भास्वता निदधिरे भुवनानामात्मनीव पतितेन विशेषाः ॥१२॥

एकतामिति ॥ एकतामभेदं गतस्येव तमोव्याहृया तथा प्रतीतेरियमुत्प्रेक्षा । म
इतः शैलादेरपि कस्यचित्कस्यापि पदार्थस्य विवेको भेदो नोपलेभे न गृहीतः । अ
तएवोत्प्रेक्ष्यते—पतितेनास्तमितेन भास्वता सूर्येण ॥ "भास्वद्विवस्वत्सप्ताश्व–"
इत्यमरः ॥ भुवनानाम् । भुवनस्थपदार्थानामित्यर्थः । विशेषा भूधरादिभेदा आ
त्मनि स्वस्मिन्नेव निदधिर इव निहिता इव । कथमन्यथा नोपलभ्येरन्नित्यर्थः ॥
अत्रोत्प्रेक्षयोः सजातीययोः सापेक्षत्वादङ्गाङ्गिभावेन संकरः ॥

इच्छतां सह वधूभिरभेदं यामिनीविरहिणां विहगानाम् ।
आपुरेव मिथुनानि वियोगं लङ्घयते न खलु कालनियोगः॥१३॥

इच्छतामिति ॥ वधूभिः स्वकामिनीभिः सहाभेदमवियोगमिच्छताम् । तथा सं
कल्पवतामपीत्यर्थः । यामिनीषु विरहिणाम् । निपतवियोगानामित्यर्थः ॥ रहते
रावश्यकेऽर्थे णिनिः । यद्वा निन्द्यायामिनिः ॥ तेषां विहगानाम् । चक्रवाकाना
मित्यर्थः । मिथुनानि वियोगमापुरेव । न तु नापुरित्ययोगव्यवच्छेदः । तथाहि ।
कालनियोगो दैवाज्ञा न लङ्घयते खलु । दुर्वार इत्यर्थः ॥

यच्छति प्रतिमुखं दयिताये वाचमन्तिकगतेऽपि शकुन्तौ ।
नीयते स्म नतिमुज्झितहर्षं पङ्कजं मुखमिवाम्बुरुहिण्या ॥१४॥

यच्छतीति ॥ शकुन्तौ चक्रवाकपक्षिणि । सामान्यस्य प्राकरणिकविशेषपर्यवसा
नात् ॥ "शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः" इत्यमरः ॥ अन्तिकगते समी
पस्थेऽपि दयिताये चक्रवाक्यै प्रतिमुखमभिमुखं यथा तथा वाचं यच्छति वाचमेव
ददाने सति । न तु संगच्छमाने सतीत्यर्थः ॥ "पाघ्राध्मा–" इत्यादिना दाणो
यच्छादेशः ॥ अम्बुरुहिण्या नलिन्योज्झितहर्षं चक्रवाकदुर्दर्शनादिव त्यक्तं
विकासं पङ्कजं मुखमिव नतिं नम्रत्वं नीयते स्म नीतम् ॥ "प्रधानकर्मण्याख्येये
ऽादीनामाहुर्हिकर्मणाम्" इति नयतेर्द्विकर्मकस्यात्मघाने कर्मणि क्विप् ॥ प्रायेण दुः
खदर्शनात्स्त्रियः म्रियन्ते । विशेषेण विरहदर्शनादिति भावः ॥ अत्र पङ्कजावल
नेऽपि चक्रवाकविरोधानन्तर्यावच्छेदेनोत्कृष्टमुत्प्रेक्ष्यते । तच्च मुखोपमेयमम्बुरुहिण्या का
मिनीसाम्यं नमयन्त्या निरूढत इत्युपमोत्प्रेक्षयोरङ्गाङ्गिभावेन संकरः । व्यञ्जका
नयोस्तत्तदीयमानोत्प्रेक्षा ॥

Digitized by Google

रञ्जिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु ।
पूरिता नु विषमेषु धरित्री संहृता नु ककुभस्तिमिरेण ॥ १५ ॥

रञ्जिता इति ॥ तिमिरेणान्धकारेण विविधास्तरवः शैलाश्च रञ्जिताः स्वसाव-र्ण्यमापादिता नु । अन्यथा कथमेषां नीलाद्यन्यत्वमिति भावः । तथा गगनं नामितं नु । आभूतलादिति शेषः ॥ " मितां ह्रस्वः " इत्यत्र वाशब्दानुवृत्त्या व्यवस्थि-तविभाषाश्रयणान्न ह्रस्वः ॥ यद्वा गगनं स्थगितमाच्छादितं नु । उभयत्रापि त-मसाहृतत्वान्न दृश्यत इति भावः । तथा धरित्री विषमेषु निम्नोन्नतेषु पूरिता स-मीकृता नु । अन्यथा तद्विवेकः कथं न स्यादिति भावः । ककुभो दिशश्च संहृता नु लुप्ताः किम् ॥ " दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः " इत्यमरः ॥ कथमन्यथा न दृश्यन्त इति भावः ॥ अत्र तिमिरे तरुशैलाद्यनेकविषयरञ्जकत्वा-दिकमारोप्य संदिग्ध इति संदेहालंकारः । अन्ये तु नुशब्दस्य संभावनाद्योतकत्व-मत्रोत्प्रेक्षाप्रकारमित्यलंकारसर्वस्वकारः ॥

रात्रिरागमलिनानि विकाशं पङ्कजानि रहयन्ति विहाय ।
स्पष्टतारकमियाय नभः श्रीर्वस्तुमिच्छति निरापदि सर्वः ॥ १६ ॥

रात्रीति ॥ श्रीः शोभा ॥ कश्चित् ॥ रात्रेः संध्याया रागेण स्वच्छायोपरञ्जनेन मलिनान्यतएव विकाशं रहयन्ति त्यजन्ति ॥ रहयतेस्त्यागार्थाच्छतृप्रत्ययः ॥ प-ङ्कजानि विहाय त्यक्त्वा स्पष्टतारकं नभः खमियाय प्राप । तथाहि । सर्वो जनो निरापदि निर्बाधस्थले वस्तुं स्थातुम् ॥ " एकाच उपदेशेऽनुदात्तात् " इतीदन्न-तिषेधः । घसिभस सान्तेषु वसिः । प्रसारिणीति वचनात् ॥ इच्छति ॥

अस्तादिसंध्यान्तं वर्णयित्वा चन्द्रोदयवर्णनमारभते—

व्यानशे शशधरेण विमुक्तः केतकीकुसुमकेसरपाण्डुः ।
चूर्णमुष्टिरिव लम्भितकान्तिर्वासवस्य दिशमंशुसमूहः ॥ १७ ॥

व्यानश इति ॥ शशधरेण चन्द्रेण विमुक्तः क्षिप्तः केतकीकुसुमकेसर इव पाण्डुर्ल-म्भिता प्रापिता कान्तिर्यस्य सोंऽशुसमूहो रश्मिसमूहश्चूर्णस्य कर्पूरक्षोदस्य मुष्टिरिव ॥ मुष्टिशब्दस्य द्विलिङ्गत्वेऽप्यत्र पुंल्लिङ्गतैव ग्राह्या । उपमेयानुसारात् ॥ वासवस्येन्द्रस्य दिशं प्राचीं व्यानशे व्याप ॥ अनेन दिशानिशाकरयोर्नायिकानायकोपम्यं गम्यते ॥

उज्झती शुचमिवांशु तमिस्रामन्तिकं व्रजति तारकराजे ।
दिक्प्रसादगुणमण्डनमूहे रश्मिहासविशदं मुखमैन्द्री ॥ १८ ॥

१ अथ. २ अस्तिके.

Digitized by Google

उज्झतीति ॥ इन्द्रस्येयमैन्द्री दिक्प्राची तारकराजे नक्षत्रनाथे ॥ "कनीनिकायां नक्षत्रे तारकं तारकापि च" इति विश्वः ॥ अन्तिकं समीपं व्रजति सति । आशु तमिस्रामन्धतमसम् ॥ "तमिस्रा स्त्री ध्वान्तनिशि निश्यन्धतमसे न ना" इति वैजयन्ती ॥ शुचमिव । विरहदुःखमिवेत्यर्थः । उज्झती विजहती प्रसादो नैर्मल्यमेव शुभ्रः स एव मण्डनं यस्य तत् । रश्मयो हास इव तेन विशदं शुक्लमिव शुक्लमग्रभागम् ॥ श्लिष्टोपमेयम् ॥ ऊहे वहति स्म ॥ अत्र दिक्चन्द्रयोर्नायिकानायकौपम्यं गम्यते ॥

नीलनीरजनिभे हिमगौरं शैलरुद्धवपुषः सितरश्मेः ।
ते रराज निपतत्करजालं वारिधेः पयसि गाङ्गमिवाम्भः ॥१९॥

नीलेति ॥ शैलरुद्धवपुष उदयगिरितिरोहितमण्डलस्य सितरश्मेरिन्दोः संबन्धि नीलनीरजनिभे श्यामकमलतुल्ये व्य आकाशे निपतत्मसरत् । हिमवद्गौरं शुभ्रं करजालमंशुसमूहं वारिधेः पयसि निपतद्गाङ्गमम्भ इव । रराज ॥ उपमानेऽपि विशेषणं योज्यम् ॥

द्यां निरुन्धदतिनीलघनाभं ध्वान्तमुद्यतकरेण पुरस्तात् ।
क्षिप्यमाणमसितेतरभासा शंभुनेव करिचर्म चकासे ॥ २० ॥

द्यामिति ॥ द्यां निरुन्धदाकाशमाक्रम्णदतिनीलघनाभं मेचकम् । उद्यताः करा अंशवो हस्ताश्च यस्य तेन । असितात्म्य इतराः शुभ्रा भासो यस्य तेन चन्द्रेण पुरस्तात्प्राच्यामग्रे च क्षिप्यमाणं तुद्यमानं ध्वान्तं शंभुना क्षिप्यमाणं करिचर्मेव चकासे ॥ उपमानेऽपि विशेषणानि योज्यानि ॥

अन्तिकान्तिकगतेन्दुविसृष्टे जिह्मतां जहति दीधितिजाले ।
निःसृतस्तिमिरभारनिरोधादुच्छ्वसन्निव रराज दिगन्तः ॥ २१ ॥

अन्तिकेति ॥ अन्तिकान्तिकेऽतिसमीपे ॥ "मकारे गुणवचनस्य" इति द्विर्भावः । कर्मधारयवद्भावात्सुपो लुक् ॥ अन्तिकान्तिकगतेनेन्दुना विसृष्टे मुक्ते दीधितिजाले किरणसमूहे जिह्मतां संकोचं जहति त्यजति सति तिमिरभारनिरोधैस्तिमिरोधादुपरोधान्निःसृतो निर्गतः । दिगन्त उच्छ्वसन्निव । रराजेत्युत्प्रेक्षालंकारः ॥

लेखया विमलविद्रुमभासा संततं तिमिरमिन्दुरुदासे ।
दंष्ट्रया कनकटङ्कपिशङ्कया मण्डलं भुव इवादिवराहः ॥ २२ ॥

१ अभिनील. २ कचर्म. ३ लवति. ४ भङ्ग.

Digitized by Google

लेखयेति ॥ इन्दुर्विमलविद्रुमभासा स्वच्छप्रवालसदृश्या लेखया कलया संततं सान्द्रं तिमिरमादिदराह: कनकस्य टङ्कः शिलाभेदकं शस्त्रम् ॥ "टङ्कः पाषाणदारणः" इत्यमरः ॥ तद्वत्पिशङ्गया लोहितवर्णया ॥ "पिशङ्गादुपसंख्यानम्" इति ङीप् ॥ दंष्ट्रया भुवो मण्डलमिव । उदास उच्चिक्षिपे ॥ असतेः कर्तरि लिट् । सोपसर्गादस्यतेरात्मनेपदं विकल्पात् ॥

दीपयन्नथ नभः किरणौघैः कुङ्कुमारुणपयोधरगौरः ।
हेमकुम्भ इव पूर्वपयोधेरुन्ममज्ज शनकैस्तुहिनांशुः ॥ २३ ॥

दीपयन्निति ॥ अथोदयानन्तरं किरणौघैर्नभो दीपयन्प्रकाशयन्कुङ्कुमेनारुणो यः पयोधरः कुचस्तद्वद्गौरोऽरुणः । उदयरागादिति भावः । तुहिनांशुरिन्दुः शनकैः पूर्वपयोधेः पूर्वसागरादुन्नः कुम्भ इवोन्ममज्जोज्जगामेत्युत्प्रेक्षा ॥

उद्गतेन्दुमविभिन्नतमिस्रां पश्यति स्म रजनीमवितृप्तः ।
व्यंशुकस्फुटमुखीमतिजिह्मां व्रीडया नववधूमिव लोकः ॥ २४ ॥

उद्गतेन्दुमिति ॥ लोको जनः ॥ "लोकस्तु भुवने जने" इत्यमरः ॥ उद्गतेन्दुमुदितचन्द्रामविभिन्नतमिस्रामनिःशेषितध्वान्तां रजनीं व्यंशुकमपनीतावगुण्ठनमतएव स्फुटं दृश्यमानं मुखं यस्याः सा तां तथापि व्रीडयातिजिह्मां वक्रां नववधूं नवोढाम् ॥ "वधूर्नवोढयोषायां स्नुषाभार्यान्वनासु च" इति धरणिः ॥ स्त्रियमिवावितृप्तः सम्पश्यति स्म ॥

न प्रसादमुचितं गमिता द्यौर्नोद्धृतं तिमिरमद्रिवनेभ्यः ।
दिक्षु लेषु न च धाम विकीर्णं भूषितैव रजनी हिमभासा ॥२५॥

नेति ॥ हिमभासा चन्द्रेण द्यौराकाशमुचितं योग्यं प्रसादं न गमिता । अद्रयो वनानि च तेभ्यस्तिमिरं नोद्धृतं नोत्सारितम् । दिशां लेषु धाम तेजश्च न विकीर्णं न पर्यस्तम् । तथापि रजनी भूषितैव । किमुतोक्तगुणासंपत्ताविति भावः ॥ अत्र प्रसादनकारणाभावेऽपि तत्कार्यभूषणोक्त्या विभावनालंकारः ॥

मानिनीजनविलोचनपातानुष्णवाष्पकलुषान्प्रतियन्क्रन् ।
मन्दमन्दमुदितः प्रययौ खं भीतभीत इव शीतमयूखः ॥ २६ ॥

मानिनीति ॥ उदितः शीतमयूख उष्णेन विरहतप्तेन वाष्पेण कलुषानाविलाम्भानिनीजनस्य कलहान्तरितनायिकाजनस्य विलोचनपातान् । मानभङ्गजनितरोषेण भीषणानिति भावः ॥ "कोपात्कान्तं पराङ्मुख पश्चात्तापसमन्विता । कलहान्त-

१ च.

Digitized by Google

रिता भोक्ता नायिका नवशालिभिः" इति दशरूपके ॥ प्रतिशब्दमस्वीकुर्वन् । अपराधस्यापरिहार्यत्वादिति भावः । अतएव भीतभीतो भीतमकार इवेत्युत्प्रेक्षा । मन्दमन्दं मन्दमकारम् ॥ उभयत्रापि "मकारे गुणवचनस्य" इति द्विर्भावे कर्मधारयवद्भावात्सुलोपः ॥ क्षमाकाशं मयथौ ॥

श्लिष्यतः प्रियवधूरुपकण्ठं तारकास्ततकरस्य हिमांशोः ।
उद्गमन्नभिरराज समन्ताद्रङ्गराग इव लोहितरागः ॥ २७ ॥

श्लिष्यत इति ॥ ततः प्रसारिताः करा एव करा अंशुहस्ता येन तस्य ततकरस्य तारका एव प्रियवधूरुपकण्ठमन्तिके कण्ठे वा ॥ अत्यन्तसंयोगे द्वितीया । विभक्त्यर्थेऽव्ययीभावः ॥ श्लिष्यतः प्रलासीदत आलिङ्गतश्च हिमांशोः संबन्धी समन्तादुद्गमन्नुत्सर्पन् ॥ अर्थान्तरन्यासादकर्मकत्वम् । "धातोरर्थान्तरे वृत्तेः" इति वचनात् ॥ लोहितरागोऽरुणमभाद्रङ्ग इवाभिरराज । आलिङ्गनाद्रागो गलतीति प्रसिद्धिः ॥ अत्र रूपकोपमयोरङ्गाङ्गिभावेन संकरः ॥

प्रेरितः शशधरेण करौघः संहतान्यपि नुनोद तमांसि ।
क्षीरसिन्धुरिव मन्दरभिन्नः काननान्यविरलोच्चतरूणि ॥ २८ ॥

प्रेरित इति ॥ शशधरेण चन्द्रेण प्रेरितो विसृष्टः करौघः संहतानि सान्द्राण्यपि तमांसि मन्दरेण मन्दराचलेन भिन्नो नुनः क्षीरसिन्धुरविरलाः सान्द्रा उच्चा उच्चताश्च तरवो येषु तानि काननानीव नुनोद विक्षेप दूरीचकार ॥

शारतां गमितया शशिपादैश्छायया विटपिनां प्रतिपेदे ।
न्यस्तशुक्लबलिचित्रतलाभिस्तुल्यता वसतिवेश्मभिरेव ॥ २९ ॥

शारतामिति ॥ शशिपादैश्चन्द्ररश्मिभिः ॥ "पादा रश्म्यङ्घ्रितुर्यांशाः" इत्यमरः ॥ शारतां शबलतां गमितया ॥ "शारः शबलपीतयोः" इति विश्वः ॥ विटपिनां तरूणां छायया न्यस्तैर्निक्षिप्तैः शुक्लबलिभिः श्वेतपुष्पाक्षतोपहारैश्चित्राणि तलान्युपरिभागा यासां ताभिः ॥ "करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियाम्" इत्यमरः ॥ वसतिवेश्ममहीभिर्निवासभूभिस्तुल्यता साम्यं प्रतिपेदे ॥ कर्मणि च्लिट् ॥ आर्थीयमुपमा ॥

आतपे द्युतिमता सह वध्वा यामिनीविरहिणा विहगेन ।
सेहिरे न किरणा हिमरश्मेर्दुःखिते मनसि सर्वमसह्यम् ॥ ३० ॥

आतप इति ॥ आतपे । दुःखकरेऽपीति भावः । वध्वा चक्रवाक्या सहातएव द्युतिमता संयोगवता यामिनीषु विरहिणा नियतविरहेणातएव विहगेन चक्रवाकेन हि-

१ अतिशया. २ पृष्ठ.

Digitized by Google

मरुन्मेघन्द्रस्य किरणा न सेहिरे। तथाहि। दुःखिते संजातदुःखे मनसि सर्वम्। मनोहरमपीति भावः। असह्यं सोढुमशक्यम्॥ "शकिसहोश्च" इति यत्प्रत्ययः॥ पूर्वे तु "आतपाः" इति पेठुः। तत्र बध्वा सदातपा अपि सेहिरे। तद्विरहिणा तु शशिकिरणा अपि न सेहिर इति योज्यम्। फलं तु समानम्॥

गन्धमुद्धतरजःकणवाही विक्षिपन्विकसतां कुमुदानाम्।
आदुधाव परिलीनविहङ्गा यामिनीमरुदपां वनराजीः॥ ३१॥

गन्धमिति॥ अपां कणवाही॥ योग्यान्वये व्यवधानमपि सोढव्यम्॥ विकसतां कुमुदानां गन्धं सौरभमुद्धतं रजः परागो यस्मिन्कर्मणि तथथा तथा॥ "शेषाद्विभाषा" इति विकल्पात्कप्॥ विक्षिपन्विकिरन्। इत्थं शिशिरः सुरभिः। यामिनीमरुद्रात्रिवायुः परितो लीनाः शयिता विहङ्गा यासु ता वनराजीरादुधावेपत्कम्पयामास। वनराजिः किंचित्कम्पितेत्यर्थः। विहङ्गशयनाधिरोधेनेत्यर्थः॥ "आङीषदर्थेऽभिव्याप्तौ" इत्यमरः॥ यथा कश्चित्कामिनीं गन्धोदकादिना सिञ्चन्नाकर्षति तद्वदिति भावः॥

संविधातुमभिषेकमुदासे मन्मथस्य लसदंशुजलौघः।
यामिनीवनितया ततचिह्नः सोत्पलो रजतकुम्भ इवेन्दुः॥ ३२॥

संविधातुमिति॥ यामिनी वनितेव तया रात्रिरूपया कान्तया मन्मथस्याभिषेकं त्रिभुवनजैत्रयात्राभिषेकं संविधातुं सम्पादयितुमंशवो जलानीव तेषामोघः पूरो लसन्प्रस्फुरन्। ततचिह्नः स्फुटलाञ्छन इन्दुः सोत्पलो रजतकुम्भ इवोदास उल्लसत्॥ अस्यतेः कर्मणि क्विप्॥ अत्र संविधातुमिति तुमुना प्रतीयमानोत्प्रेक्षयानुप्राणितोऽप्युपमोत्प्रेक्षयोः संकरः॥

ओजसापि खलु चूनमचूनं नासहायमुपयाति जयश्रीः।
यद्विभुः शशिमयूखससखः सन्नाददे विजयि चापमनङ्गः॥ ३३॥

ओजसेति॥ ओजसाचूनं संपूर्णमप्यसहायं सहायरहितम्। पुरुषमिति शेषः। जयश्रीर्नोपयाति खलु चूनम्। कुतः। यद्यस्माद्विभुः समर्थोऽप्यनङ्गः शशिमयूखानां ससासहचरस्तथोक्तः। ससहायः सञ्जित्यर्थः। विजयि विजयशीलम्॥ "जिदक्षि–" इत्यादिनेनिप्रत्ययः॥ चापमाददे॥ विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः॥

इत्थमुद्दीपनसामग्रीमुपवर्ण्य संप्रति तत्कार्यभूतं रतिवर्णनमारभते—

सज्जनां विरचनाहितशोभैरागतप्रियकथैरपि दूत्यम्।
संनिकृष्टरतिभिः सुरदारैर्भूषितैरपि विभूषणभीपे॥ ३४॥

१ तेजसा. २ सत्सहायम्. ३ अभियाति.

Digitized by Google

सञ्चनामित्यादि ॥ संनिकृष्टरतिभिरासक्तसुरतोत्सवैरतएव सुरदारैः सुरवधूभिराहितशोभैः मानेव विहितकेलिगृहमण्डनैरपि पुनः सञ्चनां केलिगृहाणां विरचना मण्डनमीप्सभिलेपे ॥ इपेः कर्मणि लिट् ॥ आगतप्रियकथैः प्राप्तप्रियजनवृत्तान्तैरपि दूतस्य कर्म दूत्यं दूतिव्यापार ईपे ॥ "वा दूतवणिग्भ्यां च" इति यत्प्रत्ययः ॥ तथा धूपितैरपि विधूपनं प्रसाधनमीपे । औत्सुक्यातिरेकादिति भावः ॥

न स्रजो रुरुचिरे रमणीभ्यश्चन्दनानि विरहे मदिरा वा ।
साधनेषु हि रतेरुपधत्ते रम्यतां प्रियसमागम एव ॥ ३५ ॥

नेति ॥ विरहे वियोगावस्थायां स्रजो माल्यानि चन्दनानि गन्धा मदिरा मद्यानि वा रमणीभ्यः ॥ "रुच्यर्थानां प्रीयमाणः" इति संप्रदानत्वाच्चतुर्थी ॥ न रुरुचिरे न रोचन्ते स्म । हि यस्मात्प्रियसमागम एव रतेः साधनेषु स्रगादिषु रम्यतां मनोहरत्वम् । रुचिकरत्वमिति यावत् । उपधत्ते आधत्ते । तदभावादरुचिर्युक्तैवेत्यर्थः ॥ अतएव वैधर्म्यात्कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ रम्यन्त एभिरिति रम्याणि ॥ "पोरदुपधात्" इति यत्प्रत्ययः । "कृत्यल्युटो बहुलम्" इति बहुग्रहणादधिकरणार्थः ॥

प्रस्थिताभिरधिनाथनिवासं ध्वंसितप्रियसखीवचनाभिः ।
मानिनीभिरपहस्तितधैर्यैः सादयन्नपि मदोऽबललम्बे ॥ ३६ ॥

प्रस्थिताभिरिति ॥ अधिनाथनिवासं प्रियगृहं प्रति प्रस्थिताभिः प्रचलिताभिर्ध्वंसितानि खण्डितानि प्रियसखीवचनानि स्वयं प्रस्थानं लाघवायेत्येवंरूपाणि याभिस्ताभिर्मानिनीभिः कोपनाभिः ॥ "स्त्रीजातीर्ष्याकृतः कोपो मानोऽन्यासङ्गिनि प्रिये" इति लक्षणात् ॥ अपहस्तितं निरस्तं धैर्यं येन स तथा सादयन्मानं शरीरं च कर्षयन्नपि । सदोषोऽपीत्यर्थः । मदोऽबललम्बे स्वीकृतः । अज्ञानव्याजेन लाघवापादनस्वीकर्यादिति भावः ॥

कान्तवेश्म बहु संदिशतीभिर्यातमेव रतये रमणीभिः ।
मन्मथेन परिलुप्तमतीनां प्रायशः स्खलितमप्युपकारि ॥ ३७ ॥

कान्तेति ॥ रतये सुरताय बहु संदिशतीभिरनेकं वाचिकं कथयन्तीभिः । संदेष्टव्यसंनाद्गन्तव्यमप्यजानतीभिरित्यर्थः । रमणीभिः कान्तवेश्म यातं प्राप्तमेव । न तु मानाभ्यध्ये निहतमित्यर्थः । तथाहि । मन्मथेन परिलुप्तमतीनां भ्रष्टमतीनां स्खलितं विरुद्धाचरणमपि प्रायश उपकारि भवति ॥

आशु कान्तमभिसारितवत्या योषितः पुलकरुद्धकपोलम् ।
निर्जिगाय मुखमिन्दुमखण्डं खण्डपत्रतिलकाकृति कान्त्या ॥ ३८ ॥

Digitized by Google

आश्वितिं ॥ आशु कान्तमभिसारितवत्या अभिगतवत्याः ॥ स्वार्थे णिच् ॥ योषितः संबन्धि पुलकं रुद्भावाद्वर्ता कपोलौ यस्य तत् । खण्डा मसृणा पत्राणां पत्रलेखानां तिलकस्य चाकृतिः संनिवेशो यस्य तत्तथोक्तं मुखं कान्त्यालयं पूर्णमिन्दुं निर्जगाय जयति स्मेत्यर्थोपमुपमा । "जयति द्वेष्टि" इति दण्डिना सादृश्यार्थेषु गणनात् ॥

अथ युग्मेन सखीनायिकासंवादमाह—

उच्यतां स वचनीयमशेषं नेश्वरे परुषता सखि साध्वी ।
आनयैनमनुनीय कथं वा विप्रियाणि जनयन्ननुनेयः ॥ ३९ ॥

उच्यतामिति ॥ तत्र नायिकाह—स धूर्तोऽशेषमखिलं वचनीयंवक्तव्यमुच्यतां[1] । निःशङ्कमुपालभ्यतामित्यर्थः ॥ तृज्वो दृहादित्वादभधाने कर्मणि लोट् ॥ अथ सख्याह— हे सखि । ईश्वरे भर्तरि नायके विषये परुषता पारुष्यं न साध्वी न हिता । अथ नायिकाह—हे सखि । तर्ह्येनमनुनीय सान्त्वयित्वानय । पुनः सख्याह—विप्रियाणि जनयन्नप्रियाणि कुर्वन्स कथं वानुनेयोऽनुनयार्हः ॥

किं गतेन न हि युक्तमुपैतुं कः प्रिये सुभगमानिनि मानः ।
योषितामिति कथासु समेतैः कामिभिर्बहुरसा धृतिरूहे ॥ ४० ॥

किमिति ॥ पुनर्नायिकाह—तर्हि गतेन तं प्रति गमनेन किम् । कोऽर्थ इत्यर्थः । कुतः । उपैतुं गन्तुं न युक्तं हि । पुनः सख्याह—हे सुभगमानिनि सौन्दर्यमानिनि । सुभगमात्मानं मन्यत इति ॥"आत्ममाने खश्च" इति चकाराण्णिनिप्रत्ययः ॥ तस्मिन्प्रिये विषये को मानः । मानो न कर्तव्य इत्यर्थः । यद्वा । नहीत्यादि सखीवाक्यम् । तत्र नहीत्येकं वाक्यम् । तद्युक्तं नहीत्यर्थः । हे सखि । किं तूपैतुं युक्तम् । कुतः । सुभगमानिनि प्रिये को मानः । तादृग्जनस्य दुर्लभत्वादिति भावः । इत्येवंरूपासु योषितां कथासु विषये समेतैः । समीपमागत्याकर्णयद्भिरित्यर्थः । कामिभिर्बहुरसानेकस्वादा धृतिः संतोष ऊह ऊढा ॥ अत्र रीत्योत्सुक्यनिर्वेदाधनेकभावावस्थापरिपूर्णकान्ताकथाकर्णनादुत्तरोत्तरमपूर्वहृदयानन्दनिष्यन्दमानस्यन्दसंदोहबिन्दक्षिप्तार्थः । मायेणात्र मौग्धाः कलहान्तरिताश्च नायिकाः ॥

योषितः पुलकरोधि दधत्या घर्मवारि नवसंगमजन्म ।
कान्तवक्षसि बभूव पतन्त्या मण्डनं लुलितमण्डनतैव ॥ ४१ ॥

योषित इति ॥ पुलकरोधि रोमाञ्चव्यापि नवसंगमेन जन्म यस्य तद्घर्मवारि स्वेदोदकं दधत्या इति सात्त्विकोक्तिः । कान्तवक्षसि पतन्त्यास्त्वौत्सुक्योक्तिः । योषितो

१ भूषणम् ।

Digitized by Google

वा लुलितमण्डनोत्सृष्टमसाधनत्वम् ॥ भावे तल् ॥ सैव मण्डनं बभूव । तादृशक-ऊलाचरेति भावः ॥

शीधुपानविधुरासु निरूढन्मानमाशु शिथिलीकृतलज्जः ।
संगतासु दयितैरुपलेभे कामिनीषु मदनो नु मदो नु ॥ ४२ ॥

शीधिति ॥ शिध्यतेऽनेनेति शीधु पक्वेक्षुरसविकारो मद्यविशेषस्तस्य पानेन विधुरासु विमूढासु । तथा दयितैः संगतासु स्वयमाप्तासु च कामिनीष्वतिमानवतीस्वाशु मानं कोपं निरूढमिवर्तयन् । शिथिलीकृता लज्जा येन स मदनो नु मदो नृपलेभे । लक्ष्यते स्मेत्यर्थः ॥ प्रियसमागमशीधुपानरूपोभयकारणाभावादुभयथा माननिग्रहाय-नुभावसाधारण्याच्च संदेहः । स एवालंकारः ॥

द्वारि चक्षुरधिपाणि कपोलौ जीवितं त्वयि कृतः कलहोऽस्याः ।
कामिनामिति वचः पुनरुक्तं प्रीतये नवनवत्वमियाय ॥ ४३ ॥

द्वारीति ॥ द्वारि त्वदागमनमार्ग एव चक्षुरित्यौत्सुक्योक्तिः । अधिपाणि पाणौ करे कपोलाविति चिन्तोक्तिः । किंबहुना जीवितं त्वयि त्वदधीनम् । त्वां विना न जीवतीत्यर्थः । इति गाढानुरागोक्तिः । अतोऽस्याः कलहो विग्रहः कृत इत्येवं कामि-नां प्रीतये पुनरुक्तं पुनःपुनरुच्यमानं वचो दूतीवाक्यं नवनवत्वं नवप्रकारत्वमपूर्व-वद्भावमियाय ॥ प्रकारार्थे द्विर्भावः । कर्मधारयवद्भावात्सुपो लुक् ॥ कान्तानुराग-प्रकटनात्कामिनः प्रहृष्यन्तीति भावः ॥ कलहान्तरितेयम् ॥

साचि लोचनयुगं नमयन्ती रुन्धती दयितवक्षसि पातम् ।
सुभ्रुवो जनयति स्म विभूषां संगतावुपरराम च लज्जा ॥ ४४ ॥

साचीति ॥ लोचनयुगं साचि तिर्यङ्नमयन्ती प्रिये तिर्यक्पातयन्ती । न तु ह्रियेत्यर्थः । दयितवक्षसि पातं रुन्धतीत्यपि प्रतिबध्नती लज्जा सुभ्रुवो नायिकाया विभूषां शोभां जनयति स्म संगतौ सुरतप्रसङ्गे सत्युपरराम च । एवं यतस्तदा न दूषणमेवेति भावः ॥ " विभाषाकर्मकाद् " इति परस्मैपदम् ॥

सव्यलीकमवधीरितखिन्नं प्रस्थितं सपदि कोपपदेन ।
योषितः सुहृदिव स्म रुणद्धि प्राणनाथमभिवाष्पनिपातः ॥ ४५ ॥

सव्यलीकमिति ॥ सव्यलीकं सापराधमतएवावधीरितोऽवज्ञातः सन् । खिन्नखिन्नम् ॥ " पूर्वकाल- " इत्यादिना तत्पुरुषः ॥ सपदि कोपस्य पदेन व्याजेन प्रस्थितं निर्ग-च्छन्तं प्राणनाथं प्रियं योषितः संबन्ध्यभिवाष्पनिपात आभिमुख्येनाश्रुमोक्षः सु-हृदिव रुणद्धि स्म रुरोध । वाष्पपातस्य मन्युमोक्षलिङ्गतया प्रस्थानप्रतिबन्धकत्वा-

१ अभिवाष्प.

Digitized by Google

त्सुदृदौपम्यम् ॥ इयमधीरा खण्डिता—"ज्ञातेऽन्यासङ्गिनि पतौ खण्डितेर्ष्याकषायिता । अधीराश्रु विमुञ्चन्ती विज्ञेया चात्र नायिका" इति दशरूपके ॥

शङ्कितायै कृतबाष्पनिपातामीर्ष्यया विमुखितां दयिताय ।
मानिनीमभिमुखांहितचित्तां शंसति स्म घनरोमविभेदः ॥ ४६ ॥

शङ्कितायेति ॥ शङ्कितायै दयितायाविश्वस्ताय नायकायेर्ष्यया विमुखितां विमुखीकृताम् । अतएव कृतबाष्पनिपातां मानिनीं घनरोमविभेदः सान्द्रपुलकोदयोऽभिमुखमाहितं चित्तं यया ताम् । निष्कोपामित्यर्थः । शंसति स्म । व्यनक्ति स्मेत्यर्थः । अन्यथा सात्त्विकानुदयादिति भावः ॥ अत्रापि पूर्वोक्तैव नायिका ॥

अथ संभोगशृङ्गारमाह । स भान्तरो बाह्यश्च । तत्र बाह्यरतमाह—

लोलदृष्टि वदनं दयितायाश्चुम्बति प्रियतमे रभसेन ।
व्रीडया सह विनीवि नितम्बादंशुकं शिथिलतामुपपेदे ॥ ४७ ॥

लोलेति ॥ प्रियतमे लोलदृष्टि चञ्चलेक्षणं दयिताया वदनं रभसेन बलात्कारेण चुम्बति सति विनीवि निर्गतबन्धनमंशुकं नितम्बाद्व्रीडया सह शिथिलतामुपपेदे । उभयमपि शिथिलमासीदित्यर्थः ॥ अत्र व्रीडांशुकरूपसंबन्धिभेदमिश्रहृच्छिथिलनरूपशैथिल्यस्यामेदाध्यवसायनिबन्धनातिशयोक्तिमूलसहोक्तिविशेषोऽलंकारः । अतएव व्रीडांशुकौपम्यं च कल्प्यम् । अत्र वात्स्यायनः—"बाह्यमाभ्यन्तरं चेति द्विविधं रतमुच्यते । तत्राद्यं चुम्बनाश्लेषनखदन्तक्षतादिकम् । द्वितीयं स्मरतं साक्षात्कारेण कल्पितम्" इति ॥

ह्रीतया गलितनीवि निरस्यन्नन्तरीयमवलम्बितकाञ्चि ।
मण्डलीकृतपृथुस्तनभारं सस्वजे दयितया हृदयेशः ॥ ४८ ॥

ह्रीतयेति ॥ गलितनीवि गलितबन्धनं तथाप्यवलम्बिता काञ्ची येन तत् । काञ्चीस्रमित्यर्थः । तदन्तरीयमधोंऽशुकम् ॥ "अन्तरीयोपसंव्यानपरिधानान्यधोंऽशुके" इत्यमरः ॥ निरस्यन्नाक्षिपन् । हृदयेशः प्रियो ह्रीतया वस्त्रापगमाल्लज्जितया ॥ ह्रीधातोः कर्तरि क्तः ॥ दयितया मण्डलीकृतो वर्तुलीकृतः पृथुस्तनभारो यस्मिन्कर्मणि तथथा तथा । गाढमित्यर्थः । सस्वजे आश्लिष्टः । प्रियश्लेषः प्रतिबन्धार्थमित्यर्थः ॥

आहता नखपदैः परिरम्भाभ्युचितानि घनदन्तनिपातैः ।
सौकुमार्यगुणसंभृतकीर्तिर्वाम एव सुरतेष्वपि कामः ॥ ४९ ॥

१ स्थित. २ वनितायाः. ३ अभिपेदे. ४ लम्भित.

Digitized by Google

आदृता इति ॥ परिरम्भा आलिङ्गनानि नखपदैर्दन्तभिराहता अभिमताः ॥ "हेतौ" इति तृतीया ॥ तथा चुम्बितानि चुम्बनानि घनदन्तनिपातैर्गाढदन्तक्षतैर्दन्तभिराहतानीति लिङ्गविपरिणामः । सुरतसुखेरीपरकत्वात्सखदन्तक्षतपूर्वकेष्वालिङ्गनचुम्बनेष्वादरः संदृब्ध इत्यर्थः । न तु सुकुमारे कामतन्त्रे कथं पीडाकरेष्वादर इति न वाच्यमित्याह—सौकुमार्येति ॥ सौकुमार्यमेव गुणस्तेन संभृतकीर्तिर्लब्धयशाः कामः सुरतेषु संभोगेष्वपि । न केवलं विमर्दक्षमेष्वित्यपि भावः । वामः क्रूर एव । सुकुमारः काम इति वादमात्रम् । वस्तुतस्तु पीडयन्नेव सुखमावहतीति भावः ॥ सामान्येन विशेषणसमर्थनरूपोऽर्थान्तरन्यासः ॥

अथाभ्यन्तरं रतमाह—

पाणिपल्लवविधूननमन्तः सीत्कृतानि नयनार्धनिमेषाः ।
योषितां रहसि गद्गदवाचामस्रतामुपययुर्मदनस्य ॥ ५० ॥

पाणीति ॥ रहस्येकान्त इति विश्रम्भातिशयोक्तिः । गद्गदवाचां स्खलद्गिरां योषितां संबन्धीनि पाणिपल्लवयोर्विधूननं कम्पनमन्तः सीत्कृतानि सीत्काराः ॥ एतेन कुट्टमिताख्यो भाव उक्तः—"अधरपीडनादौ सुखेऽपि दुःखवदुपचारः कुट्टमितम्" इति लक्षणात् ॥ नयनानामर्धनिमेषा अर्धनिमीलितानि । रहस्येकान्ते गद्गदवाचां योषितामिति विशेषणसामर्थ्यात् । गद्गदवाक्त्वं चेत्येतानि मदनस्यास्रतामुपययुः । अस्रवत्पुंसामुरीपनान्यासक्षित्यर्थः ॥ अत्र सीत्कारार्धनिमेषादिना सुखपारवश्यं व्यज्यते । तदुक्तं रतिरहस्ये—"स्रस्तता वपुषि भीलनं दृशोर्मूर्च्छना च रतिलाभलक्षणम् । श्लेषपेस्खलपनं मुहुर्मुहुः सीत्करोति गतलज्जिताकुला" इति ॥

अथ मधुपानवर्णनमारभते—पातुमित्यादिना ॥

पातुमाहितरतीन्यभिलेषुस्तर्पयन्त्यपुनरुक्तरसानि ।
सस्मितानि वदनानि वधूनां सोत्पलानि च मधूनि युवानः ॥ ५१ ॥

युवान आहितरतीनि वर्धितरागाण्यतएवापुनरुक्तरसानि पुनः पुनः पानेनाप्यपूर्वस्वादान्यतएव तर्पयन्ति तृप्त्युत्पादकानि । अतृप्तिकराणीत्यर्थः । सस्मितानि वधूनां वदनानि सोत्पलानि मधूनि च पातुमभिलेषुरिच्छन्ति स्म ॥ अत्र प्रस्तुतानामेव वदनानां मधूनां च पानक्रियौपम्यस्य गम्यत्वात्केवलं प्राकरणिकविषयतया तुल्ययोगितालंकारः—"प्रस्तुतानां तथान्येषां केवलं तुल्यधर्मतः । औपम्यं गम्यते यत्र सा मता तुल्ययोगिता" इति लक्षणात् ॥

कान्तसंगमपराजितमन्यौ वारुणीरसनशान्तविवादे ।
मानिनीजन उपाहितसंधौ संदधे धनुषि नेषुमनङ्गः ॥ ५२ ॥

Digitized by Google

क्रान्तेति ॥ क्रान्तसंगमेन पराजितमन्यौ अकरोषे । तदपधिकस्वाच्चसंति भावः । किंच वारुणीरसनेन मध्वास्वादेन शान्तो विवादो यावलहादिर्यस्य तस्मिन् । अत उपाहितसंधौ प्रियैः सह कृतसंधाने मानिनीजने विषयेऽनङ्गो धनुषीषुं न संदधे । सिद्धसाध्ये साधनवैयर्थ्यादिति भावः ॥

कुप्यताशु भवतानतचित्ताः कोपितांश्च वरिवस्यत यूनः ।
इत्यनेक उपदेश इव स्म स्राद्यते युवतिभिर्मधुवारः ॥ ५३ ॥

कुप्यतेति ॥ यूनः प्रियान्कुप्यत यूनां कोपं जनयत ॥ अत्र " कुधदुह–"इत्यादिना यूनां संप्रदानत्वे चतुर्थी तस्य यं प्रति कोप इति प्रियमात् । अत्र कोपस्तावत्कृत्रिम इत्याश्वानतचित्ता अनुकूलचित्ता भवत । किंच कोपितान्वरिवस्यत परिचरत ॥ " नमोवरिवश्चित्रङः क्यच् " इति क्यच् । वरिवसः परिचर्यायामित्यर्थे तस्य नियमश्च ॥ इत्येवमनेकोऽनेकप्रकारो य उपदेशः प्रवर्तकवाक्यं संदेश इव मधुवारो मधुपानाद्वृद्धिः ॥ " मधुवारा मधुक्रमाः " इत्यमरः ॥ युवतिभिः स्राद्यते स्म ॥ मधुवारस्य कोपादिकार्यप्रवर्तकत्वसाम्यादुपदेश इवेत्युत्प्रेक्षा ॥ अभियताः खलु प्रवचेष्टा इति भावः ॥

भर्तृभिः प्रणयसंभ्रमदत्तां वारुणीमतिरसां रसयित्वा ।
ह्रीविमोहविरहादुपलेभे पाटवं नु हृदयं नु वधूभिः ॥ ५४ ॥

भर्तृभिरिति ॥ भर्तृभिः प्रणयसंभ्रमाभ्यां प्रेमादराभ्यां दत्ताम् ॥ " संभ्रमः साध्वसेऽपि स्यात्संवेगादरयोरपि " इति विश्वः ॥ अतएवातिरसामधिकस्वादां वारुणीं वरुणात्मजाम् ॥ " सुरा हलिप्रिया हाला परिस्रुद्वरुणात्मजा " इत्यमरः ॥ रसयित्वास्वाद्य वधूभिर्ह्रीविमोहविरहान्मदेन लज्जाजाड्यापगमाद्धेतोः पाटवं नु हृदयं नु ज्ञानविशेषं नूपलेभे । अतएव हृदयस्य तत्कार्यज्ञानसामर्थ्यादृदयमेव प्रागसत्प्रथमाद्रूप्यमिति संदेहः । अन्यथा कथं प्रियं प्रति वक्रोक्तिपर्यायेषु महाचरिति भावः ॥ संदेहालंकारः ॥

स्वादितः स्वयमधैधितमानं लम्भितः प्रियतमैः सह पीतः ।
आसवः प्रतिपदं प्रमदानां नैकरूपरसतामिव भेजे ॥ ५५ ॥

स्वादित इति ॥ स्वयं स्वादितः । आदौ स्वयमेव पीतोऽथानन्तरं प्रियतमैरेधितमानं वर्धितबहुसंमानं यथा तथा लम्भितो ग्राहितः । स्वदत्तेन प्रापित इत्यर्थः । ततः प्रियतमैः सह पीतः । युगपदेकपात्रेण पीत इत्यर्थः । आसवः प्रमदानां प्रतिपदं प्रतिक्षणं नैकरूपरसतामनेकविधस्वादुत्वम् ॥ नञर्थस्य नशब्दस्य नृप्विति समासः ॥ नञ्समासे सलोपः स्यात् । भेज इव भावेन । भावेनोपचारविक्षेपाद्भोज्येषु

Digitized by Google

रसविशेषः स्यादिति भावः ॥ आस्वादनादिपदार्थानामनेकरसतामाश्रित्येतुत्वात्काव्यलिङ्गं तावदेकं स्वादनादीनामनेकधर्माणामेकस्मिन्नेव सर्वक्रमेण संबन्धात्पर्यायभेदश्च तयोश्च संसृष्टयोरनेकरसत्वोत्प्रेक्षाबीजत्वाश्रया सहोक्तिभावेन संकरः ॥

भ्रूविलाससुभगाननुकर्तुं विभ्रमानिव वधूनयनानाम् ।
आददे मृदुविलोलपलाशैरुत्पलैश्चषकवीचिषु कम्पः ॥ ५६ ॥

भ्रूविलासेति ॥ भ्रूविलासैः सुभगान्सुन्दरान्वधूनयनानां विभ्रमाननुकर्तुं तैरात्मानं समीकर्तुमिवेति फलोत्प्रेक्षा । मृदुविलोलपलाशैरीषच्चञ्चलदलैरुत्पलैश्चषकेषु या वीचयो मधूर्मयस्तासु यः कम्पः स आददे स्वीकृतः । न तु स्वकम्पस्वत्व विलोलविशेषणेनैवोक्तत्वात्तत्स्वीकारश्च तयोग एव । पूर्वं नेत्रभावसाम्यभाजामुत्पलानां कम्पमानवीचियोगात्सुभ्रूविलासनेत्रसाम्यं जातमित्यर्थः ॥

ओष्ठपल्लवविदंशरुचीनां हृद्यतामुपययौ रमणानाम् ।
फुल्ललोचनविनीलसरोजैरङ्गनास्यचषकैर्मधुवारः ॥ ५७ ॥

ओष्ठेति ॥ ओष्ठ एव पल्लवस्तस्य विदंशे दंशने रुचिरभिलाषो येषां तेषाम् । मुखसुरापानमिषेणाधरं पिपासतामित्यर्थः । रमणानां फुल्लानि लोचनान्येव विनीलसरोजानि येषु तैः । अङ्गनास्यान्येव चषकाणि पानपात्राणि ॥ "चषकोऽस्त्री पानपात्रम्" इत्यमरः ॥ तैर्मधुवारो मधुपानाद्रुचिर्हृद्यतां हृदयप्रियतामुपययौ ॥ "हृदयस्य प्रियः" इति यत्प्रत्ययः । "हृदयस्य हृल्लेखयदण्लास–" इति हृद्भावः ॥ रमणविशेषणार्थहेतुककाव्यलिङ्गसंकीर्णरूपकालंकारः ॥

प्राप्यते गुणवतापि गुणानां व्यक्तमाश्रयवशेन विशेषः ।
तत्तथा हि दयितानननद्धं व्यानशे मधु रसातिशयेन ॥ ५८ ॥

प्राप्यत इति ॥ गुणवतापाश्रयवशेन गुणानां विशेषः प्रकर्षः प्राप्यते व्यक्तम् । तत्तथा । यदुक्तं तथैवेत्यर्थः । हि यस्मादयितायाः आननेन ॥ करणेन ॥ दत्तं मधु रसातिशयेन स्वादुमकर्षेण ॥ कर्त्रा ॥ व्यानशे व्याप्तम् ॥ विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥

वीक्ष्य रत्नचषकेष्वतिरिक्तां कान्तदन्तपदमण्डनलक्ष्मीम् ।
जह्निरे बहुमताः प्रमदानामोष्ठयावकनुदो मधुवाराः ॥ ५९ ॥

वीक्ष्येति ॥ रत्नचषकेषु स्फटिकादिमणिपात्रेष्वतिरिक्तां यावकापनमात्पूर्वाभ्यधिकां कान्तस्य यदन्तपदमण्डनं तस्य लक्ष्मीं शोभाम् । प्रतिबिम्बितामिति शेषः । वीक्षणोद्यावकनुदोऽपरक्तात्तारागहारिणो मधुवारा मधुपानाभ्यासाः प्रमदानां ब-

Digitized by Google

द्रुमता अभिमताः ॥ वर्तमाने क्तः । तद्योगात्षष्ठी ॥ जज्ञिरे जाताः । तेषां प्रियानुरागचिह्नमकाण्डकत्वादिति भावः ॥

मधुपानाद्विलोचनेषु रागोत्पत्तिरधरेभ्यश्च लाक्षारागनिदर्शिर्मध्याननयोश्चान्योन्यगन्धसंक्रान्तिरिति स्थिते सत्युत्प्रेक्षते—

लोचनाधरकृताहृतरागा वासिताननविशेषितगन्धा ।
वारुणी परगुणात्मगुणानां व्यत्ययं विनिमयं नु वितेने ॥ ६० ॥

लोचनेति ॥ लोचने चाधरश्च लोचनाधरम् ॥ "समुद्राभ्राद्धः—" इति व्यभिचारज्ञापकान्नाधरशब्दस्य पूर्वनिपातः । कृतश्चासावाहृतश्चेति विशेषणसमासः ॥ लोचनाधरस्य कृताहृतो रागो यया सा तथोक्ता । लोचनयोः कृतरागाधरादासन्नाहृतरागा चेत्यर्थः ॥ बहुव्याश्रयसंबन्धात्सामान्यस्य योग्यविशेषणपर्यवसाननियमेनाधिकरणापादानार्थनायोराक्षेपात् । तथा चाधरलोचनपरगुणयो रागतद्विरहयोः स्थानविपरीतवृत्ति कृतवतीत्यर्थः । तथा वासितेन स्वगन्धसंक्रान्तिसुरभितेनाननेन विशेषितोऽतिशयितो गन्धो यस्याः सा । यद्वा । वासितानना वासनार्थादाननेनैव विशेषितगन्धा चेति कृतबहुव्रीहिर्विशेषणसमासः । उभयथाप्याननसंक्रान्तस्वगन्धा स्वसंक्रान्ताननगन्धा चेत्यर्थः । एवंभूता वारुणी मदिरा परगुणात्मगुणानां परयोर्लोचनाधरयोर्गुणौ च परस्याननस्य गुण आत्मनो वारुण्या गुणश्च परगुणात्मगुणास्तेषां परगुणानामात्मगुणानां व्यत्ययं नु विनिमयं नु वितेने विस्तारयामास ॥ चित्तेन प्रायादिकी वस्तुपरावृत्तिर्व्यत्ययः । बुद्धिपूर्वा तु वस्तुपरिवृत्तावेव विनिमयः । अत्र तन्त्रोच्चारतस्य परगुणशब्दस्यादृत्या परगुणौ च परगुणात्मगुणौ चेति विग्रहः कथंचिदगत्या सोढव्यः । उपमानपूर्वपदबहुव्रीहिवत् । तथा चायमर्थः । परगुणयोरधरलोचनगुणयोरागतद्विरहयोर्व्यत्ययं नु विनिमयं नु वितेने । तथा परगुणात्मगुणयोराननगन्धात्मगन्धयोश्च व्यत्ययं नु विनिमयं नु वितेने । अन्यथा कथमन्याक्षेपान्यधर्मोपलम्भः संभवतीति भावः । अत्र लोचनाधररागयोस्तदभावयोर्वा भेदेऽप्यभेदाध्यवसायादेकत्ववाचो युक्तिः । तस्माच्चन्द्रोत्तिश्चयोक्तयनुप्राणिता चेयं व्यत्ययविनिमययोरन्यतरकरणोत्प्रेक्षेति संक्षेपः । सा च प्रतीयमाना व्यञ्जकाभावयोगात् । नुशब्दस्तु संशये ॥

तुल्यरूपमसितोत्पलमक्ष्णोः कर्णगं निरुपकारि विदित्वा ।
योषितः सुहृदिव प्रविभेजे लम्भितेक्षणरुचिर्मदरागः ॥ ६१ ॥

तुल्येति ॥ अक्ष्णोस्तुल्यरूपमसितोत्पलमिति योषितः कर्णगं कर्णावतंसीकृतमसितोत्पलं निरुपकार्युपकारकं विदित्वा ज्ञात्वा । तत्कार्यशोभायाः कर्णान्तविभ्रान्तेर्नाक्ष्णोरेव कृतत्वादिति भावः । मदरागः सुहृदिवोत्पलस्य बन्धुरिव । अनिष्टकारक-

Digitized by Google

त्वादिति भावः। लम्भितेक्षणरुचिराहृतनयनकान्तिः सन्। मविभेजे वर्णान्तरापादनेन प्रविभक्तवान्। अवैलक्षण्यकरादक्ष्णो व्यावर्तयामास। ततो विच्छित्तिकरत्वादिति भावः॥

क्षीणयावकरसोऽप्यतिपानैः कान्तदन्तपदसंभृतशोभः।
आययावतितरामिव वध्वाः सान्द्रतामधरपल्लवरागः॥ ६२॥

क्षीणेति॥ अतिपानैः क्षीणयावकरसः क्षीणलाक्षारागोऽपि कान्तस्य दयितस्य दन्तपदेन दन्तक्षतेन संभृता शोभा यस्य सः। वध्वा अधरपल्लवरागोऽतितरामतिमात्रम्॥ अतिशब्दाच्चरप्रत्यये "किमेत्तिङव्यय–" इत्यादिनाम्प्रत्ययः। "तद्धितश्चासर्वविभक्तिः" इत्यव्ययसंज्ञा॥ सान्द्रतां घनत्वमापयाविव। मियोपभोगचिह्नमण्डितानां कामिन्यवयवानां किमन्यैर्मण्डनैरिति भावः॥ तत्र क्षीणस्यापि सान्द्रतेति विरोधात्कान्तदन्तेत्यादिविशेषणगणना सान्द्रत्वे हेतूकृत्या काव्यलिङ्गं तत्संकीर्णा चोत्प्रेक्षा॥

रागकान्तनयनेषु नितान्तं विद्रुमारुणकपोलतलेषु।
सर्वगापि ददृशे वनितानां दर्पणेष्विव मुखेषु मदश्रीः॥ ६३॥

रागेति॥ वनितानां सर्वगापि सर्वाङ्गगतापि॥ "अन्तात्यन्त–" इत्यादिना डः॥ मदश्री रागेण कान्तानि नयनानि येषु तेषु विद्रुमवदरुणानि कपोलतलानि येषु तेषु मुखेषु दर्पणेष्विव नितान्तं ददृशे। तेषां नयनदिनैर्मद्येन रागाभिव्यक्तिसंभवादिति भावः॥ अत्र मदश्रीः सर्वगतापि मुखेष्वेव ददृश इति विरोधः। तस्य मुखविशेषणैः समाधानात्काव्यलिङ्गानुप्राणितो विरोधवदाभासोऽलंकारः। स चोपमया संसृज्यते॥

वक्रकोपविकृतीरपि रामाश्चारुताभिमततामुपनिन्ये।
वश्यतां मधुमदो दयितानामात्मवर्गहितमिच्छति सर्वः॥ ६४॥

वक्रेति॥ वक्रा कोपेन विकृतिर्याभिस्तास्तथाभूता अपि रामाः॥ कर्म॥ चारुता तासां सौन्दर्यम्॥ कर्मी॥ अभिमततां प्रियवाल्लभ्यमुपनिन्ये। सौन्दर्ये हि विकृतिमपि रोचयत इति भावः। मधुमदो दयितानां वश्यतां विधेयत्वमुपनिन्ये। तथाहि। सर्वं आत्मवर्गहितमिच्छति। अतश्चारुता स्त्रीत्वात्स्त्रीणामुपकार। मधुमदस्तु पुंस्त्वात्पुंसामिति युक्तमिदमर्थः॥ अत्र विकृता अप्यभिमताः कुपिता अपि वश्या इति विरोधस्य चारुतामदाभ्यां समाधानादुभयथापि विरोधाभासो भवन्नर्थान्तरन्यासेन संसृज्यते॥

१ आर्. २ लम्भित.

Digitized by Google

वाससां शिथिलतामुपनाभि ह्रीनिरासमपदे कुपितानि ।
योषितां विदधती गुणपक्षे निर्ममार्ज मदिरा वचनीयम् ॥ ६५ ॥

वाससामिति ॥ उपनाभि नाभिसमीपे वाससां शिथिलतां ह्रीनिरासं लज्जात्यागमपदे कुपितान्यस्थानकोपांश्च गुणपक्षे गुणकोटौ विदधती निवेशयन्ती । दोषानप्येतान्गुणान्कुर्वतीत्यर्थः । मदिरापि योषितां वचनीयम् " न नाभिं दर्शयेत् " इति शास्त्रनिषिद्धाचरणनिन्दां निर्ममार्ज । तथा दोषाणामपि वस्त्रशैथिल्यादीनां तदानीं गुणत्वान्न कश्चिद्वचनीयावकाश इत्यर्थः ॥

भर्तृष्वुपसखि निक्षिपतीनामात्मनो मधुमदोद्यमितानाम् ।
व्रीडया विफलया वनितानां न स्थितं न विगतं हृदयेषु ॥ ६६ ॥

भर्तृष्विति ॥ उपसखि सखीसमीपे ॥ समीपार्थेऽव्ययीभावः ॥ आत्मनः स्वदेहान् ॥ " आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि " इति वैजयन्ती ॥ भर्तृषु निक्षिपतीनां निपातयन्तीनाम् । भर्तृणामुपरि पतन्तीनामित्यर्थः ॥ " आच्छीनद्योर्नुम् " इति विकल्पान्नुमभावः ॥ कुतः । मधुमदेनोद्यमितानां प्रेरितानाम् । न तु स्वेच्छयेति भावः । वनितानामनुरक्तस्त्रीणाम् ॥ " वनिता जनितात्यर्थानुरागायां च योषिति " इति विश्वः ॥ हृदयेषु विफलया । अनुचिताचरणादिति भावः । व्रीडया न स्थितं न विगतम् । वैफल्यात्तस्या मदोपाधिकत्वादिति भावः । अतएव नोभयनिषेधविरोधः ॥

रुन्धती नयनवाक्यविकाशं सादितोभयकरा परिरम्भे ।
व्रीडितस्य ललितं युवतीनां क्षीवता बहुगुणैरनुजह्रे ॥ ६७ ॥

रुन्धतीति ॥ नयनानां वाक्यानां च विकाशं प्रागल्भ्यं रुन्धती प्रतिबध्नती । तथा परिरम्भ आलिङ्गने सादितौ स्तम्भितावुभौ करौ यया सा युवतीनां संबन्धिनी क्षीवता मत्तता ॥ कर्तरि क्तः । अनुपसर्गात् "फुल्लक्षीवकृशोल्लाघाः" इति निपातनात्साधुः ॥ क्षीवा मत्ता तस्या भावः क्षीवता ॥ स्वतस्त्रीगुणवचनस्य पुंवद्भावो वक्तव्यः ॥ बहुगुणैर्दृष्टिसंकोचादिभिर्व्रीडितस्य व्रीडायाः ॥ भावे क्तः ॥ ललितं विलासमनुजह्रेऽनुचक्रे ॥ कर्तरि लिट् ॥ व्रीडाकार्यकरत्वाद्व्रीडानुकरणमित्युपमालंकारः ॥

योषिदुद्धतमनोभवरागा मानवत्यपि ययौ दयिताङ्कम् ।
कारयत्यनिभृता गुणदोषे वारुणी खलु रहस्यविभेदम् ॥ ६८ ॥

१ स्फुटमरी. २ ह्रदयेभ्यः.

Digitized by Google

योषिदिति ॥ उद्धत उत्कटो मनोभवेन यो रागः स यस्याः सा योषिन्मानवत्यपि दयितस्याङ्गं ययौ । यतो मानाद्रागो बलीयानिति भावः । लाघवदोषं परिहरति—कारयतीति ॥ अनिभृता चपला । न कार्यकारिणीत्यर्थः । वारुणी मदिरा गुणेषु दोषेषु च विषये ॥ सर्वोऽपि हन्द्वो विभाषयैकवद्भवति ॥ रहस्यविभेदं रहस्यभङ्गं कारयति खलु । वक्रीकृतादितार्थात् गुणदोषौ प्रकाशयतीत्यर्थः । यतो निगूढरागप्रकटनं प्रकटमानस्यानर्थ्यं प्रमदाया न लाघवमावहति । अबुद्धिपूर्वकत्वादिति भावः॥

आहिते नु मधुना मधुरत्वे चेष्टितस्य गमिते नु विकाशम् ।
आबभौ नव इवोद्धतरागः कामिनीष्ववसरः कुसुमेषोः ॥ ६९ ॥

आहित इति ॥ मधुना मद्येन चेष्टितस्य व्यापारस्य मधुरत्वे माधुर्ये आहिते नु आगतस्येव मनोहरत्वे संभवत्युत्पादिते वा । विकाशं गमिते नु प्राक्तनस्येव माधुर्ये प्रकर्षं प्रापिते वा । उद्धतराग उद्रिक्तरागः । अतएव कुसुमेषोः कामिनीष्ववसरः प्रवेशो नव इवाबभौ । नित्यसंनिहितोऽपि मदनः कामिनीषु मदकृततात्कालिकचेष्टामाधुर्योद्रागोद्रेके सत्यपूर्ववदुदीक्षितोऽभूदित्यर्थः ॥ संशयानुप्राणितेयमुत्प्रेक्षा ॥

मा गमन्मदविमूढधियो नः प्रोज्झ्य रन्तुमिति शङ्कितनाथाः ।
योषितो न मदिरां भृशमीषुः प्रेम पश्यति भयान्यपदेऽपि ॥७०॥

मा गमदिति ॥ शङ्कितनाथा अविश्वस्तपुरुषा योषितो मदेन विमूढधियः स्तब्धबुद्धयो नोऽस्मान्प्रोज्झ्य विहाय ॥ मपूर्वादुज्झतेः समासेऽनप्पूर्वे क्त्वो ल्यप् ॥ रन्तुं मा गमन् गच्छन्त्विति। मनीषयेति शेषः॥ गमेर्माङि लुङ् । "न माङ्योगे" इत्यडागममतिषेधः ॥ मदिरां भृशमतिमात्रं नेषुर्नेच्छन्ति स्म । किंतु भर्तृवियोगभयादीषदेव पपुरित्यर्थः । तथाहि । प्रेम क्रोडोऽपदेऽस्थानेऽपि भयान्यनिष्टानि पश्यत्युत्प्रेक्षते । शङ्कत इति यावत् ॥ शङ्काहेतौ प्रेम्णि कर्तृत्वोपचारः ॥

चित्तनिर्वृतिविधायि विविक्तं मन्मथो मधुमदः शशिभासः ।
संनमश्च दयितैः स्म नयन्ति प्रेम कामपि भुवं प्रमदानाम् ॥ ७१ ॥

चित्तेति ॥ चित्तस्य निर्वृतिविधायि सुखकरं विविक्तं रहः ॥ "विविक्तं रहसि स्वतम्" इति विश्वः ॥ मन्मथो मधुमदो मद्यमदः शशिभासश्चन्द्रिका दयितैः सह संनमश्च ॥ "तृतीया—" इति निर्देशात्सहशब्दार्थयोगेऽपि सहार्थे तृतीया ॥ एतानि प्रमदानां प्रेम वियोगासहत्वावस्थासंभोगं कामपि भुवं कांचिदवस्थां नयन्ति स्म । रत्नावस्थामप्यतिक्रम्य शृङ्गारावस्थां क्रीडामयीं निम्युरित्यर्थः ॥ "प्रेमाभिलाषो रागश्च स्नेहः प्रेमरतिस्तथा । शृङ्गारश्चेति संयोगः सप्तावस्थाः प्रकीर्तितः" इत्युक्तं रत्नरत्नाकरे । "प्रेमा विरहा रत्नेषु तथिलाप्यभिलाषकः । रागस्तत्सङ्ग-

Digitized by Google

बुद्धिः स्यात्स्नेहस्तत्प्रवणक्रिया । तद्वियोगासहं प्रेम रतिस्तत्सहवर्तनम् । शृङ्गारस्तत्सर्वं क्रीडा संभोगः सप्तधा क्रमः" इति ॥

क्रीडावस्थामाह—

धार्ष्ट्यलङ्घितयथोचितभूमौ निर्दयं विलुलितालकमाल्ये ।
मानिनीरतिविधौ कुसुमेषुर्मत्तमत्त इव विभ्रममाप ॥ ७२ ॥

धार्ष्ट्येति ॥ धार्ष्ट्येन प्रागल्भ्येन लङ्घिता यथोचिता योग्या भूमिर्मर्यादा यस्मिंस्तथोक्ते । चुम्बनताडनमणितसीत्कारपुरुषायितादौ स्वयमुच्छृङ्खलवृत्तिरिति भावः । निर्दयं यथा तथा विलुलितान्याकर्षणाकुलितान्यलकमाल्यानि यस्मिंस्तस्मिन्मानिनीरतिविधौ स्त्रीसुरते कुसुमेषुः कामः मत्तमत्तो मत्तप्रकार इव विभ्रमं विजृम्भणमाप आप । मत्तः किं न करोतीति भावः ॥ कारयितरि कर्तृत्वोपचारादुत्प्रेक्षा ॥

शीधुपानविधुरेषु वधूनां निघ्नतामुपगतेषु वपुःषु ।
ईहितं रतिरसाहितभावं वीतलक्ष्यमपि कामिषु रेजे ॥ ७३ ॥

शीध्विति ॥ शीधुपानेन मद्यपानेन विधुरेषु विह्वलेषु ॥ "मरेयमासवः शीधुः" इत्यमरः ॥ अतएव वपुःष्वङ्गेषु निघ्नतां प्रियपराधीनतामुपगतेषु सत्सु ॥ "अधीनो निघ्न आयत्तः" इत्यमरः ॥ वधूनां संबन्धि रतिरसे सुरतरसास्वाद आहितभावं दत्तचित्तं कामिषु विषय ईहितं चुम्बनताडनादिचेष्टितं वीतलक्ष्यं निर्विषयम् । अस्थानकृतमपीत्यर्थः । रेजे । रागिणां स्खलितमपि शोभत इति भावः ॥ विरोधालंकारः ॥

अन्योन्यरक्तमनसामथ विभ्रतीनां
चेतोभुवो हरिसखाप्सरसां निदेशम् ।
वैबोधिकध्वनिविभावितपश्चिमार्धा
सा संहृतेव परिवृत्तिमियाय रात्रिः ॥ ७४ ॥

अन्योन्येति ॥ अथ हरिसखा इन्द्रसचिवा गन्धर्वास्तेषामप्सरसां चान्योन्यरक्तमनसां परस्परानुरक्तचित्तानां चेतोभुवः कामस्य निदेशमाज्ञां विभ्रतीनां स्मरविधेयानाम् । तासु रममाणास्वेवेत्यर्थः ॥ "षष्ठी चानादरे" इति षष्ठी ॥ विबोधनं शीलमेषां ते वैबोधिका वैतालिकाः ॥ "शीलम्" इति ठक् ॥ तेषां ध्वनिभिर्मङ्गलरवैर्विभावितोऽभ्यूहितो ज्ञातः पश्चिमार्धश्चरमभागो यस्याः सा तथोक्ता सा रात्रिः संहृता संक्षिप्तेवेत्युत्प्रेक्षा । सुखिनां भूयानपि कालो लघीयानिव भवतीति भावः । परिवृत्तिं विवृत्तिमियाय । प्रभातकल्पाभूदित्यर्थः ॥

१ सुरसखा.

Digitized by Google

निद्राविनोदितनितान्तरतिक्लमाना-
मायामिमङ्गलनिनादविबोधितानाम् ।
रामासु भाविविरहाकुलितासु यूनां
तत्पूर्वतामिव समादधिरे रतानि ॥ ७५ ॥

निद्रेति ॥ निद्रया विनोदितोऽपनीतो नितान्तमत्यर्थं यो रत्याः क्लमः स येषां तेषा-मायामिभिरायामवद्भिर्दीर्घैर्मङ्गलनिनादैर्वैबोधिकध्वनिभिर्विबोधितानां यूनां रामा-सु ॥ "सुन्दरी रमणी रामा" इत्यमरः ॥ भाविविरहेणाकुलितासु सतीषु रतानि । तान्येव पूर्वाणि मथमानि तत्पूर्वाणि तेषां भावस्तत्पूर्वता ताम् ॥ भावे तलमित्यर्थः ॥ समादधिरे भाषुरिवेत्युत्प्रेक्षा । आद्यसुरतवदादरात्मवर्तन्त इत्यर्थः । यदुत्तरकालं दुर्लभं तदतितृष्णयानुभूयत इत्यर्थः ॥

कान्ताजनं सुरतखेदनिमीलिताक्षं
संवाहितुं समुपयानिव मन्दमन्दम् ।
हर्म्येषु माल्यमदिरापरिभोगगन्धा-
नाविश्चकार रजनीपरिवृत्तिवायुः ॥ ७६ ॥

कान्तेति ॥ सुरतखेदेन निमीलिताक्ष्णीव येन तं कान्ताजनं स्त्रीसमूहं संवा-हितुं सेवितुमिव । खेदापनोदार्थमङ्गमर्दनं कर्तुमिवेत्यर्थः ॥ " संवाहनं बाहनेऽपि न-रादेरङ्गमर्दने " इति विश्वः ॥ " वाह मयत्ने " इति धातोरण्यन्तात्सुमुन् । अन्यथा णिन्ग्रहणे संवाहयितुमिति स्यात् ॥ मन्दमन्दं मन्दमकारम् ॥ "मकारे गुणवचनस्य" इति द्विर्भावे कर्मधारयवद्भावात्सुपो लुक् ॥ समुपयान्संवान्रजनीपरिवृत्तिवायुर्नि-श्वासानमरुत् । हर्म्येषु माल्यानि च मदिरा च परिभोगो विमर्दश्च तेषां गन्धाना-विश्चकार । बहिः प्रसर्पयामासेत्यर्थः ॥ अत्र संवाहितुमिवेत्युत्प्रेक्षा । माल्यगुणमू-कत्वाद्गुणनिमित्तक्रियाफलोत्प्रेक्षा ॥

आमोदवासितचलाधरपल्लवेषु
निद्राकषायितविपाटललोचनेषु ।
व्यासृष्टपत्रतिलकेषु विलासिनीनां
शोभां बबन्ध वदनेषु मदावशेषः ॥ ७७ ॥

आमोदेति ॥ आमोदेन मथनगन्धेन वासिताः सुरभिताश्चला दष्टमुक्तत्वात्स्फुर-

१ मदस्य शेषः.

Digitized by Google

न्तश्चाधरपल्लवा येषु तेषु निद्रया कषायितान्यपटूकृतानि विपाटलानि लोचनानि येषु तेषु ॥ "कषायस्तुवरे न स्त्री निर्यासे रञ्जकादिके । सुरभावपटौ रक्ते सुन्दरे लवणेऽपि च" इति केशवः ॥ म्यासृष्टानि मसृष्टानि पत्राणि तिलकाश्च येषां तेषु विलासिनीनां वदनेषु मदावशेषः शोभां ववन्ध । मण्डनान्तरापाये मदशेष एव मण्डनं वभूवेत्यर्थः । स्त्रीणां मद एव विभूषणमिति भावः ॥

गतवति नखलेखालक्ष्यतामङ्गरागे
समददयितपीतातास्रविम्बाधराणाम् ।
विरहविधुरमिष्टा सत्सखीवाङ्गनानां
हृदयमवललम्बे रात्रिसंभोगलक्ष्मीः ॥ ७८ ॥

गतवतीति ॥ अङ्गरागेऽङ्गविलेपने नखलेखासु नखपदेषु लक्ष्यतां दृश्यतां गतवति सति । विमर्दाच्चन्मात्रावशेषे सतीत्यर्थः । किं च बिम्बतुल्या अधरा बिम्बाधराः ॥ "शाकपार्थिवादित्वान्मध्यमपदलोपीसमानाधिकरणसमासः" इति वामनः ॥ समदैर्दयितैः पीताः पीडिता अतएवातिपीडनादातास्रा आसमन्ताद्रक्ता बिम्बाधरा यासां तासामङ्गनानां संबन्धि विरहेणातिरिक्तेन वियोगेन विधुरं विह्वलं हृदयम् । रात्रिसंभोगलक्ष्मीः । नखपदादिशोभेत्यर्थः । इष्टा सा सत्सखीव निपुणसहचरीवावललम्बे धारयामास । प्रियसंभोगचिह्नशोभा स्पृहा बभूवेत्यर्थः । प्रियोपभोगचिह्नशोभावलोकनलालसाः कथं विरहं सहन्त इत्यर्थः ॥ श्रुतिपूर्णोपमालंकारः ॥ मालिनीवृत्तम् । लक्षणं तूक्तम् ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथसमाख्यया व्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये सुरसुन्दरीसंभोगो नाम नवमः सर्गः ।

दशमः सर्गः ।

अथागन्तुकसहजशोभासंपन्नतया समग्रसाधनाः स्त्रियो मुनिमनःप्रलोभनार्थं माल्यनिस्याह—

अथ परिमलजामवाप्य लक्ष्मीमवयवदीपितमण्डनश्रियस्ताः ।
वसतिमभिविहाय रम्यहावाः सुरपतिसूनुविलोभनाय जग्मुः ॥ १ ॥

अथेति ॥ अथ प्रभाते परिमलजां संभोगसंभूतां लक्ष्मीं शोभामवाप्य ॥ "संभोगः

१ विम्बाधरोष्ठयाः. २ अङ्गनावाः.

Digitized by Google

स्थात्परिमले" इति वैजयन्ती ॥ संभोगादिस्त्रियः शोभन्त इति भावः । एतेनागन्तुकशोभासंपत्तिरुक्ता । अतएव सुरतादिवर्णनस्य मस्तुतोपयोगित्वं चोक्तम् ॥ अथ सहजशोभासंपत्तिमाह—अवयवेति ॥ अवयवैः स्तनादिभिर्दीपिता मण्डिता च मण्डनश्रीः प्रसाधनशोभा याभिस्ताः । रम्यहावा मनोहरविलासास्ताः स्त्रियः ॥ "हावो विलासश्चेष्टायाम्" इति विश्वः ॥ वसति शिविरमभिविहाय सर्वतस्त्यक्ता सुरपतिसुनोरर्जुनस्य विलोभनाय जग्मुः ॥ अवयवदीपकतया प्रसिद्धस्य मण्डनस्य तदीप्यत्वासंबन्धेऽपि संबन्धाभिधानादवयवसौन्दर्यातिशयद्योतनार्थत्वादतिशयोक्तिरलंकारः ॥ अस्मिन्सर्गे पुष्पिताग्राहृत्तम्—"अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा" इति लक्षणात् ॥

द्रुतपदमभियातुमिच्छतीनां गगनपरिक्रमलाघवेन तासाम् ।
अवनिषु चरणैः पृथुस्तनीनामलघुनितम्बतया चिरं निषेदे ॥ २ ॥

द्रुतेति ॥ गगनपरिक्रमलाघवेन गगनगमनवेगेन द्रुतपदं यथा तथाभियातुं गन्तुमिच्छतीनाम् । किं च । पृथुस्तनीनां तासामप्सरसाम् । किं च । अलघुनितम्बतया न लघवो नितम्बा यासां तासां भावस्तत्ता तया चरणैरवनिषु चिरं निषेदे स्थितम् । अभ्यासपाटवेन मनसा स्मरमाणानामपि तासां स्तनजघनभाराच्चरणा नोत्थुरित्यर्थः॥

निहितसरसयावकैर्वभासे चरणतलैः कृतपद्धतिर्वधूनाम् ।
अविरलविततेव शक्रगोपैररुणितनीलतृणोलपा धरित्री ॥ ३ ॥

निहितेति ॥ निहिता आरोपिताः सरसयावकाः सान्द्रलाक्षारागा येषु तैर्वधूनां चरणतलैश्चरणन्यासैः कृतपद्धतिः कृतमार्गरेखा । अतएवारुणिता अरुणीकृता नीलास्तृणोलपास्तृणानि दूर्वादीन्युलपा वल्वजाख्यास्तृणविशेषाश्च यस्याः सा ॥ "उलपा वल्वजाः मोक्षाः" इति हलायुधः । "उलपा उशीरतृणानि" इति क्षीरस्वामी ॥ ब्राह्मणपरिव्राजकवदुलपानां पृथङ्निर्देशः । धरित्री शक्रगोपैरिन्द्रगोपाख्यैः कीटकैः ॥ "इन्द्रगोपस्त्वग्निरजः" इति हैमः ॥ अविरलं निरन्तरं यथा तथा विततेव व्याप्तेवेत्युत्प्रेक्षा । बभासे ॥

ध्वनिरगविवरेषु नूपुराणां पृथुरशनागुणशिञ्जितानुयातः ।
प्रतिरवविततो वनानि चक्रे मुखरसमुत्सुकहंससारसानि ॥ ४ ॥

ध्वनिरिति ॥ अगविवरेषु नगरन्ध्रेषु । गुहास्वित्यर्थः । प्रतिरवैः प्रतिध्वनिभिर्विततः संवृद्धिंगतः पृथुभी रशनागुणानां शिञ्जितैः स्वनितैरनुयातोऽनुगतः । शिञ्जित इति यावत् ॥ अम्भोतेर्वुप्त्यात् । रशनादेश्च ॥ रशना काञ्ची ॥ ताल्व्यशकारसमर्थं जिह्वामूलीयं हु दन्त्यसकारवानिति सिद्धान्तः ॥ "काञ्ची सप्तकी र-

Digitized by Google

शना तथा " इत्यमरः । " स्वनिते वल्लपर्णानां भूषणानां तु सिञ्जितम् " इत्यमरः ॥ नूपुराणां ध्वनिभिर्ध्वानैर्वनानि मुखराः शब्दायमानाः समुत्सुका उत्कण्ठिता हंसाः सारसाश्च येषां तानि चक्रे ॥ अत्र हंसादिमुखरसमुत्सुकीकरणरूपेण वस्तुना तेषां नूपुरादिध्वनौ सादृश्याद्धंससारसान्तरकूजितभ्रान्तिमतीतेर्भ्रान्तिमदलंकारो व्यज्यते ॥

अवचयपरिभोगवन्ति हिंस्रैः सहचरितान्यमृगाणि काननानि ।
अभिदधुरभितो मुनिं वधूभ्यः समुदितसाध्वसविक्लवं च चेतः ॥ ५ ॥

अवचयेति ॥ अवचयः पुष्पफलादिच्छेदनम् । परिभोग उपभोगः । हन्ति हिंसा पातुका व्याघ्रादयः ॥ " शरारुर्पातुको हिंस्रः" इत्यमरः ॥ तैः सहचरिताः सहचरन्तः ॥ कर्तरि क्तः । " मतिबुद्धि–" इत्यादिसूत्रेण चकारात्कीलितादिबहुर्तमानार्थता ॥ अन्ये हिंस्रेतरे मृगा हरिणादयो येषु तानि सहचरितान्यमृगाणि काननानि । तथा समुदितेन साध्वसेन विक्लवं विवशं चेतश्च वधूभ्यः ॥ "क्रियाग्रहणमपि कर्तव्यम्" इति संप्रदानत्वाच्चतुर्थी ॥ अभितो मुनिमभिदधुः । सूचयामासुरित्यर्थः । अवचयादिलिङ्गचतुष्टयेनासङ्गो मुनिरित्यन्वर्थोयमित्यर्थः ॥

नृपतिमुनिपरिग्रहेण सा भूः सुरसचिवाप्सरसां जहार तेजः ।
उपहितपरमप्रभावधाम्नां न हि जयिनां तपसामलङ्घ्यमस्ति ॥ ६ ॥

नृपतिमुनिपरिग्रहेणेति ॥ सा भूर्नृपतिरेव मुनिश्चास्य परिग्रहेणाधिष्ठानेन हेतुना सुरसचिवानां गन्धर्वाणामप्सरसां च तेजो जहार । तदाश्रमप्रवेशादेव निस्तेजस्का अभूवन्नित्यर्थः । ननु कथं मानुषेणामानुषतेजो निरस्तमित्याशङ्क्याह—उपहित आहिते परमे प्रभावधाम्नी सामर्थ्यतेजसी येषां तेषां जयिनां जयनशीलानाम् ॥ " महताम् " इति पाठे महतामुत्कटानाम् ॥ तपसामलङ्घ्यं नास्ति । किमप्यसाध्यं नास्तीति भावः ॥

सचकितमिव विस्मयाकुलाभिः शुचिसिकतास्वतिमानुषाणि ताभिः ।
क्षितिषु ददृशिरे पदानि जिष्णोरुपहितकेतुरथाङ्गलाञ्छनानि ॥ ७ ॥

सचकितमिति ॥ विस्मयाकुलाभिस्ताभिः स्त्रीभिः ॥ कर्मभिः ॥ शुचयः सिकता यासु तासु । पादरेखाभिर्व्यक्तयोर्व्यास्त्वित्यर्थः । क्षितिपूपहितानि विन्यस्तानि केतुरथाङ्गलाञ्छनानि रेखास्वरूपध्वजचक्राण्येव चिह्नानि येषु तान्यतएवातिमानुषाणि जिष्णोरर्जुनस्य पदानि सचकितमिव सभयमिव यथा तथा ददृशिरे दृष्टानि । अद्भुतवस्तुदर्शनाद्भयविस्मयौ भवत इति भावः ॥

Digitized by Google

अतिशयितवनान्तरद्युतीनां फलकुसुमावचयेऽपि तद्विधानाम् ।
ऋतुरिव तरुवीरुधां समृद्ध्या युवतिजनैर्जयते मुनिप्रभावः ॥ ८ ॥

अतिशयितेति ॥ अतिशयितातिक्रान्ता वनान्तराणां द्युतिर्याभिस्तासाम् । कुतः । फलानां कुसुमानां चावचयेऽपि ग्रहणेऽपि सैव विधा प्रकारो यासां तद्विधानाम् । तथैव समग्राणामित्यर्थः । तरूणां वीरुधां च समृद्ध्या लिङ्गेन युवतिजनैर्मुनिप्रभावो ऋतुरिव जयते निश्चितः । कारणतयेति शेषः ॥ उपमालंकारः ॥

मुदितकिसलयः सुराङ्गनानां ससलिलवल्कलभारभुग्नशाखः ।
बहुमतिमधिकां ययावशोकः परिजनतापि गुणाय सद्गुणानाम् ॥९॥

मुदितेति ॥ ससलिलमार्द्रं यद्वल्कलं तदेव भारस्तेन भुग्नशाखो नम्रशाखः ॥ "वल्कं वल्कलमस्त्रियाम्" इत्यमरः ॥ अतएव मुदितकिसलयो विलुलितपल्लवः ॥ "क्वचिन्न" इति प्रतिषेधान्न मुदेर्गुणः ॥ अशोको दुःखविशेषः सुराङ्गनानामप्सरसां संबन्धिनीमधिकां बहुमतिं तत्कर्तृकसंमानं सज्जनसेवी धन्योऽयमिति ययौ प्राप । ननु सेवकेषु का श्लाघेत्यत्राह—परीति ॥ सद्गुणानां महतां परिजनताप्यनुचरत्वमपि ॥ भावे तल् ॥ गुणायोत्कर्षाय । भवतीति शेषः । एतेन तासां मुनेः प्रभावदर्शनादेव पारवश्यं गम्यते ॥

यमनियमकृशीकृतस्थिराङ्गः परिददृशे विधृतायुधः स ताभिः ।
अनुपमशमदीप्ततागरीयान्कृतपदपङ्क्तिरथर्वणेव वेदः ॥ १० ॥

यमेति ॥ यमो देशकालाद्यनपेक्षया शुद्धिहेतुरहिंसादिः । नियमस्तदपेक्षया शुद्धिहेतुस्तपःस्वाध्यायादिः । ताभ्यां कृशीकृतान्यपि स्थिराणि दृढान्यङ्गानि यस्य सः । विधृतायुधो धृतशस्त्रोऽतएव तपःक्षात्रयुक्तः सोऽर्जुनः शमः शान्तिरभ्युदयकाण्डे दीप्ततोग्रतामिचारकाण्डे ताभ्यामनुपमाभ्यां गरीयानुद्ग्रः । अथर्वणा वशिष्ठेन कृता रचिता पदानां पङ्क्तिरानुपूर्वी यस्य स वेदः । चतुर्थवेद इत्यर्थः । अथर्वणस्तु मन्त्रोद्गारो वशिष्ठकृत इत्यागमः । स इव ताभिः स्त्रीभिः परिददृशे दृष्टः ॥

अथ चतुर्भिरमेव विशिनष्टि—ग्रथितैरित्यादिभिः ॥

शशधर इव लोचनाभिरामैर्गगनविसारिभिरंशुभिः परीतः ।
शिखरनिचयमेकसानुसक्था सकलमिवापि दधन्महीधरस्य ॥ ११ ॥

ग्रथितैरित्यत्र इव लोचनाभिरामैराह्लादकरैर्गगनविसारिभिरंशुभिस्तेजोभिः । परीतो व्याप्तोऽम्बरवदेकं सानु सक्थ यस्य सः । एकदेशस्थोऽपीत्यर्थः । महीधरस्येत्यत्रापीव सकलं शिखरनिचयमपि दधदाह्लादयन्निवेत्युत्प्रेक्षा ॥

Digitized by Google

सुरसरिति परंतपोऽधिगच्छन्विधृतपिशङ्गबृहज्जटाकलापः ।
हविरिव विततः शिखासमूहैः समभिलषन्नुपवेदि जातवेदाः ॥ १२ ॥

सुरेति ॥ पुनः । सुरसरिति गङ्गाकूले परंतपोऽधिगच्छन्नजर्जयन् । फलाभिलाषेणेति शेषः । हविः समभिलषन्नित्युपमानविशेषणसामर्थ्यात् । तथा विधृतः पिशङ्गबृहज्जटाकलापो येन सः । अतएवोपवेदि वेद्याम् ॥ विभक्त्यर्थेऽव्ययीभावः ॥ शिखासमूहैर्ज्वालाजालैर्विततो विस्तृतो हविराज्यादिकं समभिलषन् । जातं वेदो हिरण्यं भोज्यम् । कर्मफलमिति यावत् । यस्मादिति जातवेदा वह्निरिव स्थितः ॥

सदृशमतनुमाकृतेः प्रयत्नं तदनुगुणामपरैः क्रियामलङ्घ्याम् ।
दधदलघु तपः क्रियानुरूपं विजयवतीं च तपःसमां समृद्धिम् ॥ १३ ॥

सदृशमिति ॥ पुनः । आकृतेर्वपुषः ॥ "आकृतिः कथिता रूपसामान्यवपुषोरपि" इति विश्वः ॥ सदृशं तुल्यमतनुं महान्तं प्रयत्नं दधत् । तथा तदनुगुणां प्रयत्नानुगुणामपरैरन्यैरलङ्घ्याम् । कर्तुमशक्यामित्यर्थः । क्रियां व्यापारं दधत् । तथा क्रियानुरूपमलघु गुरु तपो दधत् । तथा विजयवतीं सर्वोत्कर्षवतीं विजयविफलां वा तपःक्रियानुरूपां तपःसमां समृद्धिमैश्वर्यं दधत् ॥ अत्र पूर्वं प्रस्तुतस्य विशेषणतया स्थापनात्प्रथमैकावल्यलंकारः—"यथापूर्वं परस्य विशेषणतया स्थापन एकावली" इति सर्वस्वसूत्रात् ॥

चिरनियमकृशोऽपि शैलसारः शमनिरतोऽपि दुरासदः प्रकृत्या ।
ससचिव इव निर्जनेऽपि तिष्ठन्मुनिरपि तुल्यरुचिस्त्रिलोकभर्तुः ॥ १४ ॥

चिरनियमेति ॥ पुनश्च । चिरनियमेन दीर्घकालतपसा कृशः क्षीणाङ्गोऽपि शैलसारः ॥ उपमानपूर्वपदो बहुव्रीहिः ॥ शमे निरतोऽपि प्रकृत्या दुरासदो दुर्धर्षो निर्जने विजने देशे तिष्ठन्नपि ससचिवः सपरिवार इव । किं च । मुनिरप्यैश्वर्यरहितोऽपीत्यर्थः । त्रयाणां लोकानां भर्तुरिन्द्रस्य ॥ "तद्धितार्थ–" इत्यादिनोत्तरपदसमासः ॥ तुल्यरुचिः समानतेजाः । अपिशब्दः सर्वत्र विरोधद्योतनार्थः । स च मुनेरतकर्यमहिमत्वेन निरस्त इति विरोधालंकारः— "विरोधाभासत्वं विरोधः" इति सूत्रात् ॥

तनुमवजितलोकसारधार्ष्ण्यीं त्रिभुवनगुप्तिसहां विलोकयन्त्यः ।
अवययुरमरस्त्रियोऽस्य यत्नं विजयफले विफलं तपोऽधिकारे ॥ १५ ॥

तनुमिति ॥ अवजिते तिरस्कृते लोकानां सारधार्ष्ण्यी सत्त्वतेजसी यया ताम् ॥

१ वमनिवम.

Digitized by Google

"अन उपधा–" इत्यादिना ङीप् ॥ त्रयाणां भुवनानां समाहारस्त्रिभुवनम् ॥ "तद्धितार्थ–" इत्यादिना समाहारार्थे तत्पुरुषः । पात्रादित्वात्स्त्रीत्वप्रतिषेधः ॥ तस्य गुप्तौ रक्षणे सहां समर्थाम् ॥ पचाद्यच् ॥ तनुं मूर्तिं विलोकयन्त्योऽमरस्त्रियोऽप्सरसो विजयफले विजयार्थे तपोऽधिकारे तपोऽनुष्ठानेऽस्यार्जुनस्य यत्नं विफलमवयुर्मेनिरे । त्रैलोक्याधिपत्यादिमहाफलसाधनसमर्थस्य तुच्छफलाभिलाषो मत्तमातङ्गमांसभोगोचितस्य कण्ठीरवस्य जीर्णतृणचर्वणोत्कण्ठेव न शोभामावहतीति भावः ॥ अत्र विग्रहतनुविलोकनस्य स्त्रीविशेषणवैफल्यज्ञानहेतुत्वोक्त्या पदार्थहेतुकः काव्यलिङ्गमलंकारः ॥

मुनिदनुतनयान्विलोभ्य सद्यः प्रतनुबलान्यधितिष्ठतस्तपांसि ।
अलघुनि बहु मेनिरे च ताः स्वं कुलिशभृता विहितं पदे नियोगम् १६

मुनीति ॥ प्रतनुबलान्यल्पोत्कृष्टसाराणि तपांस्यधितिष्ठतोऽनुतिष्ठतो मुनीन्ददनुतनयान्दानवांश्च सद्यस्तत्क्षणमेव विलोभ्याकृष्य चिरात्कुलिशभृता शक्रेणालघुनि पदे स्थाने विहितं दत्तं स्वं स्वकीयं नियोगमधिकारं ताः स्त्रियो बहु यथा तथा मेनिरे । निकृष्टपदवृत्तीनामुत्कृष्टपदलाभो महा । बहुमानमूलमिति भावः । विलोभ्य मेनिर इत्यन्वयः । यद्वा । विलोभ्य लोभं कारयित्वा विहितं शक्रेणेत्यन्वयात्समानकर्तृत्वनिर्वादः ॥

अथ कृतकविलोभनं विधित्सौ युवतिजने हरिसूनुदर्शनेन ।
प्रसभमवततार चित्तजन्मा हरति मनो मधुरा हि यौवनश्रीः ॥ १७

अथेति ॥ अथानन्तरं कृतकविलोभनं कृत्रिमं विलोभनं विधित्सौ विधातुमिच्छौ ॥ विपूर्वादधातेः सन्नन्तादुमत्वयः ॥ युवतिजने हरिसूनोरर्जुनस्य दर्शनेन चित्तजन्मा कामः प्रसभं बलादवततार । दैवतत्परं वञ्चयितुमागतस्य मोहो भवति। यतः स्वयं मुनिवञ्चनप्रवृत्ताः स्त्रियस्तेन वञ्चिता इत्यर्थः । युक्तं चैतत् । हि यस्मान्मधुरा मनोहरा यौवनश्रीर्मनो हरति । बलादिति शेषः ॥

सपदि हरिसखैर्वधूनिदेशाद्धृनितमनोरमवल्गुकीमुदद्भैः ।
युगपदृतुगणस्य संनिधानं वियति वने च यथायथं वितेने ॥ १८ ॥

सपदीति ॥ सपदि वधूनां निदेशान्नियोगाद्धृनिता नादिता मनोरमा वल्गुक्यो वीणा यैस्तैर्हरिसखैर्गन्धर्वैर्वियत्याकाशे वने च युगपदृतुगणस्यर्तुषट्कस्य संनिधानमाविर्भावो यथायथं यथास्वम् । असंकरेणेत्यर्थः । "यथास्वं तु यथायथम्" इति निपातः ॥ वितेने वितस्तरे । उद्दीपनसामग्री संपादितेत्यर्थः ॥

Digitized by Google

अथ वर्षाक्रमेणर्तून्वर्णयति—

सजलजलधरं नभो विरेजे विवृतिमियाय रुचिस्तडिल्लतानाम् ।
व्यवहितरतिविग्रहैर्वितेने जलयुरुभिः स्तनितैर्दिगन्तरेषु ॥ १९ ॥

सजलेत्यादि ॥ सजला जलधरा यस्मिंस्तन्नभो विरेजे । तडितो लता इव तासां रुचिः प्रभा विद्युतिं विजृम्भणमियाय । तथा व्यवहितरतिविग्रहैर्दूरीकृतरतिमकल्पितमणयकलहैर्जलयुरुभिः । जलभारादुन्भीरैरित्यर्थः । स्तनितैर्गर्जितैर्दिगन्तरेषु वितेने विततैरभवि । भावे क्विप् । अकर्मकत्वं वैयधिकरण्यम् । अतएव दिगन्तरेष्वित्यधिकरणत्वेन प्रयोगः । अन्यथा कर्मत्वमेव स्यात् ॥

परिसुरपतिसूनुधाम सद्यः समुपदधन्मुकुलानि मालतीनाम् ।
विरलमपजहार वद्धबिन्दुः सरजसतामवनेरपां निपातः ॥ २० ॥

परीति ॥ परिसुरपतिसूनुधामार्जुनाभमं प्रति ॥ परीति लक्षणार्थे कर्मप्रवचनीयस्य योगाद्द्वितीया । यद्वा । वर्जनार्थस्य तस्याप्र विरोधाद्विभक्त्यर्थेऽव्ययीभावः ॥ तथा च सुरपतिसूनुधाम्नीत्यर्थः । सद्यो मालतीनां जातीलतानाम् ॥ "सुमना मालती जातिः" इत्यमरः ॥ मुकुलानि समुपदधज्जनयन्विरलं यथा तथा वद्धबिन्दुरपां निपातो वृष्टिरवनेः संबन्धिनीं सरजसतां सरजस्कत्वम् ॥ "अचतुर—" इत्यादिसूत्रेण साकल्यार्थेऽव्ययीभावः । "समासान्तनिपातश्च बहुव्रीह्यर्थस्तु लक्ष्यते । अव्ययीभावदर्शनं तु प्रायिकम्" इति केचित् ॥ अपजहार । धूलिं शमयामासेत्यर्थः॥

प्रतिदिशमभिगच्छताभिमृष्टः ककुभविकाससुगन्धिनानिलेन ।
नव इव विबभौ सचित्तजन्मा गतधृतिमाकुलितश्च जीवलोकः॥२१॥

प्रतिदिशमिति ॥ दिशि दिशि प्रतिदिशम् ॥ यथार्थेऽव्ययीभावः । शरत्प्रभृतित्वात्समासान्तनिपातः ॥ अभिगच्छता संवाता ककुभान्यर्जुनकुसुमानि ॥ "इन्द्रद्रुः ककुभोऽर्जुनः" इत्यमरः ॥ तेषां विकासेन सुगन्धिना मनोज्ञगन्धेन ॥ गन्धसेत्वे तदेकान्तग्रहणं प्रायिकम् ॥ अनिलेनाभिमृष्टोऽतएव सचित्तजन्मा । कामाक्रान्त इत्यर्थः । अतएव गतधृतिर्गतधैर्य आकुलितः क्षोभितश्च । रतिं प्रतीति भावः । एवंभूतो जीवलोको नव इवावस्थान्तरमाप्यापूर्व इव विबभौ भाति स्मोत्प्रेक्षा ॥

व्यथितमपि भृशं मनो हरन्ती परिणतजम्बुफलोपभोगहृष्टा ।
परभृतयुवतिः स्वनं [1]वितेने नवनवयोजितकण्ठरागरम्यम् ॥ २२ ॥

१ विवृतिम्- २ अनुगच्छता. ३ विचक्रे.

Digitized by Google

व्यथितमिति ॥ व्यथितं दुःखितमपि मनो भृशं हरन्ती । किमुत सुखितमिति भावः । जम्ब्वाः फलं जम्बु ॥ "वार्ताडं च फले जम्ब्वा जम्भूः स्त्री जम्बु जाम्बवम्" इत्यमरः ॥ "जम्ब्वा वा" इत्यणाभावपक्षेऽपि "फले लुक्" इति लुक् । "लुक्तद्धितलुकि" इति स्त्रीप्रत्ययनिवृत्तिः ॥ जम्बु च तत्फलं चेति सामान्यविशेषयोः सह निर्देशः । यद्वा । जम्ब्वाः फलमिति विग्रहः ॥ "इको ह्रस्वोऽङ्यो गालवस्य" इति ह्रस्वः ॥ तस्य परिणतस्योपभोगेन हृष्टा । अतएव परभृतयुवतिः कोकिलाङ्गना नवनवं नवमकारं यथा तथा योजितेन संपादितेन कण्ठरागेण कण्ठमाधुर्येण रम्यम् । सौम्यमित्यर्थः । स्वनं स्वरं वितेने । वर्षास्वपि मधुराः स्वराः कोकिलाया इति प्रसिद्धिः ॥

अभिभवति मनः कदम्बवायौ मदमधुरे च शिखण्डिनां निनादे ।
जन इव न धृतेश्चचाल जिष्णुर्न हि महतां सुकरः समाधिभङ्गः ॥२३॥

अभिभवतीति ॥ कदम्बवायौ कदम्बसंबन्धिनि मारुते मदमधुरे शिखण्डिनां निनादे च मनोऽभिभवत्यभिरमति सति जिष्णुर्जयनशीलोऽजुनो जनः पृथग्जन इव धृतेर्धैर्यान्न चचाल । वर्षा अपि तदुद्दीपनाय न क्षेत्करित्यर्थः । हि यस्मान्महतां समाधिभङ्गः सुकरो न । न केनापि कर्तुं शक्यत इत्यर्थः ॥

धृतविसवलयावलिर्वहन्ती कुमुदवनैकदृकूलमार्द्रबाणा ।
शरदमलतले सरोजपाणौ घनसमयेन वधूरिवाललम्बे ॥ २४ ॥

धृतेति ॥ विसानि बलयानीव तेषामावलिर्धृता यया सा । कुमुदवनमेकं शुभ्रं दुकूलमिव तद्वहन्ती । आर्द्रानि गृहीतानि बाणानि नीलशिण्डीनि यया सार्द्रबाणा धृतशरा च । "गृह्णीयात्सप्रिया शरम्" इति स्मरणात् ॥ "बाणोऽस्त्री नीलशिण्डी च" इति वैजयन्ती ॥ शरदृतूर्जायेव घनसमयेन वर्षर्तुना । वरेणेति शेषः । अमलतले निर्मलतले सरोजं पाणिरिव तस्मिन्ललम्बे जगृहे ॥ कर्मणि लिट् ॥ वधूवरसमागमवदृतुसंधिरशोभतेत्यर्थः ॥ अत्र "आर्द्रबाणा" इति शिण्डीशरयोर्बाणबोरभेदाध्यवसायादश्लेषमूलातिशयोक्तिरुपमाङ्गमिति तयोः संकरः ॥

अथर्तुसंधिं वर्णयति—

समदरिभितरुतानि हंसनादैः कुमुदवनानि कदम्बपुष्पवृष्ट्या ।
श्रियमतिशयिनीं समेत्य जग्मुर्गुणमहतां महते गुणाय योगः ॥२५॥

समदेति ॥ समदरिभितरुतानि मत्तमयूरकूजितानि हंसनादैः समेत्य तथा कुमुदवनानि कदम्बपुष्पवृष्ट्या समेत्यातिशयिनीमतिशयवतीं श्रियं जग्मुः । तथा हि । गुणमहतां गुणाधिक्यानां योगः परस्परसमागमो महते गुणायोत्कर्षाय । भवतीति

Digitized by Google

शेषः ॥ अत्र भिषायां समासोक्तिरलंकारः— " सा समासोक्तिर्योग्यवस्तुनोरुभयोरपि " इति लक्षणात् । सोऽपि चतुर्थेनार्थान्तरन्यासेन स्वसमर्थकेनाङ्गाङ्गिभावेन संकीर्यते॥

सरजसमपहाय केतकीनां प्रसवमुपान्तिकनीपरेणुकीर्णम् ।
प्रियमधुरसनानि पद्मदाली मलिनयति स्म विनीलबन्धनानि ॥२६॥

सरजसमिति ॥ प्रियमधुरिष्टमकरन्दः ॥ नास्ति रूपसमासान्तः पुंल्लिङ्गोत्तरपदो बहुव्रीहिः । नपुंसकलिङ्गस्यैव मधुशब्दस्यारःमधूतिषु पाठात् " मकरन्दस्य मधस्य वाल्मिकस्यापि वाचकः । अर्थवर्गादिगणे पाठात्पुंनपुंसकयोर्मधुः " इत्यभिधानात् ॥ पद्मदाली पद्मदावलिरुपान्तिके यानि नीपानि कदम्बकुसुमानि तेषां रेणुभिः परागैः कीर्णं व्याप्तम् । किंच स्वतोऽपि सह रजसा सरजसम् । न स्वरजस्कमिति भावः ॥ साकल्येऽव्ययीभावः । " अचतुर– " इत्यादिना निपातः ॥ केतकीनां मतल्यं पुष्पमपहाय विनीलबन्धनानि नलिनहृन्तान्यसनानि प्रियकपुष्पाणि । मकरन्दभरितानीति शेषः ॥ " सर्जकासनबन्धूकपुष्पप्रियकजीवकाः " इत्यमरः ॥ मलिनयति स्म । यथा हृन्तादन्यत्रापि मालिन्यं स्यात्तथा मधुलोभाच्चादयामासेत्यर्थः । न हि मध्वासक्तो मधुलाभेऽसति विधूतिष्यासज्जतीति भावः ॥

मुकुलितमतिशय्य बन्धुजीवं धृतजलबिन्दुषु शाद्वलस्थलीषु ।
अविरलवपुषः सुरेन्द्रगोपा विकचपलाशचयश्रियं समीयुः ॥ २७ ॥

मुकुलितमिति ॥ धृता जलबिन्दवो यासु तासु शाद्वलस्थलीषु शादहरितमदेशेष्वविरलवपुषः स्थूलमूर्तयः सुरेन्द्रगोपाः कीटविशेषा मुकुलितं बन्धुजीवम् । बन्धुजीवकमुकुलमित्यर्थः ॥ " बन्धूको बन्धुजीवकः " इत्यमरः ॥ अतिशय्यातिक्रम्य विकचपलाशचयो विकसितकिंशुकराशिः ॥ " पलाशे किंशुकः पर्णः " इत्यमरः ॥ तस्य श्रियम् । तत्सदृशीं श्रियमित्यर्थः ॥ अतएव निदर्शनालंकारः ॥ समीयुः प्राप्तुः ॥

अथ हेमन्तवर्णनमाह—

अविरलफलिनीवनप्रसूनः कुसुमितकुन्दसुगन्धिगन्धवाहः ।
गुणमसमयजं चिराय लेभे विरलतुषारकणस्तुषारकालः ॥ २८ ॥

अविरलेति ॥ अविरलानि घनानि फलिनीवनानां प्रियङ्गुवनानां प्रसूनानि यस्मिन्सः ॥ " प्रियङ्गुः फलिनी फली " इत्यमरः ॥ कुसुमितैः कुन्दैर्माध्यकुसुमैः सुगन्धिर्गन्धवाहो यस्मिन्सः ॥ " माध्यं कुन्दम् " इत्यमरः ॥ शैशिरानामपि

Digitized by Google

कुन्दानां हेमन्ते प्रादुर्भावादविरोधः । विरलतुषारकण इति प्रारम्भोक्तिः । तुषारकालो हेमन्तशिरायासमयजमकालसंभवं गुणमुत्कर्षं लेभे ॥

निचयिनि लवलीलताविकाशे जनयति लोध्रसमीरणे च हर्षम् ।
विकृतिमुपययौ न पाण्डुसूनुभ्वलति नयान्न जिगीषतां हि चेतः २९

निचयिनीति ॥ निचयिन्युपचयवति लवलीलतानां विकाशे पुष्पविजृम्भणे तथा लोध्रसमीरणे च हर्षं प्रसादम् । उत्कण्ठामिति यावत् । जनयति सति पाण्डुसूनुर्विकृतिं नोपययौ । कुतः । हि यस्माज्जिगीषतां जेतुमिच्छतां चेतो नयान्नीतेर्न चलति । न हि क्रोधाक्रान्ते चेतसि शृङ्गाररसस्य विकाशस्तद्विरुद्धस्वाद्रोपस्येति भावः॥

कतिपयसहकारपुष्परम्यस्तनुतुहिनोऽल्पविनिद्रसिन्दुवारः ।
सुरभिमुखसहिमागमान्तशंसो समुपययौ शिशिरः स्मरैकबन्धुः॥३०॥

कतिपयेति ॥ कतिपयैरेव सहकारपुष्पैश्चूतकुसुमै रम्यः । न तु वसन्तवत्समग्रैर्नापि हेमन्तवच्चहितैरिति भावः । तनुतुहिनोऽल्पहिमः । न तु हेमन्तवद्बहुतुहिनो नापि वसन्तवद्विरलतुहिन इति भावः । अल्पानि कतिपयानि विनिद्राणि सिन्दुवाराणि विकसितनिर्गुण्डीकुसुमानि यस्मिन्सः । अत्रापि सहकारवदभिमायो द्रष्टव्यः ॥ " सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेसपि " इत्यमरः ॥ इत्थं सुरभिमुखं वसन्तमारम्भं हिमागमान्तं हेमन्तावसानं च शंसति सूचयतीति स तथोक्तः । स्मरस्यैकबन्धुः सहकारी । उभयर्तुधर्मसंपत्तेरिति भावः । शिशिरः समुपययौ ॥

अथ वसन्तमारम्भमाह—

कुसुमनगवनान्युपैतुकामा किसलयिनीमवलम्ब्य चूतयष्टिम् ।
कलदलिकुलनूपुरा निरासे नलिनवनेषु पदं वसन्तलक्ष्मीः ॥ ३१ ॥

कुसुमेति ॥ कुसुमसमानानां नगानां वृक्षाणां कुसुमानां नगा वृक्षा वा तेषां वनान्युपैतुमारोढुं कामो यस्याः सा ॥ " शैलवृक्षौ नगावगौ " इत्यमरः ॥ " लुम्पेदवर्ण्यमः कुत्वे तुं काममनसोरपि " इति मकारलोपः ॥ वसन्तलक्ष्मीः किसलयिनीं पल्लविनीं चूतयष्टिम् । चूतशाखामिवेति भावः । अवलम्ब्यावष्टभ्य । अन्यथारोढुमशक्यत्वादिति भावः । कलध्विअव्यक्तं शब्दायमानमलिकुलं भृपुरमिव यस्याः सा तथोक्ता सती ॥ "कलदलिकुलनूपुरम्" इत्यपि पाठः ॥ अन्यत्राप्यलिकुलवन्नूपुरम् । नलिनवनेषु पदं निरासे निवपे । वेपु मथमं प्रादुरासीदित्यर्थः ॥ " उपसर्गादस्यूहोर्वा " इति वचनादात्मनेपदम् ॥ अत्र प्रकाशवत्तल्लक्ष्मीविशेषणसामर्थ्यादप्रस्तुतगाधिकाव्यवहारसमारोपात्समासोक्तिरलंकारः ॥

१ निवपति.

Digitized by Google

विकसितकुसुमाधरं हसन्तीं कुरबकराजिवधूं विलोकयन्तम् ।
ददृशुरिव सुराङ्गना निषण्णं सशरमनङ्गमशोकपल्लवेषु ॥ २२ ॥

विकसितेति ॥ विकसितो विश्लिष्टः कुसुममेवाधरो यस्मिन्कर्मणि तथथा हसन्तीं स्मयमानां कुरबकराजिरेव वधूस्तां विलोकयन्तम् । कामुकतयेति भावः । अतएवाशोकपल्लवेषु पल्लवसंस्तरेषु निषण्णम् । स्थितमित्यर्थः । रिरंसयेति शेषः । सशरम् । नित्यविजयित्वादिति भावः । इत्थं शृङ्गारवीरयोरेकाधिकरणभूतमनङ्गं सुराङ्गना ददृशुरिवेत्युत्प्रेक्षा । अशोकाद्यवलोकनान्मदनसाक्षात्कारादिव महान्मनः क्षोभस्तासामासीदित्यर्थः ॥ अत्र रूपकोत्प्रेक्षयोः संसृष्टिः ॥

मुहुरनुपतता विधूयमानं विरचितसंहति दक्षिणानिलेन ।
अलिकुलमलकाकृतिं प्रपेदे नलिनमुखान्तर्विसर्पि पङ्कजिन्याः ॥ २३ ॥

मुहुरिति ॥ अनुपततानुधावता दक्षिणानिलेन मलयमारुतेन मुहुर्विधूयमानं कम्पितमतएव विरचिता संहतिर्येन । तत्संभूतमित्यर्थः । पङ्कजिन्या यन्नलिनं मुखमिव तस्यान्तर्विसर्पि प्रान्तचार्यलिकुलम् ॥ कर्तृ ॥ अलकाकृतिमलकसादृश्यं प्रपेदे ॥

श्वसनचलितपल्लवाधरोष्ठे नवनिहितेर्ष्यमिवावधूनयन्ती ।
मधुसुरभिणि पदपदेन पुष्पे मुख इव शाललतावधूश्चुचुम्बे ॥ २४ ॥

श्वसनेति ॥ पदपदेन शाललता सर्जतरुशाखा वधूरिव शाललतावधूः ॥ "प्राकारवप्रयोः शालः शालः सर्जतरुः स्मृतः" इति शाश्वतः ॥ श्वसनेन वायुना निःश्वासेन च चलितः पल्लवोऽधरोष्ठ इव यत्र तस्मिन् ॥ "ओत्वोष्ठयोः समासे वा" इति परूपं वक्तव्यम् ॥ मधुना मकरन्देन मद्येन च सुरभिणि पुष्पे मुख इव नवं यथा तथा निहितेर्ष्यं कृतकोपमिवेति क्रियाविशेषणम् ॥ तथावधूनयन्ती कम्पयन्ती ॥ "धूञ्शीङोर्नुम्वक्तव्यः" इति णिचि नुमागमः ॥ चुचुम्बे चुम्बिता ॥ अत्र श्वसनशब्दार्थमधुशब्दार्थयोश्च स्वस्वभेदाध्यवसायाच्छ्लेषमूलातिशयोक्तिः । सा चोपमाङ्गमित्यनयोः संकरः ॥

प्रभवति न तदा परो विजेतुं भवति जितेन्द्रियता यदात्मरक्षा ।
अवजितभुवनस्तथा हि लेभे सितसुरगे विजयं न पुष्पमासः ॥ २५ ॥

प्रभवतीति ॥ परः शत्रुस्तदा तस्मिन्काले विजेतुं न प्रभवति न शक्नोति । यदा जितेन्द्रियतेन्द्रियजयित्वमात्मरक्षा भवति जायते । तथाहि । अवजितभुवनश्चैत्रोऽप्यविजयी पुष्पमासो वसन्तः । सितसुरगेऽर्जुने विषये विजयं न लेभे । अतो

१ वहन्तीम्. २ पुष्पचापः.

Digitized by Google

जितेन्द्रिया दुर्जया इत्यर्थः ॥ विशेषेण सामान्यार्थसमर्थनरूपोऽर्थान्तरन्यासोऽलंकारः ॥

अथ ग्रीष्मं वर्णयति—

कथमिव तव संमतिर्भवित्री समसृतुभिर्मुनिनावधीरितस्य ।
इति विरचितमल्लिकाविकाशः स्मयत इव स्म मधुं निदाघकालः ३६

कथमिति ॥ विरचितमल्लिकाविकाशो निदाघकालो ग्रीष्मो ऋतुभिर्वर्षादिभिः समं मुनिनावधीरितस्य तिरस्कृतस्य तव संमतिर्लोके योग्यत्वेनानुमतिर्मान्यत्वं कथमिव भवित्री । न संभावनः कथंचिद्भविष्यतीत्यर्थः । इतीत्थं मधुर्वसन्तः ॥ "चैत्रे वैत्से वसन्ते च जीवे कोके मधुः स्मृतः" इति विश्वः ॥ स्मयते स्मेव जहास किमित्युत्प्रेक्षा ॥ "ष्टन् स्मे" इति भूतार्थे ष्टन् ॥ महासस्य शुभ्रत्वेन प्रसिद्धेर्मल्लिकाविकाशे हासत्वाध्यवसायः ॥ अमतुभिः सममवधीरितस्येत्यभावेऽप्यवसायमूला तद्योक्तिरलंकारः । संबन्धभेदभिन्नस्यावधीरणस्याभिन्नतयाध्यवसायात्तदेवावधीरणमसंभवद्वारा स्मयोत्प्रेक्षेत्यनयोरङ्गाङ्गिभावेन संकरः ॥

बलवदपि बलं मिथोविरोधि प्रभवति नैव विपक्षनिर्जयाय ।
भुवनपरिभवी न यत्तदानीं तमृतुगणः क्षणमुन्मनीचकार ॥ ३७ ॥

बलवदिति ॥ बलवत्प्रबलमपि । प्रकृष्टगामीति यावत् । मिथोविरोधि परस्परस्पर्धि बलं सैन्यम् ॥ "बलधिनी बलं सैन्यम्" इत्यमरः ॥ विपक्षनिर्जयाय शत्रुविजयाय ॥ "तुमर्थाच्च–" इत्यादिना चतुर्थी ॥ शत्रूञ्जेतुमित्यर्थः । न प्रभवति न शक्नोत्येव । कुतः । यत्यस्मात्कारणात्त्रिभुवनानां परिभवी जेतापि ॥ "जिदक्षि–" इत्यादिनेनिमत्ययः ॥ ऋतुगणस्तदानीं तमर्जुनं क्षणमपि नोन्मनीचकारानुन्मनसमुन्मनसं न चकार ॥ "अदर्शनश्रुधु–" इत्यादिनाभूततद्भावे च्विप्रत्ययः । सलोपश्च ॥ विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥

एवं षडस्यस्योद्दीपनसामग्री विफलेत्युक्त्वा संप्रति विपरीता जातेत्याह—

श्रुतिसुखमुपवीणितं सहायैरविरललाञ्छनहारिणश्च कालाः ।
अविहितहरिसन्तुविक्रियाणि त्रिदशवधूषु मनोभवं वितेनुः ॥ ३८ ॥

श्रुतीति ॥ सहायैस्तासां सहचरैर्गन्धर्वैः । कृतमिति शेषः ॥ "न लोक–" इत्यादिना षष्ठीप्रतिषेधः । कर्तरि तृतीया ॥ श्रुतिसुखं श्रोत्रमधुरमुपवीणितं वीणयोपगीतम् ॥ "सत्यापपाश–" इत्यादिना वीणाशब्दाण्णिजन्ताद्भावे क्तः ॥ अविरलैर्बहुभिरङ्कनैः पूर्वोक्तैः कलङ्कसुमादिभिर्विहरिणो मनोहराः काला वस-

Digitized by Google

म्यादिकृतयोऽविहिता कृता हरिमूनोरर्जुनस्य विक्रिया मनोविकृतिर्यैस्तानि तथाभूतानि सन्ति ॥ " नपुंसकमनपुंसक- " इत्यादिना नपुंसकैकशेषः ॥ त्रिदशवधूषु मनोभवं वितेनुर्विस्तारयामासुः । सोऽयं परमहारार्थमुपतमायुधं स्वात्मानमेव प्रहरतीति न्यायवज्ञात इति भावः ॥ अत्र मुनिविक्रियार्थं स्त्रीणां विक्रियाकरणानर्थोत्पत्तिकथनाद्विषमालंकारः । तथा च सूत्रम्—" विरूपकार्यानर्थयोरुत्पत्तिरुपसंपदनाद्विषमालंकारः " इति ॥

तदक्षवदालम्बनगणोऽपि विपरीतोऽभूदिति श्लोकद्वयेनाह—

न दलति निचये तथोत्पलानां न च विषमच्छदगुच्छयूथिकासु ।
अभिरतिमुपलेभिरे यथासां हरितनयावयवेषु लोचनानि ॥ २९ ॥

नेत्यादि ॥ आसां लोचनानि हरितनयावयवेषु यथा तथा दलति विकसत्युत्पलानां निचयेऽभिरतिं नोपलेभिरे न प्राप्तुः । विषमच्छदगुच्छाः सप्तपर्णस्तबका यूथिकामल्लिकाश्च तास्वभिरतिं नोपलेभिरे ॥ " सप्तपर्णो विशालत्वक्छदारो विषमच्छदः " इत्यमरः ॥ तथा रमणीयत्वात् । तदवयवानामित्यर्थः ॥ इति चक्षुःप्रीतिरुक्ता ॥

अथ मनःसङ्गं सूचयति—

मुनिमभिमुखतां निनीषवो याः समुपययुः कमनीयतागुणेन ।
मदनमुपदधे स एव तासां दुरधिगमा हि गतिः प्रयोजनानाम् ॥ ४० ॥

मुनिमिति ॥ याः स्त्रियः कमनीयता सौन्दर्यं सैव गुणस्तेन मुनिमर्जुनमभिमुखतां निनीषवो नेतुमिच्छवः समुपययुः । तासां स्त्रीणां स मुनिरेव मदनमुपदधे जनयामास । तथाहि । प्रयोजनानामुद्देश्यानां गतिः परिणतिर्दुरधिगमा हि दुर्ज्ञेया खलु । अतः क्वचिद्भवति क्वचिन्न भवतीति भावः ॥

अथासामनुरागमेव कार्यतः प्रपञ्चयति—

प्रकृतमनुससार नाभिनेयं प्रविकसदङ्गुलि पाणिपल्लवं वा ।
प्रथममुपहितं विलासि चक्षुः सिततुरगे न चचाल नर्तकीनाम् ॥ ४१ ॥

प्रकृतमिति ॥ विलासि सविलासं नर्तकीनां संबन्धि ॥ "स्त्रिल्यादि च्वुन्" इति च्वुन्प्रत्ययः । " वृत्तिसर्गनिरभिम्य एव " इति नियमः ॥ चक्षुः ॥ कर्तृ ॥ प्रकृतं प्रक्रान्तमभिनेयमभिनेतव्यं रसभावादिव्यञ्जकं नानुससार । तदूपणं तदानुगुण्येनैव दृष्टिप्रयोगनियमादिति भावः । तथा प्रविकसदङ्गुलि पाणिपल्लवं वा नानुससार ।

१ दुग्ध. २ अभिससार.

Digitized by Google

स च दोषः। "यतो इस्तस्ततो दृष्टिः" इति नियमादिति भावः॥ "पल्लवोऽस्त्री किसलयम्" इत्यमरः। "वा स्यादिकल्पोपमयोरेवार्थे च समुच्चये" इति विश्वः॥ किं तु प्रथमं प्रवेश एव सिततुरगेऽर्जुन उपहितं सत्र चचाल तत्रैव लग्नं तस्थौ। रागार्तेन किंचित्करणीयमनुसंधेयमिति भावः॥

अभिनयमनसः सुराङ्गनाया निहितमलक्तकवर्तनाभिताम्रम्।
चरणमभिपपात पट्टदाली धृतनवलोहितपङ्कजाभिशङ्का॥ ४२॥

अभिनयेति॥ अभिनयो रसभावादिव्यञ्जकचेष्टाविशेषः॥ "व्यञ्जकाभिनयौ समौ" इत्यमरः॥ तत्र मनो यस्यास्तस्याः। व्यासङ्गाद्गृङ्गापातमजानन्त्या इत्यर्थः। सुराङ्गनायाः संबन्ध्यलक्तकवर्तनेन लाक्षारसरञ्जनेनाभिताम्रं निहितं न्यस्तं चरणं पट्टदाली॥ कर्त्री॥ धृता नवलोहितपङ्कजानामभिशङ्का प्रत्यग्रकोकनदभ्रमो यया तामिपपातामिधावति स्म॥ अत्र पट्टदाल्याः स्त्री चरणे पङ्कजभ्रमाभिधानाद्भ्रान्तिमदलंकारः। तेन चोपमा व्यञ्जत इत्यलंकारेणालंकारध्वनिः॥

अविरलमलसेषु नर्तकीनां द्रुतपरिषिक्तमलक्तकं पदेषु।
सवपुषमिव चित्तरागमुद्धुर्नमितशिखानि कदम्बकेसराणि॥ ४३॥

अविरलमिति॥ नमितशिखानि नर्तकीपादपीडनान्नमिताग्राणि कदम्बकेसराणि। रङ्गभूमादचानीति शेषः। अविरलं सान्द्रं यथा तथा द्रुतो रागोल्बणा विगलितोऽतएव परिषिक्तो नर्तकीनामलसेषु पदेषु पादन्यासेष्वलक्तकं लाक्षारागं सवपुषं मूर्तिमन्तं चित्तरागमुत्कण्ठतया बहिर्निःसृतं मुनिविषयकं रागमिवेत्युत्प्रेक्षा। ऊर्ध्वं हन्ति स्म॥

अथासां शृङ्गारचेष्टां कथयति—

नृपसुतमभितः समन्मथायाः परिजनगात्रतिरोहिताङ्गयष्टेः।
स्फुटमभिलषितं बभूव वध्वा वदति हि संवृतिरेव कामितानि॥४४॥

नृपेति॥ नृपसुतमर्जुनमभितः संमुखं परिजनस्य सखीजनस्य गात्रेण तिरोहिता लज्जया लाकारमोपनायान्तर्हिताङ्गयष्टिर्यस्याः सा तस्याः समन्मथाया बध्वा अभिलषितं मुनि प्रत्यनुरागः स्फुटं बभूव॥ नु च संवृतस्याभिव्यक्तिर्विरुद्धेति वाच्यमित्याह— यतः संवृतिः सम्यग्गोपनमेव कामितान्यनुरागान्॥ कामयतेर्भावे क्तः॥ वदति हि। प्रकटयतीत्यर्थः॥ अयमनुरागस्य स्वभाव उक्तः। यया चेष्टया रागः संश्रिक्ष्यते सैवास्य प्रकाशिकेति भावः॥

१ कथयति.

Digitized by Google

अभिमुनि सहसा हृते परस्या घनमरुता जघनांशुकैकदेशे।
चकितमवसनोरु सत्रपायाः प्रतियुवतीरपि विस्मयं निनाय ॥ ४५ ॥

अभिमुनीति ॥ अभिमुनि मुनिसमक्षं घनेन मरुता जघनांशुकस्यैकदेशे सहसा हृते प्रति सत्रपायाः सलज्जायाः परस्याः संबन्ध्यवसनं निरावरणावृक् यस्मिंस्तच्चकितं भयसंभ्रमः प्रतियुवतीरपि सपत्नीरपि विस्मयं निनाय। किमुतान्यजनमित्यपिशब्दार्थः। न तु मुनिमित्याशयः ॥

धृतविसवलये निधाय पाणौ मुखमधिरूषितपाण्डुगण्डलेखम्।
नृपसुतमपरा स्मराभितापादमधुमदालसलोचनं निदध्यौ ॥ ४६ ॥

धृतेति ॥ अपरा स्त्री स्मराभितापाद्धेतोर्धृतानि बिसान्येव वलयानि येन तस्मिन्नाणावधिरूषिते चन्दनादिचर्चिते पाण्डू गण्डलेखे गण्डस्थले यस्य तन्मुखं निधायारोप्यामधुमदे मधुमदरहिते तथाप्यलसे लोचने यस्मिन्कर्मणि तथथा तथा तं नृपसुतं निदध्यौ पश्यति स्म ॥ "निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्" इत्यमरः॥

अथ पञ्चभिर्मुनिं प्रति दूतीवाक्यमाह—

सखि दयितमिहानयेति सा मां प्रहितवती कुसुमेषुणाभितप्ता।
हृदयमहृदया न नाम पूर्वं भवदुपकण्ठमुपागतं विवेद ॥ ४७ ॥

सखीति ॥ कुसुमेषुणा कामेनाभितप्ता पीडिता सा नायिका। हे सखि। दयितं मुनिमिहानयेति मां प्रहितवती भवदन्तिकं प्रेषितवती ॥ किं त्वभिमुख्यकारिणीयमित्याह— हृदयमिति ॥ अहृदयामनस्का। तस्यास्त्वद्गतत्वादिति भावः। अतएव सा पूर्वं प्रागेव भवदुपकण्ठं त्वत्समीपमुपागतं हृदयं मनो न विवेद। नाम संभावनायाम्। अतो मत्प्रेषणं व्यर्थं तस्यान्तरङ्गत्वाद्बहिरङ्गस्य दुर्बलत्वादिति भावः ॥ एतेन मनःसङ्ग उक्तः। चक्षुःप्रीतिस्तु प्रागेव सर्वासामुक्तेति न पृथगुच्यते ॥

"ध्यानःसङ्गसंकल्पा जागरः कृशता रतिः। ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश" इति। तत्राद्यमवस्थाद्वयमभ्यधायि। संप्रति कायिकमनैरपेक्ष्येण वृच्यते—

चिरमपि कलितान्यपारयन्त्या परिगदितुं परिशुष्यता मुखेन।
गतघृण गमितानि सत्सखीनां नयनयुगैः सममार्द्रतां मनांसि ॥ ४८ ॥

चिरमिति ॥ चिरं कलितान्यपि संदेशार्थवृन्दानि योजितान्यपि। वचनानीति शेषः। परिशुष्यता मुखेनेति जागरोक्तिः। परिगदितुमपारयन्त्याशक्नुवत्या तया।

१ विधाय. २ अभिकर्षित. ३ अतिकलितानि.

Digitized by Google

हे गतघृण । अथापि तां नानुकम्पस इति भावः । सत्सखीनां मनांसि नयनयुगैः समभार्द्रतां गमितानि । उपचयं गमितानीत्यर्थः । शोकबाष्पाभ्यामिति भावः ॥ अत्र सखीशोकोक्त्या मूर्च्छावस्था सूच्यते ॥ अत्र शोकबाष्परूपकारणभेदात्प्रतियोगिभेदाद्वार्द्रत्वभेदेऽप्यभेदाध्यवसायः । तन्मूला चेयम् । नयनयुगैः समभिति सहोक्तिरलंकारः ॥

अचकमत सपल्लवां धरित्रीं मृदुसुरभिं विरहय्य पुष्पशय्याम् ।
भृशमरतिमवाप्य तत्र चास्यास्तव सुखशीतमुपैतुमङ्गमिच्छा ॥४९॥

अचकमतेति ॥ किं वाच्यं चेत्याह— सा स्त्री मृदी सुरभिश्च या तां मृदुसुरभिं पुष्पशय्यां विरहय्य विहाय सपल्लवां धरित्रीमचकमतेच्छत् । तस्माल्लतोऽपि शीतलत्वादिति भावः ॥ क्रमेर्णिजन्तात्लुङ् ॥ " णिश्रिद्रुस्रुभ्यः कर्तरि चङ् " इति हेर्भाव इति केचित् । तत्र । अचीकमतेति प्रसङ्गात् । अतो णिजभावपक्षे " क्रमेऽलेऽङ् वक्तव्यः " इति वक्तव्याच्चङि रूपमेतत् ॥ असा नायिकायास्तत्र धरित्र्यामपि भृशमरतिं दुःखमवाप्य । सुखयतीति सुखः शीतः शीतलश्च तं सुखशीतलं तवाङ्गमुपैतुमिच्छा वर्तत इति शेषः । असाश्चौत्सुक्यं कथितम् । अत्रारतिजागरौ सुप्यकावित्यस्या नायिकायाः क्रमेण पुष्पशय्याद्यनेकाधारसंबन्धकथनात्क्रमः पर्यायालंकारः । तदुक्तम्— " क्रमेणैकमनेकस्मिन्नाधारे वर्तते यदि । एकस्मिन्वानेकं पर्यायालंकृतिर्द्विधा " इति लक्षणात् ॥

तदनघ तनुरस्तु सा सकामा व्रजति पुरा हि परासुतां त्वदर्थे ।
पुनरपि सुलभं तपोऽनुरागी युवतिजनः खलु नाप्यतेऽनुरूपः ॥५०॥

तदिति ॥ तत्तस्मात्कारणात्सा दुःखस्थत्वाद्धेतोः । हे अनघ निष्पाप । तनुः कृशेति कार्श्यावस्थाकथनम् । सा नायिका सकामा सफलमनोरथास्तु । हि यस्मात्त्वमेवार्थः प्रयोजनं वस्तु वा तस्मिंस्त्वदर्थे निमित्ते । सतीति शेषः । त्वामुद्दिश्येत्यर्थः । परासुतां निष्प्राणत्वं पुरा व्रजति व्रजिष्यति । मरिष्यतीत्यर्थः । तथा च ते निमित्तहत्यानघत्वव्याघातः स्यादिति भावः ॥ " यावत्पुरानिपातयोर्लट् " इति भविष्यदर्थे लट् ॥ इदं च दक्षमावस्थामदर्शनम् ॥ न च तपोनिघ्नत्वाद्धेतव्यमित्याह— पुनरिति ॥ पुनरपि पश्चादपि ॥ " पुनरप्यर्थे भेदे " इति विश्वः ॥ तपः सुलभम् । अनुरागयुक्तो योग्यश्च युवतिजनस्तु नाप्यते न लभ्यते खलु ॥

एवं प्रलोभितस्यापि मुनेर्मौनं न भग्नमित्याह—

जहिहि कठिनतां प्रयच्छ वाचं ननु करुणामृदु मानसं मुनीनाम् ।
उपनतमवधीरयन्नभव्याः स निपुणमेत्य कयाचिदेवमूचे ॥ ५१ ॥

जहिहीति ॥ कठिनतां निःस्नेहतां जहिहि । त्यजेत्यर्थः ॥ जहातेः " आ च

Digitized by Google

हौ " इतीकारः ॥ वार्षं भयञ्च । संघत्स्वेत्यर्थः । मुनीनां मानसं मनः करुणायदु ननु दयार्द्रं खलु ॥ " स्वान्तं हृन्मानसं मनः " इत्यमरः ॥ किंच । अमव्या निर्माण्या उपगतं प्राप्तम् । विषयमिति शेषः । अवधीरयन्त्यवमन्यन्ते । एवमुक्तप्रकारेण सोऽर्जुनः कयाचिदेत्य समीपमागत्य निपुणं चतुरं यथा स्यात्तथोच उक्तः । नायिकया दूतीं प्रति वचनमुक्तं तया दूत्या च मुनिं प्रत्युक्तम् । कथितमित्यर्थः ॥ अत्र पञ्चश्लोक्यां विमलम्भशृङ्गारस्यौत्सुक्यनाम्नो व्यभिचारिभावस्य चापुनरुक्तिः । अनौचित्येन नायिकायाः प्रवृत्तेराभासत्वमनुसंधेयम् । तदुक्तम्— " एकत्र चेन्नानुरागस्तिर्यङ्म्लेच्छगतोऽपि वा । योषितां बहुसक्तिश्चेद्रसाभासस्त्रिधा मतः" इति । तन्निबन्धनादूर्जस्वलमलंकारः । तथा च सूत्रम्— " रसभेददतदाभासतत्प्रकाशानां निबन्धनेन रसवत्प्रायमूर्जस्वलम् " इति । तत्प्रकाश्यमानबन्धने समाहितालंकार इति सूत्रार्थः ॥

सललितचलितत्रिकाभिरामाः शिरसिजसंयमनाकुलैकपाणिः ।
सुरपतितनयेऽपरा निरासे मनसिजजैत्ररथं विलोचनार्धम् ॥ ५२ ॥

सललितेति ॥ सललितं सविलासं यथा तथा चलितेन विवर्तितेन त्रिकेन कटिभागेन ॥ " पृष्ठवंशाधरे त्रिकम् " इत्यमरः ॥ अभिरामाः शिरसि जाताः शिरसिजाः ॥ "सप्तम्यां जनेर्डः" । "अमूर्धमस्तकात्स्वाङ्गादकामे" इत्यलुक । " उपपदमतिङ् " इति समासः ॥ एतेन मनसिजो व्याख्यातः ॥ तेषां संयमने बन्धन आकुलो व्यग्र एकः पाणिर्यस्याः सापरा स्त्री सुरपतितनयेऽर्जुने । जेतैव जैत्रः ॥ जेतृशब्दात्तृजन्तात् "प्रज्ञादिभ्यश्च" इत्यण्प्रत्ययः ॥ मनसिजस्य जैत्रः शरस्तं तथाभूतम् । विलोचनस्यार्धमेकदेशम् । कटाक्षमित्यर्थः । निरासे विससर्ज ॥

कुसुमितमवलम्ब्य चूतमुच्चैस्तनुरिभकुम्भपृथुस्तनानताङ्गी ।
तदभिमुखमनङ्गचापयष्टिर्विसृतगुणेव समुन्ननाम काचित् ॥ ५३ ॥

कुसुमितमिति ॥ इभकुम्भवत्पृथुभ्यां स्तनाभ्यामानतमङ्गं यस्याः सा ॥ " अङ्गगात्रकण्ठेभ्यश्च"इति ङीष् ॥ काचिच्चतुरस्नन्वी ॥ " द्योतो गुणवचनात्" इति विकल्पान्न ङीष् ॥ कुसुमितमुच्चैरुन्नतं चूतमवलम्ब्य । अतएव चूतलतायोगाद्विसृतो विस्तृतो गुणो ज्या यस्याः सा ॥ "विसृतं विस्तृतं ततम्" । " मौर्वी ज्या शिञ्जिनी गुणः " इति चामरः ॥ अनङ्गचापयष्टिरिव । आकृष्टमुक्तेति भावः । तदभिमुखं समुन्ननाम समुज्जजृम्भे । अङ्गभङ्गं चकारेत्यर्थः ॥

सरभसमवलम्ब्य नीलमन्या विगलितनीवि विलोलमन्तरीयम् ।
अभिपतितुमनाः ससाध्वसेव च्युतरशनागुणसंदितावतस्थे ॥ ५४ ॥

१ सकुसुमम्. २ संयत.

Digitized by Google

सरभसमिति ॥ अन्यापरा विगलितनीवि श्लथबन्धनमत एव विलोलं स्थानच्युतम् । नीव्या रक्तं नीलम् ॥ "नीव्या अन्यतरस्याम्" इत्यन्नन्तोऽयम् ॥ अन्तरीयं परिधानमवलम्ब्य इत्नेन गृहीत्वा सरभसं सत्वरमभिपतितुं मनो यस्याः सा । अपगन्तुमुद्युक्तेत्यर्थः । तथापि ससाध्वसेव । न तु वस्तुतः ससाध्वसा । किंतु च्युतेन गलितेन रशनागुणेन संदिता बद्धा सत्वरतस्थे स्थिता ॥ "बद्धे संदानितं भूतमुदितं संदितं सितम्" इत्यमरः ॥ कर्मणि क्तः । "यतिस्तुतिमास्थाम्–" इतीकारः ॥

काचिद्युग्मेनाह—

यदि मनसि शमः किमङ्ग चापं शठ विषयास्तव वल्लभा न मुक्तिः ।
भवतु दिशति नान्यकामिनीभ्यस्तव हृदये हृदयेश्वरावकाशम् ॥५५॥

यदीत्यादि ॥ तव मनसि शमः शान्तिर्यदि । अस्तीति शेषः । अङ्ग भोः । चापं किम् । किमर्थमित्यर्थः । किंतु । हे शठ हे वञ्चक । तव विषयाः शब्दादयो वल्लभाः प्रियाः । न तु मुक्तिः । तदेव द्रढयितुमाह— भवतु । को दोष इति शेषः ॥ यद्यहं रागी तर्हि किमिति भवतीनं गणयामीति शङ्कां निवारयति— तव हृदये मनसि हृदयेश्वरा काचिदेव प्रेयस्यन्यकामिनीभ्यः कृपन्तरेभ्योऽवकाशं न दिशति न प्रयच्छति । कृपन्तरासक्त्या नास्माभ्यमनयसि । न तु वैराग्यात् । तदर्थमेवायं ते सकलः प्रयासोऽभीत्यर्थः ॥

इति विषमितचक्षुषाभिधाय स्फुरदधरोष्ठमसूयया कयाचित् ।
अगणितगुरुमानलज्जयासौ स्वयमुरसि श्रवणोत्पलेन जघ्ने ॥ ५६ ॥

इतीति ॥ इतीत्थमसूयया मत्सरेण स्फुरन्नधरोष्ठो यस्मिन्कर्मणि तथाभिधायोक्त्वा विषमितचक्षुषा कुटिलीकृतदृष्ट्यागणिता गुरव आचार्यादयो मानोऽभिमानो लज्जा च यया तया कयाचिदसौ मुनिरुरसि स्वयं स्वहस्तेनैव श्रवणोत्पलेन जघ्ने हतः ॥

सविनयमपराभिसृत्य साचि स्मितसुभगैकलसत्कपोललक्ष्मीः ।
श्रवणनियमितेन तं निदध्यौ सकलमिवासकलेन लोचनेन ॥ ५७ ॥

सविनयमिति ॥ अपरा सविनयमनौद्धत्येन साचि तिर्यगभिसृत्य समीपं गत्वा स्मितेन मन्दहासेन सुभगैकस्य ललितः कपोलस्य लक्ष्मीर्यस्याः सेति ॥ बहुव्रीहिः । अन्यथा कमत्वयः स्यादित्युक्तं प्राक् ॥ श्रवणनियमितेन कर्णान्तमापितेन । रूढमत्सरं तावदीयतेनेत्यर्थः । असकलेनासंपूर्णेन । कटाक्षेणेति यावत् । लोचनेन तं मुनिं धनंजयं सकलमिव समग्रमायं यथा तथा निदध्यौ पश्यति स्म । कटाक्षेणैव नाटमद्रागीदित्यर्थः ॥ एषु श्लोकेषु भावाभासनि-

१ क.

बन्धनत्वाद्जस्रसालंकारः । औत्सुक्यमत्र भावः । आभासत्वं चास्य विरक्तमुनाव-लंबित्वादित्युक्तं प्रागेवेति ॥

अथ तासां मुनिविलोभनमुपसंहरति—

करुणमभिहितं त्रपा निरस्ता तदभिमुखं च विमुक्तमभ्रु ताभिः ।
प्रकुपितमभिसारणेऽनुनेतुं प्रियमियती ह्यबलाजनस्य भूमिः ॥५८॥

करुणमिति ॥ ताभिः स्त्रीभिस्तदभिमुखं मुनिसमक्षं करुणं दीनमभिहितमुक्तम् । त्रपा निरस्ता लज्जा त्यक्ता । किंबहुनाभ्रु च विमुक्तम् । ततः परं न किंचिद्विधेयमासीदिति भावः । कुतः । हि यस्मादबलाजनस्याभिसारणे समागमविषये प्रकुपितमनुकूलं प्रियमनुनेतुमनुकूलयितुमियती भूमिरित्येतावती सीमा । साधनानां परमावधिरिति भावः ॥ अर्थान्तरन्यासोऽलंकारः ॥

अथासामनुरागदार्ढ्यं निगमयति—

असकलनयनेक्षितानि लज्जा गतमलसं परिपाण्डुता विषादः ।
इति विविधमियाय तासु भूपां प्रभवति मण्डयितुं वधूरनङ्गः ॥५९॥

असकलेति ॥ असकलनयनेक्षितानि नयनार्धविलोकितानि लज्जालसं गतं मन्दगमनं परिपाण्डुता पाण्डुरवर्णत्वं विषाद इष्टानवाप्तिनिमित्तश्चेतोभङ्ग इत्येवंप्रकारं विविधं नानाविधचेष्टितम् ॥ "नपुंसकमनपुंसक-" इत्यादिना नपुंसकैकशेषत्वम् ॥ तासु भूपामियायेति भावमाधान्येन योज्यम् । तथाहि । अनङ्गो मदनो वधूर्मण्डयितुं प्रभवति । सर्वावस्थास्विति शेषः । अतस्तासामनङ्गभूषितानामखिलं भूषणमेवेति भावः ॥

इदानीं तासां त्रिभिर्मुनिविलोभने प्रयासवैफल्यमाह—

अलसपदमनोरमं प्रकृत्या जितकलहंसवधूगति प्रयातम् ।
स्थितमुरुजघनस्थलातिभारादुदितपरिश्रमजिह्मितेक्षणं वा ॥६०॥

अलसेति ॥ वधूनां संबन्धि प्रकृत्यालसैः पदैर्मनोरमं मनोज्ञमतएव जिता कलहंसवधूनां गतिर्येन तत्प्रयातं गमनम् ॥ भावे क्तः ॥ तथोरुणोऽतिविपुलस्य जघनस्थलस्यातिभारादतिगौरवादुदितपरिश्रमेणोद्गतश्रमेण जिह्मिते घूर्णिते ईक्षणे यस्मिंस्तत्स्थितं वा स्थितिश्च ॥ सर्वत्र वाशब्दः समुच्चये ॥ "वा समुच्चय एवार्थे उपमानविकल्पयोः" इति हेमचन्द्रः ॥

भ्रुशकुसुमशरेषुपातमोहादनवसितार्थपदाकुलोऽभिलापः ।
अधिकविततलोचनं वधूनामयुगपदुन्नमितभ्रु वीक्षितं च ॥६१॥

१ अभिनेतुम्. २ स्तना. ३ वा.

Digitized by Google

भृङ्गेति ॥ तथा भृङ्गेण नादेन कुसुमशरस्य कामस्येषोर्निपातेन यो मोहो मूर्च्छा तस्माद्धेतोरनवसितार्थैरस्फुटोच्चारणादनवधारिताभिधेयैः पदैः सुप्तिङन्तादिभिः भ्रमितशब्दैराकुलः संकीर्णोऽभिलापो वाक्यप्रयोगश्चाधिकं वितते विस्तृते लोचने यस्मिन्नदयुगलप्रपर्यायेणोन्मिते भ्रुवौ यस्मिन्तत्तथोक्तम् ॥ "ह्रस्वो नपुंसके प्रातिपदिकस्य" इति ह्रस्वः ॥ भीसितं भीक्षणं च ॥

रुचिकरमपि नार्थवद्बभूव स्तिमितसमाधिशुचौ पृथातनूजे ।
ज्वलयति महतां मनांस्यमर्षे न हि लभतेऽवसरं सुखाभिलाषः॥६२॥

रुचिकरमिति ॥ पूर्वोक्तं रुचिकरं स्पृहाजनकमपि ॥ "रुचिः कान्तिरुचौ भासि स्त्रियां स्पृहाभासयोः" इति वैजयन्ती ॥ स्तिमितेन स्थिरेण समाधिना तपोयोगेन शुचौ शुद्धे । निर्विकारचेतसीत्यर्थः । पृथातनूजेऽर्जुने विषयेऽर्थवत्सप्रयोजनं न बभूव । तथा हि । महतां धीराणां मनांस्यमर्षे क्रोधे ज्वलयति सति सुखाभिलाषोऽवसरमवकाशं न लभते । रौद्रस्य शृङ्गारविरोधित्वादिति भावः ॥ अत्र विशेषकेऽर्थान्तरन्यासोऽलंकारः ॥

स्वयं संराध्यैवं शतमखमखण्डेन तपसा
परोच्छित्त्या लभ्यामभिलषति लक्ष्मीं हरिसुते ।
मनोभिः सोद्वेगैः प्रणयविहतिभ्वस्तरुचयः
सगन्धर्वा धाम त्रिदशवनिताः स्वं प्रतिययुः ॥ ६३ ॥

स्वयमिति ॥ एवं हरिसुतेऽर्जुने स्वयमखण्डेनाविच्छिन्नेन तपसा शतमखमिन्द्रं संराध्य प्रीणयित्वा परोच्छित्त्या शत्रुवधेन लभ्यां साध्यां लक्ष्मीं राजलक्ष्मीमभिलषति सति सोद्वेगैः कार्यसिद्धयभावात्सनिर्वेदैर्मनोभिरुपलक्षिताः । किंच । प्रणयविहत्या मार्गनाभङ्गेन भ्वस्तरुचयो नष्टकान्तयः सगन्धर्वा गन्धर्वसहितास्त्रिदशवनिताः स्वं धाम स्वस्थानं प्रतिययुः ॥ त्रिसरिन्नीहृचमेतत्— "रसै रुद्रैश्छिन्ना यमनसभला नः त्रिसरिन्नी" इति लक्षणात् ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथसमाख्यया
व्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये
अर्जुनविलोभनप्रस्थानो नाम दशमः सर्गः ।

१ त्रिसृ.

Digitized by Google

एकादशः सर्गः ।

अथामर्षान्निसर्गाच्च जितेन्द्रियतया तया ।
आजगामाश्रमं जिष्णोः प्रतीतः पाकशासनः ॥ १ ॥

अथेति ॥ अथाप्सरसां प्रतिमयाणानन्तरम् । पाको नाम कश्चिद्राक्षसस्तस्य शासन इन्द्रः ॥ नन्यादित्वाल्लुप्तमत्वर्थः ॥ तयाप्सरोमुखाच्छ्रुतयामर्षादिपदेपार्थिसर्गाच्च या जितेन्द्रियता तयागन्तुकानागन्तुकोभयविधहेतुकया प्रतीतो हृष्टः सन् ॥ "ख्याते हृष्टे प्रतीतः" इत्यमरः ॥ जिष्णोरर्जुनस्य ॥ "जिष्णुः शक्रे धनंजये" इत्यमरः ॥ आश्रममाजगाम ॥ अत्रामर्षनिसर्गयोर्जितेन्द्रियताहेतुर्क रुचिकरमपीति काव्यलिङ्गं स्फुटमवगम्यते ॥

किमिन्द्रो मुनिरूपेणैवाजगामेत्याह—

मुनिरूपोऽनुरूपेण सूनुना ददृशे पुरः ।
द्राघीयसा वयोऽतीतः परिक्लान्तः किलाध्वना ॥ २ ॥

मुनिरूप इति ॥ मुने रूपमिव रूपं यस्य स मुनिरूपः । मुनिवेषधारीत्यर्थः । स इन्द्रोऽनुरूपेण । दर्शनमदानयोग्येनेत्यर्थः । सूनुना पुत्रेणार्जुनेन पुरोऽग्रे ददृशे दृष्टः । कथंभूतः । वयो यौवनादिकमतीतो हृद्धः ॥ "द्वितीया श्रित–" इत्यादिना द्वितीयासमासः ॥ द्राघीयसातिदीर्घेण ॥ "प्रियस्थिर–" इत्यादिना दीर्घशब्दस्य द्राघादेशः ॥ अध्वना । अध्वगमनेनेत्यर्थः । परिक्लान्तः परिश्रान्तः । किलेत्यलीके ॥ "किल संभाव्यवार्तयोः । हेत्वरुच्योरलीके च" इति हेमचन्द्रः ॥ हृद्ध इव दूराध्वश्रान्त इव स्थित इत्यर्थः ॥ "इव" इति पाठे स्पष्टार्थः ॥

अथ चतुर्भिरिन्द्रं विशिनष्टि—

जटानां कीर्णया केशैः संहत्या परितः सितैः ।
प्रकृत्येन्दुकरैरक्तः पर्यन्त इव संध्यया ॥ ३ ॥

जटानामिति ॥ परितः सितैः केशैः कीर्णया व्याप्तया जटानां संहत्योपलक्षितः । अतएवेन्दुकरैरिन्दुकिरणैः पृक्तया युक्तया संध्ययोपलक्षितोऽक्तः पर्यन्तो दिनान्त इव स्थितः । तस्यापि परिणतरक्तत्वाद्धृद्धोपमानत्वम् । जटानां संहत्येत्युक्त्वा-र्तसंध्याम्यम् ॥

विशदभ्रुयुगच्छन्नवलितापाङ्गलोचनः ।
प्रालेयावततिम्लानपलाशाब्ज इव ह्रदः ॥ ४ ॥

१ हरिः.

Digitized by Google

विषादेति ॥ पुनश्च । विषादेन पलितपाण्डुरेण भ्रूयुगेन छन्ने वलितापाङ्गे वलितमन्ते लोचने यस्य स तथोक्तः ॥ "अपाङ्गौ नेत्रयोरन्तौ" इत्यमरः ॥ पामादित्वाल्लोमादित्वेन वलच्प्रत्ययः ॥ मालेयावतस्या हिमसंहत्या म्लानपलाशानि म्लान्यदलान्यङ्गानि यस्मिन्त इद इव स्थितः ॥

आसक्तभरनीकाशैरङ्गैः परिकृशैरपि ।
आधूनः सन्नृहिण्येव प्रायो यष्ट्यावलम्बितः ॥ ५ ॥

आसक्तेति ॥ पुनश्च । परिकृशैः परिक्षीणैरप्यासक्तभरनीकाशैर्भाराक्रान्तसदृशैः । सभारवहकभद्विरित्यर्थः ॥ "इकः काशे" इति दीर्घः ॥ अङ्गैरुपलक्षितः । कार्श्यात्तद्भूम्यपि स्वाङ्गानि स्वयं वोढुमसमर्थ इत्यर्थः । अतएवाधून औदरिकः ॥ "आधूनः स्यादौदरिको विजिगीषाविवर्जिते" इत्यमरः ॥ आङ्पूर्वाद्धिन्व्यतेः क्तः । "च्वोः शूडनुनासिके च" इत्यूठादेशः । "दिवोऽविजिगीषायाम्" इति निष्ठानत्वम् ॥ सन्नृहिण्यानुकूलकलत्रनेव प्रायः प्रायुर्येण यष्ट्यावलम्बनदण्डेनावलम्बितो धारितः । न तु स्वयमक्षमेति भावः ॥

गूढोऽपि वपुषा राजन्धाम्ना लोकाभिभाविना ।
अंशुमानिव तन्वभ्रपटलच्छन्नविग्रहः ॥ ६ ॥

गूढ इति ॥ वपुषा गूढोऽपि । प्रच्छन्नरूपोऽपीत्यर्थः ॥ प्रकृत्यादिभ्य उपसंख्यानादृतीया ॥ तन्वभ्रपटलच्छन्नविग्रहः लोकाभ्रशब्दान्तरितमूर्तिरंशुमानिव लोकाभिभाविना लोकव्यापिना धाम्ना तेजसा ॥ "धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोः" इति हेमचन्द्रः ॥ राजन्दीप्यमानो दरश्च इति पूर्वेण संबन्धः ॥

जरतीमपि बिभ्राणस्तनुमभ्राकृताकृतिः ।
चकाराक्रान्तलक्ष्मीकः ससाध्वसमिवाश्रमम् ॥ ७ ॥

जरतीमिति ॥ जरतीं जीर्णाम् ॥ "जीनो जीर्णो जरत्यपि" इत्यमरः ॥ जीर्यतेरतीवार्थे शतृप्रत्ययः । "ऋगितश्च" इति ङीप् ॥ तनुं शरीरं बिभ्राणो दधदप्यभ्राकृता लोकसामान्याकृतिर्मूर्तिर्यस्य स इन्द्र आक्रान्ताभिभूता लक्ष्मीराश्रमशोभा येन स आक्रान्तलक्ष्मीकः ॥ एकवचनान्तलक्ष्मीशब्दोत्तरपदबहुव्रीहौ "उरःप्रभृतिभ्यः कप्" इति निपात्यं कप् ॥ आश्रमं ससाध्वसमिव चकार । तेजस्विदर्शनादूर्यं भवति । वयं न दुःखजनकं तत्सामीप्यत्वादिति सूचयितुमिवशब्दः ॥

अभितस्तं ततासूनुः स्नेहेन परितस्तरे ।
अविज्ञातेऽपि वन्धौ हि बलात्प्रह्लादते मनः ॥ ८ ॥

१ मन्दलच्छन्नमण्डलः. २ अभाकृताकृतिम्. ३ लक्ष्मीकम्.

Digitized by Google

अभित इति ॥ पृथासूनुरर्जुनस्तमिन्द्रमभितस्तं प्रति स्नेहेन परितस्तरे । तद्गोचरेण मेत्रा पर्याप्ततः ॥ स्तृणोतेः कर्मणि क्विप् । "ऋतश्च संयोगादेर्गुणः" इति गुणः ॥ नन्वज्ञातसंबन्धविशेषस्य कथं स्नेहोदय इत्यत आह—अविज्ञात इति ॥ बन्धौ मुहृद्यविज्ञातेऽपि बन्धुरयमित्यज्ञातेऽपि बलाद्वान्धवसचावसादेव मनः प्रसादते हि । स्निह्यतीत्यर्थः ॥

आतिथेयीमथासाद्य सुतादर्चितिं हरिः ।
विश्रम्य विष्टरे नाम व्याजहारेति भारतीम् ॥ ९ ॥

आतिथेयीमिति ॥ अथ हरिरिन्द्रः सुतादर्जुनादातिथेयीमतिथिषु साध्वीम् ॥ "पथ्यतिथिवसतिस्वपतेर्ढञ्" ॥ अर्चितिं पूजामासाद्य प्राप्य ॥ "पूजा नमस्यार्चितिः" इत्यमरः ॥ विष्टर आसने ॥ "ऋदोरप्" इति स्तृणातेरप्प्रत्ययः । "दुहासनयोर्विष्टरः" इति षत्वम् ॥ विश्रम्य नाम विश्रम्य किल । श्रममपनीयेत्यर्थः । इति वक्ष्यमाणप्रकारां भारतीं व्याजहारोक्तवान् ॥ "व्याहार उक्तिर्लपितम्" इत्यमरः ॥

अथ प्रथमं तावन्मुनिवदेनं मुग्धं कृत्वाह—

त्वया साधु समारम्भि नवे वयसि यत्तपः ।
ह्रियते विषयैः प्रायो वर्षीयानपि मादृशः ॥ १० ॥

त्वयेति ॥ त्वया साधु समारम्भि सम्यगुपक्रान्तम् ॥ रभेः कर्मणि लुङ् ॥ हृतः । पथ्यस्यानवे वयसि यौवने । तपश्चर्यत इति शेषः । तथा हि । अहमिव दृश्यतेऽसौ मादृशो वर्षीयानतिवृद्धोऽपि ॥ "प्रियस्थिर-" इत्यादिना वृद्धशब्दस्य वर्षादेशः॥ प्रायो विषयैर्ह्रियत आकृष्यते । किमु भवादृशो यवीयानिति भावः ॥

अथैवमनारम्भे तव स्वाकारलाभोऽपि विफलः स्यादित्याशयेनाह—

श्रेयसीं तव संप्राप्ता गुणसंपदमाकृतिः ।
सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम् ॥ ११ ॥

श्रेयसीमिति ॥ तवाकृतिर्मूर्तिः । रम्येति शेषः । श्रेयसीं श्रेष्ठां गुणसंपदं तपःसमारम्भरूपां संप्राप्ता । अतो न निष्फलेति भावः ॥ न च स्वाकारा गुणाढ्याश्च क्रियन्तो न सन्तीति वाच्यमित्याह—लोक इति ॥ लोके रम्यता रम्याकारता सुलभा हि । गुणार्जनं गुणसंपादनं दुर्लभम् । त्वयि तूभयं संपद्यत इति हेतोः परमाश्चर्य इति भावः ॥

Digitized by Google

यदुक्तम् "त्वया साधु समारब्धम्" इति तदेव साधुत्वं संसारनिःसारताख्यापनया युग्मेनोपपादयति—

शरदम्बुधरच्छाया गत्वर्यो यौवनश्रियः ।
आपातरम्या विषयाः पर्यन्तपरितापिनः ॥ १२ ॥

शरदिति ॥ यौवनश्रियस्तावच्छरदम्बुधरच्छाया इव गत्वर्यश्चलाः ॥ "गत्वरश्च" इति करवन्तो निपातः । "दिद्युतोऽन्-" इत्यादिना ङीप् ॥ विषयाः शब्दादयस्त्वापातरम्यास्तत्कालरमणीयाः ॥ "तदात्वे पात आपातः" इति वैजयन्ती ॥ पर्यन्तेऽवसाने परितापयन्ति दुःखं कुर्वन्तीति तथोक्ताः ॥

अन्तकः पर्यवस्थाता जन्मिनः संततापदः ।
इति त्याज्ये भवे भव्यो मुक्तावुत्तिष्ठते जनः ॥ १३ ॥

अन्तक इति ॥ किं च । संतता अनवच्छिन्ना आपदः क्लेशा यस्य तस्य जन्मिनः प्राणिनः ॥ "प्राणी तु चेतनो जन्मी" इत्यमरः । व्रीह्यादित्वादिनिः ॥ अन्तको मृत्युः पर्यवस्थाता प्रतिरोद्धा । प्रथमं तावज्जन्मिनो जन्मदुःखमेव दुस्तरं, ततो जातस्य जीवनमपि सततं दुःखसंभिन्नतया विषयुक्तान्नमार्यं,तदपि मृत्युग्रस्तमिति सोऽयं "काकमांसं क्षुनोच्छिष्टं स्वल्पं तदपि दुर्लभम्" इति न्यायादिति भावः । इत्युक्तहेतोस्त्याज्ये भवे संसारे । भवतीति भव्यो योग्यो जनः । भवादश इति शेषः ॥ "भव्यं सुखे शुभे चापि भेषजयोग्यभाविनोः" इति विश्वः ॥ "भव्यगेय-" इत्यादिना कर्तरि निपातः ॥ मुक्तौ मोक्ष उत्तिष्ठत उद्युक्तो भवति ॥ "उदोऽनूर्ध्वकर्मणि" इत्यात्मनेपदम् ॥

संप्रति प्रशंसापूर्वकं स्वाभिसंधिं दर्शयति—

चित्तवानसि कल्याणी यत्त्वां मतिरुपस्थिता ।
विरुद्धः केवलं वेषः संदेहयति मे मनः ॥ १४ ॥

चित्तवानिति ॥ चित्तवान्प्रशस्तचित्तोऽसि ॥ प्रशंसायां मतुप् ॥ कुतः । यतस्त्वां कल्याणी साध्वी ॥ "वहादिभ्यश्च" इति ङीप् ॥ मतिरुपस्थिता संगता । किंतु केवलमेकं यथा तथा विरुद्धो वेषो मे मनः संदेहयति संशययुक्तं करोति । यद्वा । वेषः । केवलं वेष एवेत्यर्थः ॥ "केवलः कुत्सनेऽन्यके च" । "केवलं चावधारिते" इत्युभयत्रापि शाश्वतः ॥

वेषविरोधमेवाह—

युयुत्सुनेव कवचं किमामुक्तमिदं त्वया ।
तपस्विनो हि वसते केवलाजिनवल्कले ॥ १५ ॥

१ क्लेशे.

Digitized by Google

युयुत्सुनेति ॥ युयुत्सुनेव योद्धुमिच्छुनेवत्यया ॥ युधेः सन्नन्तादुप्रत्ययः ॥ किमिदं कवचं चर्मोत्कर्षमर्पितम् ॥ तत्र को विरोध इत्यत्राह— हि यस्मात्तपस्विनः केवले एके । कवचायसहचरित इति यावत् । ते च ते अजिनवल्कले च ॥ "निर्मोके केवलमिति त्रिलिङ्गं त्वेककृत्स्नयोः" इत्यमरः ॥ वसत आच्छादयन्ति । अतस्तपस्विनस्ते कवचधारणं विरुद्धमित्यर्थः ॥

प्रपित्सोः किंच ते मुक्तिं निःस्पृहस्य कलेवरे ।
महेषुधी धनुर्भीमं भूतानामनभिद्रुहः ॥ १६ ॥

प्रपित्सोरिति ॥ किंच । मुक्तिं प्रपित्सोः प्रातुमिच्छोः ॥ "सनि मीमा–" इत्यादिनेसादेशः । अत्र "लोपोऽभ्यासस्य" इत्यभ्यासलोपः ॥ अतो मुमुक्षुत्वादेव कलेवरे शरीरे निःस्पृहस्य गतस्पृहस्य । अतो नात्मरक्षार्थं धनुर्धारणं युक्तमित्यर्थः॥ नापि परहिंसार्थमित्याह— भूतानां जन्तूनाम् ॥ "स्म्यादौ जन्तौ च भूतानि" इति वैजयन्ती ॥ "कुधमद्रोरुपसृष्टयोः कर्म" इति कर्मसंज्ञायाम् "कर्तृकर्मणोः कृति" इति कर्तरि षष्ठी ॥ अनभिद्रुहोऽहिंसकस्य ॥ "सत्सूद्विष–" इत्यादिना क्विप् ॥ ते तव महेषुधी महानिषङ्गौ भीमं त्रासजनकं धनुश्च । न समर्थयते क्षममित्युत्तरेणान्वयः । समर्थयत इति वचनविपरिणामः कार्यः ॥

भयंकरः प्राणभृतां मृत्योर्भुज इवापरः ।
असिस्तव तपस्थस्य न समर्थयते शमम् ॥ १७ ॥

भयंकर इति ॥ तथा मृत्योरपरो भुज इव प्राणभृतां प्राणिनां भयंकरः ॥ "मेघर्तिभयेषु कृञः" इति खच्प्रत्ययः । "अरुर्द्विष–" इत्यादिना मुमागमः ॥ असिः खड्गः । तपसि तिष्ठतीति तपस्थः । तपश्चरन्नित्यर्थः ॥ "सुपि स्थः" इति कप्रत्ययः ॥ तस्य तव शमं शान्तिं न समर्थयते न संभावयति । किं शान्तस्य क्लेशेनेति भावः ॥

नन्वशान्तस्य किं तपसेत्याशङ्क्य जयार्थमित्याह—

जयमत्रभवान्नूनमरातिष्वभिलाषुकः ।
क्रोधलक्ष्म क्षमावन्तः कायुधं क्व तपोधनाः ॥ १८ ॥

जयमिति ॥ अत्रभवान् । पूज्य इत्यर्थः ॥ "इतराभ्योऽपि दृश्यन्ते" इति प्रथमार्थे प्राग्दिशीयस्तत्प्रत्ययः । सुप्सुपेति समासः ॥ "त्रिषु तत्रभवान्पूज्यस्तथैवात्रभवानपि" इति यादवः ॥ अरातिषु विषये जयमभिलाषुको जयमिच्छुः ॥ "लषपत–" इत्यादिनोकञ्प्रत्ययः । "न लोक–" इत्यादिना षष्ठीप्रतिषेधः ॥ नूनमिति निश्चयस्य ॥ "नूनं तर्केऽपि निश्चये" इत्यमरः ॥ क्रोधस्य लक्ष्म क्रोधस्य

Digitized by Google

लिङ्गमायुषं क । क्षमावन्तः क्षान्तास्तपोधनाः क । क्रोधक्षान्त्योर्विरोधात्कार्यकारणयोः क्षमातपसोरप्येकत्रासंभवेऽपि क्षमिणस्ते तपो जयार्थं न तु मोक्षार्थमिति निश्चय इत्यर्थः ॥

तपसो जयार्थत्वे दोषमाह—

यः करोति वधोदर्कां निःश्रेयसकरीः क्रियाः ।
ग्लानिदोषच्छिदः स्वच्छाः स मूढः पङ्कयत्यपः ॥ १९ ॥

य इति ॥ यः पुमानभिमतं श्रेयो निःश्रेयसं मुक्तिः ॥ "अचतुर–" इत्यादिना समासान्तो निपातः ॥ "मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्" इत्यमरः ॥ निःश्रेयसं कुर्वन्तीति निःश्रेयसकरीः । निःश्रेयसहेतूनित्यर्थः ॥ "कृञो हेतुताच्छील्यानुलोम्येषु" इति हेत्वर्थे टप्रत्ययः । टित्त्वान्ङीप् ॥ क्रियास्तपोदानादिकर्माणि वधोदर्का हिंसाफलकाः करोति ॥ "उदर्कः फलमुत्तरम्" इत्यमरः ॥ अतएव मूढः स पुमान्ग्लानिरेव दोषस्तं छिन्दन्तीति ग्लानिदोषच्छिदः पिपासाहारिणीः ॥ क्विप् ॥ स्वच्छा निर्मला अपः पङ्कयति पङ्कवतीः करोति ॥ "नाविद्वद्भावे विन्मतोर्लुक्" इति मतुपो लुक् ॥ महाफलसाधनस्य तपसस्तुच्छफलैर्विनियोगः । स्वच्छाम्बुनः पङ्कसंकरत्वमेवाविद्वद्गर्हितमित्यर्थः ॥ अत्र "यत्तपसो वधोदर्कीकरणं तन्निर्मलस्य पयसः पङ्कसंकरीकरणम्" इति वाक्यार्थौचित्यमारोप्य प्रतिबिम्बकरणाक्षेपादसंभवद्वस्तुसंबन्धाद्वाक्यार्थहेतुनिदर्शनालंकारः ॥

नन्वर्थकामयोरपि मोक्षवत्पुरुषार्थत्वाच्चपसस्तदर्थत्वे को दोषस्तत्राह—

मूलं दोषस्य हिंसादेरर्थकामौ स्म मा पुषः ।
तौ हि तत्त्वावबोधस्य दुरुच्छेदावुपप्लवौ ॥ २० ॥

मूलमिति ॥ हिंसादेरिति तद्गुणसंविज्ञानो बहुव्रीहिः । आदिशब्दादनृतस्तेयादीनां संग्रहः । दोषस्यावगुणस्य मूलं कारणभूतौ । "स्त्रीकामा धनकामाश्च किं न कुर्युरिह पातकम्" इति भावः । अर्थकामौ मा स्म पुषः ॥ "स्मोत्तरे लङ् च" इति लङ् । "पुषादि–" इत्यादिना च्लेरङादेशः ॥ हि यस्मात्तावर्थकामौ तत्त्वावबोधस्य तत्त्वज्ञानस्य । मोक्षसाधनस्येति शेषः । दुरुच्छेदौ दुर्वारावुपप्लवौ हिंसादिप्रवर्तकत्वादन्धकौ । अतः पुरुषार्थपरिपन्थिनावेतौ न पुरुषार्थावित्यर्थः ॥

मुक्तिमभिधेयकत्वात्पुरुषार्थावर्थकामावित्युक्तम् । तमर्थस्य दुःखैकनिदानत्वादप्यपुरुषार्थत्वमिति पश्यामः प्रपञ्चयति—

अभिद्रोहेण भूतानामर्जयन्नत्वरीः श्रियः ।
उदन्वानिव सिन्धूनामापदोमति पात्रताम् ॥ २१ ॥

Digitized by Google

अभिद्रोहेणेत्यादि ॥ भूतानामभिद्रोहेण हिंसया गत्वरीरस्थिराः श्रियः संपदोऽर्जयतः। उदकमस्तीत्युदन्वानुदधिः ॥ "उदन्वानुदधौ च" इति निपातनात्साधु। सिन्धूनां नदीनामिवापदां पात्रतां मूलत्वमेति ॥

आपत्पात्रतामेव व्यनक्ति—

या गम्याः सत्सहायानां यासु खेदो भयं यतः।
तासां किं यन्न दुःखाय विपदामिव संपदाम् ॥ २२ ॥

या इति ॥ याः संपदः सत्सहायानां विद्यमानसाधनानामेव पुंसां गम्याः प्राप्याः। विपदोऽपि सत्सहायानामेव गम्याः। निस्तीर्या इत्यर्थः ॥ "कृत्यानां कर्तरि वा" इति षष्ठी ॥ यासु सतीषु खेदो रक्षणादिक्लेशः। विपत्सु त्वत एवेति विशेषः। यतो याभ्यः संपद्भ्यो भयम्। अनेकार्थमूलत्वादिति भावः। विपद्भ्यस्तु स्वरूपत एवेति भावः। किं बहुना। विपदामिव तासां संपदां संबन्धि। न किमस्तीति शेषः। यदुःखाय न भवति। सर्वं दुःखावहमेवेति भावः। यदाहुः— "अर्थानामर्जने दुःखमर्जितानां च रक्षणे। नाशे दुःखं व्यये दुःखं धिगर्थं दुःखभाजनम्" इति। अतो हेय इति भावः ॥ अत्र यन्न दुःखायेत्युत्तरवाक्यस्थ यच्छब्दसामर्थ्यात्तासां किमिति पूर्ववाक्ये तच्छब्दोपादानं नापेक्षते। तदेतत्काव्यप्रकाशे स्पष्टम् ॥

दुरासदानरीनुग्रान्धृतेर्विश्वासजन्मनः।
भोगान्भोगानिवाहेयानध्यास्यापन्न दुर्लभा ॥ २३ ॥

दुरासदानिति ॥ किंच। दुरासदान्दुःप्रापान्। विश्वासाज्जन्म यस्यास्तस्याः ॥ जन्मोत्तरपदत्वाद्बहुव्रीहिः ॥ धृतेः संतोषस्योग्रानरीन्। धनिकस्य सर्वत्रानाश्वाससंभवाद्विस्रम्भसुलभकानित्यर्थः। भुज्यन्त इति भोगान्धनान्याहेयानहिषु भवान् ॥ "इतिकुत्सिकुलशिवस्त्यस्त्यहेर्डेन्" ॥ भोगान्फणान् ॥ "भोगः सुखे धने वाहेः शरीरफणयोरपि" इत्युभयत्रापि विश्वः ॥ अध्यास्याधिष्ठायापद्विपन्न दुर्लभा। आशीविषमुखमिव तमेव भोगिनं पुमांसं बलादापदोऽनुसंदधतीत्यर्थः ॥

इतोऽपि श्रियो हेया इत्याह—

नान्तरङ्गाः श्रियो जातु प्रियैरासां न भूयते।
आसक्तास्वमी मूढा वामशीला हि जन्तवः ॥ २४ ॥

नेति ॥ श्रियः संपदो जातु कदाचिदन्तरङ्गा नीचानीचविशेषाभिज्ञा न भवन्ति। अतएवासां श्रियां प्रियैर्न भूयते। न ताः कुमार्यनुरज्यन्तीत्यर्थः। ननु किं श्रीदोषः पुरुषदोषो वेति चेत्तत्राह—मूढा अमी जनास्तासवनुरक्तास्वपि श्रीष्वासक्ताः। स्त्रीष्विव श्रीष्वनुरक्तास्वनुरागः पुंसामेवायं दोष इत्यर्थः ॥ किमर्थं तर्हि

Digitized by Google

नास्तेव सर्वेषामासक्तिरित्यर्थान्तरं न्यस्यति— वामेति ॥ जन्तवो वामशीला वक्रस्वभावा हि । स्वभावस्य दुर्वारत्वादिति भावः ॥

यदुक्तम् "नाम्तरङ्गाः श्रियः" इति तदेव भङ्ग्यन्तरेणाह—

कोऽपवादः स्तुतिपदे यदशीलेषु चञ्चलाः ।
साधुवृत्तानपि क्षुद्रा विक्षिपन्त्येव संपदः ॥ २५ ॥

क इति ॥ यत्संपदोऽशीलेषु दुःशीलेषु विषये चञ्चला अस्थिराः । न तद्विरुद्धयते यत्तच्चञ्चला इति । अतः स्तुतिपदे स्तुतिविषये तत्र कोऽपवादः का निन्दा । किंतु क्षुद्राः संपदः साधुवृत्तानपि विक्षिपन्त्येव जहत्येव । तदेव तासां निन्दास्पदमित्यर्थः । तस्मादर्थो न पुरुषार्थ इति संदर्भार्थः ॥

नन्वार्यमहमर्थये । किंतु वीरधर्ममनुपालयन्वैरनिर्यातनमिच्छामीत्याशङ्क्य तदपि परपीडात्मकत्वादयुक्तमिति श्लोकचतुष्टयेनाचष्टे—

कृतवानन्यदेहेषु कर्ता च विधुरं मनः ।
अप्रियैरिव संयोगो विप्रयोगः प्रियैः सह ॥ २६ ॥

कृतवानिति ॥ तत्रात्मरक्षान्तेनैव परपीडातो निवर्तितव्यमित्याशयेनाह— अप्रियैरनिष्टवस्तुभिः संयोग इव प्रियैरिष्टवस्तुभिः सह विप्रयोगो विरहोऽन्यदेहेषु स्वस्यैव देहान्तरेषु । अतीतानागतेष्वित्यर्थः । मनो विधुरं दुःखितं कृतवान् । कर्ता करिष्यति च ॥ भविष्ये लुट् ॥ तद्वर्तमाने चानुभूयत इति शेषः । इष्टनाशो दुःखहेतुरिति सर्वत्रापि प्रैकालिकसिद्धमिति श्लोकार्थः ॥

संभवीष्टसमागमस्य दुःखहेतुत्वमाह—

शून्यमाकीर्णतामेति तुल्यं व्यसनमुत्सवैः ।
विप्रलम्भोऽपि लाभाय सति प्रियसमागमे ॥ २७ ॥

शून्यमिति ॥ प्रियसमागम इष्टजनसंयोगे सति शून्यं रिक्तमप्याकीर्णतां संपूर्णतामेति । सदृशमिव प्रतीयत इत्यर्थः । व्यसनं विपदप्युत्सवैस्तुल्यम् ॥ "व्यसनं विपदि भ्रंशे" इत्यमरः ॥ विप्रलम्भो वञ्चना । प्रतारणमिति यावत् । सोऽपि लाभाय । किंबहुना प्रियसङ्गस्य सर्वावस्थास्वपि सुखमेवेत्यर्थः ॥

पुनः प्रकारान्तरेण प्रियवियोगस्य दुःखहेतुत्वमाह—

तदा रम्याण्यरम्याणि प्रियाः शल्यं तदासवः ।
तदैकाकी सबन्धुः सन्निष्टेन रहितो यदा ॥ २८ ॥

तदेति ॥ तदा रम्याण्यप्यरम्याण्यमनोरमाणि भवन्ति । किंबहुना प्रिया असवः

Digitized by Google

प्राणा अपि शस्यन्ते । शस्यवदसत्या भवन्तीत्यर्थः । किंच । तदा सबन्धुः सबन्ध्येकाक्यसहाय एव ॥ "एकादाकिनिच्चासहाये" इत्याकिनिच्प्रत्ययः ॥ कदेत्याकाङ्क्षायामाह— यदेहेन रहितो भवति तदा सर्वमसबमिति ॥

युक्तः प्रमाद्यसि हितादपेतः परितप्यसे ।
यदि नेष्टात्मनः पीडा मा सञ्जि भवता जने ॥ २९ ॥

युक्त इति ॥ किंच । युक्तः । हितेनेति शेषः । हितेनेहेन युक्तः सन् । प्रमाद्यसि प्रकर्षेण माद्यसि हृष्यसि । हितादपेतः परितप्यसे परितप्तो भवसि ॥ तपेर्दैवादिकात्कर्तरि लट् ॥ सबमेवं ततः किमत आह— यदीति ॥ पीडात्मनः स्वस्य च नेष्टा यदि तर्हि भवता जने परस्मिन्नपि मा सञ्जि न सज्यताम् ॥ सञ्जतेर्ण्यन्तात्कर्मणि लुङ् ॥ आत्मदृष्टान्तेन परपीडातो निवर्तितव्यमित्यर्थः । पीडायाः परात्मनोः समत्वात् ॥

अथ देहास्थैर्यभङ्गया च परपीडा न कार्येत्याह—

जन्मिनोऽस्य स्थितिं विद्वांल्लक्ष्मीमिव चलाचलाम् ।
भवान्मा स्म वधीच्छार्य्य न्यायाधारा हि साधवः ॥ ३० ॥

जन्मिन इति ॥ अस्य जन्मिन उत्पत्तिधर्मिकस्य शरीरिणः ॥ व्रीह्यादित्वादिनिः॥ स्थितिं लक्ष्मीमिव चलाचलां चञ्चलां जन्मिधर्मत्वादेव चञ्चलाम् । अनित्यामित्यर्थः॥ चलतेः पचाद्यच् । "चरिचलिपतिवदीनां वा द्वित्वमभ्याकाभ्यासस्येति वक्तव्यम्" इति द्विर्भावः । अभ्यासस्यागागमश्च ॥ विद्वान् । जानन्नित्यर्थः ॥ "विदेः शतुर्वसुः" इति वैकल्पिको वसुरादेशः॥ भवान् । न्यायादनपेतं न्याय्यम् ॥ "धर्मपथ्यर्थन्यायादनपेते" इति यत्प्रत्ययः ॥ मा स्म वधीत् । मा नाशयेदित्यर्थः ॥ "स्मोत्तरे लङ् च" इति लुङ् । "लुङि च" इति हनो वधादेशः । "शेषे प्रथमः" इति प्रथमपुरुषः ॥ हि यस्मात्साधवो न्यायाधारा न्यायावलम्बाः ॥ बहुव्रीहिरुत्तरपुरुषो वा ॥ न्यायत्यागे साधुत्वमेव न स्यादिति भावः॥ "न्यायाचाराः" इति पाठे न्यायमाचरन्तीति तथोक्ताः ॥ कर्मण्यण् ॥

तर्हि किं मे कर्तव्यं तत्राह—

विजहीहि रणोत्साहं मा तपः साधु नीनशः ।
उच्छेदं जन्मनः कर्तुमेधि शान्तस्तपोधन ॥ ३१ ॥

विजहीहीति ॥ हे तपोधन । रणोत्साहं रणोद्योगम् । लोकोत्तरेषु कार्येषु स्वेषामप्ययत्न उत्साहः । विजहीहि त्यज ॥ "आ च हौ" इतीकारः ॥ साधु समीचीनम् ।

१ न्यायाधीनाः.

Digitized by Google

निःश्रेयसकरत्वादिति भावः । तपो मा नीनशो न नाशय ॥ नशेर्यङन्तान्माङ्योगादाशिषि लुङ् । अडागमनिषेधश्च ॥ किंतु जन्मन उच्छेदं कर्तुम् । मोक्षं साधयितुमित्यर्थः । शाम्त एधि । विजिगीषानिहत्तो भवेत्यर्थः ॥ "दुह्रस्नभ्यो हेर्धिः" इति धिः । "ध्वसोरेद्धावभ्यासलोपश्च" इत्येकार इति ॥

अथ सर्वथा मे विजयकन्दूरस्ति न निवर्तत इत्याशङ्क्य तर्जन्तःशत्रुविजयेन विधीयतां तदपनोद इत्याह—

जीयन्तां दुर्जया देहे रिपवश्चक्षुरादयः ।
जितेषु ननु लोकोऽयं तेषु कृत्स्नस्त्वया जितः ॥ ३२ ॥

जीयन्तामिति ॥ दुर्जया अजय्याश्चक्षुरादयो देहे वर्तमाना रिपवो जीयन्तां वशमानयन्तु । जितेषु सत्सु त्वयार्थ कृत्स्नो लोको जितो ननु । किमुतान्ये शत्रवस्तदन्तर्गता इत्यर्थः । जितेन्द्रियस्य इन्द्रियार्थनिस्पृहस्य निर्भरवैराद्युदयाद्विजयव्यपदेशः ॥

अजितेन्द्रियत्वानिहमाचष्टे—

परवानर्थसंसिद्धौ नीचवृत्तिरपत्रपः ।
अविधेयेन्द्रियः पुंसां गौरिवैति विधेयताम् ॥ ३३ ॥

परवानिति ॥ अर्थसंसिद्धावभ्यवहारादिस्वार्थसाधने परवान्पराधीनः ॥ "परतन्त्रः पराधीनः परवान्" इत्यमरः ॥ नीचवृत्तिः कर्पणवहनादिनिकृष्टकर्मोपजीवो निर्लज्जोऽविधेयेन्द्रियोऽजितेन्द्रियः पुमान्गौर्वशीवर्द इव पुंसां विधेयतां वशीकारिताम् । मेष्यतामिति यावत् ॥ "विधेयो विनयग्राही वचने स्थित आभवः" इत्यमरः ॥ एति प्राप्नोति ॥ उपमालंकारोऽयम्— "प्रकृतामकृतयोर्धर्मसाधर्म्याच्चेत्ते तु शब्दमात्रसाधर्म्यम्" इति ॥

न केवलं हिंसादिदोषदूषितत्वाद्विषयाणां हेयत्वम् । किंत्वपारमार्थिकत्वाद्पीत्याह—

श्वस्त्वया सुखसंवित्तिः स्मरणीयाधुनातनी ।
इति स्वप्नोपमान्मत्वा कामान्मा गास्तदङ्गताम् ॥ ३४ ॥

श्व इति ॥ अधुना भवा अधुनातनीदानींतनी ॥ "सायंचिरम्—" इत्यादिना ट्युमत्ययः ॥ सुखसंवित्तिः सुखानुभवः श्वः परेऽहनि त्वया स्मरणीया न त्वनुभवनीया । इति हेतोः । काम्यन्त इति कामा विषयास्तान्स्वप्नोपमान्स्वप्नवत्स्वाप्नान्मत्वा निश्चित्य तदङ्गतां तच्छेषत्वं कामपरतन्त्रतां मा गा मा गच्छ ॥ "इणो गा लुङि" इति गादेशः ॥

Digitized by Google

अतो हेयाः कामा इत्याह—

श्रद्धेया विमलब्धारः प्रिया विप्रियकारिणः ।
सुदुस्त्यजास्त्यजन्तोऽपि कामाः कष्टा हि शत्रवः ॥ ३५ ॥

श्रद्धेया इति ॥ श्रद्धातुमर्हाः श्रद्धेया विश्वसनीयास्तथा विमलब्धारः प्रतारकाः । विश्वासघातका इत्यर्थः । तथा प्रीणयन्तीति प्रियाः प्रीतिजनकाः ॥ "इगुपध-" इत्यादिना कप्रत्ययः ॥ तथापि विप्रियकारिणो दुःखजननशीलाः। किं च । त्यजन्तोऽपि पुरुषं विहाय गच्छन्तोऽपि सुदुस्त्यजाः स्वयमेन त्यक्तुमशक्याः कामा विषयाः कष्टाः कुत्सिताः शत्रवो हि मांसद्विषदः । वैधर्म्यादिति भावः ॥ अत्र श्रद्धेयत्वादीनां विमलब्धकत्वादीनां चैकत्रविरोधो विषयस्वाभाव्येन समाधीयत इति विरोधाभासोऽलंकारः । तेन च कामानां प्रसिद्धशत्रुवैधर्म्यं व्यतिरेकेण व्यज्यत इत्यलंकारेणालंकारध्वनिः ॥

तर्हि किं कर्तव्यमित्याशङ्क्योपसंहरन्नाह—

विविक्तेऽस्मिन्नगे भूयः प्लाविते जह्नुकन्यया ।
प्रत्यासीदति मुक्तिस्त्वां पुरा मा भूरुदायुधः ॥ ३६ ॥

विविक्त इति ॥ विविक्ते विजने ॥ "विविक्तविजनच्छन्ननिःशलाकास्तथा रहः" इत्यमरः ॥ जह्नुकन्यया गङ्गया भूयो भूयिष्ठं पुनःपुनर्वा ॥ "भूयः पुनःपुनरत्यातं भूतार्थे पुनरव्ययम्" इति विश्वः ॥ प्लाविते सिक्ते ॥ "पाविते" इति पाठे पवित्रीकृत इत्यर्थः ॥ अस्मिन्नग इन्द्रकीले त्वां मुक्तिः पुरा निकटे प्रत्यासीदति । संनिकृष्टा भविष्यतीत्यर्थः ॥ "पुरा पुराणे निकटभवन्धातीतभाविषु" इति विश्वः ॥ उदायुधो गृहीतशस्त्रो मा भूः । शस्त्रं विमुञ्चेत्यर्थः ॥

व्याहृत्य मरुतां पत्याविति वाचमवस्थिते ।
वचः प्रश्रयगम्भीरमथोवाच कपिध्वजः ॥ ३७ ॥

व्याहृत्येति ॥ मरुतां पत्यौ देवेन्द्र इति वाचं व्याहृत्योक्तावस्थिते सति तूष्णीं स्थिते सति । अथ कपिध्वजोऽर्जुनः प्रश्रयगम्भीरं विनयमधुरम् ॥ "विनयमश्रयौ समौ" इति यादवः ॥ वच उवाच ॥

किमुवाचेत्यपेक्षायां चतुर्भिरिन्द्रवाक्यमुपश्लोकयन्नाह—

प्रसादरम्यमोजस्वि गरीयो लाघवान्वितम् ।
साकाङ्क्षमनुपस्कारं विष्वग्गति निराकुलम् ॥ ३८ ॥

प्रसादेति ॥ प्रसादोऽत्र प्रसिद्धार्थपदत्वं तेन रम्यम् । "प्रसिद्धार्थपदत्वं वस्तु प्र-

Digitized by Google

सादो निगद्यते" इति लक्षणात्। ओजस्वि समासभूयिष्ठम्। "ओजः समासभूयस्त्वम्" इति शासनात्। गरीयोऽर्थभूयस्त्वपरिगतम्। न तु शब्दाडम्बरमात्रमित्यर्थः। लाघवान्वितं विस्तरदोषरहितम्। साकाङ्क्षमाकाङ्क्षावत्पदकदम्बात्मकम्। न तु दण्डादिमादिवाक्यवदनाकाङ्क्षितमित्यर्थः। अनुपस्कारमध्याहारदोषरहितम्। विप्वग्गति कृत्स्नार्थमतिपादकम्। न तु सावशेषार्थमतएव निराकुलमसंकीर्णार्थम्॥

न्यायनिर्णीतसारत्वान्निरपेक्षमिवागमे।
अप्रकम्प्यतयान्येषामाम्नायवचनोपमम्॥ ३९॥

न्यायेति॥ पुनर्न्यायेन युक्त्या निर्णीतसारत्वाभिधितार्थत्वाद्वेतोरागमे शास्त्रे विषये निरपेक्षं स्वतन्त्रमिव। युक्तिदार्ढ्यादेवं प्रतीयते। वस्तुतस्तु शास्त्रसिद्धार्थमिवेतीवशब्दार्थः। किं च। अन्येषां प्रतिवादिनामप्रकम्प्यतयानुमानादिभिरबाध्यत्वादमलाक्ष्यातत्वयाम्नायवचनोपमम्। वेदवाक्यतुल्यमित्यर्थः॥

अलङ्घ्यत्वाज्जनैरन्यैः क्षुभितोदन्वदूर्जितम्।
औदार्यादर्थसंपत्तेः शान्तं चित्तमृषेरिव॥ ४०॥

अलङ्घ्यत्वादिति॥ अन्यैर्जनैरलङ्घ्यत्वादनुल्लङ्घनीयत्वात्क्षुभितोदन्वदूर्जितमुद्वेलाम्भोधिगम्भीरम्। औदार्यादुक्तिविशेषत्वात्। श्लाघ्यविशेषणाद्वा। तदुक्तं दण्डिना— "उत्कर्षवान्गुणः कश्चिदुक्ते यस्मिन्प्रतीयते। तदुदाहरणं तेन सनाथा काव्यपद्धतिः। श्लाघ्यैर्विशेषणैर्युक्तमुदारं केचिदिष्यते" इति। "अग्राम्यार्थत्वात्" इति केचित्। अन्यत्र त्यागित्वादित्यर्थः॥ अर्थसंपत्तेः प्रयोजनसंपत्तेः। अन्यत्राग्न्यादित्यादेः। ऋषेर्मुनेरिवचमिव शान्तं सौम्यम्॥

इदमीदृग्गुणोपेतं लब्धावसरसाधनम्।
व्याकुर्यात्कः प्रियं वाक्यं यो वक्ता नेदृगाशयः॥ ४१॥

इदमिति॥ इदमीदृग्गुणोपेतं यथोक्तगुणयुक्तम्॥ इदमुपपदादृशेः क्विप्। "इदंकिमोरीश्की" इतीशादेशः॥ लब्धे प्राप्तेऽवसरसाधने कालोपायौ येन तत्प्रियं प्रीतिकरं वाक्यं को वक्ता व्याकुर्यात्प्रयुञ्जीत्। यो वक्ता सोऽनीदृगाशय ईदृग्विधपक्षपाती च भवति। अनुद्विरित्यर्थः। तस्यार्थस्य वक्तुमशक्यत्वादिति भावः॥

एवमिन्द्रवाक्यमुपश्लोक्य नाहमस्योपदेशस्याधिकारीति परिहरति—

न ज्ञातं तात यत्नस्य पौर्वापर्यमनुष्य ते।
शासितुं येन मां धर्मं मुनिभिस्तुल्यमिच्छसि॥ ४२॥

नेति॥ हे तात। अनुष्य यत्नस्य तपोरूपस्यास्य मदीयस्य पूर्वं चापरं च पू-

Digitized by Google

र्वापरे । त एव पौर्वापर्यं कारणं फलं च ॥ चातुर्वर्ण्यादित्यास्त्यर्थे प्रत्ययः ॥ ते तव न ज्ञातम् । त्वया न ज्ञायत इत्यर्थः ॥ "मतिबुद्धि-" इत्यादिना वर्तमाने क्तः । तयोगादेव षष्ठी ॥ कुतः । येन कारणेन मां द्युनिभिस्तुल्यं सदृशं धर्मं मोक्षधर्मं शासितुमुपदेष्टुमिच्छसि ॥ शासिरयं दुहादित्वादिकर्मकोऽपि ज्ञेयः ॥

अथ पौर्वापर्यमज्ञात्वाप्युपदेशे दोषमाह—

अविज्ञातप्रबन्धस्य वचो वाचस्पतेरपि ।
व्रजत्यफलतामेव नयद्रुह इवेहितम् ॥ ४३ ॥

अविज्ञातेति ॥ अविज्ञातः प्रबन्धः पूर्वापरसंगतिर्येन तस्य वाचस्पतेर्बृहस्पतेरपि॥ कस्कादित्वात्सः । अथवा "षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु" इति सकारः । एतज्ज्ञापकात् "अलुक्" इति केचित् ॥ वच उपदेशो नयद्रुहो नीतिविरुद्धकारिणः पुरुषस्येहितमुद्योग इवाफलतां निष्फलत्वं व्रजतीव गच्छतीव ॥

ननु सदुपदेशस्य कुतो वैफल्यमित्याशङ्क्य सोऽप्यस्थाने प्रयुक्तश्चेदुपरसंभे शालिबीजवद्विफल एवेत्याशयेनाह—

श्रेयसोऽप्यस्य ते तात वचसो नास्मि भाजनम् ।
नभसः स्फुटतारस्य रात्रेरिव विपर्ययः ॥ ४४ ॥

श्रेयस इति ॥ हे तात ॥ "पुत्रे पितरि पूज्ये च तातशब्दं प्रचक्षते" इति ॥ श्रेयसोऽपि हितार्थयोगात्प्रशस्ततरस्याप्यस्य ते तव वचसो हितोपदेशरूपस्य रात्रेर्विपर्ययो दिवसः स्फुटतारस्य व्यक्ततारकस्य नभस इव भाजनं पात्रं नास्मि । अनधिकारित्वादिति भावः ॥ अत्राह्नो नभोमात्रसंबन्धसंभवेऽपि तारासंबन्धासंभवाद्विशिष्टनभःसंबन्धविरोधायुक्तं तारकितस्य नभसो न पात्रमहरिति ॥

कुतस्ते मोक्षोपदेशानधिकारित्वम् । किं च । ते तपसः पौर्वापर्यं । कथं न जान इत्याशङ्क्य तत्सर्वं स्वजात्यादिकथनपूर्वकं निरूपयति—

क्षत्रियस्तनयः पाण्डोरहं पार्थो धनंजयः ।
स्थितः प्रास्तस्य दायादैर्भ्रातुर्ज्येष्ठस्य शासने ॥ ४५ ॥

क्षत्रिय इति ॥ अहं क्षत्रियः क्षत्रियकुले जातः । तत्रापि महाकुले प्रसूतः ॥ वीरसंतानश्रेष्ठत्वाह—पाण्डोस्तनय इति । तत्रापि कौन्तेयोऽस्मि । न माद्रेय इत्याह—पार्थ इति ॥ पृथा कुन्ती तत्सुतः पार्थः ॥ "तस्यापत्यम्" इत्यण् ॥ अर्जुनोऽहं महावीरश्रेष्ठत्वाह—धनंजय इति ॥ उत्तरकुरूनिजित्य धनाहरणाद्धनंजयोऽस्मीत्यर्थः ॥ धनंजय इत्युक्ते शरीरस्थो वायुः सर्पविशेषो वा स्यात्तदर्थं पार्थो गन्धर्वोऽपि कश्चित्पृथासुतोऽस्ति । तदर्थं पाण्डोः सुतो नैमिषारण्ये पाण्डुविश्वस्त-

Digitized by Google

त्पत्नी पृथा नाम काचिद्ब्राह्मणी तत्पुत्रोऽपि स्याच्चदर्थं क्षत्रिय इति ॥ अथैवं चेत्किमर्थं तर्हि तपस्यसि मोक्षार्थं वा किं न तपस्यसि तत्राह—स्थित इति ॥ दायं पैतृकं धनमाददत इति दायादा ज्ञातयः ॥ "दायादो ज्ञातिपुत्रयोः" इति । "विभक्तपितृद्रव्यं च दायमाहुर्मनीषिणः" इति च विश्वः ॥ स्वामीश्वरादिसूत्रेण सोपसर्गादपि दायादेति कर्मण्यण्तो निपातनात्साधुः ॥ तैः प्राप्तस्य राज्यश्रियस्तस्य । वैरिनिर्यातनार्थिन इत्यर्थः । ज्येष्ठस्य भ्रातुर्युधिष्ठिरस्य ॥ वृद्धशब्दादिष्ठन्प्रत्ययः । वृद्धस्य च ज्यादेशः ॥ शासने निदेशे स्थितः । तदाज्ञया तपस्यामीत्यर्थः । अन्यथा मानहानिः सौभ्रात्रभङ्गः पूज्यपूजाव्यतिक्रमदोषश्च स्यादिति भावः । अतएव हिंसैकरतस्य रागद्वेषकषायितचेतसः कुतो मे मोक्षाधिकार इति तात्पर्यार्थः । सार्थविशेषणत्वात्परिकरालंकारः ॥

यदुक्तम् "विरुद्धः केवलं वेषः" इति तत्रोत्तरमाह—

कृष्णद्वैपायनादेशाद्बिभर्मि व्रतमीदृशम् ।
भृशमाराधने यत्तः स्वाराध्यस्य मरुत्वतः ॥ ४६ ॥

कृष्णेति ॥ द्वीपोऽयनं जन्मभूमिर्यस्य स द्वीपायनः । स एव द्वैपायनो व्यासः ॥ प्रज्ञादिस्वात्स्वार्थेऽण्प्रत्ययः ॥ स एव कृष्णवर्णत्वात्कृष्णद्वैपायनस्तस्मादेशादुपदेशादीदृशम् । विरुद्धवेषमित्यर्थः । व्रतं तपो नियमं विधिमिति धारयामि । न तु स्वेच्छयेति भावः ॥ अथोपास्यां देवतामाह—भृशमिति ॥ स्वाराध्यस्य सुखमाराध्यस्य ॥ सादिसमासः ॥ "स्वाराधस्य" इति पाठ उपसृष्टात्स्वप्रत्ययः ॥ मरुतत इन्द्रस्य । भृशं सम्यगाराधने यत्तः । प्रयत्नवानित्यर्थः । तस्य क्षत्रियदैवतत्वादिति भावः ॥

ननु भवादृशभ्रातृसहायस्य महावीरस्य युधिष्ठिरस्य कथमरिपरिभवमाशिरिस्यत आह—

दुरक्षान्दीव्यता राज्ञा राज्यमात्मा वयं वधूः ।
नीतानि पणतां नूनमीदृशी भवितव्यता ॥ ४७ ॥

दुरक्षानिति ॥ दुरक्षान् । कपटपाशकैरित्यर्थः ॥ "दिवः कर्म च" इति करणं कर्मसंज्ञा ॥ दीव्यता क्रीडता । "आहूतो न निवर्तेत तूतादपि रणादपि" इति स्मरणात् । न तु व्यसनितयेति भावः । राज्ञा युधिष्ठिरेण राज्यं राष्ट्रमात्मा स्वयं वयं चत्वारोऽनुजा वधूर्जाया द्रौपदी च पणतां ग्लहस्वम् ॥ "पणोऽक्षेषु ग्लहोऽक्षास्तु देवनाः पाशकाश्च ते" इत्यमरः ॥ नीतानि । सर्वं द्यूते राज्ञा हारितमित्यर्थः ॥ नीतानीति नपुंसकैकशेषः । नयतेर्हिकर्मकस्यात्मप्रधाने कर्मणि क्तः ॥ ननु सर्वज्ञस्य राज्ञः कथमियमविमृष्यकारिता तत्राह—भवितव्यतानर्थानामवश्यंभावितेदृशी नूनं निश्चितम् । नात्र संशय इत्यर्थः । बुद्धिरपि भवितव्यतानुसारिण्येव । न स्वतन्त्रेत्यर्थः ॥

Digitized by Google

ननु तथापि तर्वव तेष्वासङ्गो न तेषां त्वयि तत्राह—

तेनानुजसहायेन द्रौपद्या च मया विना ।
भृशमायामियामासु यामिनीष्वभितप्यते ॥ ४८ ॥

तेनेति ॥ अनुजा सहजाताः सहाया यस्य तेन । अनुजयुक्तेनेत्यर्थः ॥ तुल्ययोगः सहार्थः ॥ तेन युधिष्ठिरेण द्रौपद्या च मया विना । मद्विरहादित्यर्थः । आयामिनो दीर्घा यामाः प्रहरा यासां तासासु । दुःखितस्य तथाभावादिति भावः । यामिनीष्वभितप्यते ॥ भावे लट् ॥ तेषु महत्तेषां मय्यप्यासङ्गाच्च वैराग्यावकाश इत्यर्थः ॥

अथ वैरिनिर्यातनस्यावश्यंभावद्योतनाय चतुर्भिः परापकृतिं दर्शयन्परनिकारान्वर्णयति—

हृतोत्तरीयां प्रसभं सभायामागतह्रियः ।
मर्मच्छिदा नो वचसा निरतक्षन्नरातयः ॥ ४९ ॥

हृतेत्यादि ॥ अरातयः शत्रवः सभायां प्रसभं बलात्कारेण हृतोत्तरीयामतएवागतह्रियः संप्राप्तलज्जाक्लेऽस्मान्मर्मच्छिदा मर्मच्छेदिना वचसा निरतक्षन्नशातयन् । वस्त्रापहारवाक्पारुष्याभ्यां तथा व्यथयामासुरित्यर्थः ॥ तक्षणशब्दसामर्थ्याद्वचसां वास्यौपम्यं गम्यत इति वस्तुनालंकारध्वनिः ॥

अथातिदुःसहनिकारान्तरमाह—

उपाधत्त सपत्नेषु कृष्णाया गुरुसंनिधौ ।
भावमानयने सत्याः सत्यंकारमिवान्तकः ॥ ५० ॥

उपाधत्तेति ॥ अन्तको मृत्युर्गुरुसंनिधौ भीष्मद्रोणादिसमक्षमेव सत्याः पतिव्रतायाः कृष्णाया द्रौपद्या आनयने केशाम्बरादिकर्षणे भावं चित्ताभिप्रायमितः परमनेन पाण्डवाभिभवेनैतान्स्वजनगरं नेष्यामीत्यंबभूवं सत्यंकारमिव । क्रियतेऽनेनेति कारः ॥ करणे घञ् ॥ सत्यस्य कारः सत्यंकारः सत्यापनम् । चिकीर्षितस्य कार्यस्यावश्यं क्रियास्वापनार्थं परहस्ते यदीयमं स सत्यंकारः । क्रियादौ सत्सदाकार्याय प्राग्दीयमानो मूल्यैकदेशश्च ॥ "क्ष्वेडे सत्यापनं सत्यंकारः सत्याकृतिः क्रियासु" इत्यमरः ॥ "कारे सत्यागदस्य" इति सुमागमः ॥ तमिव सपत्नेषूपाधत्त निहितवान् । तेषां विनाशकाले विपरीतबुद्धिमुत्पादितवानित्यर्थः ॥

केनेयमाकृष्टा सभ्यैर्वा किं कृतं तत्राह—

तामैक्षन्त क्षणं सभ्या दुःशासनपुरःसराम् ।
अभिसायार्कमावृत्तां छायामिव महातरोः ॥ ५१ ॥

१ पुरोगमाम्.

Digitized by Google

तामिति ॥ दुःशासनः पुरःसरो यस्यास्तां तथोक्ताम् । दुःशासनेन सभां प्रत्याकृष्यमाणामित्यर्थः ॥ "अनुपसर्जनात्" इति न ङीप् ॥ तां कृष्णाम् । सभायां साधवः सभ्याः ॥ "सभाया यः" इति यप्रत्ययः ॥ अभिसायार्कं दिनान्तमूर्ध्वाभिमुखम् । स्थितस्येति शेषः ॥ "सायो नाशदिनान्तयोः" इति विश्वः ॥ "लक्षणेनाभिप्रती आभिमुख्ये" इत्यव्ययीभावः ॥ महातरोः संबन्धिनीमाहृतां छायामिव तां कृष्णां क्षणमैक्षन्त । न चिरं जुगुप्सितत्वात् । नापि किंचिद्वक्ष्यामियन्त वाच्यस्वभङ्गभयात् । ते स्वकंवदेव साक्षित्वमात्रमास्थिता इत्यर्थः ॥ अत्राकृष्यमाणायाः कृष्णाया आकृष्टारं प्रति पराङ्मुखस्वादाहृतच्छायौपम्यम् । तथापि तां न मुञ्चतीति दुःशासनस्य तरुसाम्यम् ॥

अथास्यास्तादात्मिकतां वर्णयति—

अयथार्थक्रियारम्भैः पतिभिः किं तवेक्षितैः ।
अरुण्येतामितीवास्या नयने बाष्पवारिणा ॥ ५२ ॥

अयथार्थेति ॥ अयथार्था मिथ्याभूताः क्रियारम्भाः पतिशब्दप्रवृत्तिनिमित्तभूतकर्मयोगा येषां तैः । तामरक्षद्भिरित्यर्थः । तव संबन्धिभिः पान्ति रक्षन्तीति पतयो भर्तारः ॥ "पातेर्डतिः" इत्यौणादिको डतिप्रत्ययः ॥ तैरीक्षितैरवेक्षितैः किम् । न किंचित्फलमस्तीत्यर्थः । इतीवेत्थं विचार्येवेत्युत्प्रेक्षा । बाष्पवारिणास्याः कृष्णाया नयने अरुण्येतामाहृते ॥ रुधेः कर्मणि लङ् ॥ अक्षरत्रा रुरोदेत्यर्थः ॥

नन्वु भवद्भिः किमर्थमसमर्थैरिवोपेक्षितं तत्राह—

सोढवान्नो दशामन्त्यां ज्यायानेव गुणप्रियः ।
सुलभो हि द्विषां भङ्गो दुर्लभा सत्त्ववाञ्जता ॥ ५३ ॥

सोढवानिति ॥ गुणाः प्रिया यस्य स गुणप्रियः ॥ "वा प्रियस्य" इति परनिपातः ॥ ज्यायानग्रजो युधिष्ठिर एव ॥ वृद्धशब्दादीयसुनि "ज्यादादीयसः" इत्याकारादेशः ॥ नोऽस्माकमन्ते भवामन्त्यां निकृष्टां दशामवस्थां सोढवान्न तु वयम् । किंतु तदवरुद्धा इति भावः ॥ नन्वु क्षमूपेक्षा महानर्थकारिणीत्याशङ्क्याह—सुलभ इति ॥ द्विषां विरोधिनां भङ्गः सुलभः । कालान्तरेऽपीति शेषः । सत्त्वं सज्जनेष्वबाध्यता निन्द्यता दुर्लभा न तु क्षमूपेक्षा । हि प्रसिद्धौ । क्षमूपेक्षातो लोकापवाद एव बलवान् । तस्योत्पन्नस्य दुस्तरतिविधेयत्वात्त च समयोल्लङ्घने स्यादेवेति भावः ॥

१ निरीक्षितैः.

Digitized by Google

ननु शत्रुवधे राज्ञां को नामापवादः प्रत्युत कीर्तिरेवेत्याशङ्क्य सत्यं स एव समयोल्लङ्घनकलङ्कितकीर्त्या महानिन्दानिदानमित्याशयेनाह—

स्थित्यतिक्रान्तिभीरूणि स्वच्छान्याकुलितान्यपि ।
तोयानि तोयराशीनां मनांसि च मनस्विनाम् ॥ ५४ ॥

स्थितीति ॥ तोयराशीनां समुद्राणां तोयानि मनस्विनां मनांसि च समानि भवन्ति । उभयं विशिनष्टि—स्थित्यतिक्रान्तेर्मर्यादोल्लङ्घनाद्धेतोर्भीरूण्यत एवाकुलितानि संक्षोभितान्यपि स्वच्छान्यकलुषाणि । न स्वरन्त इत्यर्थः । मनस्व्ययं युधिष्ठिर इति भावः ॥ अत्र तोयानां सामान्यतो मनस्विनां चापकृतानामेव गुणतौल्यादौपम्यस्य गम्यतया तुल्ययोगितालंकारः । गुणश्चात्र भीरुत्वं स्वच्छता च ॥

नन्वजातशत्रोः स्वजने वैरं किं कारणमित्याशङ्क्याह—सत्सौहार्दमेवेत्याह—

धार्तराष्ट्रैः सह प्रीतिर्वैरमस्मास्वसूयत ।
असन्मैत्री हि दोषाय कूलच्छायेव सेविता ॥ ५५ ॥

धार्तराष्ट्रैरिति ॥ धार्तराष्ट्रैर्दुरितराष्ट्रपुत्रैः सह प्रीतिः सौहार्दमेवास्मासु विषये वैरमसूयत सूतवती ॥ सूयतेर्देवादिकात्कर्तरि लङ् ॥ ननु सौहार्दं वैरजनकं चेद्विगर्हितमिदं तत्राह— असदिति ॥ हि यस्मादसन्मैत्री दुर्जनेन संगतिः कूलस्यासन्नपातस्य नदीतटस्य छायेव सेविता श्रिता सती दोषायानर्थाय भवति । न खलु दुर्जनः सुजनवन्मित्रद्रोहपातकं पश्यतीति भावः ॥ उपमा प्राणितोऽयमर्थान्तरन्यासालंकारः ॥

नन्वादावेव तेषां दुष्टमविज्ञाय कथं मैत्री कृतेत्याशङ्क्य किं कुर्मः । दुर्जनदुष्टं दुर्विज्ञेयमित्याह—

अपवादाद्भीतस्य समस्य गुणदोषयोः ।
असद्वृत्तेरहोवृत्तं दुर्विभावं विधेरिव ॥ ५६ ॥

अपवादादिति ॥ अपवादाज्जनाक्रोशाद्भीतस्य । अनुगुप्तमानस्येत्यर्थः । गुणदोषयोः समस्य तुल्यबुद्धेः । निग्रहानुग्रहौ गुणदोषयोरननुरुन्धत इत्यर्थः ॥ विधावप्येतद्विशेषणं योज्यम् ॥ असद्वृत्तेर्दुराचारस्य धूर्तस्याहोदृत्तमीदृशं विधेर्दैवस्य दृत्तमिव दुर्विभावं विभावयितुमशक्यम् । किंतु कार्यैकसमधिगम्यमित्यर्थः ॥ भवतेर्ण्यन्तात्कृच्छ्रार्थे खलर्थयः ॥

नन्वेवं मानी कथं परिभूतो जीवसि तत्राह—

ध्वंसेत हृदयं सद्यः परिभूतस्य मे परैः ।
यद्यमर्षः प्रतीकारं भुजालम्बं न लम्भयेत् ॥ ५७ ॥

१ तटच्छायेव. २ दुर्विभाव्यम्.

Digitized by Google

ध्वंसेतेति ॥ परैः शत्रुभिः परिभूतस्य मे हृदयं सद्यो ध्वंसेत । भ्रश्येदित्यर्थः अमर्षः ॥ कर्ता ॥ प्रतीकारं प्रतिक्रियारूपं भुजालम्बं हस्तावलम्बनं न लभ्येय ग्राह्येयदि । हृदयेनेति शेषः । सत्यं जीवामि प्रतिविधित्सया । न तु निर्लज्जत वेति भावः ॥

नन्वु तवैव क्रोऽयमभिमानस्तत्राह—

अवधूयारिभिर्नीता हरिणैस्तुल्यवृत्तिताम् ।
अन्योन्यस्यापि जिह्रीमः किं पुनः सहवासिनाम् ॥ ५८ ॥

अवधूयेति ॥ अरिभिरवधूय परिभूय हरिणैर्मृगैस्तुल्यवृत्तितां तुल्यवृत्तिजीवन त्वम् । वन्याहारतामित्यर्थः । नीताः प्रापिता वयम् । पश्वापीति शेषः । अन्यो न्यस्यापि जिह्रीमो लज्जामहे । सहवासिनां सहचारिणां किं पुनः । प्रागेव जिह्री इति किमु वक्तव्यमित्यर्थः ॥ क्रियायोगे संबन्धसामान्ये षष्ठी ॥ अत्र वयं पश्वा तुल्याभिमाना एव । इदं तु मदेकसाध्यं कर्मेति मुनिभाषनान्मयानुष्ठीय इति भावः ॥

नन्वु तर्हि दुःखैकनिदानमन्तःशत्रुर्मान एव त्यज्यतामित्याशङ्क्य तत्त्यागे दो षमाह—

शक्तिवैकल्यनम्रस्य निःसारत्वाल्लघीयसः ।
जन्मिनो मानहीनस्य तृणस्य च समा गतिः ॥ ५९ ॥

शक्तीति ॥ शक्तिवैकल्येनोत्साहादिशक्तिवैधुर्येणावतुन्नसामर्थ्यविरहेण न मनस्य महीभूतस्य विषेयभूतस्य च निःसारत्वादुर्बलत्वात् । स्थिरांशरहितत्वाच्च । "सारो बले स्थिरांशे च" इत्यमरः ॥ लघीयसो गौरवहीनस्य । नीरसस्येत्यर्थः मानहीनस्य जन्मिनो जन्तोः ॥ व्रीह्यादित्वादिनिः ॥ तृणस्य च गतिरवस्था स मेति मानहीनस्य तृणादपि निकृष्टत्वान्न त्याज्यो मान इति भावः ॥ श्लेषालंका रौऽयं तदनुप्राणितेयमुपमेत्यनेकार्थदीपिकेति व्यज्यते ॥

मानत्यागे दोषमुक्त्वा तत्सद्भावे षड्गुणमाह—

अलङ्घ्यं तत्तदुद्दीप्य यद्यदुच्चैर्महीभृताम् ।
प्रियतां ज्यायसीं मा गान्महतां केन तुङ्गता ॥ ६० ॥

अलङ्घ्यमिति ॥ महीभृतां पर्वतानां संबन्धि यद्यच्छृङ्गादिकमुच्चैरुन्नतं तत्तदल ङ्घ्यमुद्दीप्योत्तेजय्य । तर्कयित्वेति यावत् । । महतां महात्मनां तुङ्गता मानोन्न ज्यायसीं प्रियतां प्रियत्वं केन हेतुना मा गात् । न केनापि । प्रियत्वं गच्छत्येवेत्यर्थः

१ तुल्यवृत्तिताम्.

Digitized by Google

किंतु तुल्यत्वेनेत्यर्थः ॥ आशिषि माङि लुङ् ॥ दैवमनिष्पन्नमपीच्छामुत्पादयत्यौपम्यवदस्मिन्नर्थ इत्याशंसनार्थमाशीःप्रयोगः। उद्दीक्ष्येत्यसमानकर्तृकत्वनिर्देशः क्वचित्प्रयोगदर्शनात्सोढव्यः ॥ केचित् "उद्दीक्ष्यम्" इति पठन्ति। तत्र यद्यदुर्वस्तत्तदलक्ष्यमुद्दीक्ष्यमवलोकनीयं न चोल्लङ्घनीयमिति। अतो महतामित्यादि योजयन्ति ॥

तावदाश्रीयते लक्ष्म्या तावदस्य स्थिरं यशः।
पुरुषस्तावदेवासौ यावन्मानान्न हीयते ॥ ६१ ॥

तावदिति ॥ किं च। तावदेवासौ लक्ष्म्याश्रीयते। तावदस्य पुंसो यशः स्थिरम्। तावदेवासौ पुरुषः। पुरुषत्वेन गण्यत इत्यर्थः। यावन्मानादभिमानान्न हीयते न भ्रश्यति। मानहीनस्य न किंचिच्छुभमस्तीत्यर्थः ॥

स पुमानर्थवज्जन्मा यस्य नाम्नि पुरःस्थिते।
नान्यामङ्गुलिमभ्येति संख्यायामुद्यताङ्गुलिः ॥ ६२ ॥

स इति ॥ स पुमानर्थवज्जन्मा सार्थकजन्मा यस्य पुंसो नाम्नि पुरोऽग्रे स्थिते सति संख्यायां पुरुषगणनायामस्ताव उद्यता गुणमधिकृत्योन्नमिताङ्गुलिरन्यां द्वितीयामङ्गुलिम्। उद्यतामिति शेषः। नाभ्येति न प्राप्नोति। अद्वितीयत्वादस्येत्यर्थः। एतन्मानरहितस्य न संभवतीति भावः ॥

दुरासदवनज्यायान्गम्यस्तुङ्गोऽपि भूधरः।
न जहाति महौजस्कं मानप्रांशुमलङ्घ्यता ॥ ६३ ॥

दुरासदेति ॥ दुरासदैर्वनैर्ज्यायान्महद्भस्तथापि तुङ्गोऽपि भूधरो गम्यो गन्तुं शक्य एव। प्रसिद्धं चैतदिति भावः। महौजस्कं प्रतापसंपन्नं मानमांशुं मानोन्नतम्। पुरुषमिति शेषः। अलङ्घ्यता न जहाति। न कदाचिन्मानी लङ्घयितुं शक्यत इत्यर्थः। गिरेरपि गरीयान्मानाधिक इति भावः ॥ अप्रोपमानाद्भूधरादुपमेयस्य मानिनो धर्मान्तरसाम्येऽप्यलङ्घ्यत्वेनाधिक्यकथनाद्व्यतिरेकालंकारः ॥

गुरून्कुर्वन्ति ते वंश्यानन्वर्था तैर्वसुंधरा।
येषां यशांसि शुभ्राणि द्रावयन्तीन्दुमण्डलम् ॥ ६४ ॥

गुरूनिति ॥ ते नरा वंश्यानन्वये भवान्गुरून्कुर्वन्ति प्रथयन्ति। स्वनाम्ना व्यपदेशयन्ति रघुदिलीपादिवदित्यर्थः। तैर्नरैः। वसूनि धनानि धरतीति वसुंधरा ॥ "संज्ञायां भृदृजि-" इत्यादिना खच्प्रत्यये "खचि ह्रस्वः" इति ह्रस्वानुवागमश्च ॥ अन्वर्थानुगतार्था। तेषां वसुभूतानां धारणादिति भावः। येषां शुभ्राणि यशांसी-

Digitized by Google

ग्रुमण्डलं द्वेषयन्ति लज्जयन्ति। यशसो निष्कलङ्कत्वादिति भावः। ईदृशं हि यशो मानमहत एव संभवतीति तात्पर्यार्थः॥ द्वीधातोर्ण्यन्ताच्छट्। "अर्तिह्री-" इत्यादिना पुगागमः॥ अत्र द्वेषजन्यस्य लज्जयपर्यवसानादुपमालंकारः॥

उदाहरणमाशीःषु प्रथमे ते मनस्विनाम्।
शुष्केऽशनिरिवामर्षो यैररातिषु पात्यते॥ ६५॥

उदाहरणमिति॥ यैरमर्षः क्रोधः शुष्के नीरसेऽग्रनिरिवाराषिषु विषये पात्यते क्षेप्स्यते। मनस्विनां मानिनां प्रथमेऽग्रेसरास्ते आशीःषु पुरुषैरेवं भवितव्यमेवंरूपा-मुदाहरणं निदर्शनम्। भवतीति शेषः। रामादिवदुपमानं भवतीत्यर्थः। अतो न त्राज्यो मान इति संदर्भार्थः॥

यदुक्तम् "अभिद्रोहेण भूतानाम्" इत्यादि तत्र युग्मेनोत्तरमाह—

न सुखं प्रार्थये नार्थमुदन्वद्वीचिचञ्चलम्।
नानित्यताशनेस्तस्यन्विविक्तं ब्रह्मणः पदम्॥ ६६॥

नेत्यादि॥ उदन्वद्वीचिरिव चञ्चलं समुद्रतरङ्गवदस्थिरं सुखं कामं न प्रार्थये ने-च्छामि। तथा चञ्चलमर्थं च न प्रार्थये। किंचानित्यता विनाशिता सैवाशनिस्तस्मा-त्तस्यन्विच्यत्॥ "वा त्राश-" इत्यादिना स्यन्प्रत्ययः॥ विविक्तं निर्बाधं ब्रह्म-णो वेधस आत्मनः। पथत इति पदं स्थानमैकयलक्षणं मुक्तिं च न प्रार्थये। एतेन यदुक्तम् "उच्छेदं जन्मनः कर्तुम्" इत्यादिना तत्समाहितम्॥

प्रमार्ष्टुमयशः पङ्कमिच्छेयं छद्मना कृतम्।
वैधव्यतापितारातिवनितालोचनाम्बुभिः॥ ६७॥

प्रमार्ष्टुमिति॥ किंतु छद्मना कपटेन कृतम्। शत्रुभिरिति शेषः। अयश एव पङ्कमिति रूपकालंकारः। वैधव्येन तापितानां दुःखीकृतानामरातिवनितानां लो-चनाम्बुभिः प्रमार्ष्टुं क्षालयितुमिच्छेयमभिलषेयम्॥ इषिधातोर्लिङि रूपम्॥ वैरि-निर्यातनातिरिक्तं न किंचिदिच्छामीत्यर्थः॥

एवं तर्हि "यः करोति वधोद्कोः" इत्युक्तदोषः स्यादित्याशङ्क्याशङ्कामङ्गीकृत्य ग्ला-निर्न दोषायेति न्यायमाश्रित्य युग्मेनोत्तरमाह—

अपहस्येऽथवा सद्भिः प्रमादो वास्तु मे धियः।
अस्थानविहितायासः कामं जिह्रेतु वा भवान्॥ ६८॥

अपहस्य इत्यादि॥ अथवा सद्भिः पण्डितैरपहस्ये। अपहसिष्य इत्यर्थः॥ "वर्त-

१ न चाभिस्वासनेः. २ मतम्. ३ अपहस्ये.

Digitized by Google

मानसामीप्ये वर्तमानवद्वा" इति लट् ॥ व्यन्तस्तु भ्रान्तिपाठः ॥ मे प्रियः प्रमादोऽनवधानत्वं वास्तु । भवानप्यस्थानेऽयोग्यविषये विहित आयासो हितोपदेशप्रयासो येन स तथोक्तः । विफलप्रयत्नः सन्नित्यर्थः । कामं भिद्येतु लज्जताम् ॥

वंशलक्ष्मीमनुद्धृत्य समुच्छेदेन विद्विषाम् ।
निर्वाणमपि मन्येऽहमन्तरायं जयश्रियः ॥ ६९ ॥

वंशेति ॥ अहं तु विद्विषां शत्रूणां समुच्छेदेन विनाशेन ॥ करणेन. ॥ वंशलक्ष्मीमनुद्धृत्य निर्वाणं मोक्षमपि जयश्रियोऽन्तरायं विघ्नं मन्ये । न तु पुरुषार्थमित्यर्थः । किमुतान्योत्सवादिकमिति भावः ॥

नन्वयं ते दुराग्रह इत्यत आह—

अजन्मा पुरुषस्तावन्नतासुस्तृणमेव वा ।
यावन्नेषुभिरादत्ते विलुप्तमरिभिर्यशः ॥ ७० ॥

अजन्मेति ॥ पुरुषो यावदरिभिर्विलुप्तं संहृतं यश इषुभिर्नादत्ते । अरिवधेन न मन्यादरतीत्यर्थः । तावदजन्मा । अजातप्राय इत्यर्थः ॥ नन्वजातोऽपि जननानन्तरमुपयुज्यत एवेत्यरुच्या पक्षान्तरमाह—गतासुर्मृतः । अमृततुल्य इत्यर्थः ॥ मृतोऽपि परोपयुक्तवानित्यरुच्याह—तृणमेवेति ॥ तृणतुल्य इत्यर्थः । आकिंचित्करस्तु नैकान्त्यानुपयोगाज्जीवन्मृत इत्यर्थः । अतो नाहमाग्रहाद्ब्रवीमि । किंतु वीरधर्ममनुपालयामीति भावः ।

सर्वथा वैरिनिर्यातनं कर्तव्यमित्युक्तम् । तदकरणे पुरुषगुणानां हानिदोषमाह—

अनिर्जयेन द्विषतां यस्यामर्षः प्रशाम्यति ।
पुरुषोक्तिः कथं तस्मिन्ब्रूहि त्वं हि तपोधन ॥ ७१ ॥

अनिर्जयेनेति ॥ यस्यामर्षः क्रोधो द्विषतां शत्रूणामनिर्जयेन निर्जयं विनैव प्रशाम्यति ॥ उपलक्षणे तृतीया ॥ तस्मिन्पुरुष इत्युक्तिः । पुरुषशब्दः कथम् । न कथंचिदित्यर्थः । प्रवर्तत इति शेषः । महर्षिर्निमित्तस्य पुरुषकारस्याभावादिति भावः । हे तपोधन । त्वं हि त्वमेव ब्रूहि कथय । न च ते किंचिदविदितमस्तीति भावः ॥ "हि हेताववधारणे" इत्यमरः ॥

ननु पुरुषत्वजात्यैव पुरुषोक्तिमर्हसे किं पुरुषकारेण । तत्राह—कृतमित्यादिद्वयेन॥

कृतं पुरुषशब्देन जातिमात्रावलम्बिना ।
योऽक्लीकृतगुणैः श्लाघ्यः सविस्मयमुदाहृतः ॥ ७२ ॥

जातिमात्रावलम्बिना जातिमात्राभिधायिना पुरुषशब्देन कृतमलम् । न तेन

Digitized by Google

किंचित्साध्यत इत्यर्थः ॥ अत्र गम्यमानसाधनक्रियापेक्षया करणत्वात्तृतीयेत्युक्तं भाक् ॥ कृतमिति निषेधार्थमव्ययं चादिषु पठ्यते ॥ सत्यं जातिमात्रेऽपि पुरुषशब्दः प्रवर्तते परंतु नासौ पुंसामाश्रास्यः पश्वादिसाधारण्यादिति तात्पर्यार्थः ॥ तर्हि कीदृक्श्लाघ्य इत्याशङ्क्याह—य इत्यादिनार्थत्रयेण ॥ अङ्गीकृतगुणैर्गुणपक्षपातिभिर्यः पुमाञ्श्लाघ्यः स्तुत्यः सन्सविस्मयं ससंभ्रममुदाहृतः कथितः । पुंसेदृशेन भवितव्यमिति निदर्शितः ॥

ग्रसमानमिवौजांसि सदसा गौरवेरितम् ।
नाम यस्याभिनन्दन्ति द्विषोऽपि स पुमान्पुमान् ॥ ७३ ॥

ग्रसमानमिति ॥ किंच । सदसा सभया गौरवेणेरितं कथामसङ्गेषु गौरवपूर्वकमुच्चारितम् । सत ओजांसि शृण्वतां तेजांसि ग्रसमानं गिलदिव स्थितं यस्य पुंसो नाम द्विषोऽप्यभिनन्दन्त्यनुमोदन्ते । किमुत सुहृद इति भावः । स पुमान्पुमान् । पुरुषत्वेन मन्यत इत्यर्थः ॥ प्रथमः पुरुषशब्दो जातिवचनो द्वितीयो गुणवचनः । स एव श्लाघ्यः ॥ अत्र पुमान्पुमानिति तात्पर्यमात्रभेदभिन्नशब्दार्थपौनरुक्त्यलक्षणो लाटानुप्रासोऽलंकारः । तथा च सूत्रम्—"तात्पर्यभेदयुक्तो लाटानुप्रासः" इति ॥

नन्वेतत्तु भीमादिषु तवैवायं क्रोऽभिनिवेश इत्याह—

यथाप्रतिज्ञं द्विषतां युधि प्रतिचिकीर्षया ।
ममैवाध्येति नृपतिस्तृष्यन्निव जलाञ्जलेः ॥ ७४ ॥

यथेति ॥ नृपतिर्युधिष्ठिरो यथाप्रतिज्ञं युधि द्विषतां प्रतिचिकीर्षया द्विषतः प्रतिकर्तुमिच्छया । प्रतिज्ञानुसारेणैव जिघांसयेत्यर्थः । तृष्यन्निपानमुर्जलाञ्जलेरिव ममैवाध्येतीच्छति कार्यसिद्धेर्ममैवायत्तत्वान्मामेव स्मरति । अतोऽयं ममाभिनिवेश इत्यर्थः ॥ "अधीगर्थ-" इत्यादिना कर्मणि षष्ठी ॥

नन्वयं युधिष्ठिरः स्वार्थं साधयति । त्वया च स्वार्थमात्ममनुसंधीयतामित्यत आह—

स वंशस्यावदातस्य शशाङ्कस्येव लाञ्छनम् ।
कुक्ष्येषु व्यथया यत्र भूयते भर्तुराज्ञया ॥ ७५ ॥

स इति ॥ स नरोऽवदातस्य स्वच्छस्य वंशस्य शशाङ्कस्येव लाञ्छनं कलङ्को यत्र यस्मिन्पुरुषे कुक्ष्येषु व्यसनेषु भर्तुः स्वामिन आज्ञया व्यथया भूयते ॥ भावे क्त्र ॥ आपदि स्वार्थसाधकः कुलपांसकः । तत्कथं स्वार्थनिष्ठकार्यता युक्तेत्यर्थः ॥

१ नवः. २ मामेव. ३ जलाञ्जलिम्.

Digitized by Google

यदुक्तम् "विजहीहि रणोत्साहम्" इत्यादि तत्रोत्तरमाह—

कथं वा दीयतामर्वाङ्मुनिता धर्मरोधिनी ।
आश्रमानुक्रमः पूर्वैः स्मर्यते न व्यतिक्रमः ॥ ७६ ॥

कथमिति ॥ धर्मरोधिनी धर्मविरोधिन्यर्वाग्गार्हस्थ्यात्प्रागेव मुनिता वानप्रस्थत्वं चतुर्थाश्रमता वा । वर्णक्रमेण तस्य विधानात् "त्रयाणां वर्णानां वेदमधीत्य चतार आश्रमाः" इति सूत्रकारवचनाच्च क्षत्रियस्यापि कैश्चिदिष्टत्वात् । तदेतत्सम्यग्विवेचितमस्माभी रघुवंशसंज्ञीविन्यास् "स किलाश्रममन्त्यमाश्रितः" इत्यत्र । कथं वा दीयतां मया कथं वाङ्नीक्रियताम् ॥ संभ्रमे क्षोद् ॥ तथाहि । पूर्वैर्मन्वादिभिराश्रमानुक्रमः स्मर्यते । न तु व्यतिक्रमः । "ब्रह्मचारी भूत्वा गृही भवेत् । गृही भूत्वा वनी भवेत् । वनी भूत्वा प्रव्रजेत्" इति श्रुत्यनुसारादिनयः । एतदपि "चतार आश्रमाः" इत्येतत्पक्षमाश्रित्योक्तम् । यदि चेद्वैराग्यं तदा ब्रह्मचर्यादेव प्रव्रजेत् । गृहाद्वनादेति व्युत्क्रमपक्षस्यापि भवणात् । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥

नन्वु भवान्गृहस्थ एव । तत्कथमर्वाङ्मुनितविरोध इत्याशङ्क्य सत्यं गृहस्थोऽस्मि तथापि कृतानिलमृहस्थकर्तव्यस्यैव वानप्रस्थाधिकारो न गृहस्थमात्रस्य । न चाहमद्यापि कृतकृत्य इत्युत्तरमाह—

आसक्ता धूरियं रूढा जननी दूरगा च मे ।
तिरस्करोति स्वातन्त्र्यं ज्यायांश्चाचारवान्नृपः ॥ ७७ ॥

आसक्तेति ॥ आसक्ता लग्ना । अवश्यं कर्तव्येत्यर्थः । रूढा प्रसिद्धा । महतीत्यर्थः । इयं पूर्वोक्ता धूर्वैरिनिर्यातनरूपा । दूरगा दूरवर्तिनी जननी च मातापि । तथा नृपोऽप्याचारवान् । तपोऽधिक इत्यर्थः । तत्रापि ज्यायाञ्ज्येष्ठो नृपो युधिष्ठिरश्च मे मम स्वातन्त्र्यं स्वाच्छन्द्यं तिरस्करोति दूरीकरोति । आश्रमं प्रतिबध्नातीत्यर्थः । तिरस्करोतीति प्रत्येकमभिसंबध्यते । अन्यथा बहुवचनमसङ्गात् ॥

उक्तमर्थमुपसंहरति—

स्वधर्ममनुरुन्धन्ते नातिक्रममरातिभिः ।
पलायन्ते कृतध्वंसानाहवान्मानशालिनः ॥ ७८ ॥

स्वधर्मामिति ॥ मानशालिनः स्वधर्मं क्षात्रधर्ममनुरुन्धन्तेऽनुवर्तन्ते । अतिक्रमं स्वधर्मातिक्रमं नानुरुन्धन्ते ॥ ततः किमत आह— अरातिभिरिति ॥ अरातिभिः कृतध्वंसाः कृतापकाराः सन्त आहवान्न पलायन्ते । अयमेव स्वधर्मानुरोध इत्यर्थः ॥ "उपसर्गस्यायतौ" इति रेफस्य लत्वम् ॥ अत्र मनुः— "न निवर्तेत

Digitized by Google

सङ्गामात्क्षात्रधर्ममनुस्मरन् " इति ॥ अत्रोत्तरवाक्यार्थं प्रति पूर्ववाक्यार्थहेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गमलंकारः ॥

किंबहुना ममार्थं निश्चयः श्रूयतामित्याह—

विच्छिन्नाभ्रविलायं वा विलीये नगमूर्धनि ।
आराध्य वा सहस्राक्षमयशः शल्यमुद्धरे ॥ ७९ ॥

विच्छिन्नेति ॥ विच्छिन्नं वाताहतं यदभ्रं तदिव विलीयेति विच्छिन्नाभ्रविलायं यथा तथा ॥ " उपमाने कर्मणि च " इति कर्तर्युपपदे णमुल् ॥ नगमूर्धन्यस्मिन्गिरिशृङ्गे विलीये विक्षीर्ये वा ॥ कर्मादिषु यथाविध्यनुप्रयोगः । यद्वा सहस्राक्षमिन्द्रमाराध्यायशः एव शल्यं तदुद्धर उद्धरिष्यामि । न तु गत्यन्तरशङ्केत्यर्थः ॥ वाशब्दो विकल्पे ॥

इत्युक्तवन्तं परिरभ्य दोर्भ्यां तनूजमाविष्कृतदिव्यमूर्तिः ।
अघोपघातं मघवा विभूत्यै भवोद्भवाराधनमादिदेश ॥ ८० ॥

इतीति ॥ मघवेन्द्र इत्युक्तवन्तं तनूजं पुत्रमर्जुनम् । आविष्कृता प्रकटिता दिव्यमूर्तिर्निजरूपं येन स तथोक्तः सन् । दोर्भ्यां बाहुभ्यां परिरभ्य विभूत्यै श्रेयसे । उपहन्यतेऽनेनेत्युपघातम् ॥ करणे घञ्प्रत्ययः ॥ अघानां दुःखानामुपघातमघोपघातं भवः संसारस्तस्योद्भवः कारणमिति भवोद्भवः शिवस्तस्याराधनमुपासनमादिदेश । शिवमुद्दिश्य तपश्चरेत्याज्ञापयामासेत्यर्थः ॥

प्रीते पिनाकिनि मया सह लोकपालै-
र्लोकत्रयेऽपि विहितामतिवार्यवीर्यः ।
लक्ष्मीं समुत्सुकयितासि भृशं परेषा-
मुच्चार्य वाचमिति तेन तिरोबभूवे ॥ ८१ ॥

प्रीत इति ॥ पिनाकिनि शिवे प्रीते सति लोकपालैः सह मया लोकत्रयेऽपि विहितं दत्तमप्रतिवार्यमनिवार्यं वीर्यं यस्य स तथोक्तः सन् । परेषां शत्रूणां लक्ष्मीं भृशं समुत्सुकयितासि समुत्सुकां लक्ष्यनुरक्तां कर्तासि । पुनराहरिष्यसीत्यर्थः । वीरभोग्याः संपद इति भावः । उत्सुकशब्दात् " तत्करोति " इति ण्यन्तात्कर्तरि क्विप् ॥ इति वाचमुच्चार्य तेनेन्द्रेण तिरोबभूवेऽन्तर्दधे ॥ भावे लिट् ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथसंज्ञया व्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये इन्द्रलाभागमो नामैकादशः सर्गः ।

१ क्षीणे भवा.

Digitized by Google

द्वादशः सर्गः ।

अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनम् ।
क्लान्तिरहितमभिराधयितुं विधिवत्तपांसि विदधे धनंजयः ॥ १ ॥

अथेति ॥ अथेन्द्रतिरोधानानन्तरं रुचिरवदन इन्द्रसाक्षात्कारसंतोषात्प्रसन्नमुखो धनंजयोऽर्जुनो वासवस्य वचनेनोपदेशेन त्रिलोचनं शिवं क्लान्तिरहितं यथा तथाभिराधयितुं प्रसादयितुं तपांसि विधिवद्विध्यर्हम् । यथाशास्त्रमित्यर्थः ॥ "तदर्थम्" इति वतिप्रत्ययः ॥ विदधे चक्रे ॥ अस्मिन्सर्गे उद्गताद्दत्तम्— "सजसाद्यैः सलघुकैः च नसजगुरुकैरुद्गता । अग्रिमैः भनजलागकृता सजसाजगौ चरणमेकतः पठेत्" इति लक्षणात् ॥

अभिरश्मिमालि विमलस्य धृतजयधृतेरनाशुपः ।
तस्य भुवि बहुतिथास्तिथयः प्रतिजग्मुरेकचरणं निपीदतः ॥ २ ॥

अभिरश्मीति ॥ अभिरश्मिमाल्यभिमुखं सूर्याभिमुखं शुष्येकचरणं निपीदत एकचरणेन तिष्ठतो विमलस्य बाह्यान्तरशुद्धिमतः । धृता जयधृतिर्जयेच्छा येन तस्यानाशुपोऽनशतः ॥ "उपेयिवाननाश्वानवृचानश्च" इति निपातः ॥ तस्यार्जुनस्य बहूनां पूरणा बहुतिथाः । बहुसंख्यका इत्यर्थः ॥ "तस्य पूरणे डट्" । "बहुपूगगणसंघस्य तिथुक्" इति तिथुगागमः ॥ तिथयो दिनानि प्रतिजग्मुः ॥ अत्र तिथिशब्दः पुंलिङ्गः । "तदाद्यास्तिथयो द्वयोः" इत्यभिधानात् । अन्यथा बहुतिथा इत्यत्र दित्वान्ङीप्स्यात् ॥

वपुरिन्द्रियोपतपनेषु सततमसुखेषु पाण्डवः ।
व्याप नगपतिरिव स्थिरतां महतां हि धैर्यमविभाव्यवैभवम् ॥ ३ ॥

वपुरिति ॥ पाण्डवोऽर्जुनः सततं वपुष इन्द्रियाणां चोपतपनेषु संतापकरेषु ॥ करणे ल्युट् ॥ असुखेष्वनशनादिदुःखेष्वपि नगपतिर्गिरीन्द्र इव स्थिरतां दार्ढ्यं व्याप प्राप । तथाहि । महतां धैर्यमविभाव्यं दुर्बोधं वैभवं सामर्थ्यं यस्य तत्तथोक्तम् । धीराणामकिंचित्करं दुःखमिति भावः ॥

न पपात संनिहितपक्तिसुरभिषु फलेषु मानसम् ।
तस्य शुचिनि शिशिरे च पयसामृतायते हि सुतपः सुकर्मणाम् ॥ ४ ॥

नेति ॥ तस्यार्जुनस्य मानसं मनः संनिहितानि समीपस्थानि यानि पक्तिसुरभीणि

१ अभिभिमव.

Digitized by Google

पाकसुगन्धीनि तेषु फलेषु । तथा शुचिनि स्वच्छे शिशिरे शीतले पयसि च न पपात । न किंचिदाचकाङ्क्षेति भावः । प्राणधारणं तु तस्य तप एवेत्याह—तथाहि । सुकर्मणां सुकृतिनां शोभनं तपः सुतप एवामृतायतेऽमृतवदाचरति । किं तपस्तृप्तानां तर्पणान्तरैरिति भावः ॥ "लोहितादिडाज्भ्यः क्यष्" । "क्याच्छन्दसि" इत्यात्मनेपदम् । लोहितादिराकृतिगणः ॥

न विसिस्मिये न विषसाद मुहुरलसतां न चाददे ।
सत्त्वमुरुधृति रजस्तमसी न हतः स्म तस्य हतशक्तिपेलवे ॥ ५ ॥

नेति ॥ सोऽर्जुनो न विसिस्मिये । अहो महत्तपस्तप्तमिति न विस्मयं जगाम । "तपः क्षरति विस्मयात्" इति स्मृतेरिति भावः । न विषसाद फलविलम्बाद्गतोत्साहो न बभूव । "विषादधैर्यतो भ्रंशः" इति लक्षणात् ॥ "सदिरमतेः" इति पत्वम् ॥ मुहुरलसतां तपसि मन्दोद्यमतां च नागमत् । किंच । इतशक्तिनी इतसारे अतएव पेलवे भङ्गुरे ते इतशक्तिपेलवे रजस्तमसी गुणावुरुधृति महासारं तस्यार्जुनस्य सत्त्वं सत्त्वगुणं न हतः स्म न हतवती ॥ हन्तेः "लङ् स्मे" इति भूतार्थे लङ् ॥

तपसा कृशं वपुरुवाह स विजितजगत्त्रयोदयम् ।
त्रासजननमपि तत्त्वविदां किमिवास्ति यन्न सुकरं मनस्विभिः ॥६॥

तपसेति ॥ सोऽर्जुनस्तपसा कृशं तथापि विजितो जगत्त्रयस्य भुवनत्रयस्योदय उत्कर्षो येन तत्तथोक्तम् । किंच । तत्त्वविदामपि लोकहितार्थतत्त्वं जानतामपि त्रासजननं भयंकरं वपुरुवाह वहति स्म ॥ न चैतच्चित्रमित्याह— किमिति ॥ यन्मनस्विभिर्न सुकरं तत्किमिवास्ति । न किमपीत्यर्थः । इवशब्दो वाक्यालंकारे ॥ "मनस्विनाम्" इति पाठेऽपि षष्ठी स्यादेव । कृयोगलक्षणायाम् "न लोक–" इत्यादिना निषेधात् ॥

ज्वलतोऽनलादनुनिशीथमधिकरुचिरम्भसां निधेः ।
धैर्यगुणमवजयन्विजयी दहरो समुन्नततरः स शैलतः ॥ ७ ॥

ज्वलत इति ॥ विजयी सोऽर्जुनोऽनुनिशीथमर्धरात्रे ॥ विभक्त्यर्थेऽव्ययीभावः॥ "अर्धरात्रनिशीथौ द्वौ" इत्यमरः ॥ ज्वलतो दीप्यमानादनलादधिकरुचिरम्भसां निधेर्धैर्यं गाम्भीर्यं तदेव गुणस्तमवजयन् । किंच । शैलतः शैलादपि समुन्नततरो दहरे ॥ अत्र रुच्यादिभिरनलाद्यधिक्यासंबन्धे संबन्धाभिधानादतिशयोक्तिरलंकारः ॥

१ वेपाते. २ न ववक्षि. ३ महाम्भसः.

Digitized by Google

जपतः सदा जपमुपांशु वदनमभितो विसारिभिः ।
तस्य दशनकिरणैः शुशुभे परिवेषभीषणमिवार्कमण्डलम् ॥ ८ ॥

जपत इति ॥ सदोपांशु रहः । गूढमित्यर्थः ॥ "रहोपांशु चाखिले" इत्यमरः ॥ "करणवदशब्दमनुभयोग उपांशु" इति कौमारे लक्षणम् ॥ जप्यत इति जपस्तं जपम् । मन्त्रमित्यर्थः । जपतः पठतस्तस्यार्जुनस्य वदनम् ॥ कर्तृ ॥ अभितो विसारिभिर्दशनकिरणैर्हेतुभिः परिवेषभीषणमर्कमण्डलमिव शुशुभे ॥ "परिवेषस्तु परिधिरुपसूर्यकमण्डले" इत्यमरः ॥

कवचं स बिभ्रदुपवीतपदनिहितसज्यकार्मुकः ।
शैलपतिरिव महेन्द्रधनुःपरिवीतभीमगहनो विदिद्युते ॥ ९ ॥

कवचमिति ॥ कवचं वर्म बिभ्रदुपवीतपदे यज्ञोपवीतस्थाने निहितं सज्यं कार्मुकं येन स तथोक्तः । सोऽर्जुनो महेन्द्रधनुषा परिवीतं परिवेष्टितं भीमं गहनं वनं यस्य स शैलपतिरिव विदिद्युते शुशुभे ॥

प्रविवेश गामिव कृशस्य नियमसवनाय गच्छतः ।
तस्य पदविनमितो हिमवान्गुरुतां नयन्ति हि गुणा न संहतिः ॥१०॥

प्रविवेशेति ॥ नियमसवनाय नियमस्नानाय ॥ "सवनं स्नभ्वरे स्नाने सोमनिर्दस्नेऽपि च" इति विश्वः ॥ गच्छतः कृशस्य तस्यार्जुनस्य पदैः पादन्यासैर्विनमितो हिमवान्नां भुवं प्रविवेशेवेत्युत्प्रेक्षा ॥ ननु कृशस्य कथमियद्गौरवम् । तत्राह—गुणाः सारादयो गुरुतां नयन्ति प्रापयन्ति हि । संहतिः संघातः । मूर्तिरिति यावत् । न नयति । अन्तःसाराद्धि गौरवं भवति न तु बाह्यात्स्थौल्यात् । तत्र च हेमपिण्डतूलपिण्डावेव निदर्शनमिति भावः ॥

परिकीर्णमुद्यतभुजस्य भुवनविवरे दुरासदम् ।
ज्योतिरुपरि शिरसो विततं जगृहे निजान्मुनिदिवौकसां पथः ॥११॥

परिकीर्णमिति ॥ उद्यतभुजस्योर्ध्वबाहोस्तस्य शिरस उपरि ॥ "षष्ठ्यतसर्थप्रत्ययेन" इति षष्ठी ॥ विततं विस्तृतं भुवनयोर्विवरे द्यावापृथिव्योरन्तराले परिकीर्णं व्याप्तं दुरासदं दुर्धर्षं ज्योतिस्तेजो मुनीनां दिवौकसां च निजान्निजवतान्पथो मार्गान्जगृहे जग्राह । प्रतिबबन्धेत्यर्थः ॥

रजनीषु राजतनयस्य बहुलसमयेऽपि धामभिः ।
भिन्नतिमिरनिकरं न जहे शशिरविसंगमयुजा नभः श्रिया ॥१२॥

रजनीष्विति ॥ बहुलसमये कृष्णपक्षेऽपि रजनीषु राजतनयस्यार्जुनस्य धामभिस्ते-

Digitized by Google

ओभिर्मिलद्भिरनिकरो यस्य तत्तमः शशिरश्मीनां संगमेन हेतुना युजा संगतया श्रिया । तत्प्रीतुल्यया श्रियेत्यर्थः ॥ अतएव निदर्शनालंकारः ॥ न जहे न त्यक्तम् ॥ ओहाङ्गतेः कर्मणि लिट् ॥ ज्योत्स्नातुल्यज्योतिरित्यर्थः ॥

महता मयूखनिचयेन शमितरुचि जिष्णुजन्मना ।
ह्रीतमिव नभसि वीतमले न विराजते स्म वपुरंशुमालिनः ॥ १३ ॥

महतेति ॥ जिष्णोरर्जुनाज्जन्म यस्य तेन ॥ जन्मोत्तरपदव्यधिकरणो बहुव्रीहिः ॥ महता मयूखनिचयेन शमितरुचि इतमभमंशुमालिनो वपुरर्कबिम्बं ह्रीतं जितत्वाल्लज्जितमिवेत्युत्प्रेक्षा । वीतमले । मेघनीहाराद्यावरणरहितेऽपीत्यर्थः । नभसि न विराजते स्म ॥

तमुदीरितारुणजटांशुमधिगुणशरासनं जनाः ।
रुद्रमनुदितललाटदृशं ददृशुर्मिमन्थिषुमिवासुरीः पुरीः ॥ १४ ॥

तमिति ॥ उदीरिता उद्गता अरुणा जटानामंशवो यस्य तमधिगुणमधिज्यं शरासनं यस्य तमर्जुनं जनाः सिद्धगणा आसुरीरसुरसंबन्धिनीः पुरीर्मिमन्थिषुं मथितुमिच्छवः ॥ मथेः सन्नन्तादुमत्ययः ॥ तथानुदिता ललाटे दृश्यस्य तं साक्षात्त्रिपुरविजयोद्यतमभालाक्षं रुद्रमिव ददृशुः ॥ अत्राभालाक्षस्य रुद्रस्यासंभवात्स्वतः सिद्धोपमानासिद्धेर्मेयमुपमा । किंतूत्प्रेक्षा । सा चाभालाक्षमित्युपमानानुपमेयस्य न्यूनत्वकथनार्थेऽन्वयव्यतिरेकेणोज्जीवितेत्यनयोरङ्गाङ्गिभावेन संकरः । उपमा तु व्यज्यत इत्यलंकारेणालंकारध्वनिः ॥

मरुतां पतिः स्विदहिमांशुरुत पृथुशिखः शिखी तपः ।
तमुमसुकरमुपक्रमते न जनोऽयमित्यवयये स तापसैः ॥ १५ ॥

मरुतामिति ॥ मरुतां पतिः स्विदेवेन्द्रो वा । अहिमांशुरुत सूर्यो वा । पृथुशिखो महाज्वालः शिखी पावको वा । असुकरं दुष्करं तपस्तनुमुपक्रमते । अयं पुरुषो जनः कश्चिन्मानुषो नेति सोऽर्जुनस्तापसैस्तापसिभिः ॥ "अस् च" इति मत्वर्थीयोऽस्त्यवयः ॥ अवयवेऽवयतः ॥ यातेरवपूर्वात्कर्मणि लिट् ॥ अत्रेन्द्रादिकं धर्ममारोप्य जनत्वापवादात्साम्यमारोप्यापह्नवालंकारः । सामान्यलक्षणं तु—"निषिद्धविषये साम्यारोपो ह्यपह्नवः" इति लक्षणात् ॥

न ददाह भूरुहवनानि हरितनयधाम दूरगम् ।
न स्म नयति परिशोषमपः सुसहं बभूव न च सिद्धतापसैः ॥ १६ ॥

१ विराजति. २ पुरः. ३ अथ. ४ भूधर.

Digitized by Google

न ददाहेति ॥ दूरगम् । व्यापकमित्यर्थः । हरितनयसंज्ञसुतस्यार्जुनस्य धाम तेजो भूरुहवनानि न ददाह । अग्निवदिति भावः । तथापः परिशोषं न नयति स्म । अर्कवदिति भावः । तथापीति शेषः । सिद्धाश्च तापसाश्च तैः सुसहं न बभूव । अतोऽस्यालौकिकं तेज इति भावः ॥ अतएव दुःसहत्वदाहायजनकत्वयोर्विरोधाद्विरोधाभासोऽलंकारः— "आभासत्वे विरोधस्य विरोधालंकृतिर्मता" इति लक्षणात् ॥

विनयं गुणा इव विवेकमपनयभिदं नया इव ।
न्यायमवधय इवाशरणाः शरणं ययुः शिवमथो महर्षयः ॥ १७ ॥

विनयमिति ॥ अथोऽनन्तरमशरणा महर्षयो मुनयो विनयं शिक्षां गुणा औदार्यादय इव । अशिक्षितस्य तदभावादिति भावः । अपनयभिदं दुर्नीतिवारकं विवेकं सदसज्ज्ञानं नया नीतय इव । अविवेकिनो नीत्यभावादिति भावः । नीतिः पाण्डुभयोगः । नीयतेऽनेनेति न्यायो नियामकं प्रमाणं तम् । अवधयः समया इव । अप्रामाणिकस्य समयोल्लङ्घितत्वादिति भावः । शिवं त्रिनयनं शरणं रक्षितारम् ॥ "शरणं गृहरक्षित्रोः" इत्यमरः ॥ ययुः । शरणत्वेन प्रापुरित्यर्थः । अशरणाः शरणमिति चोपमास्वपि यथायोग्यं योज्यम् ॥ उपमालंकारः ॥

परिवीतमंशुभिरुदस्तदिनकरमयूखमण्डलैः ।
शंभुमुपहतदृशः सहसा न च ते निचायितुमभिप्रसेहिरे ॥ १८ ॥

परिवीतमिति ॥ उदस्तं निरस्तं छादितं दिनकरमयूखमण्डलं यैस्तैः । सूर्यतेजोविजयिभिरित्यर्थः । अंशुभिस्तेजोभिः परिवीतं व्याप्तं शंभुं शिवमुपहतदृशः प्रतिहतदृष्टयस्ते महर्षयः सहसा झटिति निचायितुं निध्यायितुम् । द्रष्टुमित्यर्थः ॥ "चायृ पूजानिशामनयोः" इति धातोः "शकधृष-" इत्यादिना तुमुन् ॥ नाभिप्रसेहिरे न शेकुः ॥

अथ भूतभव्यभवदीशमभिमुखयितुं कृतस्तवाः ।
तत्र महसि ददृशुः पुरुषं कमनीयविग्रहमयुग्मलोचनम् ॥ १९ ॥

अथेति ॥ अथ दृष्टपघातानन्तरं भूतभव्यभवतां भूतभविष्यद्वर्तमानानामीशं देवमभिमुखयितुमभिमुखीकर्तुं कृतस्तवाः कृतस्तोत्राः सन्तः । न त्वन्यथेति भावः ॥ "स्तवः स्तोत्रं स्तुतिर्नुतिः" इत्यमरः ॥ तत्र पूर्वोक्ते महसि तेजसि कमनीयविग्रहं रम्यमूर्तिमयुग्मानि त्रीणि लोचनानि यस्य तं पुरुषं ददृशुः ॥

१ निचायितुम् ; निरीक्षितुम् ।

Digitized by Google

अथ पञ्चभिः पुरुषं विधिनद्धि—ककुद इत्यादिना ॥

ककुदे वृषस्य कृतवाङ्मकृशपरिणाहशालिनि ।
स्पर्शसुखमनुभवन्तमुमाकुचयुग्ममण्डल इवार्द्रचन्दने ॥ २० ॥

कीदृशं पुरुषम् । अकृशेन महता परिणाहेन विशालतया शालत इति तथोक्ते ॥ "परिणाहो विशालता" इत्यमरः ॥ वृषस्य वृषभस्य ककुदेऽसकूटे । आभयीकृत इति शेषः । आर्द्रचन्दन उमायाः कुचयुग्ममण्डल इव कृतवाङ्कं न्यस्तहस्तमतएव स्पर्शसुखमनुभवन्तम् । ककुदस्य तथाविधस्पर्शसुखकरत्वादिति भावः ॥ उपमालंकारः॥

स्थितमुन्नते तुहिनशैलशिरसि भुवनातिवर्तिना ।
सादिजलधिजलवाहपथं सदिगभ्रुवानमिव विभ्रमोजसा ॥ २१ ॥

स्थितमिति ॥ उन्नते तुहिनशैलशिरसि हिमवतः शिखरे स्थितम् । क्वचित्कोणे स्थितमित्यर्थः । तथापि भुवनातिवर्तिना सर्वलोकातिशयिनौजसा तेजसा । अद्रिभिः पर्वतैर्जलधिभिः समुद्रैर्जलवाहपथेनाकाशेन च सह वर्तत इति तथोक्तम् । दिग्भिः सह वर्तत इति सदिक् ॥ उभयत्रापि "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः ॥ विभ्रमभ्रुवानं व्याप्नुवन्तमिव स्थितमित्युत्प्रेक्षा ॥ "अभ्रूङ् व्याप्तौ" इति धातोः क्वानच् ॥

अनुजानुमध्यमवसक्तवितततवपुषा महाहिना ।
लोकमखिलमिव भूमिभृता रवितेजसामवधिनाधिवेष्टितम् ॥२२॥

अनुजानुमिति ॥ जानुनोर्मध्येऽनुजानुमध्यम् ॥ विभक्त्यर्थेऽव्ययीभावः ॥ अवसक्तं लग्नं विततमायतं च वपुर्यस्य तेन महाहिना । अवसक्तिकावन्धभूतेनेत्यर्थः । अधिवेष्टितमतएव रवितेजसामवधिना पर्यन्तभूतेन भूमिभृता लोकालोकाचलेनाधिवेष्टितमखिलं लोकमिव स्थितमित्युपमा ॥ "अस्तूर्यपश्चापरभागो लोकालोकाचलः" इत्यागमः ॥

परिणाहिना तुहिनराशिविशदमुपवीतसूत्रताम् ।
नीतमुरगमनुरञ्जयता शितिना गलेन विलसन्मरीचिना ॥ २३ ॥

परिणाहिनेति ॥ पुनश्च । तुहिनराशिवद्विशदं शुभ्रमुपवीतसूत्रतां यज्ञोपवीतत्वं नीतं प्रापितमुरगं शेषाहिमनुरञ्जयता स्वगुणोपरक्तं कुर्वता । श्यामीकुर्वतेत्यर्थः । परिणाहिना विशालेन विलसन्मरीचिना मयूखकिरणेन शितिना नीलेन गलेन कण्ठेनोप-

१ अभिवेष्टितम्.

Digitized by Google

लक्षितम् ॥ "कम्बो गलोऽथ ग्रीवायाम्" इत्यमरः ॥ अत्रोरगस्य स्वपक्षलिप्सत्यागेनान्यनीलिमग्रहणाच्चतुर्थालंकारः—"तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणग्रहात्" इति लक्षणात् ॥

द्रुतमालतीसितकपालकुमुदमुपरुद्धमूर्धजम् ।
शेषमिव सुरसरित्पयसां शिरसा विसारि शशिधाम बिभ्रतम् ॥२४॥

द्रुतेति ॥ पुनश्च । मालती जातीकुसुमम् ॥ "सुमना मालती जातिः" इति । "पुष्पे जातीमधूतयः स्त्रलिङ्गा व्रीहयः फले" इति चामरः ॥ तद्वत्सितं यत्कपालमेव कुमुदं तत्कृतमाकुलं येन तत्तथोक्तम् । अवरुद्धमूर्धजं व्याप्तशिरोरुहम् । अतएव सुरसरित्पयसां शेषमिव निर्यातावशिष्टं गाङ्गमम्भ इव । स्थितमित्यर्थः ॥ उत्प्रेक्षालंकारः ॥ विसारि विस्तरं शशिधाम शिरसा बिभ्रतम् । पुरुषं ददृशुरिति पूर्वेणान्वयः॥

मुनयस्ततोऽभिमुखमेत्य नयनविनिमेषनोदिताः ।
पाण्डुतनयतपसा जनितं जगतामशर्म भृशमाचचक्षिरे ॥ २५ ॥

मुनय इति ॥ ततो दर्शनानन्तरं मुनयोऽभिमुखमेत्य । शिवस्येति शेषः । नयननिमेषेण नेत्रसंज्ञया नोदिताः प्रेरिताः सन्तः पाण्डुतनयस्यार्जुनस्य तपसा जनितं तत्पूर्वोक्तं जगतामशर्माशुभम् । दुःखमित्यर्थः ॥ "शर्मशातसुखानि च" इत्यमरः ॥ भृशं सम्यगाचचक्षिरे ॥

तरसैव कोऽपि भुवनैकपुरुष पुरुषस्तपस्यति ।
ज्योतिरमलवपुषोऽपि खेरभिभूय वृत्र इव भीमविग्रहः॥ २६ ॥

तरसेति ॥ हे भुवनैकपुरुष हे पुरुषोत्तम । वृत्रो दनुसुत इव भीमविग्रहः क्रोऽपि । अविज्ञात इत्यर्थः । पुरुषस्तरसा बलात्कारेणैव ॥ "तरसा बलरंहसी" इति

१ पयसः. २ विकासि.

२४-२५ श्लोकमध्ये क्वचिल्लोपकोऽयं दृश्यते—

बहुभिश्च बाहुभिरहीनभुजबलयैर्विराजितम् ।
चन्दनतरुभिरिवोर्वीभृद्भिः मैबलावतैर्मेरुमयमेदिनीभृतम् ॥

बहुभिरिति ॥ अहीनां सर्पाणां मध्ये ये इनाः श्रेष्ठा भुजगास्त एव बलवानि येषां तैः । सर्पभरनैरित्यर्थः । बहुभिरनेकैर्बाहुभिः । सहस्रभुजबलात्तत्स्येति भावः । विराजितं शोभितं चन्दनतरुभिरनेकैर्मेरुमयमेदिनीभृतमिव स्थितम् । चन्दनतरवोऽप्यहीना महान्तो भुजगास्तेषां वलयो वेष्टनं येषां तैरिति । अरुद्भिः प्रबलाश्च ते आयताश्च तैरुभयविशेषणम् । प्रबलदीर्घैरित्यर्थः। अथवा । अमलावतैरमला निर्मलाश्च ते तैः ॥ उपमालंकारः ॥ (१ अतरुभिः. २ अमलावतैः, धवलावतैः.)

Digitized by Google

विश्वः ॥ अमलवपुष उज्ज्वलमूर्ते रवेरपि ज्योतिरभिभूय तपसति तपश्चरति ॥ "कर्मणो रोमन्थतपोभ्यां वर्तिचरोः" इति क्यङ् ॥

स धनुर्महेषुधि बिभर्ति कवचमसिमुत्तमं जटाः ।
वल्कमजिनमिति चित्रमिदं मुनिताविरोधी न च नास्य राजते॥२७॥

स इति ॥ किंच । स पुरुषो महान्ताविषुधी यस्य तन्महेषुधि धनुः कवचं वर्मोत्तममसिः खड्गं जटा वल्कं चीरमजिनं चर्म बिभर्ति । इत्येवं रूपमिदं विरुद्धवेषधारणं मुनिताविरोधि मुनित्वमतिबन्धकं तथाप्यस्य न राजत इति न । किंतु राजत एवेत्यर्थः । चित्रमाश्चर्यम् ॥ "संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ" इति वामनः ॥

चलनेऽवनिश्चलति तस्य करणनियमे सदिद्युखम् ।
स्तम्भमनुभवति शान्तमरुद्धहतारकागणयुतं नभस्तलम् ॥ २८ ॥

चलन इति ॥ किंच । तस्य पुंसश्चलनेऽवनिः पृथिवी चलति । तथा करणनियमे समधिष्ठितेन्द्रियसंयमे सति ॥ "करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि" इत्यमरः॥ शान्तैः स्तिमितैर्मरुतां वायूनां ग्रहाणां सूर्यादीनां तारकाणां नक्षत्रादीनां च गणैर्युतं नभस्तलं सदिद्युतं दिक्सहितं स्तम्भं निश्चलतामनुभवतीत्यर्थः । अतो विश्वातिशायिनी तस्य शक्तिरुपलभ्यत इति भावः ॥

न चैतदुपेक्ष्यमित्याशयेनाह—

स तदोजसा विजितसारमभरदितिजोपसंहितम् ।
विश्वमिदमपिदधाति पुरा किमिवास्ति यन्न सुकरं खलु तेन ॥२९॥

स इति ॥ स पुमानोजसा विजितसारं निरस्तसत्त्वम् । अभरदितिजोपसंहितं सुरासुरसहितं तदिदं विश्वं पुरापिदधाति । अपिधास्यतीत्यर्थः । क्षीप्रमेव हरिष्यतीति भावः ॥ "निकटागामिके पुरा" इत्यमरः ॥ "यावत्पुरानिपातयोर्लट्" इति भविष्यदर्थे लट् ॥ तथा यत्खलु तेन पुंसा न सुकरं कर्म तत्किमिवास्ति । न किंचिदेतेन दुष्करमस्तीत्यर्थः ॥ सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥

न चैतदभ्यफलकं तप इत्याह—

विजिगीषते यदि जगन्ति युगपदय संजिहीर्षति ।
प्रासुमभवमभिवाञ्छति वा वयमस्य नो विषहितुं क्षमा रुचः॥३०॥

विजिगीषत इति ॥ स पुरुषो जगन्ति भुवनानि युगपद्विजिगीषते यदि विजेतुमिच्छति वा ॥ "पूर्ववत्सनः" इत्यात्मनेपदम् ॥ अथ युगपत्संजिहीर्षति संहर्तुमि-

१ अक्षिविषम्. २ यत्र यत्र तेन दुष्करम्; तेन खलु यत्र दुष्करम्.

Digitized by Google

ष्यति वा । अभवमपवर्गं भावुमभिवाञ्छति वा । न विद्म इति शेषः । किंतु । वयमप्यस्य रुषस्तेजांसि विषहितुं सोढुम् ॥ "तीषसहलुभरुषरिषः" इति विकल्पादिट्कागमः ॥ नो क्षमा न शक्ताः ॥ केचित् "रुषः कामितानि विषहितुमवधारयितुम्" इति व्याचक्षते । तत्र सहेरवधारणार्थत्वं विचार्यम् ॥

किमुपेक्षसे कथय नाथ न तव विदितं न किंचन ।
त्रातुमलमभयदार्हसि नस्त्वयि मा स्म शासति भवत्पराभवः ॥२१॥

किमिति ॥ हे नाथ । किं किमर्थमुपेक्षसे कथय । त्वमिति शेषः । तव न विदितम् । त्वयाज्ञायमानमित्यर्थः ॥ "रुस्य च वर्तमाने" इति षष्ठी ॥ न किंचन किमपि न । हे अभयद । नोऽस्मानलं त्रातुमर्हसि । त्वयि शासति सति पराभवो मा स्म भवन्मा भूत् ॥ "ओत्परे लङ् च" इति लङ् ॥

इति गां विधाय विरतेषु मुनिषु वचनं समाददे ।
भिन्नजलधिजलनादगुरुं ध्वनयन्दिशां विवरमन्धकान्तकः ॥ २२ ॥

इतीति ॥ इतीत्थं गां वाचं विधाय । अभिधायेत्यर्थः । सामान्यस्य विशेषपर्यवसानात् । मुनिषु विरतेषु तूष्णींभूतेषु सत्सु । अन्धकान्तकः शिवो भिन्नस्योद्वेलस्य जलधेर्जलस्य नादमिव गुरुं गम्भीरं यथा तथा दिशां विवरमन्तरालं ध्वनयन्वचनं समाददे स्वीचकार । उवाचेत्यर्थः ॥

बदरीतपोवननिवासनिरतमवगात मान्यथा ।
धातुरुदयनिधने जगतां नरमंशमादिपुरुषस्य गां गतम् ॥ २३ ॥

बदरीति ॥ बदरीतपोवने बदरिकाश्रमे निवासनिरतं नित्यनिवासिनं गां गतं भुवमवतीर्णं जगतामुदयनिधने सृष्टिसंहारौ धातुः । तयोः कर्तुरित्यर्थः ॥ "तृन्" इति धातेस्तृन्प्रत्ययः । अतएव "न लोक-" इत्यादिना कर्मणि षष्ठीप्रतिषेधः ॥ आदिपुरुषस्य विष्णोरंशमंशभूतं नरम् । नरसंज्ञकमित्यर्थः । यो नारायणसंज्ञक इति भावः । अन्यथोक्तविपरीत्येनैनं मावगात । मनुष्यमात्रं मा जानीतेत्यर्थः ॥ "इणो गा लुङि" इति गादेशः ॥

अथ तपसो निमित्तमाह—

द्विषतः परासिसिषुरेष सकलभुवनाभितापिनः ।
क्रान्तकुलिशकरवीर्यबलान्मदुपासनं विहितवान्महत्तपः ॥ २४ ॥

द्विषत इति ॥ एष नरः सकलभुवनान्यभितापयन्त्यभीक्ष्णमिति तथोक्तान् ॥ "बहुलमाभीक्ष्ण्ये" इति णिनिः ॥ क्रान्ते आक्रान्ते कुलिशकरस्येन्द्रस्य वीर्यबले

Digitized by Google

शक्तिसैन्ये पेक्षान्विषतः शत्रून्परासिसिषुः परासितुमिच्छुः ॥ अस्यतेः सन्नन्ता-दुमत्ययः ॥ मघुपासनं मदाराधनम् ॥ करणे क्युट् ॥ महत्तपो विहितवान् । अत्र निमित्तं शत्रुक्षय एवेति ॥

अथास्य मानुषावतारे कारणमाह—

अयमच्युतश्च वचनेन सरसिरुहजन्मनः प्रजाः ।
पातुमसुरनिधनेन विभ्रु भुवमभ्युपेत्य मनुजेषु तिष्ठतः ॥ २५ ॥

अयमिति ॥ विभ्रु भ्रु अयं नरोऽच्युतः कृष्णश्च सरसिरुहजन्मनो ब्रह्मणो व-चनेन प्रार्थनयासुराणां निधनेन मारणेन ॥ करणे ॥ प्रजाः पातुं रक्षितुं भुवमभ्यु-पेत्य मनुजेषु तिष्ठतः । वस्तुतस्तु साक्षान्नरनारायणावेतौ कृष्णार्जुनावित्यर्थः ॥

अथास्य सत्त्वसंपदं प्रकाशयितुमाह—

सुरकृत्यमेतदवगम्य निपुणमिति मूकदानवः ।
इन्तुमभिपतति पाण्डुसुतं त्वरया तदत्र सह गम्यतां मया ॥ २६ ॥

सुरेति ॥ मूकदानवो मूकाख्यः कश्चिदसुर एतत्पाण्डवकृत्यं सुरकृत्यमिति नि-पुणमवगम्य साधु निश्चित्य पाण्डुसुतमर्जुनं इन्तुमभिपतति । तच्चात्कारकाद-र्जुनाभमे विषये । आभमं प्रतीत्यर्थः । मया सह त्वरया गम्यतामु ॥ द्रष्टुमिति शेषः ॥

विवरेऽपि नैनमनिगूढमभिभवितुमेष पारयन् ।
पापनिरतिरविशङ्कितया विजयं व्यवस्यति वराहमायया ॥ २७ ॥

विवर इति ॥ पापे निरतिर्यस्य स एव दानवो विवरे रन्ध्रेऽपि । एकान्तेऽपी-त्यर्थः । एनं पाण्डवमनिगूढं प्रकाशं स्पष्टं यथा तथाभिभवितुं न पारयन्न शक्नु-वन् ॥ विभाषायां "नञ्" इति नञ्समासः ॥ अविशङ्कितया स्वरूपगूहनाभिःशङ्कि-तया वराहमायया वराहभूमिकया विजयं व्यवस्यति । विजयं प्रत्युद्युक्त इत्यर्थः ॥

ततः किं भविष्यतीत्यत्राह—

निहते विडम्बितकिरातनृपतिवपुषा रिपौ मया ।
मुक्तनिशितविशिखः प्रसभं मृगयाविवादमयमाचरिष्यति ॥ २८ ॥

निहत इति ॥ विडम्बितमनुकृतं किरातनृपतिवपुषेन तेन । तद्रूपधारिणेत्यर्थः । मया निहते रिपौ वराहे मुक्तनिशितविशिखः सन् । अयं पाण्डवः प्रसभं प्रसह्य मृगयाविवादं मृगमहारकलहमाचरिष्यति करिष्यति । मत्प्रहतमेव मृगं महत्य स्व-यमहमेव महतेति कलहिष्यत इत्यर्थः ॥

१ मुरकार्यम्.

Digitized by Google

ततोऽपि किं भावीत्यभाह—

तपसा निपीडितकृशस्य विरहितसहायसंपदः।
सत्त्वविहितमतुलं भुजयोर्बलमस्य पश्यत मृधेऽधिकुप्यतः॥ ३९॥

तपसेति॥ तपसा नितरां पीडितोऽतएव कृशस्तस्य तपसा निपीडितकृशस्य॥ "पूर्वकाल—" इत्यादिना समासः॥ तथा विरहिता सहायसंपद्यस्य तस्यैकाकिनो मृधे रणे॥ "मृधमास्कन्दनं सङ्गरम्" इत्यमरः॥ अधिकुप्यतोऽधिकं कुप्यतोऽस्य पाण्डवस्य सत्त्वविहितं स्वभावकृतम्। स्वाभाविकमित्यर्थः॥ "सत्त्वोऽस्त्री जन्तुपु क्लीबे व्यवसाये पराक्रमे। आत्मभावे पिशाचादौ द्रव्ये सत्तास्वभावयोः। प्राणे बलेऽन्तःकरणे" इति वैजयन्ती॥ अतुलं निरुपमं भुजयोर्बाहोर्बलं शक्तिं पश्यत॥ "बलं शक्तिर्बलं सैन्यम्" इति शाश्वतः॥

अथ त्रिभिरस्य किरातभावं वर्णयति—

इति तानुदारमनुनीय विषमहरिचन्दनालिना।
घर्मजनितपुलकेन लसद्गजमौक्तिकावलियुगेन वक्षसा॥ ४०॥

इतीत्यादि॥ शिव इतीत्थं तान्पुनीनुदारं युक्तियुक्तं यथातथानुनीय शिक्षयित्वा। उक्तेति यावत्। रुचिरः किरातपृतनापतिः संवहत इत्युत्तरेणान्वयः। किरातसेनापतिवेषधारी बभूवेत्यर्थः। कथंभूतः। विषमा विकृतविन्यासा हरिचन्दनस्यालयो रेखा यस्मिंस्तेन। घर्मेण स्वेदेन जनिताः पुलका रोमाञ्चा यस्मिंस्तेन॥ "पुलकः पुनः। रोमाञ्चः कण्टको रोमविकारो रोमहर्षणम्" इति हेमचन्द्रः॥ "घर्मः स्यादातपे ग्रीष्मे उष्णस्वेदाम्भसोरपि" इति विश्वः॥ लसन्तः शोभमाना गजमौक्तिकानां करिकुम्भोद्भवमौक्तिकानामावलय एव गुणाः सूत्राणि यस्मिंस्तेन वक्षसा वक्षःस्थलेनोपलक्षितः॥ करिणां मुक्तायोनित्वे प्रमाणमाहागस्त्यः—"जीमूतकरिमत्स्याहिवंशशङ्खवराहजाः। मुक्तायुद्भवाश्च विज्ञेया अष्टौ मौक्तिकयोनयः" इति॥

वदनेन पुष्पितलतान्तनियमितविलम्बिमौलिना।
बिभ्रदरुणनयनेन रुचं शिखिपिच्छलाञ्छितकपोलभित्तिना॥ ४१॥

वदनेनेति॥ पुष्पितैर्लतान्तैर्विकसितलताग्रैर्नियमिताः संयता विलम्बिनश्च ते मौलयः केशाः यस्य तेन॥ "चूडा किरीटं केशाश्च संयता मौलयस्त्रयः" इत्यमरः॥ शिखिपिच्छलाञ्छिते बर्हिबर्हाङ्किते कपोलभित्ती यस्य तेनारुणनयनेनारक्तनेत्रेण वदनेन रुचं शोभां बिभ्रत्॥

१ तुल्यो:. २ आवलियुतेन.

Digitized by Google

दृढदुद्दहजलदनादि धनुरुपहितैकमार्गणम् ।
मेघनिचय इव संवृते रुचिरः किरातपटतनापतिः शिवः ॥ ४२ ॥

दृढदिति ॥ पुनश्च । जलद इव नदतीति जलदनादि ॥ "कर्तर्युपमाने" इति णिनिः ॥ उपहितैकमार्गणं संहितैकबाणं धनुरुद्वहन् । अतएव मेघनिचय इव स्थित इत्युपमा ॥ अत्र विशेषके स्वभावोक्तिरलंकारः— "स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम्" इति लक्षणात् ॥

अनुकूलमस्य च विचिन्त्य गणपतिभिरात्तविग्रहैः ।
शूलपरशुशरचापभृतैर्महती वनेचरचमूर्विनिर्ममे ॥ ४३ ॥

अनुकूलमिति ॥ अस्य शिवस्यानुकूलं विचिन्त्य प्रियमिति निश्चित्यात्तविग्रहैर्गृहीतविकरातदेहैः । तथा शूलानि परशवः कुठाराः शराश्चापानि च तानि भृतानि यैस्तैः ॥ "भृद्रणार्थेभ्यः परे निष्ठासप्तम्यौ" इति निष्ठायाः परनिपातः ॥ गणपतिभिः प्रमथमुख्यैर्महती वनेचरचमूः सेना विनिर्ममे निर्मिता ॥ "मान् माने" कर्मणि लिट् । "ह्रस्वः" इत्यभ्यासस्य ह्रस्वत्वम् ॥

विरचय्य काननविभागमनुगिरमथेश्वराज्ञया ।
भीमनिनदपिहितोरुभुवः परितोऽपदिश्य मृगयां प्रतस्थिरे ॥ ४४ ॥

विरचय्येति ॥ अथेश्वराज्ञयानुगिरं गिरौ ॥ विभक्त्यर्थेऽव्ययीभावः । "गिरेश्च सेनकस्य" इति समासान्तः ॥ काननविभागं विरचय्य । अस्यायमिति देशविभागं कृत्वेत्यर्थः । भीमैर्निनदैः कलकलैः पिहिता उरवो भुवो यैस्ते तथोक्ताः सन्तः । मृगयामपदिश्य व्याजीकृत्य परितः प्रतस्थिरे प्रस्थिताः ॥

क्षुभिताभिनिःसृतविभिन्नशकुनिमृगयूथनिःस्वनैः ।
पूर्णपृथुवनगुहाविवरः सहसा भयादिव ररास भूधरः ॥ ४५ ॥

क्षुभितेति ॥ क्षुभितास्त्रस्ता अभिनिःसृताः स्वस्थानान्निर्गता विभिन्ना मुक्तसङ्घाश्च ये शकुनयः पक्षिणो मृगाश्च तेषां यूथानि तानि तेषां निःस्वनैः पूर्णानि पूरितानि वनानि गुहाविवराणि च यस्य स भूधरः सहसा भयादिवेत्युत्प्रेक्षा । ररास चुक्रोश ॥ "रस आक्रोशे" लिट् ॥

न विरोधिनी रुषमियाय पथि मृगविहङ्गसंहतिः ।
भ्रान्ति सहजमपि भूरिभियः समुपागताः सपदि वैरमापदः ॥ ४६ ॥

नेति ॥ पथि पलायनमार्गे विरोधिनी जातिवैरिणी मृगाणां सिंहव्याघ्रादीनां विहङ्गानां काकोलूकादीनां च संहतिः सङ्घो रुषं परस्परक्रोधं नेयाय न प्राप । किंतु

Digitized by Google

सहैव चचारेत्यर्थः। तथाहि। भूरि प्रभूता भीर्यासु ताः सर्वं साधारण्येनागता आपदो विपत्तयः सहजमपि वैरं सपदि प्रघ्नन्ति। न हि संपातव्यसनेषु प्रजायते वैरानुबन्ध इति भावः॥

चमरीगणैर्गणबलस्य बलवति भयेऽप्युपस्थिते।
वंशवितति[1]षु विपक्त[2]षट्पुप्रियबालबालधिभिराददे धृतिः॥ ४७॥

चमरीति॥ वंशवितति[3]षु वेणुगुल्मेषु विपक्वा लग्नाः पृथवो भृशं प्रियबालाः प्रियरोमाणो बालधयः पुच्छानि येषां तैः॥ "पुच्छोऽस्त्री लूमलाङ्गूले बालहस्तश्च बालधिः" इत्यमरः॥ चमरीगणैर्मृगविशेषैर्गणबलस्य शिवबलस्य संबन्धिनि। तद्धेतुक इत्यर्थः॥ संबन्धमात्रविवक्षायां षष्ठी। अन्यथा "भीत्रार्थानां भयहेतुः" इति पञ्चमी स्यात्॥ बलवति प्रबले भय उपस्थिते प्राप्तेऽपि धृतिराददे स्वीकृता। बालच्छेदभयात्प्राणहानिमप्यवगणय्य स्थितमित्यर्थः॥

हरसैनिकाः प्रतिभयेऽपि गजमदसुगन्धिकेसरैः।
स्वस्थमभिदधिरे सहसा प्रतिबोधजृम्भितमुखैर्मृगाधिपैः॥ ४८॥

हरेति॥ प्रतिभये भयहेतौ॥ "भयंकरं प्रतिभयम्" इत्यमरः॥ प्राप्तेऽपीति शेषः। गजमदैः सुगन्धयः सुरभयः केसराः सटा येषां तैः। इतानेकगजैरित्यर्थः। सहसा सेनाकलकलश्रवणानन्तरमेव प्रतिबोधेन निद्रापगमेन जृम्भितानि व्याप्तानि मुखानि येषां तैर्मृगाधिपैः सिंहैः स्वस्थं निःशङ्कमेव हरसैनिका अभिदधिरे ईक्षिताः। न तु किंचित्क्षुभितमित्यर्थः। युक्तं चैतद्राजनामधारिणां केसरिणामिति भावः॥

बिभरांबभूवुरपवृत्तजठरशफरीकुलाकुलाः।
पङ्कविषमिततटाः सरितः करिरुग्णचन्दनरसारुणं पयः॥ ४९॥

बिभरामिति॥ अपवृत्तजठरैस्तत्कालक्षुभितानुत्थितोदरैः शफरीकुलैराकुला व्याप्ताः पङ्कैर्विषमितानि दुर्गमीकृतानि तटानि कूलानि यासां ताः सरितः करिभिः। पीड्यमानैरिति शेषः। रुग्णानां मार्गरोधितया भग्नानाम्॥ "ओदितश्च" इति निष्ठानत्वम्॥ चन्दनानां रसैररुणं पयो बिभरांबभूवुः॥ भृधातोः "भीह्रीभृहुवां श्लुवच्च" इत्याम्प्रत्ययः। श्लुवद्भावश्च। "कृञानुभयुज्यते लिटि" इति भूधोऽनुप्रयोगः॥

महिषक्षताग्रुरुतमालनलदसुरभिः सदागतिः।
व्यस्तशुकनिभशिलाकुसुमः प्रणुदन्ववौ वनसदां परिश्रमम्॥ ५०॥

१ विपवलस्य. २ विपक्षभृशम्. ३ वितत.

Digitized by Google

महिषेति ॥ महिषैः क्षतानि विदलितानि तैरगुरुभिस्तमालैर्नलदैरुशीरैश्च सुरभिः । व्यस्तानि विश्लिष्टानि शुकनिभानि शुकसदृशानि शिलाकुसुमानि शैलयास्या ओषधिविशेषा येन सः । अतः शीतल इति भावः ॥ "कालानुसार्यगुरुद्धाश्मपुष्पशीतशिवानि तु । शैलेयम्" इत्यमरः ॥ शुकनिभेति स्वरूपकथनम् । सदागतिर्वायुर्घनसदां वनेचराणां परिश्रमं मृदन् । अतो मन्द इति भावः ॥ "मातरिश्वा सदागतिः" इत्यमरः ॥ ववौ वाति स्म ॥

मथिताम्भसो रयविकीर्णमृदितकदलीगवेधुकाः ।
क्लान्तजलरुहलताः सरसीर्विदधे निदाघ इव सत्त्वसंक्षवः ॥ ५१ ॥

मथिताम्भस इति ॥ सत्त्वसंप्लवः प्राणिसंक्षोभो निदाघो ग्रीष्म इव सरसीः सरांसि ॥ "कासारः सरसी सरः" इत्यमरः ॥ मथिताम्भसः संक्षोभितोदका रयेन पलायनवेगेन विकीर्णं व्याकीर्णं यथा तथा मृदिता निष्पीडिताः कदल्यो गवेधुकास्तृणधान्यविशेषाश्च यासां तास्तथोक्ताः ॥ "तृणधान्यानि नीवाराः स्त्री गवेधुर्गवेधुका" इत्यमरः ॥ मृदित इति "क्तिति च" इति गुणप्रतिषेधः ॥ क्लान्ता जलरुहलता पद्मिन्यो यासु ता एवंभूता विदधे चकार ॥

इति चालयन्नचलसानुवनगहनजानुमापतिः ।
प्राप मुदितहरिणीदशनक्षतवीरुधं वसतिमैन्द्रसूनवीम् ॥ ५२ ॥

इतीति ॥ इतीत्थमुमापतिरचलसानुषु वनेषूपभोग्यद्रुमेषु गहनेषु दावेषु च जातांस्तथोक्तान् । सत्त्वानिति शेषः । चालयन् । मुदितानां हरिणीनां दशनैः क्षता वीरुधो लता यस्यां तामिन्द्रसूनोरिमामैन्द्रसूनवीम् । वसत्यत्रेति वसतिमाश्रमम् ॥ "वहिवस्तिभ्यश्च" इत्यौणादिको वसतेरतिप्रत्ययः ॥ प्राप ॥

स तमाससाद घननीलमभिमुखमुपस्थितं मुनेः ।
पोत्रनिकृषणविभिन्नभुवं दनुजं दधानमथ सौकरं वपुः ॥ ५३ ॥

स इति ॥ अथानन्तरं स शिवो घननीलं मेघमेचकं मुनेरर्जुनस्याभिमुखमुपस्थितमागतं पोत्रस्य मुखाग्रस्य ॥ "मुखाग्रे क्रोडदशयोः पोत्रम्" इत्यमरः ॥ "दशशूकरयोः पुवः" इति ष्ट्रन्प्रत्ययः ॥ निकृषणेनोल्लेखनेन विभिन्ना विदारिता भूर्येन तत् । शूकरस्येदं सौकरं वाराहं वपुर्धानं दनुजमाससाद प्राप । ददर्शेति यावत् ॥

कच्छान्ते सुरसरितो निधाय सेनामन्वीतः स कतिपयैः किरातवर्यैः ।
प्रच्छन्नस्तरुगहनैः सशुल्मजालैर्लक्ष्मीवाननुपदमस्य संप्रतस्थे ॥ ५४ ॥

१ अभिलीकरम्.

Digitized by Google

कच्छान्त इति ॥ लक्ष्मीवान् ॥ "मादुपधायाश्च मतोर्वोऽयवादिभ्यः" इति मतुपो मकारस्य वकारादेशः ॥ स शिवः। सुरसरितः कच्छान्तेऽनूपप्रान्ते ॥ "जलमाप्यमनूपं स्यात्पुंसि कच्छस्तथाविधः" इत्यमरः ॥ सेनां निधाय। स्थापयित्वेत्यर्थः। कतिपयैः किरातवर्यैरन्वीतोऽनुगतः सन् ॥ "ईगतौ" इति धातोरनुपूर्वात्कर्मणि क्तः ॥ सगुल्मजालैर्लतामण्डपसहितैस्तरुगहनैः प्रच्छन्नच्छादितः ॥ "वा दान्तशान्त–" इत्यादिना निपातः ॥ अस्य वराहस्य पदमन्वनुपदम्। पदानुसारेणेत्यर्थः। संप्रतस्थे प्रस्थितः ॥ "समवप्रविभ्यः स्थः" इत्यात्मनेपदम् ॥ अर्हपणीद्वत्तम् ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथसमाख्यया व्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये ईश्वराभिगमनो नाम द्वादशः सर्गः।

त्रयोदशः सर्गः।

वपुषा परमेण भूधराणामथ संभाव्यपराक्रमं विभेदे।
मृगमाशु विलोकयांचकार स्थिरदंष्ट्राग्रमुखं महेन्द्रसूनुः ॥ १ ॥

वपुषेति ॥ अथेश्वरप्रस्थानानन्तरं महेन्द्रसूनुरर्जुनः परमेण महता वपुषा हेतुना भूधराणां विभेदे विदारणे संभाव्यपराक्रमं क्षमोऽयमिति मतकर्यपौरुषं स्थिराभ्यां दृढाभ्यां दंष्ट्राभ्यामग्रं मुखं यस्य तं मृगम्। वराहमित्यर्थः। आशु तदागमनानन्तरम्। अविलम्बेनेत्यर्थः। विलोकयांचकार ददर्श ॥ अस्मिन्सर्गे प्रायेणर्भिण्यच्छ्लोकादीपच्चन्दसिकं वृत्तम् ॥

स्फुटबद्धसटोन्नतिः स दूरादभिधावन्नवधीरितान्यकृत्यः।
जयमिच्छति तस्य जातशङ्के मनसीमं मुहुरादधे वितर्कम् ॥ २ ॥

स्फुटेति ॥ स्फुटा स्पष्टा बद्धा विरचिता सटानां केसराणामुन्नतिरुद्धतिर्यस्य सः। क्रोधाद्धर्षितलोमेत्यर्थः ॥ "सटा जटाकेसरयोः" इत्यमरः ॥ दूरादभिधावन्। तथावधीरितान्यकृत्योऽनन्यकर्मा स वराहो जयमिच्छति जयार्थिन्यतएव जातशङ्के। स्वयं जिघांसोर्द्विषामेकलक्ष्यत्वादिति भावः। तस्य सुतेर्मनसि मुहुरिमं वितर्कं वक्ष्यमाणमूहम् ॥ "अभ्याहारस्तर्क ऊहः" इत्यमरः ॥ आदधे उत्पादयामास ॥

१ विलोकयांबभूव.

Digitized by Google

अथैकादशभिर्वितर्कमेव निरूपयति—

घनपोत्रविदीर्णशालमूलो निबिडस्कन्धनिकारुरुग्णवप्रः ।
अयमेकचरोऽभिवर्तते मां समरायेव समाजुहूषमाणः ॥ ३ ॥

घनपोत्रेति ॥ घनेन कठिनेन पोत्रेण शूकाग्रेण विदीर्णानि विदलितानि शाल-मूलानि वृक्षप्ररोहा येन सः ॥ "मूलं प्ररोहोऽङ्कुरनामकः" इत्यमरः ॥ निबिडस्य स्कन्धस्य निकारुणा निकरुजेन रुग्णवप्रो भग्नसानुः । अतो महासत्त्वसंपन्न इति भावः । एकश्चासौ चरश्चेत्येकचर एकाकी । यूथादपेत इत्यर्थः । अतोऽयं वराहः समराय समरं कर्तुम् ॥ "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी ॥ समाजुहूषमाण इव समाहातुमिच्छन्निव ॥ इवशब्दः संभावनायाम् ॥ समाहृयतेः सञ्जन्ताच्छानच्प्रत्ययः । "स्पर्धायामाङः" । "पूर्ववत्सनः" इत्यात्मनेपदम् । "अभ्य-मस्य च" इति संप्रसारणम् ॥ मामभिवर्तते मामभिधावति ॥ उपसर्गवशात्सकर्म-कत्वम् ॥ अतः सर्वथा मामुपेक्ष्य इति भावः ॥

इह वीतभयास्तपोऽनुभावाज्जहति व्यालमृगाः परेषु वृत्तिम् ।
मयि तां सुतरामयं विधत्ते विकृतिः किं नु भवेदियं नु माया ॥ ४ ॥

इहेति ॥ इहाश्रमे तपोऽनुभावाद्वीतभयाः । सञ्जनया विगतवैरा इत्यर्थः । अतएव व्यालमृगाः क्रूरव्याघ्रादयः ॥ "व्यालो श्वापदे क्रूरे श्वापदे दुष्टदन्तिनि" इति विश्वः ॥ परेषु माध्यस्थ्यरेषु हरिषु जीविकां जहति । हिंसया न जीवन्तीत्यर्थः । अयं वराहो मयि मद्विषये तां हरिषु सुतरां विधत्ते । निर्यासतीत्यर्थः । तदियं विकृति-रूपःसामर्थ्यभङ्गरूपा भवेत्किं नु । यद्वा । माया कस्यचिद्दैत्यस्य वराहभूमिका भवेन्नु ॥ किंनुशब्दो वितर्के ॥

अथवैष कृतज्ञयेव पूर्वं भृशमासेवितया रुषा न मुक्तः ।
अवधूय विरोधिनीः किमारान्मृगजातीरभियाति मां जवेन ॥ ५ ॥

अथवेति ॥ अथवेति पक्षान्तरे । एष मृगः पूर्वं जन्मान्तरे भृशमत्यर्थमासेवितया-तिपरिचितया रुषा क्रुधा । महोदरयेति शेषः । कृतज्ञयेव पूर्वकृतं वैरानुबन्धं सं-प्रति जातमित्येवंरूपज्ञया । न मुक्तो न त्यक्तः । अद्यापीति शेषः । नूनमयं जन्म-शतवैरानुबन्धी कश्चित् । संप्रति वैरबीजासंभवादिति भावः । कुतः । यतः आरा-त्समीपतः ॥ "आराद्दूरसमीपयोः" इत्यमरः ॥ विरोधिनीर्मृगजातीरवधूय त्यक्त्वा जवेन मामभियात्यभिधावति । अन्यथा मामियात्यादिति भावः ॥

१ विरोधि. २ अवो.

Digitized by Google

न केवलमभियानमेव। किं च मनोऽत्रविरम्यत्र प्रमाणमित्याह—

न मृगः खलु कोऽप्ययं जिघांसुः स्खलति ह्यत्र तथा भृशं मनो मे।
विमलं कलुषीभवच्च चेतः कथयत्येव हितैषिणं रिपुं वा ॥ ६ ॥

न मृग इति ॥ अयं मृगो न खलु किंतु कोऽपि कश्चिदन्य एव जिघांसुर्हन्तुमिच्छुः ॥ हन्तेः सन्नन्तादुप्रत्ययः। "अभ्यासाच्च" इति कुत्वम्। "अज्झनगमां सनि" इति दीर्घः ॥ कुतः। हि यस्मात्। अत्रास्मिन्मृगविषये मे मनस्तथा भृशं स्खलति क्षुभ्यति। यथायं जिघांसुरिति बुद्धिरुत्पद्यत इत्यर्थः। तथा हि। विमलं मनस्तथा कलुषीभवत्क्षुभ्यच्च चेत एव हितैषिणं रिपुं वा मित्रममित्रं च कथयति। यत्र यत्र मनः प्रसीदति तदेव मित्रम्। अन्यथा त्वन्यथेति निश्चितमित्यर्थः। अतोऽयं वध्य इति भावः ॥

ननु मुनेः किमनया दुःशङ्कया। तत्राह—

मुनिरस्मि निरागसः कुतो मे भयमित्येष न भूतयेऽभिमानः।
परवृद्धिषु बद्धमत्सराणां किमिव ह्यस्ति दुरात्मनामलङ्घ्यम् ॥ ७ ॥

मुनिरिति॥ मुनिरस्मि। अतो निरागसो निरपराधस्य मे कुतो भयमित्येषोऽभिमानोऽहंकारः ॥ "गर्वोऽभिमानोऽहंकारः" इत्यमरः ॥ अनपकारिणं मां कोऽपि किं करिष्यतीति बुद्धिर्भूतये श्रेयसे न भवति। तथा हि। परवृद्धिषु विषये बद्धमत्सराणां दुरात्मनामलङ्घ्यं किमिवास्ति। न किंचिदकार्यमस्तीत्यर्थः ॥ इवशब्दो वाक्यालंकारे॥

अस्तु। जिघांसुरपि क्षुद्रः किं करिष्यतीत्यत्राह—

दनुजः स्विदयं क्षपाचरो वा वनजे नेति बलं बतास्ति सत्त्वे।
अभिभूय तथा हि मेघनीलः सकलं कम्पयतीव शैलराजम् ॥ ८ ॥

दनुज इति ॥ अयं दनुजः स्विदानवो वा क्षपाचरो राक्षसो वा। न तु मृग एवेत्यर्थः। कुतः। वनजे सत्त्वे वन्यप्राणिनीतीदृशं बलं नास्ति। बतेत्याश्चर्ये ॥ बलमेव समर्थयते। तथा हि मेघनीलोऽयं वराहः सकलं शैलराजमभिभूयाक्रम्य कम्पयतीव। पदविक्षेपभरात्तथा प्रतीयत इत्यर्थः ॥ अत्र कम्पयतीवेत्युत्प्रेक्षागर्भोऽयं शैलकम्पनरूपकार्येण तत्कारणबलातिरेकसमर्थनात्कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासः ॥

किं च। योऽयं शैले मृगयाकलकल इव श्रूयते सोऽप्येतन्मायापरिकल्पित एवेत्याह—

अयमेव मृगव्यसत्रकामः प्रहरिष्यन्मयि मायया शमस्थे।
पृथुभिर्भ्वजिनीरवैरकार्षीच्चकितोद्भ्रान्तमृगाणि काननानि ॥ ९ ॥

१ तथापि च.

Digitized by Google

अथमिति ॥ अथमेव शमस्थे शान्तिनिविष्टे मयि ॥ अधिकरणविवक्षायां सप्तमी ॥ मायया मह्यरिष्यन् । मह्यदुमिच्छन्नित्यर्थः ॥ "लृट् शेषे च" इति चकारात्क्रियायायां क्रियायां लृट् । "लृटः सद्वा" इति शत्रादेशः ॥ मृगय्यं मृगया तस्य सर्वं वनम् । तदर्थं वनमित्यर्थः । तत्कामयत इति मृगय्यसत्रकामः । मृगयाभूमिपरिग्रहार्थी सन्नित्यर्थः ॥ "कर्मण्यण्" ॥ "आच्छोदनं मृगय्यं स्यादाखेटो मृगया स्त्रियाम्" इति । "सत्रमाच्छादने यज्ञे सदा दाने वनेऽपि च" इति यादवः ॥ पृथुभिर्बृंहद्भिर्भञ्जिभीरवैः सेनाकलकलैः । स्वमायया कल्पितैरेवेत्यर्थः । काननानि चकितोद्भ्रान्तास्त्रस्तपलायिता मृगा येषु तान्यकार्षीदकरोत् । अथ रन्ध्रान्वेषी मत्प्रहारार्थं स्वयमेव मृगयुर्भूत्वा वनावरोधाय सेनायोपं कल्पयामास । स मृगरूपेणागच्छतीत्यर्थः ॥

वितर्कान्तरमाह—

बहुशः कृतसत्कृतेर्विधातुं प्रियमिच्छन्नथवा सुयोधनस्य ।
क्षुभितं वनगोचराभियोगाद्गणमाशिश्रियदाकुलं तिरश्राम् ॥१०॥

बहुश इति ॥ अथवा बहुशः कृता सत्कृतिः सत्कारो येन तस्य सुयोधनस्य प्रियं महत्करं विधातुं कर्तुमिच्छन् । यः कश्चिदिति शेषः । वनं गोचरं स्थानं येषां तेषां वनगोचराणामभियोगादवरोधात्क्षुभितमुद्विग्नमाकुलं तिरश्चां गणमाशिश्रियद्राद्धरूपेण प्राविशत् ॥ "णिश्रिद्रुस्रुभ्यः कर्तरि चङ्" । "चङि" इति द्विर्भावः ॥

वितर्कान्तरमाह—

अवलीढसनाभिरग्रसेनः प्रसभं खाण्डवजातवेदसा वा ।
प्रतिकर्तुमुपागतः समन्युः कृतमन्युर्यदि वा वृकोदरेण ॥ ११ ॥

अवलीढेति ॥ खाण्डवजातवेदसा खाण्डववनाग्निना प्रसभमवलीढसनाभिर्दग्धबन्धुः ॥ "सपिण्डास्तु सनाभयः । सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः" इत्यमरः ॥ अतएव समन्युर्वैरैः । तस्यार्जुनस्यापकारयितृत्वादिति भावः । अग्रसेनस्तत्रकुमः कश्चिन्महासर्पः प्रतिकर्तुं वैरनिर्यातनार्थमुपागतः । वराहमाययेति शेषः ॥ पक्षान्तरमाह—यदि वा वृकोदरेण भीमसेनेन कृतमन्युर्जनितक्रोधो वा । कश्चिदिति शेषः ॥ पुरा किल पाण्डवः खाण्डवदाहे पावकभयात्पलायमानांस्तत्रकुमान्बन्धुसेनस्य बन्धून्बाणैरवधीत्य दाहयामासेति भारतकथानुसंधेयेति ॥

अथ द्वाभ्यामनन्तरकरणीयमध्यवस्यति—

बलशालितया यथा तथा वा धियमुच्छेदपरामयं दधानः ।
नियमेन मया निबर्हणीयः परमं लाभमरातिभङ्गमाहुः ॥ १२ ॥

१ बहुशः. २ बलैः.

Digitized by Google

बलेत्यादिना ॥ किंबहुना। यथा तथा वास्तु। अयं मायिकः पारमार्थिको वास्तित्यर्थः। बलशालितया। बलस्यतयेत्यर्थः। उच्छेदपरां श्रियं दधानः। मां जिघांसुरित्यर्थः। अयं मृगो नियमेनावश्यं मया निर्वर्तनीयो वध्यः ॥ "प्रमापणं निर्वर्तनम्" इत्यमरः ॥ तथा हि। अरातिभङ्गे शत्रुक्षयं परमं लाभमाहुः ॥

ननु तपोविरोधिनी हिंसेत्याशङ्क्याह—

कुरु तात तपांसमार्गदायी विजयायेत्यलमन्वशान्मुनिर्माम्।
बलिनश्च वधादृतेऽस्य शक्यं व्रतसंरक्षणमन्यथा न कर्तुम् ॥ १३ ॥

कुरुविति ॥ हे तात वत्स। मार्गदायी न भवतीत्यमार्गदायी। रन्ध्रान्वेषिणां प्रवेशमयच्छन्निवर्त्यर्थः। कुतः। जयार्थित्वादित्याह—विजयाय तपांसि कुरुविति मुनिर्व्यासो मामलं भृशमन्वशादनुशिष्टवान् ॥ अनुशासेर्लङ् ॥ ननु मुनिर्वा कथमधर्ममन्वशात्तत्राह—बलिन इति ॥ अस्य मृगस्य बलिनः प्रबलस्य वधादृते वधं विना ॥ "अन्यारादितरर्ते—" इत्यादिना पञ्चमी ॥ अन्ययोपायान्तरेण व्रतसंरक्षणं तपोरक्षणं कर्तुं न शक्यम्। हिंसापि दुष्टनिग्रहात्मिका नाधर्म इत्यर्थः ॥

इति तेन विचिन्त्य चापनाम प्रथमं पौरुषचिह्नमाललम्बे।
उपलब्धगुणः परस्य भेदे सचिवः शुद्ध इवाददे च बाणः ॥ १४ ॥

इतीति ॥ तेनार्जुनेनेतीत्थं विचिन्त्य वितर्क्य चापनाम चापाख्यं प्रथमं पौरुषचिह्नम्। तस्य मुख्यायुधत्वादिति भावः। आललम्बे गृहीतम् ॥ कर्मणि लिट् ॥ अथ परस्य शत्रोर्भेदे विदारण उपलब्धगुणो ज्ञातशक्तिः। बाणस्तु प्राप्तमौर्वीकेति शेषः। शुद्धो ऋजुर्दिग्धत्वादिदोषरहितो वा। "न कर्णभेदैर्नो दिग्धैर्नाग्निज्वलिततेजसैः" इति निषेधात्। अन्यत्र शुद्धो निर्मलचित्त इति यावत्। बाणश्च सचिव इवाददे ॥ अत्र बाणसचिवयोः शब्दमात्रसाधर्म्यात्क्लृप्तोपालंकारः प्रकृतविषय इति सर्वस्वकारः। उपमेवेति केचित् ॥

अनुभाववता गुरु स्थिरत्वादविसंवादि धनुर्धनंजयेन।
स्वबलव्यसनेऽपि पीड्यमानं गुणवन्मित्रमिवानतिं प्रपेदे ॥ १५ ॥

अनुभावेति ॥ गुरु महत्पूज्यं च स्थिरत्वात्सारत्वादविसंवाद्यभङ्गुरम्। अन्यत्र प्रतिष्ठितत्वादसत्यरहितम्। गुणवत्सज्यम्। अन्यत्रौदार्यादिगुणवत्। धनुर्मित्रमिवानुभाववता निश्चयबुद्धिमता ॥ "अनुभावः प्रभावे च सतां च मतिनिश्चये" इत्यमरः ॥ धनंजयेन स्वबलव्यसनेऽपि तपसा क्षीणबलेऽपि। अन्यत्र स्वं धनं तदेव बलं तस्य ह्रासेऽपि। पीड्यमानमाकृष्यमाणमवरुध्यमानं च सन्मित्रमिवानतिं नम्रतामानुकूल्यं च प्रपेदे ॥ अलंकारस्तु पूर्ववत् ॥

Digitized by Google

प्रविकर्षनिनादभिन्नरन्ध्रः पदविष्टम्भनिपीडितस्तदानीम् ।
अधिरोहति गाण्डिवं महेषौ सकलः संशयमारुरोह शैलः ॥ १६ ॥

प्रविकर्षेति ॥ तदानीं तस्मिन्काले महेषौ गाण्डिवमर्जुनधनुरधिरोहति सति ॥ "कपिध्वजस्त्र गाण्डीवगाण्डिवौ पुंनपुंसकौ" इत्यमरः ॥ "गाण्डीवधनुगास्संज्ञायाम्" इति वप्रत्ययः ॥ प्रविकर्षेण ज्याविकर्षेण यो निनादस्तेन भिन्नरन्ध्रो विदलितगह्वरः । तथा पदविष्टम्भेन पादाक्रमणेन निपीडितो नुन्नः सकलः समूलः शैलः संशयं जीवितसंदेहं चारुरोह । प्रापेत्यर्थः ॥ अत्र शैलस्य संशयासंबन्धेऽपि संबन्धकथनादतिशयोक्तिरलंकारः ॥

दृढशोऽथ सविस्मयं शिवेन स्थिरपूर्णायतचापमण्डलस्थः ।
रचितस्तिमितृणां पुरां विधातुं वधमात्मेव भयानकः परेषाम् ॥ १७ ॥

दृढश इति ॥ अथ बाणसंधानानन्तरं शिवेन स्थिरं निश्चलं पूर्णं च यथा तथायत आकृष्टे चापमण्डले तिष्ठतीति तथोक्तः । चापमण्डलमभ्यर्थाय स्थित इत्यर्थः । तिमितृणाम् ॥ "न तिमितृतृह" इति दीर्घप्रतिषेधः ॥ पुरां वधं संहारं विधातुं कर्तुं रचितः कल्पितः । स्थानविशेषे स्थापित इति यावत् । आत्मा स्वयमेव परेषां भयानको भयंकरः सोऽर्जुनः सविस्मयं स्वयं दृष्टो दृष्टः ॥ उपमालंकारः ॥

अथ पिनाकिहस्तान्तमाह—

विचकर्ष च संहितेषुरुच्चैश्चरणास्कन्दननामिताचलेन्द्रः ।
धनुरायतभोगवासुकिज्यावदनग्रन्थिविमुक्तवह्नि शंभुः ॥ १८ ॥

विचकर्षेति ॥ अथ शंभुश्च संहितेषुः सन् । उच्चैर्भृशं चरणास्कन्दनेन पदविष्टम्भेन नामितोऽधो नीतोऽचलेन्द्रो येन स तथोक्तः । आयतभोग आकृष्टकायो वासुकिरेव ज्या तस्य वदनमेव ग्रन्थिस्तेन विमुक्तं उत्सृष्टो वह्निर्यस्य तद्धनुर्विचकर्षेति स्वभावोक्तिः ॥

स भवस्य भवक्षयैकहेतोः सितसप्तेश्च विभासतोः सहार्थम् ।
रिपुरापपराभवाय मध्यं प्रकृतिप्रत्यययोरिवानुबन्धः ॥ १९ ॥

स इति ॥ सह संयुगार्थमरिषड्रूपमयोजनं विभासतोः करिष्यतोः । अन्यत्र सहार्थमभिषेवमभिभासतोरित्यर्थः ॥ "प्रकृतिप्रत्ययौ सहार्थे भूतः" इति वचनात् ॥ भवक्षयैकहेतोः संसारोच्छेदनिदानस्य भवस्य शिवस्य सितसप्तेरर्जुनस्य च मध्यं रिपुरित्याहः । यस्मात्प्रत्ययो विधीयते सा प्रकृतिर्धात्वादिः । प्रत्ययः सनादिः । तयोर्म-

१ च. २ भयंकरः. ३ आयत.

ष्यमनुबन्ध इत्संज्ञको वर्णः। यथा भूतं भूतिरित्यादौ ककारः। स इव पराभवाय लोपार्थमेवाप। न तु स्थित्यर्थमित्यर्थः॥

अथ दीपितवारिवाहवर्त्मा रवविन्नासितवारणादवार्यः।
निपपात जवादिषुः पिनाकान्महतोऽभ्रादिव वैद्युतः कृशानुः॥२०॥

अथेति॥ अथ रिपोर्मध्यमवेक्षानन्तरं दीपितं शरिवाहवर्त्माकाशं येन सः। अवार्यो दुर्वार इषुः शरो रवविन्नासितवारणात्स्वघोषभीषितगजात्पिनाकाच्छिवधनुषः॥ "पिनाकोऽजगवं धनुः" इत्यमरः॥ महतोऽभ्रान्मेघाद्विद्युतोऽयं वैद्युतः कृशानुरग्निरिव जवाद्वेगान्निपपातादधाव॥

व्रजतोऽस्य वृहत्पतत्रजन्मा कृतताक्ष्योपनिपातवेगशङ्कः।
प्रतिनादमहान्महोरगाणां हृदयश्रोत्रभिदुत्पपात नादः॥ २१॥

व्रजत इति॥ व्रजतो धावतोऽस्य बाणस्य वृहद्भ्यः पतत्रेभ्यः पक्षेभ्यो जन्म यस्य स तथोक्तः। कृता ताक्ष्योपनिपातवेगशङ्का गरुडागमभ्रमो येन सः। अतएव महोरगाणां हृदयानि श्रोत्राणि च भिनत्तीति हृदयश्रोत्रभित्॥ "समुद्राभ्राद्रः" इति सूत्रे पूर्वनिपातव्यभिचाराच्छ्रोत्रशब्दस्य पूर्वनिपातव्यभिचारः॥ प्रतिनादैः प्रतिध्वनिभिर्महान्संमूर्च्छितो नाद उत्पपातोत्थितः॥ अत्र नादस्योरगहृदयभेदकत्वासंबन्धेऽपि संबन्धाभिधानादतिशयोक्तिः। सा च ताक्ष्यवेगभ्रमोत्थापितेति तयोरङ्गाङ्गिभावेन संकरः॥

नयनादिव शूलिनः प्रवृत्तैर्मनसोऽप्याशुतरं यतः पिशङ्गैः।
विदधे विलसत्तडिल्लताभैः किरणैर्व्योमनि मार्गणस्य मार्गः॥ २२॥

नयनादिति॥ शूलिनो नयनात्प्रवृत्तैर्निर्गतैरिवेत्युत्प्रेक्षा। नेत्राग्निशिखाकल्पैरित्यर्थः। पिशङ्गैर्विलसत्तडिल्लताभैर्विद्युदाभतुल्यैरित्युपमा। मनसश्चित्तादप्याशुतरं शीघ्रतरम्॥ आशुशब्दादप्ययाचरप्। अतः "किमेत्तिङव्यय-" इत्यादिनाम्प्रत्ययो न॥ "क्लीबे शीघ्राद्यसत्त्वे स्यात्" इत्यमरः॥ यतो गच्छतः॥ इणः शतुमत्ययः॥ मार्गणस्य शरस्य॥ "कलम्बमार्गणशराः" इत्यमरः॥ किरणैर्व्योमन्याकाशे मार्ग उत्कारेखाकारः पन्था विदधे विरचित इति स्वभावोक्तिरलंकारः॥

अपयन्धनुषः शिवान्तिकस्थैर्विवरेसन्निरभिख्यया जिहानः।
युगपद्ददृशे विशन्वराहं तदुपोढैश्च नभश्चरैः पृषत्कः॥ २३॥

अपयन्निति॥ पृषत्को बाणः॥ "पृषत्कबाणविशिखाः" इत्यमरः॥ धनुषः पिनाकादपयन्निर्यन्। निर्गच्छन्निति यावत्॥ इणः शतुमत्ययः॥ शिवान्तिकस्थैर्नभ-

Digitized by Google

शरैरभिख्यया शोभया जिहानः। शोभां गच्छन्निस्यर्थः ॥"ओहाङ् गतौ" इति धातोः शानच् ॥ "अभिख्या नामशोभयोः" इत्यमरः ॥ विवरे सीदन्तीति विवरेसदस्तैर्विवरेसद्भिरन्तराळवर्तिभिर्नभश्चरैः ॥ "सत्सूद्विष–" इत्यादिना क्विप्। "तत्पुरुषे कृति बहुलम्" इत्यलुक् ॥ अथ वराहं विशन्भविशंस्तदुपोद्दैस्तं वराहमुपोद्दैः मत्या-सद्भिः ॥ वहेः कर्तरि क्तः ॥ नभश्चरैर्युगपदहये दृष्ट इति बाणवेगोक्तिः ॥ अत्र पिनाकनिष्क्रमणादिक्रियाविशिष्टस्य बाणस्य शिवान्तिकादिभिन्नदेशस्थनभश्चर-कर्तृकदर्शनयौगपद्यासंबन्धेऽपि तत्संबन्धोक्तिमूलातिशयोक्त्या लोकोत्तरवेगम-हीतेरलंकारेण वस्तुध्वनिः ॥

स तमालनिभे रिपौ सुराणां घननीहार इवाविषक्तवेगः।
भयविद्रुतमीक्षितो नभस्थैर्जगतीं ग्राह इवापगां जगाहे ॥ २४ ॥

स इति ॥ स बाणस्तमालनिभे तमालसमे। नीलाभ इति यावत्। सुराणां रिपौ वराहे घननीहारे सान्द्रतुहिन इवाविषक्तवेगोऽप्रतिबद्धवेगः सन्। तथा नभस्थैः खेचरैर्भयेन विद्रुतं विद्रवं यथा तथेक्षितः सन् ॥ अपां संबन्धि वेग आपः। अपां समूहो वापस्। आपेन गच्छतीत्यापगा नदी तास्। गृह्णातीति ग्राहो जलग्रहः। "जलचरे" इति वक्तव्यादिभावपक्षे ग्रह इति नमस्यथः ॥ स इव। जगतीं भूमिम्। "जगती विष्टपे भूम्याम्" इति वैजयन्ती ॥ जगाहे विवेश। अन्तर्दित इत्यर्थः ॥

अथार्जुनबाणमयोगमाह—

सपदि प्रियरूपपर्वरेखः सितलोहाग्रनखः खमाससाद।
कृपितान्तकतर्जनाकुलिश्रीर्व्यथयन्प्राणभृतः कपिध्वजेषुः ॥ २५ ॥

सपदीति ॥ सपदि शिववाणपाततसमय एव भिया कृपमाकृतिः पर्वाणि ग्रन्थयो रेखा रचनाश्च यस्य सः। अङ्गुलिपक्षे पर्वरेखाः प्रसिद्धाः। लोहाग्रमयःफलं तच्च-क्षमिवेत्युपमितसमासः। सितं लोहाग्रनखं यस्य सः। कृपितस्यान्तकस्य यद्वोर्या त-र्जनी तस्या अङ्गुलिस्तर्जनाङ्गुलिस्तर्जनी तस्याः श्रीरिव श्रीर्यस्य स कपिध्वजेषुरर्जुन-बाणः प्राणभृतो व्यथयन्भीषयमाणः खमाकाशमाससाद प्राप ॥ उपमालंकारः ॥

परमाक्षपरिग्रहोरुतेजः स्फुरदुल्काकृति विक्षिपन्वनेषु।
स जवेन पतन्परःशतानां पततां-ग्रात इवारवं वितेने ॥ २६ ॥

परमेति ॥ परमाक्षपरिग्रहेण शिव्याक्षाधिष्ठानेनोद्यद्यत्पद स्फुरदुल्काकृतिः। उल्कावदीर्घाधमाणमित्यर्थः। तेजो वनेषु विक्षिपन्विकिरन्सन्। जवेन पत-न्बाणः। ततस्तत्परे परःशतास्तेषाम्। शताधिकसंख्यकानामित्यर्थः ॥ "परः-

१ वनस्थैः. २ मृगः.

Digitized by Google

शतायास्ते वेषां परा संख्या शतादिकात्" इत्यमरः ॥"पञ्चमी–" इति योगविभागात्समासः। "राजदन्तादिषु परम्" इत्युपसर्जनस्य शतशब्दस्य परनिपातः। पारस्करादित्वात्सुडागमः ॥ पततां पतत्रिणाम् ॥ "पतत्पत्ररथाण्डजाः" इत्यमरः ॥ शातः समूह इवारवं वितेने ॥

अविभावितनिष्क्रमप्रयाणः शमितायाम इवातिरंहसा सः।
सह पूर्वतरं नु चित्तवृत्तेरपतित्वा नु चकार लक्ष्यभेदम् ॥ २७ ॥

अविभावितेति ॥ अतिरंहसातिवेगेनाविभावितेऽलक्षिते निष्क्रमो गाण्डीवान्निःसरणं प्रयाणमन्तरागमनं च यस्य सः। तथा शमितायामः संक्षिप्तदैर्घ्य इव स्थित इत्युपमा ॥ अत्र वेगगुणनिमित्ता दैर्घ्यगुणाभावोत्प्रेक्षा ॥ स शरः। सह नु सह वा। चित्तहृत्येति शेषः। चित्तहृत्तेः पूर्वतरं नु प्रागेव वा। उभयत्रापि लक्ष्ये। पतित्वेति शेषः। अथवापतित्वा नु। लक्ष्य इति शेषः। लक्ष्यभेदं चकार ॥ अत्रोपाचवेगगुणनिमित्ताद्भाणस्य चित्तहृत्या सहपातपूर्वपातपतनाभावोत्प्रेक्षालिप्सः। "उत्तरोत्तरोत्कर्षेण वेगातिशयव्यञ्जिका" इत्यलंकारेण वस्तुध्वनिः ॥

स वृषध्वजसायकावभिन्नं जयहेतुः प्रतिकायमेषणीयम्।
लघु साधयितुं शरः प्रसेहे विधिनेवार्थमुदीरितं प्रयत्नः ॥ २८ ॥

स इति ॥ जयहेतुः स शरो वृषध्वजसायकाभिन्नं शिवशरविद्धमेषणीयम्। वेदुमिति शेषः ॥ इषेरिच्छार्थादनीयप्रत्ययः ॥ प्रतिकायम्। प्रतिपक्षमिति यावत्। विधिना दैवेनोदीरितं फलसाधनतया प्रतिपादितमर्थं योगादिकं प्रयत्नः पुरुषव्यापार इव। लघ्वक्लेशेन यथा तथा साधयितुम् ॥ स्वार्थणिजन्तानुसुन् ॥ प्रसेहे प्रचक्रे ॥ उपमालंकारः ॥

अविवेकवृथाश्रमाविवार्थं क्षयलोभाविव संश्रितानुरागम्।
विजिगीषुमिवानयप्रमादावसादं विशिखौ विनिन्यतुस्तम् ॥ २९ ॥

अविवेकेति ॥ अविवेकोऽन्तरानभिज्ञत्वं वृथाश्रमो निष्फलप्रयासस्तावर्थौ धनमिव। अस्थानविनियोगहेतुकत्वादनयौ दुर्नयौ। अनयोरुपचयो लोभोऽदातृत्वं तौ संश्रितानामनुजीविनामनुरागमिव। अकिंचित्करे स्वामिन्यनुरागस्यानवस्थानादिति भावः। अनयो दुर्नीतिः प्रमादोऽनवधानता तौ विजिगीषुमिव। रन्ध्रभूयिष्ठस्य जयासिद्धेरिति भावः। विशिखौ शिवार्जुनबाणौ तं वराहमवसादं करणशैथिल्यं विनिन्यतुर्नीतवन्तौ ॥ नयतिर्द्विकर्मकः ॥ मालोपमेयम् ॥

Digitized by Google

अथ दीर्घतरं तमः प्रवेक्ष्यन्सहसा रुग्णरयः स संभ्रमेण।
निपतन्तमिवोष्णरश्मिमूर्ध्वी वलयीभूततरुं धरां च मेने॥ २०॥

अथेति॥ अथ स वराहो दीर्घतरं तमो दीर्घनिद्रां प्रवेक्ष्यन्। मरिष्यन्नित्यर्थः। सहसा झटिति रुग्णरयो भग्नवेगः संभ्रमेण भ्रान्त्या॥ "संभ्रमो भ्रान्तिहार्ययोः" इति विश्वः॥ उष्णरश्मिमूर्ध्वी निपतन्तमिव मेने। धरां च वलयीभूता मण्डलीभूतारण्यरुहो यस्यास्तां तथा मेने। तथा च भ्रान्तेरलंकारः॥

स गतः क्षितिमुष्णशोणितार्द्रः क्षुरदंष्ट्राग्रनिपातदारिताश्मा।
असुभिः क्षणमीक्षितेन्द्रसूनुर्विहितामर्षगुरुध्वनिर्निरासे॥ २१॥

स इति॥ क्षितिं गतः क्षितौ पतित उष्णेन मरणप्रत्यग्रत्वाच्छोणितेनार्द्रः क्षुतः क्षुराणां दंष्ट्रयोश्चाग्राणां निपातेनाघातेन दारिताश्मा पाटितपाषाणो येन सः। किं च। क्षणमीक्षितेन्द्रसूनुः। स्वार्थविघातरोषादिति भावः। अतएव विहितः कृतोऽमर्षगुरुः क्रोधोद्भवो ध्वनिः क्रन्दितं येन स तथोक्तः स वराहोऽसुभिः प्राणैर्निरासे निरासितः। त्यक्त इत्यर्थः॥ असतेः कर्मणि लिट्॥ इयं च स्वभावोक्तिः॥

स्फुटपौरुषमापपात पार्श्वस्तमथ प्राज्यशरः शरं जिघृक्षुः।
न तथा कृतवेदिनां करिष्यन्प्रियतामेति यथा कृतावदानः॥ २२॥

स्फुटेति॥ अथ वराहपातानन्तरं पार्श्वः प्राज्यशरः प्रभूतशरः। सज्जपीत्यर्थः॥ "प्रभूतं प्रचुरं प्राज्यम्" इत्यमरः॥ स्फुटपौरुषं व्यक्तविक्रमं वराहमेदिनं शरं जिघृक्षुर्ग्रहीतुमिच्छुः॥ ग्रहेः सज्जनात्तुमत्ययः॥ आपपातापाधावति स्म। कृतज्ञतया शरग्रहणम्। न तु लोभादित्यर्थः। नन्वन्येऽप्युपकर्तार एव। किमत्रादरस्तत्राह— कृतवेदिनां कृतज्ञानां कृतावदानः कृतकर्मा॥ "अवदानं कर्म हुतम्" इत्यमरः॥ तथा म्रियतामेति तथा करिष्यमुपकरिष्यन्न म्रियतामेति। कृतकरिष्यमाणयोः कृतं वलीय इति भावः॥

अथ युग्मेनाह—

उपकार इवासति प्रयुक्तः स्थितिमप्राप्य मृगे गतः प्रणाशम्।
कृतशक्तिरधोमुखो गुरुत्वाज्जनितव्रीड इवात्मपौरुषेण॥ २३॥

उपकार इति॥ असति नीचे प्रयुक्त उपकार इव मृगे स्थितिमप्राप्य प्रणाशमदर्शनं गत इत्युपमा। तथा कृतशक्तिः कृतपौरुषो गुरुत्वाच्छोढभाराम्महच्चादधोमुखो नम्रमुखः। अतएवात्मपौरुषेण जनितव्रीड इव स्थित इत्युत्प्रेक्षा॥

१ क्रोधोद्भवम्.

Digitized by Google

स समुद्धरता विचिन्त्य तेन खरुचं कीर्तिमिवोत्तमा दधानः ।
अनुयुक्त इव स्ववार्तमुच्चैः परिरेभे नु भृशं विलोचनाभ्याम् ॥ २४ ॥

स इति ॥ उत्तमां खरुचं कान्तिं कीर्तिमिव दधान इत्युत्प्रेक्षा । किं च। विचिन्त्य तर्कयित्वा ब्राह्मोऽयमिति विपृच्य समुद्धरता तेनार्जुनेनोच्चैः स्ववार्तं स्वपाटवम् ॥ "वार्तं पाटवमारोग्यं भव्यं स्वास्थ्यमनामयम्" इति यादवः ॥ अनुयुक्तः पृष्ट इव स्थित इत्युत्प्रेक्षा । आदरात्तथा प्रतीयत इत्यर्थः ॥ "प्रश्नोऽनुयोगः पृच्छा च" इत्यमरः ॥ स बाणो विलोचनाभ्यां नयनाभ्यां भृशं परिरेभे न्यालिङ्गितः किमित्युत्प्रेक्षा । तेनात्यादरेण दृष्ट इत्यर्थः ॥

तत्र कार्मुकभृतं महाभुजः पश्यति स्म सहसा वनेचरम् ।
संनिकाशयितुमग्रतः स्थितं शासनं कुसुमचापविद्विषः ॥ २५ ॥

तत्रेति ॥ तत्र प्रदेशे महाभुजोऽर्जुनः कुसुमचापविद्विषः स्मरारेः शासनं वक्ष्यमाणमादेशं संनिकाशयितुं संनिवेशयितुम् । निवेदयितुमिति यावत् । अग्रतः स्थितं कार्मुकभृतं वनेचरं सहसा झटिति पश्यति स्म ॥ इतः प्रभृति रथोद्धताह्वम्—"रो नराविह रथोद्धता लगौ" इति लक्षणात् ॥

स प्रयुज्य तनये महीपतेरात्मजातिसदृशीं किलानतिम् ।
सान्त्वपूर्वमभिनीतिहेतुकं वक्तुमित्थमुपचक्रमे वचः ॥ २६ ॥

स इति ॥ स वनेचरो महीपतेस्तनये राजपुत्रेऽर्जुने आत्मजातिसदृशीं किरातजात्यनुरूपां किल ॥ किलेति जातेरलीकतां द्योतयति । यतः । परमार्थतः प्रथम एवासौ ॥ आनतिं प्रणतिं प्रयुज्य सान्त्वपूर्वं सामपूर्वकम् ॥ "साम सान्त्वमुपे समे" इत्यमरः ॥ अभिनीतिहेतुकं प्रियप्राप्तिहेतुकं वचः । इत्थं वक्ष्यमाणप्रकारेण वक्तुमुपचक्रम उपक्रान्तवान् ॥

तत्र तावच्चतुर्भिः सान्त्वमाह—

शान्तता विनययोगि मानसं भूरिधाम विमलं तपः श्रुतम् ।
प्राह ते नु सदृशी दिवौकसामन्ववायमवदातमाकृतिः ॥ २७ ॥

शान्ततेति ॥ शान्तता बहिरनौद्धत्यं ते तव विनययोग्यनौद्धत्ययुक्तं मानसं प्राह नु वृत्ते खलु । तथा भूरि बहु धाम तेजो यस्मिंस्तत्तपः ॥ कर्तृ ॥ विमलं संमदापशून्यं श्रुतं प्राह । किं च । यौवंदिवं द्यौको येषां तेषां दिवौकसां देवानाम् ॥ पृषोदरादित्वात्साधुः ॥ "दिवं स्वर्गेऽन्तरिक्षे च" इति विश्वः ॥ सदृशी तुल्याकृति-

१ उज्झताम्. २ कुसुमकेतुः मकरकेतु.

Digitized by Google

मूर्तिरवदातं शुद्धमन्ववायं वंशं माह ॥ "वंशोऽन्ववायः संतानः" इत्यमरः ॥ आ
न्त्यादिभिर्लिङ्गैर्विनयादयोऽनुमीयन्ते । अन्यथा तदसंभवादिति भावः ॥

दीपितस्वमनुभावसंपदा गौरवेण लघयन्महीभृतः ।
राजसे मुनिरपीह कारयन्नाधिपत्यमिव शातमन्यवम् ॥ ३८ ॥

दीपित इति ॥ मुनिरपि । ऐश्वर्यरहितोऽपीत्यर्थः । अनुभावसंपदा प्रभावातिशयेन
दीपितः प्रकाशितो गौरवेण महत्त्वया महीभृतो राज्ञो लघयँल्लघूकुर्वन् । त्वमिहाग्रौ
शतमन्योरिदं शातमन्यवमैन्द्रम् ॥ "तस्येदम्" इत्यण्प्रत्ययः ॥ "शातमन्युदिव
स्पतिः" इत्यमरः ॥ अधिपतेः कर्माधिपत्यं त्रैलोक्यरक्षाधिकारः ॥ ब्राह्मणादि
त्वात्ष्यञ्प्रत्ययः ॥ कारयन्निव । इन्द्रेणेति शेषः । राजसे तस्माप्युपजीव्य इति
प्रतीयसे । त्वमिन्द्रेत्यर्थः ॥

तापसोऽपि विश्रुतामुपेयिवानास्पदं त्वमसि सर्वसंपदाम् ।
दृश्यते हि भवतो विना जनैरन्वितस्य सचिवैरिव द्युतिः ॥ ३९ ॥

तापस इति ॥ विशोर्भावो विश्रुता तां विश्रुतां प्रभावमुपेयिवानुपगतः । अतएव
तापसोऽपि त्वं सर्वसंपदामास्पदं स्थानमसि ॥ "आस्पदं प्रतिष्ठायाम्" इति नि
पातः ॥ विश्रुतामेव समर्थयते—हि यस्माद्भवतो जनैर्विनापि । एकाकिनोऽपीत्यर्थः
सचिवैरन्वितस्येवामात्यादियुक्तस्येव द्युतिस्तेजो दृश्यते । अतः सर्वसंपदास्पदत्व
युक्तमित्यर्थः ॥

विस्मयः क इव वा जयश्रिया नैव मुक्तिरपि ते दवीयसी ।
ईप्सितस्य न भवेदुपाश्रयः कस्य निर्जितरजस्तमोगुणः ॥ ४० ॥

विस्मय इति ॥ किं च । जयश्रिया हेतुना । प्राप्तयापीति शेषः । क इव वा वि
स्मयः किमाश्चर्यम् । न किंचिदित्यर्थः ॥ "विस्मयोऽद्भुतमाश्चर्यं चित्रम्" इत्यमरः
अतो मुक्तिरपि ते तव दवीयसी दूरतरा दुर्लभा न भवत्येव ॥ "स्थूलदूर—"
त्यादिना यजादिपरत्वेऽपि पूर्वगुणश्च ॥ निर्जितौ रजस्तमसौ एव गुणौ येन स भ
वत्तस्तव पुरुषः कस्येप्सितस्योपाश्रय आस्पदं न भवेदित्यर्थः ॥

अथास्मन्मनसो योजनमुपालब्धुमुक्तेनाह—

क्षेपयन्नहिमतेजसं त्विषा स त्वमित्थमुपपन्नपौरुषः ।
हर्तुमर्हसि वराहभेदिनं नैनमस्मदधिपस्य सायकम् ॥ ४१ ॥

क्षेपयन्निति ॥ त्विषा तेजसाहिमतेजसमुष्णतेजसं क्षेपयंश्चञ्चयन्नुपपन्नपौरु

१ धारयन्, २ अपि.

Digitized by Google

संभावितपराक्रमः स प्रसिद्धस्तं वराहभेदिनम् । कृतोपकारमित्यर्थः । एवं त्वत्करुणास्पदविषय साधकं शरभित्थं साहसेन हर्तुं नार्हसि ॥

अनर्हत्वमेवाह—

स्मर्यते तनुभृतां सनातनं न्याय्यमाचरितमुत्तमैर्नृभिः ।
ध्वंसते यदि भवादृशस्ततः कः प्रयातु वद तेन वर्त्मना ॥ ४२ ॥

स्मर्यत इति ॥ उत्तमैर्नृभिः सत्पुरुषैर्धर्मवादिभिस्तनुभृतां शरीरिणां सनातनं नित्यं न्याय्यं न्यायादनपेतमाचरितमाचारः स्मर्यते । कर्तव्यतयेति शेषः । न स्वभाव इत्यर्थः ॥ अथाप्यनाचारेण दोषमाह—ध्वंसत इति ॥ भवानिव दृश्यन्ते ते भवादृशस्ततः सदाचाराद्ध्वंसते भ्रश्यन्ते यदि तदा तेन वर्त्मना न्यायमार्गेण कः प्रयातु गच्छतु वद कथय । न कोऽपीत्यर्थः । तथा च सन्मार्ग एव शीलं कुर्यादिति भावः ॥

आकुमारमुपदेष्टुमिच्छवः संनिवृत्तिमपथान्महापदः ।
योगशक्तिजितजन्ममृत्यवः शीलयन्ति यतयः सुशीलताम् ॥ ४३ ॥

आकुमारमिति ॥ किं च । योगशक्त्यात्मज्ञानमहिम्ना जितौ जन्ममृत्यू यैस्ते यतयो योगिनः । आ कुमारेभ्य आकुमारम् । कुमारादारभ्येत्यर्थः ॥ "आङ् मर्यादाभिविध्योः" इत्यव्ययीभावः ॥ महत आपदो यस्मिंस्तस्मान्महापदः । महानर्थहेतोरित्यर्थः । अपथादमार्गात् ॥ "पथो विभाषा" इति निषेधविकल्पात्समासान्तः । "अपथं नपुंसकम्" ॥ संनिवृत्तिमपगमयितुमुपदेष्टुमिच्छवः सन्तः सुशीलतां सदृत्तताम् ॥ "शीलं स्वभावे सदृत्ते" इत्यमरः ॥ शीलयन्त्यभ्यस्यन्ति । अतो न स्वाभ्यं शीलमित्यर्थः ॥

न केवलं सौशील्यादनर्थनिवृत्तिमात्रम् । किं स्वर्थमाप्तिरपीत्याह—

तिष्ठतां तपसि पुण्यमासजन्संपदोऽनुगुणयन्सुखैषिणाम् ।
योगिनां परिणमन्विमुक्तये केन नास्तु विनयः सतां प्रियः ॥ ४४ ॥

तिष्ठतामिति ॥ तपसि तिष्ठतां तपोनिष्ठानाम् । धर्मार्थिनामित्यर्थः । पुण्यं धर्ममासजन्संपादयन् ॥ "स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः" इत्यमरः ॥ सुखैषिणां सुखार्थिनां संपदः सुखसाधनभूतानर्थाननुगुणयन्ननुकूलयन् । अर्थकामयोरपि हेतुभूत इत्यर्थः । तथा योगिनां विमुक्तयेऽपवर्गाय परिणमन्संपद्यमानो विनयः सौशील्यं केन हेतुना सतां प्रियो नास्तु ॥ संभावनायां लोट् ॥ सर्वथाविनय एव चतुर्वर्गसाधनमित्यर्थः । अतस्त्वया नास्मत्स्वामिशरभीर्थं कार्यमिति तात्पर्यम् ॥

१ आचरणम्. २ मृगयः.

Digitized by Google

अथवा किं भवादृशेष्वन्यसंभावनया भ्रान्तिरपि संभाव्यत इति मृदूक्तिमवलम्ब्याह—

नूनमत्रभवतः शराकृतिं सर्वथायमनुयाति सायकः ।
सोऽयमित्यनुपपन्नसंशयः कारितस्त्वमपथे पदं यया ॥ ४५ ॥

नूनमिति ॥ अयमस्मदीयः सायकोऽत्रभवतः । पूज्यस्येत्यर्थः ॥ "पूज्यस्त्वत्रभवान्-त्रभवान्" इति सज्जनः ॥ "इतराभ्योऽपि दृश्यन्ते" इति सार्वविभक्तिकस्तसिल्-स्त्ययः । सुप्सुपेति समासः ॥ शराकृतिं सर्वथा रूपेण रेखादिना च सर्वमकारेणानु-याति । अत्यन्तमनुकरोतीत्यर्थः । नूनमिति वितर्के । यया कृत्या ॥ कर्त्र्या ॥ त्वम-नुपपन्नसंशयोऽस्यन्तसादृश्यादनुत्पन्नस्वान्यदीयत्वसंदेहः सन् । सोऽयमिति यः स्वकीयः स एवायमिति भ्रान्त्युत्पत्त्यर्थमेति शेषः । अपथेऽमार्गे शरापहरणरूपे पदं कारितः । निधापित इत्यर्थः ॥ "हृक्रोरन्यतरस्याम्" इत्यणि कर्तुः कर्मता । "ण्यन्ते कर्तुश्च कर्मणः" इति तत्रैवाभिहिते कर्मणि क्तः ॥

पुनरपि श्लेषमेव प्रबन्धोपान्तरमापादयति—

अन्यदीयविशिखे न केवलं निःस्पृहस्य भवितव्यमाहृते ।
निघ्नतः परनिबर्हितं मृगं व्रीडितव्यमपि ते सचेतसः ॥ ४६ ॥

अन्यदीयेति ॥ सह चेतसा वर्तत इति सचेतास्तस्य मनस्विनस्तेऽन्यदीयविशिखे विषये यदाहृतमाहरणम् ॥ भावे क्तः ॥ तस्मिन् । अन्यदीयविशिखस्याहरण इत्य-र्थः । निःस्पृहस्य केवलं निःस्पृहेणैव न भवितव्यम् । किं तु परनिबर्हितं परेण मारितं मृगं निघ्नतः मारयतस्ते । निघ्नता त्वयेत्यर्थः ॥ "कृत्यानां कर्तरि वा" इति षष्ठी ॥ व्री-डितव्यं लज्जितव्यमपि ॥ भावे तव्यप्रत्ययः ॥ संप्रति तु त्वया परविद्धं मृगं वि-द्धापि न व्रीड्यते प्रत्युत स्तेयं च क्रियत इत्यहो महत्साहसमित्यर्थः ॥ मृगमित्यत्र क्षेपत्वाविवक्षणात् " जासिनिप्रहणनाटक्राथपिषां हिंसायाम् " इति षष्ठी न भ-वति क्षेपाधिकाराद् । निप्रहणेत्यत्र निभयोः संघातव्यत्ययविषयत्वानां ग्रहणात् ॥

अथास्मिन्कृतघ्नतापि योगं स्वीयोपकारकर्त्रे वर्णयितुं विकत्थनदोषं तावदुन्मेन परिहरन्नाह—

संततं निशमयन्त उत्सुका यैः प्रयान्ति मुदमस्य सूरयः ।
कीर्तितानि हसितेऽपि तानि यं व्रीडयन्ति चरितानि मानिनम् ॥ ४७ ॥

संततमित्यादि ॥ सूरयो विद्वांसोऽस्य स्वामिनः संबन्धिभिर्यैश्चरितैः ॥ करणभूतैः ॥ संततं सततमुत्सुकाः सोत्कण्ठाः सन्तो निशमयन्तश्चरितानि शृण्वन्तो मुदं प्रयान्ति ॥

१ अपदे.

Digitized by Google

अत्र चरितानां हुतभाक्षी शाब्दं करणत्वम्। अर्थाक्षिप्तमनकर्मत्वमिति विवेकः॥ यानि चरितानि इप्सितेऽपि परिहासेऽपि कीर्तितानि परैरुच्चारितानि सन्ति यैर्मानिभिर्व्रीडयन्ति। मानिस्वाद्व्रीडा न तु चरितदोषात्। तेषामलंकाररूपत्वादिति भावः॥

अन्यदोषमिव सः स्वकं गुणं स्थापयेत्कथमधृष्टताजडः।
उच्यते स खलु कार्यवत्तया धिग्विभिन्नबुधसेतुमर्थिताम्॥ ४८॥

अन्येति॥ अधृष्टतया विकत्थनेन शालीनतया जडः स्तब्धः। अविकत्थन इत्यर्थः। सोऽस्मत्स्वाम्यन्यदोषं परावरगुणमिव स्वकीयं गुणं कथं स्थापयेत्प्रकटयेत्। "आत्मप्रशंसां परगर्हामिव वर्जयेत्" इति स्मरणात्। तथापि कार्यवत्तया। कर्मार्थितयेत्यर्थः। स स्वगुण उच्यते। खलु कार्यार्थिनः कुतो गर्व इति भावः॥ निर्विण्ण इवाह—धिगिति॥ विभिन्नबुधसेतुमतिक्रान्तमुज्जनमर्यादामर्थितां याचनां धिक्। निन्दामीत्यर्थः। वदयमपीत्थं विकत्थयितुं प्रवृत्त इति भावः॥ "धिक्कुत्सननिन्दयोः" इत्यमरः॥ अभिसर्पतसोः कार्यार्थिगुणपर्यायेषु त्रिषु द्वितीयान्तेषु। ततः "अन्यत्रापि दृश्यते" इति द्वितीया॥

संप्रति स्वकृतोपकारं दर्शयति—

दुर्वचं तदथ मा स्म भून्मृगस्त्वय्यसौ यदकरिष्यदोजसा।
नैनमाशु यदि वाहिनीपतिः प्रत्यपत्स्यत शितेन पत्त्रिणा॥ ४९॥

दुर्वचमिति॥ वाहिनीपतिः सेनापतिरस्मत्स्वामी शितेन पत्त्रिणा शरेणैनं मृगमाशु न प्रत्यपत्स्यत यदि नाभियुञ्जीत चेदसौ मृग ओजसा बलेन त्वयि विषये यदकरिष्यद्यदनिष्टं कुर्यात्तदुर्वचं दुर्वाच्यममङ्गलतया वक्तुं न शक्यते। तदनिष्टमथानन्तरमपि मा स्म भूदिति सौहार्दकथनम्। तदुपेक्षणे स मृगस्त्वां हन्यादिति भावः॥ "लिङ्निमित्ते लृङ् क्रियातिपत्तौ" इति करोतेः पचतेश्च लृङ्॥

ननु मयैव इतो मृगो न तु सेनापतिना। तत्राह—

को न्विमं हरितुरङ्गमायुधस्थेयसीं दधतमङ्गसंहतिम्।
वेगवत्तरमृते चमूपतेर्हन्तुमर्हति शरेण दंष्ट्रिणम्॥ ५०॥

क इति॥ हरितुरङ्गमायुधमिद्रायुधं तद्वत्स्थेयसीं स्थिरतराम्। अकुण्ठितामित्यर्थः॥ स्थिरशब्दादियसुन्। "प्रियस्थिर—" इत्यादिना स्थादेशः॥ अङ्गसंहतिमवयवसंघातं दधतं धारयन्तं वेगवत्तरं दुर्वारवेगमिमं दंष्ट्रिणं वराहं चमूपतेः किरातवाहिनीपतेर्ऋते चमूपतिं विना॥ "अन्यारात्—" इत्यादिना पञ्चमी॥ को नु को वा शरेण। एकेनेति भावः। हन्तुमर्हति। न कोऽपीत्यर्थः॥

Digitized by Google

अस्तु । स एव मृगस्य हन्ता । ततः किमत आह—

मित्रमेमदृमुपकारि संशये मेदिनीपतिरयं तथा च ते ।
तं विरोध्य भवता निरासि मा सज्जनैकवसतिः कृतज्ञता ॥ ५१ ॥

मित्रमिति ॥ तथा च । तस्यैव मृगहन्तृत्वे सतीत्यर्थः । अयं मेदिनीपतिः किरातभूपतिस्ते तव संशये प्राणसंकट उपकार्युपकारकारकमिदं मित्रम् ॥ ततोऽपि किं तत्राह—तमिति ॥ तं मित्रभूतं विरोध्य सज्जनैकवसतिर्भवादृशसुजनमात्राधारा कृतज्ञतोपकारवेदित्वं मा निरासि न निराक्रियतां भवता । अन्यथा जगति कृतघ्नत्वेऽसं वादे कृतघ्नता च ते भवेदित्यर्थः ॥ अस्मतेः कर्मण्याधिपि माङि लुङ् ॥

नन्वेवं सर्वस्यार्थमूलत्वात्स एवास्तु । किं मित्रेणेत्याशङ्क्य मित्रस्य सर्वाधिक्यं युग्मेनाह—

लभ्यमेकसुकृतेन दुर्लभा रक्षितारमसुरक्ष्यभूतयः ।
स्वन्तमन्तविरसा जिगीषतां मित्रलाभमनु लाभसंपदः ॥ ५२ ॥

लभ्यमिति ॥ जिगीषतां जेतुमिच्छताम् ॥ जयतेः सन्नन्ताच्छत्रुमात्रस्य ॥ दुर्लभाः दुष्प्रेणापि लब्धुमशक्यास्तथाप्यसुरक्ष्यभूतयो रक्षितुमशक्यमहिमानः । निस्यं रक्षणादिक्लेशवहा भोति भावः । अन्तविरसाः । गत्वर्थ इत्यर्थः । लभ्यन्त इति लाभा अर्थास्तेषां संपदः । एकसुकृतेनैकोपकारेण लभ्यं सुलभं न तु दुर्लभं रक्षितारं न तु रक्ष्यं स्वन्तं शुभावसानं न स्वन्तविरसं मित्रलाभमनु मित्रलाभाद्धीनाः । निकृष्टा इत्यर्थः ॥ हीन इत्यनोः कर्मप्रवचनीयसंज्ञा । तद्योगे द्वितीया ॥ अत्रोपमेयस्य मित्रलाभस्य लाभान्तरं प्रत्याधिक्यामिधानाद्व्यतिरेकालंकारः ॥

चञ्चलं वसु नितान्तमुन्नता मेदिनीमपि हरन्त्यरातयः ।
भूधरस्थिरमुपेयमागतं भावमंस्त सुहृदं महीपतिम् ॥ ५३ ॥

चञ्चलमिति ॥ किं च । वसु धनं नितान्तं चञ्चलं मेदिनीमप्युन्नताः प्रबला अरातयो हरन्ति ॥ मित्रं तु न तथेत्याह—भूधर इति ॥ भूधरवत्स्थिरमुपेयमन्विष्य मन्तव्यमानतं स्वतःप्राप्तमपि महीपतिम् । सर्वधुरीणमित्यर्थः । सुहृदं मित्रं भावमंस्त भावयाञ्चक्रे । भवानिति शेषः ॥ अन्यश्लोकमतो भवच्छब्दो विपक्षिपरिणामेनात्र ग्राह्यः । अन्यथा मध्यमपुरुषः स्यात् ॥ मन्यतेः कर्तरि माङि लुङ् ॥ अत्रालंकारस्तु व्यतिरेक एव भूधरस्थिरमित्युपमासंगतिसंकरः ॥

नन्वेवं सुहृल्लोः किं मित्रसंग्रहेण । तत्राह—

जेतुमेव भवता तपस्यते नायुधानि दधते मुमुक्षवः ।
प्राप्यते च सकलं महीभुता संगतेन तपसः फलं त्वया ॥ ५४ ॥

१ वादिगीर्वाणिः. २ उद्यता. ३ भूपतिम्. ४ प्राप्यते. ५ भूभृता.

Digitized by Google

जेतुमिति ॥ भवता जेतुं जयार्थमेव तपस्यते तपश्चर्यते ॥ "कर्मणो रोमन्थ–" इत्यादिना चरणे क्यच् । ततो भावे क्त्र् ॥ कुतः । मुमुक्षवो मोक्षार्थिन आयुधानि न दधते न धारयन्ति । अतो भिन्नसंग्रहः कार्य इति भावः ॥ तथापि किं भवत्स्वामिसख्येन । तत्राह—प्राप्स्यत इति ॥ महीभृता सह संगतेन त्वया सकलं च तपसः फलं प्राप्स्यते । अतस्ते सखात्मस्वामी युक्त इत्यर्थः ॥

नन्वकिंचनः कुम्भोपयुज्यते । तत्राह—

वाजिभूमिरिभराजकाननं सन्ति रत्ननिचयाश्च भूरिशः ।
काञ्चनेन किमिवास्य पत्रिणा केवलं न सहते विलङ्घनम् ॥ ५५ ॥

वाजीति ॥ तस्य भूपतेर्वाजिभूमिरश्वाकर इभराजानां काननं गजोत्पत्तिस्थानं भूरिशो रत्ननिचयाश्च । सन्तीति शेषः । नन्वीदृगाढ्यः किमेकस्मै काञ्चनपत्रकाण्डाय कलहायते । तत्राह—अस्य काञ्चनेन सौवर्णेन पत्रिणा शरेण किमिव । न किंचित्प्रयोजनमस्तीत्यर्थः । परंतु केवलं विलङ्घनं व्यतिक्रमं न सहते । नायं शरलुब्धः । किं त्वधिक्षेपासहिष्णुरित्यर्थः ॥ अत्र प्रथमार्धे समृद्धिमद्वस्तुवर्णनादुदात्तालंकारः ॥

नन्वीदृग्लुब्धः किमुपकर्ता । तत्राह—

सावलेपमुपलिप्सिते परैरभ्युपैति विकृतिं रजस्यपि ।
अर्थितस्तु न महान्समीहते जीवितं किमु धनं धनायितुम् ॥ ५६ ॥

सावलेपमिति ॥ महानपि रजस्यपि धूलावपि परैः सावलेपं सगर्वमुपलिप्सिते उपलब्धमिच्छे जिघृक्षिते सति विकृतिमभ्युपैति । मङ्क्ष्यतीत्यर्थः । अर्थितो याचितस्तु जीवितं धनायितुं धनीकर्तुम् ॥ क्यजन्तात्तुमुन् ॥ न समीहते नोत्सहते । जीवितमप्यात्मनो नेच्छति । किं त्वर्थितः प्रयच्छतीत्यर्थः । तर्हि धनं किम् ॥ धनमात्मन एषितुं धनायितुमिति विग्रहः । अत्र इच्छामात्रमर्थः । अन्यथा धनमित्यनेन पौनरुक्त्यं स्यात् । सुप आत्मनः क्यच् ॥ "अश्वनायोदन्यधनाया बुभुक्षापिपासागर्धेषु" इति निपातनादाकारः ॥

उक्तं निगमयति—

तत्तदीयविशिखातिसर्जनादस्तु वां गुरु यदृच्छयागतम् ।
राघवच्छवगराजयोरिव प्रेम युक्तमितरेतराश्रयम् ॥ ५७ ॥

तदिति ॥ तत्तस्मात्तदीयविशिखस्यातिसर्जनात्मत्प्रेषणाद्वां युवयोः ॥ "षष्ठीच-

१ प्रार्थितः.

Digitized by Google

तुर्यौ द्वितीयास्वयोर्यौ नौ" इति वामादेशः ॥ राघवप्लवगराजयो रामसुग्रीवयोरिव वरच्छया दैवादागतं गुरु महद्युक्तमनुरूपमितरेतराश्रयमन्योन्यविषयं प्रेम सख्यमस्तु॥

ननु शरलोभान्मिथ्याभियुज्यस इत्याह—

नाभियोक्तुमनृतं त्वमिथ्यसे कस्तपस्विविशिखेषु चादरः।
सन्ति भूभृति शरा हि नः परे ये पराक्रमवसूनि वज्रिणः ॥ ५८ ॥

नेति ॥ त्वमनृतं मिथ्याभियोक्तुमभ्याख्यातुम् ॥ भ्वादेर्थग्रहणाद्धेतुकर्मकता ॥ "मिथ्याभियोगोऽभ्याख्यानम्" इत्यमरः ॥ अस्मामिरिति शेषः । नेष्यसे नेष्टोऽसि । इतः । तपस्वी मुनिः शोभ्यश्च ॥ "मुनिशोभ्यौ तपस्विनौ" इति शाश्वतः ॥ तस्य विशिखेषु क आदरः कास्था । न कश्चिदित्यर्थः । हि यस्मान्नोऽस्माकं भूभृति शैले परेऽन्येऽपि शराः सन्ति ये शरा वज्रिणः शक्रस्य पराक्रमवसूनि पराक्रमधनानि । शौर्यसर्वस्वभूता इत्यर्थः । वज्रिग्रहणाद्वज्रादप्यतिरिक्ता इति सूच्यते ॥ अत्र शरेषु पराक्रमसाधनेषु पराक्रमरूपेण वस्तु व्यज्यते ॥

अथ ते शरापेक्षा चेत्तर्हि तपोऽप्यतामित्याह—

मार्गणैरथ तव प्रयोजनं नार्थसे किमु पतिं न भूभृतः।
स्वद्विधं सुहृदमेत्य सोऽर्थिनं किं न यच्छति विजित्य मेदिनीम्॥५९

मार्गणैरिति ॥ अथोत तव मार्गणैः शरैः प्रयोजनं कृत्यं तर्हि भूभृतो गिरेः पतिं महेन्द्रं किमु न नार्थसे किमिति न याचसे ॥ "नाधृ नाधृ याच्ञोपतापैश्वर्याशीःषु" इति धातोर्दन्त्यादिः ॥ न च याच्ञामङ्गभया कार्येत्याह—स्वद्विधमिति ॥ सोऽस्मत्स्वामी तपैव विधा प्रकारो यस्य तं स्वद्विधं स्वाराधय । महानुभावमित्यर्थः । तथापि सुहृदं मित्रभूतमर्थिनमेत्य लब्ध्वा मेदिनीं विजित्य न यच्छति न ददाति किम् । किंतु दास्यत्येव । किं पुनः शरानिति भावः ॥

यदुक्तम् "स्वद्विधम्" इत्यादि तत्रोपपत्तिमाह—

तेन सूरिरुपकारिताधनः कर्तुमिच्छति न याचितं वृथा।
सीदतामनुभवन्निवार्थिनां वेद यत्प्रणयभङ्गवेदनाम् ॥ ६० ॥

तेनेति ॥ तेन कारणेन सूरिर्विद्वानतएवोपकारिताधन उपकारकत्वमात्रधनः स किरातरूपत्वात्पार्थिवं याच्ञां वृथा व्यर्थं कर्तुं नेच्छति । इतः । यत्येन कारणेन सीदतां क्लिश्यतामर्थिनां प्रणयभङ्गवेदनां याच्ञामङ्गदुःखं स्वयमनुभवन्निव वेद वेत्ति । अतो न वैकल्यशङ्का कार्येत्यर्थः ॥

१ याच्ञे.

Digitized by Google

ननु स्वयं ग्राहिणः किं याच्ञादैन्यं तत्राह—

शक्तिरर्थपतिषु स्वयंग्रहं प्रेम कारयति वा निरत्ययम् ।
कारणद्वयमिदं निरस्यतः प्रार्थनाधिकबले विपत्फला ॥ ६१ ॥

शक्तिरिति ॥ अर्थपतिषु विषये शक्तिः सामर्थ्यं स्वयंग्रहं स्वाम्यनुज्ञां विना ग्रहणं कारयति । यद्वा निरत्ययमपरापेऽप्यविकारि प्रेम ॥ कर्तृ ॥ स्वयंग्रहं कारयति । प्रबलः श्रियो वा परस्य धनं स्वयं गृह्णातीत्यर्थः । अन्यथा उपमाह—इदं पूर्वोक्तं कारणद्वयं निरस्यतस्त्यजतः । पुंस इति शेषः । अधिकबले प्रबले विषये प्रार्थना तद्धनजिघृक्षा विपत्फलानर्थफलिका । अग्रहस्यामिषस्य सतः प्रबलधनग्राहणाद्या फणिशिरोमणिग्रहणसाहसवदनर्थाय कल्पत इत्यर्थः ॥

अथ शस्त्रार्थसंपन्ना शस्त्रत्वाभिधानः । तत्राह—

अस्त्रवेदमधिगम्य तत्त्वतः कस्य चेह भुजवीर्यशालिनः ।
जामदग्न्यमपहाय गीयते तापसेषु चरितार्थमायुधम् ॥ ६२ ॥

अस्त्रवेदमिति ॥ इह जगति तापसेषु तपस्विनां मध्ये ॥ "यतश्च निर्धारणम्" इति सप्तमी ॥ जमदग्नेरपत्यं पुमाञ्जामदग्न्यः ॥ "गर्गादिभ्यो यञ्" ॥ तमपहाय । परशुरामं विनेत्यर्थः । अस्त्रवेदं तत्त्वतोऽधिगम्य । भुजवीर्येण शालत इति भुजवीर्यशालिनः । उभयसंपन्नस्येत्यर्थः ॥ शालनक्रियापेक्षया समानकर्तृकत्वात्क्त्वानिर्देशः ॥ कस्य वायुधं चरितः प्राप्तोऽर्थो येन तच्चरितार्थं सार्थकं गीयते । न कस्यापीत्यर्थः । अतस्तवापि तापसत्वादकिंचित्करस्य तेन सह सख्यमेव मुख्यमिति भावः ॥

ननु युष्मन्मृगवधशरहरणाभ्यां द्रोहिणो मम तेन कथं सख्यं स्यादित्याशङ्क्य सख्यं तथापि तावन्मृगवधापराधः क्षमिष्यत इत्याह—

अभ्यघानि मुनिचापलात्त्वया[1] यन्मृगः क्षितिपतेः परिग्रहः ।
अक्षमिष्ट तदयं प्रमाद्यतां[2] संवृणोति खलु दोषमज्ञता ॥ ६३ ॥

अभ्यघानीति ॥ त्वया मुनिचापलात् । ब्राह्मणचापल्यादित्यर्थः । क्षितिपतेरस्मत्स्वामिनः । परिगृह्यत इति परिग्रहः । तेन स्वीकृत इत्यर्थः ॥ "परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः" इति विश्वः ॥ यन्मृगोऽभ्यघान्यभिहत इति ॥ हन्तेः कर्मणि क्तः ॥ तद्धननमयमस्मत्स्वाम्यक्षमिष्ट सोढवानेव । तथा हि । प्रमाद्यताम् । अविमृश्यकारिणामित्यर्थः । दोषमपराधमज्ञताज्ञानिता संवृणोत्याच्छादयति । नाज्ञस्यापराधो गण्यत इत्यर्थः ॥

१ मुनिना त्वया बलात्. २ प्रमार्ष्टुम्.

Digitized by Google

अथ सुहृद्भावेन हितमुपदिशति—

जन्मवेषतपसां विरोधिनीं मा कृथाः पुनरसूमपक्रियाम् ।
आपदेत्युभयलोकदूषणी वर्तमानमपथे हि दुर्मतिम् ॥ ६४ ॥

जन्मेति ॥ जन्म सत्कुले प्रसूतिः । वेषो जटावल्कलादिः । तपो नियमः । तेषां विरोधिनीं विरुद्धामसूमेर्वैविधामपक्रियामपकारम् । पुनः । इतःपरमित्यर्थः । मा कृथा मा कुरु ॥ करोतेः कर्तरि माङि लुङ् ॥ "वयोवृद्धत्वर्थवाग्वेषश्रुताभिनयकर्मणाम् । आचरेत्सदृशीं वृत्तिमजिह्मामशठां तथा" इति स्मरणात् ॥ उक्तवैपरीत्ये दोषमाह—आपदिति ॥ हि यस्मात् । अपथे वर्तमानं दुर्मतिम् । पुरुषमिति शेषः । उभौ लोकौ दूषयति इन्तीत्युभयलोकदूषणी ॥ "तद्धितार्थ–" इत्यादिनोत्तरपदसमासः ॥ आपदेति प्राप्नोति ॥ समासविषय उभशब्दस्थाने उभयशब्दप्रयोग एव साधुः । यदाह कैयटः—"उभादुदात्तो नित्यमिति नित्यग्रहणस्येदं प्रयोजनं वृत्तिविषय उभयशब्दस्य प्रयोगो मा भूत् । उभशब्दस्यैव रूपं यथा स्यादित्युभयत्रेत्यादि भवति" इति ॥

यदुक्तम् "अन्यधानि" इति तदेव स्फुटयति—

यद्गुमिच्छसि पितृन्न सांप्रतं संवृतोऽर्चियितुर्दिवौकसः ।
दातुमेव पदवीमपि क्षमः किं मृगेऽङ्ग विशिखं न्यवीविशः ॥ ६५ ॥

यद्गुमिति ॥ सांप्रतं संप्रति ॥ "संप्रतीदानीमधुना सांप्रतं तथा" इत्यमरः ॥ पितॄन्कव्यादान्यद्गुमर्चयितुं नेच्छसि । यतः संवृत एकान्ते स्थितः । तथा दिवौकसो देवानर्चियितुरप्यर्चयितुमिच्छुरपि नासि । अतो न पित्रर्थेयं हिंसा नापि देवतार्था । तदाराधने तद्धिंसितस्वादिति भावः ॥ अथ "सर्वत आत्मानं गोपायीत" इति श्रुतेरात्मरक्षार्थमिति चेन्नेत्याह—दातुमिति ॥ अङ्ग हे । पदवीं मार्गं दातुमेव । न तु हन्तुम् । मृगस्य मृगित्वादिति भावः । क्षमोऽपि योग्यः सन्नपि । किं किमर्थं मृगे विशिखं न्यवीविशो निवेशितवान् ॥ विशतेर्ण्यन्ताल्लुङ् ॥ अभिधावतो मृगादपसरणेनैवात्मरक्षणे कर्तव्ये पदवधीस्तवापक्रमेव । "न हिंस्यात्सर्वभूतानि" इति श्रुतिनिषेधादिति भावः ॥

किं बहुना परमार्थः श्रूयतामित्याह—

सज्जनोऽसि विजहीहि चापलं सर्वदा क इव वां सहिष्यते ।
वारिधीनिव युगान्तवायवः क्षोभयन्त्यनिभृता गुरूनपि ॥ ६६ ॥

सज्जन इति ॥ सज्जनोऽसि । अतएव चापलं चपलस्य कर्म विजहीहि त्यज ॥ जहातेर्लोट् । "आ च हौ" इतीकारः ॥ सर्वदा क इव वा को वा सहिष्यते ॥ इव-

१ संप्रति. २ न सम्पदि:. ३ वः.

Digitized by Google

शब्दो वाक्यालंकारे । वाशब्दोऽवधारणे ॥ असहने कारणमाह—वारिधीनिति ॥ अनिभृताश्चपलाः पुनः पुनरकार्यकारिणो गुरूनप्यैर्यगुणानपि युगान्तवायवः प्रलयपवनाः । गुरूनिधानानपि वारिधीनिव समुद्रानिव । क्षोभयन्ति ॥ उपमानुप्राणितोऽयमर्थान्तरन्यासः ॥

नन्वयं किरातः क्षुभितः किं करिष्यति । तत्राह—

अस्त्रवेदविदयं महीपतिः पर्वतीय इति भावजीगणः ।
गोपितुं भुवमिमां मरुत्वता शैलवासमनुनीय लम्भितः ॥ ६७ ॥

अस्त्रेति ॥ अयं महीपतिरस्त्रवेदवित् । निग्रहानुग्रहसमर्थ इति भावः । अतः पर्वते भवः पर्वतीयः ॥ "पर्वताच्च" इति छप्रत्ययः ॥ इति हेतोर्भावजीगणः । वनेचरपुरुषा भावज्ञासीरित्यर्थः ॥ गणयतेर्माङि लुङ् । "ई च गणः" इतीकारः ॥ नन्वीदृशमेतत्किमिह वने वसति तत्राह—गोपितुमिति ॥ मरुत्वतेन्द्रेणेमां भुवं गोपितुं रक्षितुम् ॥ "आयादय आर्धधातुके वा" इति विकल्पात् "गुपूधूप–" इत्यादिना नावप्रत्ययः ॥ अनुनीय प्रार्थ्य शैलवासं लम्भितः प्रापितः ॥ "ण्यन्ते कर्तुश्च कर्मणः" इति वचनादपि कर्तृकर्मणि क्तः । "गतिबुद्धि–" इत्यादिनापि कर्तुः कर्मत्वम् ॥

उपसंहरति—

तत्तितिक्षितमिदं मया मुनेरित्यवोचत वचश्चमूपतिः ।
बाणमत्रभवते निजं दिशन्नाप्नुहि त्वमपि सर्वसंपदः ॥ ६८ ॥

तदिति ॥ तत्तस्मान्मुनिचापलान्मुनेः संबन्धीदं मृगवधरूपं मया तितिक्षितं सोढमिति वचश्चमूपतिरवोचत ॥ शरद्रोहस्य प्रत्यर्पणमेव प्रतीकार इत्याह—अत्रभवते पूज्याय स्वामिने । अत्रभवान्व्याख्यातः । निजं बाणं तदीयमेव शरं दिशन्प्रत्यर्पयंस्त्वमपि सर्वसंपद आप्नुहि । सख्येनेति भावः ॥

नन्वेतत्सख्यमेव न रोचते । किं पुनस्तत्प्रसूताः संपदस्तत्राह—

आत्मनीनमुपतिष्ठते गुणाः संभवन्ति विरमन्ति चापदः ।
इत्यनेकफलभाजि मा स्म भूदर्थिता कथमिवार्यसंगमे ॥ ६९ ॥

आत्मनीनमिति ॥ आत्मने हितमात्मनीनम् ॥ "आत्मन्विश्वजनभोगोत्तरपदात्खः" ॥ उपतिष्ठते संगच्छते ॥ "उपादेवपूजासंगतिकरणमित्रकरणपथिषु" इति कृत्यादात्मनेपदम् ॥ गुणा विनयादयः संभवन्त्यापदश्च विरमन्ति ॥ "व्याङ्परिभ्यो रमः" इति परस्मैपदम् ॥ इत्यनेकफलभाज्यार्यसंगमे साधुसंगतावर्थिता अपेक्षा कथमिव मा स्म भूत् । सर्वदा भवत्येव ॥

१ मामृदि. २ उपरमन्ति.

Digitized by Google

न चार्यं दूरे वर्तत इत्याह—

दृश्यतामयमनोकहान्तरे तिग्महेतिपृतनाभिरन्वितः ।
साहिवीचिरिव सिन्धुरुद्धतो भूपतिः समयसेतुवारितः ॥ ७० ॥

दृश्यतामिति ॥ तिग्महेतिभिस्तीक्ष्णायुधाभिः ॥ "हेतिर्ज्वालास्त्रयोर्धांशुषु" इति हेमचन्द्रः ॥ पृतनाभिर्वाहिनीभिः ॥ "वाहिनी पृतना चमूः" इत्यमरः ॥ अन्वितो भूपतिः । साहवः ससर्पा वीचयो यस्य स सिन्धुः समुद्र इवोद्धतः किंतु समयो मर्यादा सेतुरिव स समयसेतुस्तेन वारितः सन् । इत्तेन निर्दिशन्नाह—अयमनोकहान्तरे द्रुमान्तर्धाने । वर्तत इति शेषः । दृश्यताम् ॥ "अनोकहः द्रुदः शालः पलाशी द्रुमानगाः" इत्यमरः ॥

अथास्य विज्ञापनमेवाह—

सख्यं धनुर्वहति योऽहिपतिस्थवीयः
स्थेयाञ्जयन्हरितुरंगमकेतुलक्ष्मीम् ।
अस्यानुकूलय मतिं मतिमन्ननेन
सख्या सुखं समभियास्यसि चिन्तितानि ॥ ७१ ॥

सख्यमिति ॥ स्थेयान्स्थिरतरः ॥ "भियस्थिर–" इत्यादिना स्थादेशः ॥ यश्चमूपतिर्हरितुरंगमकेतोरिन्द्रध्वजस्य लक्ष्मीं शोभां जयन् । अहिपतिः शेष इव स्थवीयः स्थूलतरम् ॥ "स्थूलदूर–" इत्यादिना पूर्वगुणयजादिपरलोपौ ॥ सह ज्यया सख्यं धनुर्वहति । हे मतिमन् । अस्य चमूपतेर्मतिमनुकूलयानुकूलां कुरु । सख्यं कुर्वित्यर्थः । मतिमत्तायाः फलमेतदिति भावः । कुतः । सख्यानेन चमूपतिना हेतुना सुखमक्लेशेन चिन्तितानि मनोरथान्समभियास्यसि प्राप्स्यसि ॥ वसन्ततिलकावृत्तम् ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथसमाख्यया
व्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये
दूतवाक्यं नाम त्रयोदशः सर्गः ।

चतुर्दशः सर्गः ।

ततः किरातस्य वचोभिरुद्धतैः पराहतः शैल इवार्णवाम्बुभिः ।
जहौ न धैर्यं कुपितोऽपि पाण्डवः सुदुर्ग्रहान्तःकरणा हि साधवः ॥१॥

१ समूपमास्थित. २ कुपितोऽपि. ३ सूरयः.

Digitized by Google

तत इति ॥ ततः किरातवाक्यानन्तरमुद्धतैः प्रगल्भैः किरातस्य वचोभिः। अर्जुनाग्नुभिः शैल इव। पराहतोऽभिहतः। अत एव कुपितोऽपि पाण्डवो धर्मं निर्विकारचित्तत्वं न जहौ न तत्याज। उत्पन्नमपि कोपं स्तम्भयामासेत्यर्थः। तथा हि। साधवः सज्जनाः सुदुर्ग्रहं सुष्ठु दुरामदममतिकुप्यमन्तःकरणं येषां ते सुदुर्ग्रहान्तःकरणा हि ॥ अर्थान्तरन्यासः ॥

संश्लेषमुल्लिङ्गितशात्रवेङ्गितः कृती गिरां विस्तरतत्त्वसंग्रहे।
अयं प्रमाणीकृतकालसाधनः प्रशान्तसंरम्भ इवाददे वचः ॥ २ ॥

सश्लेषमिति ॥ सह लेशैः सश्लेषं सकलं यथा तथोल्लिङ्गितमुद्गतलिङ्गं कृतम्। लिङ्गैस्तद्वाक्यभङ्गिभिरेव सम्यगवगतमित्यर्थः। शत्रुरेव शात्रवः ॥ स्वार्थेऽण्प्रत्ययः ॥ तत्संङ्गितमभिप्रायस्तदुल्लिङ्गितं येन सः। गिरां वाचां संबन्धिनि विस्तरे तत्त्वसंग्रहेऽवंसंक्षेपे ॥ वैभाषिको दुन्दुकवद्भावः। कृती कुशलः प्रमाणीकृतं प्रधानीकृतं कालं एव साधनं येन सः। अवसरोचितं विधत्तेरित्यर्थः। अयं पाण्डवः प्रशान्तसंरम्भः संक्षोभरहित इव वच आददे। उवाचेत्यर्थः ॥

सान्त्वपूर्वकमेवाह—

विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम्।
प्रवर्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती ॥ ३ ॥

विविक्तेति ॥ विविक्ताः संयोगादिनाश्लिष्टाः स्फुटोच्चारिता वर्णा अक्षराण्येवाभरणानि यस्याः सा। अन्यत्र तु विविक्तानि शुद्धानि वर्णो रूपमाभरणानि च यस्याः सा ॥ "वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाक्षरे" इत्युभयत्राप्यमरः ॥ सुखा श्रुतिः श्रवणं यस्याः सा सुखश्रुतिः। श्राव्येत्यर्थः। अन्यत्र श्रूयत इति श्रुतिर्वाक्। सा सुखा यस्याः सा। मधुभाषिणीत्यर्थः। द्विषामपि हृदयानि प्रसादयन्ती। किं पुनः सुहृदामिति भावः। प्रसन्नानि वाचकानि गम्भीराण्यर्थगुरूणि च पदानि सुप्तिङन्तरूपाणि यस्याः सा। अन्यत्र तु प्रसन्ना विमला गम्भीरपदाऽतलचरणा सरस्वती वाक्॥ "गीर्वाग्वाणी सरस्वती" इत्यमरः ॥ न कृतं पुण्यकर्म यैस्तेषां न प्रवर्तते न प्रसरति। किं तु सुकृतिनामेवेत्यर्थः। भवद्दाणी चैवंविधेति धन्यो भवानिति भावः॥ अत्र काचिन्नायिका वाग्देवता च प्रतीयते। तत्रादौ समासोक्तिरलंकारः। विशेषणसाम्येनामस्तुतमतीतेः। अतएव न श्लेषः ॥

भवन्ति ते सभ्यतमा विपश्चितां मनोगतं वाचि निवेशयन्ति ये।
नयन्ति तेष्वप्युपपन्ननैपुणा गभीरमर्थं कतिचित्प्रकाशताम् ॥ ४ ॥

१ अश्लेष. २ हृदय.

Digitized by Google

भयन्तीति ॥ ते पुरुषा विपश्चितां विदुषाम् ॥ "विद्वान्विपश्चिद्बोधज्ञः" इत्यमरः ॥ मध्ये सभ्यतमाः सभायां साधुतमा निपुणतमाः ॥ "साधुः समर्थो निपुणश्च" इति काशिकायाम् ॥ भवन्ति । ये मनोगतं मनसा गृहीतमर्थं वाचि निवेशयन्ति । वाचोद्गिरन्तीत्यर्थः । तेषु वक्तृष्वप्युपपन्ननैपुणाः संभावितकौशलाः कतिचिदेव गभीरं निगूढमर्थं प्रकाशतां स्फुटतां नयन्ति । लोके तावज्ज्ञातार एव दुर्लभाः । तत्रापि वक्तारः । तत्रापि निगूढार्थप्रकाशकाः । त्वयि सर्वमस्तीति स्तुतिः । वनेचरवाक्यरहस्यं ज्ञातमिति स्वयमपि तादृश एवेति हृदयम् ॥

स्तुवन्ति दुर्वीमभिधेयसंपदं विशुद्धिमुक्तेरपरे विपश्चितः ।
इति स्थितायां प्रतिपूरुषं रुचौ सुदुर्लभाः सर्वमनोरमा गिरः ॥५॥

स्तुवन्तीति ॥ किं च । केचिदुर्वीमभिधेयसंपदमर्थसंपत्तिं स्तुवन्ति । अपरे विपश्चित उक्तेः शब्दस्य विशुद्धिं साधुत्वं स्तुवन्ति । इति प्रतिपूरुषं रुचौ प्रीतौ स्थितायां व्यवस्थितायां सर्वमनोरमाः सर्वेषां शब्दार्थरुचीनां पुंसां मनोरमा गिरः सुदुर्लभाः । त्वद्गिरस्तु सर्वमनोरमा उक्तसर्वगुणसंपन्नेति भावः ॥

समस्त संपादयता गुणैरिमां त्वया समारोपितभार भारतीम् ।
प्रगल्भमात्मा धुरि धुर्य वाग्मिनां वनेचरेणापि सताधिरोपितः ॥६॥

समस्तेति ॥ धुरं वहतीति धुर्यस्तत्संबोधने हे धुर्य हे कार्यनिर्वाहक ॥ "धुरो यड्ढकौ" इति यत्प्रत्ययः ॥ अतएव समारोपितभार स्वामिना निहितसंध्यादिकार्यभार हे ॥ तदाह मनुः—"दूते संधिविपर्ययौ" इति ॥ इमां शान्तताविनयपोनीत्यादिकां भारतीं वाचं गुणैर्वैचित्र्यवर्णत्वादिभिः समस्त संपोह्य प्रगल्भं निर्भीकं यथा तथा संपादयता रचयता । व्याहरतेत्यर्थः । त्वया वनेचरेणापीत्यर्थः । सता । अपिशब्दो विरोधद्योतनार्थः । आत्मा स्वयं वाग्मिनां वाचोयुक्तिपटूनाम् ॥ "वाचोयुक्तिपटुर्वाग्मी" इत्यमरः ॥ "वाचो ग्मिनिः" इति मत्वर्थीयो ग्मिनिप्रत्ययः ॥ धुर्येऽधिरोपितः । आस्थापित इत्यर्थः ॥ "हः पोऽन्यतरस्याम्" इति पकारः ॥ अत्र मनुः—"वपुष्मान्वीतमीर्वाग्मी दूतो राज्ञः प्रशस्यते" इति ॥

वाग्मितामेवाह—

प्रयुज्य सामाचरितं विलोभनं भयं विभेदाय थियः प्रदर्शितम् ।
तथाभियुक्तं च शिलीमुखार्थिना यथेतरख्याज्यमिवावभासते ॥७॥

प्रयुज्येति ॥ शान्ततादिनयवोगीत्यादिना साम साम्यवत् ॥ "सामसाम्यवचने क्लबे" इत्यमरः ॥ प्रयुज्य नियुज्य विलोभनं प्रलोभनम् "मिनविहम्" इत्यादि-

१ प्रयुज्य.

Digitized by Google

नाचरितं संपादितम्। तथा त्रियो पुंल्लिंगभेदाय व्यामोहनार्थम् "शक्तिरर्थपतिषु" इत्यादिना भर्त्र मदर्पितम्। किं च। शिलीमुखार्थिना। न तु न्यायार्थिनेति भावः। त्वेति शेषः। "नाभियोक्तुम्" इत्यादिना तथाभियुक्तं कथितं यत्तेतरव्यावादन्यत्। अन्याय्यमित्यर्थः। न्याय्यं न्यायादनपेतमिवाचभासत इत्युपमा। अनेन वाग्मिनामग्रसरोऽसीति भावः॥

ततः किमत आह—

विरोधि सिद्धेरिति कर्तुमुद्यतः स वारितः किं भवता न भूपतिः।
हिते नियोज्यः खलु भूतिमिच्छता सहार्थनाशेन नृपोऽनुजीविना॥८

विरोधीति॥ किंतु सिद्धेः फलस्य विरोधि विघातकमितीदमसदारस्कन्दनरूपं कर्म कर्तुमुद्यतः स भूपतिर्महीपतिर्भवता। धुर्येणेति भावः। किं न वारितो निवर्तितः। निवारणे हेतुमाह— भूतिमिच्छतेहामुत्र च श्रेयोविना सह सहचरितावर्थनाशौ स्वार्थानर्थौ यस्य तेन सहार्थनाशेन। समानसुखदुःखेनेत्यर्थः। अनुजीविना भृत्येन नृपः स्वामी हिते नियोज्यो नियम्यः खलु। अन्यथा स्वामिद्रोहपातकी श्रेयसो भ्रष्टः स्यादिति भावः॥

तर्हि नो वाचः क्व गताः। किमत्र वा न्याय्यम्। तत्राह—

ध्रुवं प्रणाशः प्रहितस्य पत्त्रिणः शिलोच्चये तस्य विमार्गणं नयः।
न युक्तमत्रार्यजनातिलङ्घनं दिशत्यपायं हि सतामतिक्रमः॥ ९॥

ध्रुवमिति॥ प्रहितस्य प्रयुक्तस्य पत्त्रिणः शरस्य प्रणाशोऽदर्शनं ध्रुवं निश्चितम्। प्रहितभेदिनीति भावः। तस्य नहुषस्य पत्त्रिणः शिलोच्चये शैले॥ "अद्रिगोत्रगिरिप्रावाचलशैलशिलोच्चयाः" इत्यमरः॥ विमार्गणमन्वीक्षणं नयो न्याय्यः॥ "अन्वीक्षणं विचयनं मार्गणं मृगणा मृगः" इत्यमरः॥ अत्र विषये आर्यजनातिलङ्घनं सज्जनव्यतिक्रमो न युक्तम्। हि यस्मात्कारणात्सतामतिक्रमोऽपायमनर्थं दिशति ददाति॥

यदुक्तम् "हर्तुमर्हसि" इति तत्रोत्तरमाह—

अतीतसंख्या विहिता ममाग्निना शिलीमुखाः खाण्डवमत्तुमिच्छता।
अनाहतस्तामरसायकेष्वपि स्थिता कथं शैलजनाशुगे धृतिः॥१०॥

अतीतेति॥ खाण्डवमिन्द्रवनमत्तुं भक्षयितुमिच्छताग्निना ममातीतसंख्या असंख्याः शिलीमुखाः शरा विहिता दत्ताः॥ खाण्डवदाहेऽग्नयेऽष्टौ धनूंषि दानमुक्तं भारते॥ अतोऽमरसायकेष्वप्यनाहतस्तादररहितस्त्वं॥ भावे क्तः। ततो नञा बहुव्रीहिः॥ मम

१ विमर्दनम्. २ आयुधं.

Digitized by Google

कथं शैलजनाथुगे किरातवाणे धृतिरास्था स्थिता । न कथंचिदित्यर्थः । अतो नापहारश्लहा कार्येत्यर्थः ॥

यदुक्तम् "स्मर्यते तनुभृताम्" इत्यादिना सदाचारः प्रमाणमिति तन्नोचरमाह—

यदि प्रमाणीकृतमार्यचेष्टितं किमित्यदोषेण तिरस्कृता वयम् ।
अयातपूर्वा परिवादगोचरं सतां हि वाणी गुणमेव भाषते ॥ ११ ॥

यदीति ॥ आर्यचेष्टितं सच्चरितं प्रमाणीकृतं यदि । साधुत्वेनाङ्गीकृतं यदीत्यर्थः । तर्ह्यदोषेण दोषाभावेऽपि ॥ "क्वचित्प्रसज्य प्रतिषेधेऽपि नञ्समासः" इति भाष्यकारः । उपलक्षणे तृतीया ॥ वयं किमिति तिरस्कृताः । न युक्तमित्यर्थः । हि यस्मात्परिवादगोचरं परनिन्दास्पदमयातपूर्वा सतां वाणी गुणमेव भाषते न दोषम् । अतस्ते गुणदोषभाषिणो न सदाचारप्रामाण्यबुद्धिरिति भावः ॥ पूर्वं न यातेत्ययातपूर्वा । सुप्सुपेति समासः । परस्वास्तर्वनाम्नो निष्ठायाः पूर्वनिपातः । "स्त्रियाः पुंवत्" इत्यादिना पुंवद्भावः पूर्वसिद्धत्वा च ॥ अर्थान्तरन्यासः ॥

नन्वसत्यपि परदुद्धिः कथं दुष्टेति निश्चीयते । तत्राह—

गुणापवादेन तदन्यरोपणाद्गुणाधिरूढस्य समञ्जसं जनम् ।
द्विधेव कृत्वा हृदयं निगूहतः स्फुरन्मसाधोर्विवृणोति वागसिः ॥१२॥

गुणेति ॥ गुणापवादेन विद्यमानगुणापह्नवेन तदन्यरोपणात्तस्माद्गुणादन्यस्य दोषस्याविद्यमानस्यैवारोपणाच्च समञ्जसं जनं सुजनं गुणाधिरूढस्यातिशयमाक्रम्य स्थितस्य । अभिनिविष्टस्येत्यर्थः ॥ कर्तरि क्तः ॥ निगूहतो हृदयं संदृब्धतोऽप्यसाधोरन्यस्य हृदयम् ॥ कर्म ॥ स्फुरन्मिलत्सन्धागेवासिर्द्विधा कृत्वा भिन्त्वेव विवृणोति । दुष्टया वाचैवेतःपूर्विकाया बुद्धेरपि दौष्ठ्यमनुमीयत इति भावः ॥ वागसिरित्यत्र रूपकं द्विधाकरणरूपकसाधकम् ॥

यदुक्तम् "अभ्यधायि" इति तन्नोचरमाह—

वनाश्रयाः कस्य मृगाः परिग्रहाः शृणाति यस्तान्प्रसभेन तस्य ते ।
प्रहीयतामत्र नृपेण मानिता न मानिता चास्ति भवन्ति च श्रियः ॥१३

वनेति ॥ वनाश्रया अतएव मृगाः कस्य परिग्रहाः । न कस्यापीत्यर्थः । किंतु यस्तान्मृगान्प्रसभेन बलात्कारेण शृणाति हिनस्ति ॥ "शृ हिंसायाम्" इति धातोर्लट् ॥ ते मृगास्तस्य हन्तुः परिग्रहाः परिग्राह्याः । हन्ता चाहमेवेति भावः ॥ नन्वेवमभिमानाभावस्य सत्त्वमित्याशङ्क्याह— अत्र मृगे नृपेण मानिता ममेत्यभिमानिता महीयतां त्यज्यताम् । कुत इत्याशङ्क्याह—नेति ॥ मानिता चास्ति।

१ अदोषेऽपि. २ रोपणैः. ३ विरुद्धस्य.

Digitized by Google

शिवः स्वामि च भवन्तीति न । किंतु न भवन्त्येव । सत्यामभिमानितायामित्यर्थः । अभिमानमात्रेण स्तवेऽतिप्रसङ्गादिति भावः ॥

"यदुमिच्छसि पिदन्" इत्यादिना यन्निष्कारणमवधीरित्युपालब्धं तत्रोत्तरमाह—

न वर्म कस्मैचिदपि प्रदीयतामिति व्रतं मे विहितं महर्षिणा ।
जिघांसुरस्मान्निहतो मया मृगो व्रताभिरक्षा हि सतामलंक्रिया १४

नेति ॥ कस्मैचिदपि वर्म न प्रदीयतामित्येवं व्रतं महर्षिणा व्यासेन मे मम विहितम् । उपदिष्टमित्यर्थः । अकस्मात्कारणाज्जिघांसुर्हन्तुमिच्छुरापतन्नभिधावन्नर्थं मृगो मया निहतः । हि यस्माद्व्रताभिरक्षा सतामलंक्रिया । न तु दोषः । अत आत्मरक्षणार्थमस्य वधः । न निष्कारणमित्यर्थः ॥

"दुर्वचं तत्" इत्यादिना यत्संजातं बन्धुत्वमुक्तं तमाचष्टे—

मृगान्विनिघ्नन्मृगयुः स्वहेतुना कृतोपकारः कथमिच्छतां तपः ।
कृपेति चेदस्तु मृगः क्षतः क्षणादनेन पूर्वं न मयेति का गतिः ॥१५॥

मृगानिति ॥ स्वमात्मैव हेतुस्तेन स्वहेतुना । स्वार्थमित्यर्थः ॥ "सर्वनाम्नस्तृतीया च" इति तृतीया ॥ मृगान्विनिघ्नन्महरन् । मृगान्यातीति मृगयुर्व्याधः ॥ "मृगयुर्व्याधश्च" इत्यौणादिको युप्रत्ययान्तो निपातः ॥ "व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः" इत्यमरः ॥ तप इच्छतां तपस्विनां कथं कृतोपकारः । न कथंचिदित्यर्थः । अथ कृपेति चेत् । व्याधस्यापीति शेषः । अस्तु । किं शुष्ककलहेनेति भावः ॥ परंतु यदुक्तम् "निघ्नतः परनिर्वादितम्" इत्यादिना तस्य प्रथममपहर्तृत्वं तदयुक्तमित्याह—मृगः क्षणात्क्षतः । आवाभ्यां युगपदेव विद्ध इत्यर्थः । एवं सत्यनेन तूष्णीमेव पूर्वं हतो मया तु नेत्थम् का गतिः किं प्रमाणम् । पौर्वापर्यस्य दुर्लक्ष्यत्वादिति भावः । तथा च यदुक्तम् "व्रीडितव्यम्" इत्युपालम्भस्तस्यैव किं न स्यादिति भावः ॥

पूर्वं "कृपेति चेदस्तु" इत्युक्तम् । संप्रति तदप्यसहमान आह—

अनायुधे सत्त्वजिघांसिते मुनौ कृपेति वृत्तिर्महतामकृत्रिमा ।
शरासनं बिभ्रति सज्यसायकं कृतानुकम्पः स कथं प्रतीयते ॥ १६ ॥

अनायुध इति ॥ अनायुधे निरायुधे सत्त्वेन केनचित्प्राणिना जिघांसिते हन्तुमिच्छे ॥ हन्तेः सन्नन्तात्कर्मणि क्तः ॥ मुनौ विषये कृपेति वृत्तिर्व्यवहारो महतां महात्मनामकृत्रिमाकपटा । सह ज्यया सज्यः सायको यस्मिंस्तच्छरासनं धनुर्बिभ्रति दधति मयि स नृपः कथं कृतानुकम्पो मया प्रतीयते ज्ञायते ॥ इणः कर्मणि क्त ॥ अस्मिन्न कृपा विहिता । न तु क्षम इत्यर्थः ॥

१ अप्यवम्; तपम्. २ तवेति.

Digitized by Google

अथ कृपामभ्युपगम्याह—

अथो शरस्तेन मदर्थमुज्झितः फलं च तस्य प्रतिकायसाधनम् ।
अविक्षते तत्र मयात्मसात्कृते कृतार्थता नन्वधिका चमूपतेः ॥ १७॥

अथो इति ॥ अथो मम्रे ॥ "मङ्गलानन्तरारम्भप्रश्नकार्येष्वथो अथ" इत्यमरः ॥ तेन नृपेण मदर्थं यथा तथा ॥ अर्थेन सह नित्यसमासः ॥ शर उज्झितस्त्यक्तस्तस्य फलं च प्रतिकायस्य प्रतिपक्षस्य साधनं वधः ॥ "साधनं निर्वृतौ मेढ्रे सैन्ये सिद्धौ वधे गतौ" इति विश्वः ॥ अविक्षतेऽक्षण्डिते तत्र तस्मिन्फले मयात्मसात्कृते स्वाधीनीकृते सति ॥ "तदधीनवचने" इति सातिप्रत्ययः ॥ चमूपतेरधिका कृतार्थता साफल्यं नन्वेव खलु । स्वायुधस्य परप्राणघातुकवधपात्रप्रतिपादनार्थकक्लेशया सिद्धेरित्यर्थः । तथाप्यर्थं शरस्तोभ इति कृपालुतया मूलान्यपि निकृन्ततीति भावः ॥

"मार्गणैरथ तव प्रयोजनम्" इत्यादिना यदुक्तं तन्निराचष्टे—

यदात्थ कार्मं भवता स याच्यतामिति क्षमं नैतदनल्पचेतसाम् ।
कथं प्रसह्याहरणैषिणां प्रियाः परावनत्या मलिनीकृताः श्रियः॥१८॥

यदिति ॥ स नृपः कार्मं भवता याच्यतामिति यदात्थ । मामिति शेषः । एतदनल्पचेतसां मनस्विनां न क्षमं न युक्तम् । कुतः । प्रसह्य बलादाहरणैषिणामाहर्तुमिच्छूनाम् । "क्षमियस्य विजितम्" इति स्मरणादिति भावः । परावनत्या याच्यादिभ्येन मलिनीकृताः प्रियः कथं प्रियाः । न कथंचिदित्यर्थः ॥

अथ परेङ्गितज्ञतादृष्ट्या भयं दर्शयति—

अभूतमासज्य विरुद्धमीहितं बलादलभ्यं तव लिप्सते नृपः ।
विजानतोऽपि ह्यनयस्य रौद्रतां भवत्यपाये परिमोहिनी मतिः॥१९॥

अभूतमिति ॥ तव नृपोऽभूतमयुक्तमासज्य । मिथ्याभियुज्येत्यर्थः ॥ "युक्ते ह्यादाहृते भूतम्" इत्यमरः ॥ अलभ्यं लब्धुमशक्यं विरुद्धं विपरीतफलकमीहितं मनोरथं बलाल्लिप्सते लब्धुमिच्छति ॥ न चैतदाश्चर्यमित्याह—हि यस्मादनयस्य दुर्नयस्य रौद्रतां भयंकरत्वं विजानतोऽपि पुरुषस्य मतिर्बुद्धिरपाये विनाशकाले परिमोहिनी भवति । परिमुह्यतीति परिमोहिनी ॥ संपृचादिसूत्रेण ताच्छील्ये घिनुण्प्रत्ययः॥ तथा चोक्तम्—"विनिर्मितः केन न दृष्टपूर्वो हेम्नः कुरङ्गो न च कुत्र वार्ता । तथापि तृष्णा रघुनन्दनस्य विनाशकाले विपरीतबुद्धिः" इति । तस्माद्विनाशकाले बलाद्विपरीतबुद्धिर्भवतीति भावः ॥

१ अनल्पचेतसाम्. २ ईरितम्.

Digitized by Google

अथ सर्वथा ऊह्यस्ते शरस्तति किमनेन। मृदु विभज्यं याच्यतां शरोऽन्यद्देत्याह—

असिः शरा वर्म धनुश्च नोच्चकैर्विविच्य किं प्रार्थितमीश्वरेण ते।
अथास्ति शक्तिः कृतमेव याच्ञया न दूषितः शक्तिमतां स्वयंग्रहः॥ २०

असिरिति ॥ असिः खड्गः शरा वर्म कवचमुच्चकैरुत्कृष्टं धनुश्च ते तवेश्वरेण स्वामिना विविच्यैकैकशो विभज्य किं न प्रार्थितं न याचितम्। येन प्रयोजनं तदास्वामीति भावः ॥ नपुंसकैकशेषः ॥ अथास्य वीराभिमानिनो नृपस्य शक्तिरस्ति। चेदिति शेषः। याच्ञया कृतमेवालमेव। साध्यावाद्य याचितव्यमेवेत्यर्थः ॥ गम्यमानक्रियापेक्षया करणत्वात्तृतीयेत्युक्तं प्राक् ॥ कृतमिति निपेधार्थमव्ययम्। यतः शक्तिमतां स्वयंग्रहो बलाद्ग्रहणं न दूषितः। किंतु भूषणमेव वीराणामिति भावः। क्षत्रियाणां प्रसह्य विलोपहरणं न दूषितमिति भारतोक्तम् ॥

"राघवप्लवगराजयोरिव" इत्यादिनोपदिष्टं सख्यं प्रत्याचष्टे—

सखा स युक्तः कथितः कथं त्वया यदृच्छयासूयति यस्तपस्यते।
गुणार्जनोच्छ्रायविरुद्धबुद्धयः प्रकृत्यमित्रा हि सतामसाधवः ॥२१॥

सखेति ॥ स नृपः कथं त्वया युक्तो योग्यः सखा कथितः। न कथंचित्कथनीय इत्यर्थः। कुतः। यो नृपस्तपस्यते तपश्चरते। अनपराधिन इत्यर्थः ॥ "कृधद्रह—" इत्यादिना संप्रदानत्वाच्चतुर्थी ॥ यदृच्छया स्वैरवृत्त्या ॥ "यदृच्छा स्वैरिता" इत्यमरः ॥ असूयत्यसूयां करोति ॥ "असूया तु दोषारोपो गुणेष्वपि" इत्यमरः ॥ प्रस्तुतमनुरेवायमित्याह—हि यस्माद्गुणानामर्जने य उच्छ्राय उत्कर्षस्तस्य विरुद्धा विमुखा बुद्धिर्येषां ते तथासाधवो दुष्टाः सतां सज्जनानां प्रकृत्यमित्राः प्रकृत्या शत्रवः ॥ "द्विट्विपक्षाहितामित्रदस्युशात्रवशत्रवः" इत्यमरः ॥

हीनजातित्वात्सख्यानर्हः स इत्याह—

वयं क्व वर्णाश्रमरक्षणोचिताः क्व जातिहीना मृगजीवितच्छिदः।
सहोपकृष्टैर्महतां न संगतं भवन्ति गोमायुसखा न दन्तिनः ॥२२॥

वयमिति ॥ वर्णाश्रमरक्षणोचिता विशुद्धक्षत्रियो वयं राजानः क्व। जातिहीना मृगजीवितच्छिदो हिंसाजीविनो व्याधाः क्व। फलितमाह—सहोपकृष्टैरुत्कृष्टैरित्यस्या जात्या हृत्या च निकृष्टैः सह महतां जात्या हृत्या चोत्कृष्टानां संगतं सख्यं न। घटत इति शेषः। तथा हि। दन्तिनो गजा गोमायूनां शृगालानां सखायो गोमायुसखा न भवन्ति ॥ "स्त्रियां शिवा भूरिमायगोमायुशृगधूर्तकाः। शृगालरवभक्षक्रोष्टुफेरुफेरवजम्बुकाः" इत्यमरः ॥ अत्र विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥

१ विपृत्य. २ लक्षितः. ३ पालनोचिताः. ४ अवकृष्टैः.

Digitized by Google

नीचसख्यं कथमधिक्षिप्यत इति चेदत्राह—

परोऽवजानाति यदज्ञताजडस्तदुन्नतानां न विहन्ति धीरताम् ।
समानवीर्यान्वयपौरुषेषु यः करोत्यतिक्रान्तिमसौ तिरस्क्रिया॥२३॥

पर इति ॥ अज्ञताजडो मोहान्धः परोऽवजानाति यत्तदवज्ञानमुन्नतानां महतां धीरतां न विहन्ति। न विकारं जनयतीत्यर्थः। क्रोष्टुव सिंहस्येति भावः। किंतु समानानि तुल्यानि वीर्यान्वयपौरुषाणि शक्तिकुलविक्रमा येषां तेषु मध्ये ॥ निर्धारणे सप्तमी ॥ यः। कश्चिदित्यर्थः। अतिक्रान्तिमतिक्रमं करोति चेदसौ सदृशजनातिक्रमस्तिरस्क्रिया तिरस्कारः। यथा सिंहे सिंहस्येति भावः ॥

तर्हि नीचे कीदृशी इत्यिरिस्याशङ्क्य सोपपत्तिकमाह—

यदा विगृह्णाति हतं तदा यशः करोति मैत्रीमथ दूषिता गुणाः ।
स्थितिं समीक्ष्योभयथा परीक्षकः करोत्यवज्ञोपहतं पृथग्जनम्॥२४॥

यदेति ॥ यदा विगृह्णाति विरुणद्धि। पृथग्जनेनेति शेषः। तदा यशो हतं भवेत्। अथ मैत्रीं करोति तदा गुणा दूषिताः। भवेयुरिति शेषः। इत्युभयथा स्थितिं समीक्ष्य प्रवर्त्य विगृह्य परीक्षको विवेचकः पृथग्जनं नीचजनमवज्ञयानादरेणोपहतं तिरस्कृतं करोति। उपेक्षत इत्यर्थः ॥

उपसंहरन्नाह—

मया मृगान्हन्तुरनेन हेतुना विरुद्धमाक्षेपवचस्तितिक्षितम् ।
शरार्थमेष्यत्यथ लप्स्यते गतिं शिरोमणिं दृष्टिविषाज्जिघृक्षतः॥२५॥

मयेति ॥ अनेन हेतुना संधिविग्रहानर्हत्वेन कारणेन मया मृगान्हन्तुर्व्याधस्य संबन्धि ॥ इन्तेस्तृन्प्रत्ययः। अतएव "न लोक-" इत्यादिना षष्ठीप्रतिषेधः ॥ विरुद्धमतिपरुषमाक्षेपवचस्तिरस्कारवचनं तितिक्षितं सोढम् ॥ नन्वेतत्सख्यानङ्गीकारे बलाच्छरं ग्रहीष्यतीत्याशङ्क्याह— शरेति ॥ अथ शरार्थमेष्यति दृष्टौ विषं यस्य तस्माद्दृष्टिविषात्सर्पविशेषाच्छिरोमणिं जिघृक्षतो ग्रहीतुमिच्छतो गतिं दशां लप्स्यते प्राप्स्यति ॥

इतीरिताकूतमनीलवाजिनं जयाय दूतः प्रेतितर्ज्य तेजसा ।
ययौ समीपं भ्रजिनीमुपेयुषः प्रसन्नरूपस्य विरूपचक्षुषः ॥ २६ ॥

इतीति ॥ इतीत्थमीरिताकूतमुक्ताभिप्रायमनीलवाजिनं श्वेताश्वमर्जुनं दूतो जयाय तेजसा प्रतापेन प्रेतितर्ज्य। अस्मादित्वा क्व गमिष्यसीति भीषयित्वेत्यर्थः। भ-

१ प्रतीत. २ प्रतिभर्त्सयं.

Digitized by Google

जिनीषुपेयुषः सेनासंगतस्य प्रसन्नरूपस्य । अर्जुनं प्रतीति शेषः । विरूपचक्षुषस्तस्य-इस्य समीपं ययौ ॥

ततोऽपवादेन पताकिनीपतेश्चचाल निर्ह्रादवती महाचमूः ।
युगान्तवाताभिहतेव कुर्वती निनादमम्भोनिधिवीचिसंहतिः ॥२७॥

तत इति ॥ ततः पताकिनीपतेः सेनापतेरपवादेनादेशेन ॥ " अपवादोऽपि आदेशः " इति सज्जनः ॥ निर्ह्रादवती शब्दवती महाचमूः सेना । युगान्तवातैरभिहतात एव निनादं कुर्वत्यम्भोनिधिवीचिसंहतिरर्णवोर्मिसमूह इव । चचाल ॥

रणाय जैत्रः प्रदिशन्निव त्वरां तरङ्गितालम्बितकेतुसंततिः ।
पुरो बलानां सघनाम्बुशीकरः शनैः प्रतस्थे सुरभिः समीरणः ॥२८॥

रणायेति ॥ जैत्रेव जैत्रो जयनशीलः । अनुकूल इत्यर्थः ॥ जयतेस्तृजन्तात्मत्रादित्वात्स्वार्थेऽण्प्रत्ययः ॥ तरङ्गितं संजाततरङ्गं यथा तथालम्बिता अवस्थिताः केतुसंततयो येन सः । सह घनैः साम्द्रैरम्बुशीकरैः सघनाम्बुशीकरः सुरभिः समीरणो वायू रणाय त्वरां प्रदिशन्निव त्वरयन्निव बलानां सैन्यानां पुरोऽग्रे शनैः प्रतस्थे प्रस्थितः । ववावित्यर्थः ॥

जयारवक्ष्वेडितनादमूर्च्छितः शरासनज्यातलवारणध्वनिः ।
असंभवन्भूधरराजकुक्षिषु प्रकम्पयन्नामवतस्तरे दिशः ॥ २९ ॥

जयेति ॥ जयारवैर्वन्दिनां जयजयेतिशब्दैः क्ष्वेडितनादैः सिंहनादैश्च मूर्च्छितो वर्धितः शरासनज्यानां धनुर्गुणानां तलवारणानां च ध्वनिर्भूधरराजकुक्षिषु गिरिगुहास्वसंभवन्नमान् । अवकाशमलभमान इत्यर्थः । अत एव गां भुवं प्रकम्पयन् । एतेन बलानां बाहुल्यमुक्तम् । दिशोऽवतस्तरे व्याप्नोत् ॥ अतश्च संयोगादेर्गुणः ॥ अत्र मूर्च्छापदार्थस्य विशेषणगतासंभवनहेतुत्वात्काव्यलिङ्गम् । रूपकं तु गिरिकुक्षिरूपापेक्षया ध्वनेराधेयत्वाधिक्योक्तेरधिकालंकारश्च । तेष्वधेयसंभवमिति न्यायकं विनोत्थाप्यमानोपात्तमूर्च्छागुणनिमित्ता प्रतीयमाना क्रियोत्प्रेक्षा । तैरङ्गाङ्गिभावेन संकीर्यत इति संकरः ॥

निशातरौद्रेषु विकाशतां गतैः प्रदीपयद्भिः ककुभामिवान्तरम् ।
वनेसदां हेतिषु भिन्नविग्रहैर्विपुस्फुरे रश्मिमतो मरीचिभिः ॥३०॥

निशातेति ॥ निशातास्तीक्ष्णा अतएव रौद्रा भीषणाश्च ये तेषु निशातरौद्रेषु ॥ विशेष्यविशेषणयोरन्यतरविशेष्यस्यविवक्षायामिहत्वाद्विशेषणसमासः ॥ वने सीद-

१ नेतुः. २ विरसंहतिः. ३ संप्रदेः. ४ रश्मिवतः.

न्तीति वनेसदां वनेचराणाम् ॥ "सत्सूद्विष–" इत्यादिना क्विप् । "तत्पुरुषे कृति बहुलम्" इत्यलुक् ॥ हेतिष्वायुधेषु ॥ "हेतिः शक्तेऽपि पुंस्त्रियोः" इति केशवः ॥ भिन्नविग्रहैः संक्रान्तमूर्तिभिरत एव विकाशतां विस्तरवत्तां गतैरत एव कक्षभां दिशामन्तरं प्रदीपयद्भिः प्रज्वालयद्भिरिव स्थितैरित्युत्प्रेक्षा । रश्मिमतः सूर्यस्य ॥ "भादुपधायाश्च मतोर्वोऽयवादिभ्यः" इति मतुपो मकारस्य न वकारः ॥ मरीचिभिः करैः ॥ "भानुः करो मरीचिः स्त्रीपुंसयोः" इत्यमरः ॥ विपुलस्फुरे बभासे ॥ स्फुरतेर्भावे क्विप् ॥

उदूढवक्षःस्थगितैकदिग्भुखो विकृष्टविस्फारितचापमण्डलः ।
वितत्य पक्षद्वयमायतं बभौ विभुर्गुणानामुपरीव मध्यगः ॥ २१ ॥

उदूढेति ॥ उदूढेनोन्नतेन वक्षसा स्थगितमाच्छादितमेकमेकतरं दिग्भुखं येन सः । विकृष्टमाकृष्टमत एव विस्फारितं निर्घोषितं चापमण्डलं येन स विभुः शिवः । आयतं विस्तृतं पक्षद्वयं पार्श्वद्वयं वितत्य स्वमहिम्ना व्याप्य ॥ "पक्षः साध्यगरुत्पार्श्वसहायबलभित्षिषु" इति वैजयन्ती ॥ गुणानां मध्यगो मध्यस्थोऽप्युपरि स्थित इव बभौ । सर्वोन्नतत्वाद्यथा लक्षित इत्यर्थः ॥

सुगेषु दुर्गेषु च तुल्यविक्रमैर्जवादहंपूर्विकया यियासुभिः ।
गणैरविच्छेदनिरुद्धमाबभौ वनं निरुच्छ्वासमिवाकुलाकुलम् ॥ २२ ॥

सुगेष्विति ॥ सुखेन दुःखेन च गच्छन्त्येष्विति सुगेषु सुगमेषु दुर्गेषु दुर्गमेषु च। समानक्रमदेशेष्वित्यर्थः ॥ सुदुरोरधिकरणार्थे डो वक्तव्यः । अतएव टिलोपः ॥ तुल्यविक्रमैर्जवादात्समसंचारैर्जवादहंपूर्विकयाहमहमिकया ॥ "अहंपूर्वमहंपूर्वमित्यहंपूर्विका स्त्रियाम्" इत्यमरः ॥ यियासुभिर्यातुमिच्छुभिः ॥ यातेः सन्नन्तादुप्रत्ययः ॥ गणैः प्रमथैः ॥ मनोज्ञादित्वादुञ्प्रत्ययः । पृषोदरादित्वादुच्चभावः ॥ "गणाः प्रमथसंघाताः" इति वैजयन्ती ॥ अविच्छेदेन निरुद्धमत एवाकुलाकुलमाकुलमकारम् ॥ "मकारे गुणवचनस्य" इति द्विर्भावः ॥ वनं निरुच्छ्वासं निरुद्धप्राणमिवाबभावित्युत्प्रेक्षा ॥

तिरोहितध्वग्रनिकुञ्जरोधसः समश्नुवानाः सहसातिरिक्तताम् ।
किरातसैन्यैरपिधाय रेचिता भुवः क्षणं निम्नतयेव भेजिरे ॥२३॥

तिरोहितेति ॥ किरातसैन्यैस्तिरोहितानि छन्नानि ध्वग्राणि कुञ्जरोधांसि गर्तकुञ्जवर्त्मानि यासां ताः । अत एव भुवः प्रदेशाः सहसातिरिक्ततामुच्चानतां समश्नुवाना आप्नुवन्तः । अपिधायाच्छाद्य रेचिता रिक्तीकृता भुक्ताः क्षणं निम्नतया गाम्भी-

१ वनेषु.

Digitized by Google

वेग श्रेजिर इव शाखा इवेत्युत्प्रेक्षा । सैन्यैर्या भुवो व्याशाखा उद्यानाः प्रतीयन्ते । तैर्मुक्ताखा एव निम्नाः प्रतीयन्त इत्यर्थः ॥

पृथूरुपर्यस्तबृहल्लतातर्तिर्जवानिलाघूर्णितशालचन्दना ।
गणाधिपानां परितः प्रसारिणी वनान्यवाप्योव चकार संहतिः॥२४॥

पृथ्विति ॥ पृथुभिर्विशालैरूर्ध्वमिः पर्यस्ताः क्षिप्ता बृहत्यो लतातततयो यया सा जवानिलेन वेगमारुतेनाघूर्णिता भ्रमिताः शाखाः सर्जतरवश्चन्दनानि च यया सा ॥ "शाकारहुक्षयोः शाखः शाखः सर्जतरूः स्मृतः" इति शाश्वतः ॥ परितः सर्वत्र प्रसारिणी प्रसरणशीला गणाधिपानां संहतिः समूहो वनान्यवाप्यि न्युब्जानीव नीचानीव चकारेत्युत्प्रेक्षा ॥ अवाप्यस्त्र्योभवति ॥ अवपूर्वादप्यतेः किप् ॥ "स्यादवाप्यस्त्र्योशुल्वः" इत्यमरः ॥

अथाष्टभिः श्लोकैरर्जुनं विघ्नसन्गणानां तदभियोगमाह—तत इत्यादिना ॥

ततः सदर्पं प्रतनुं तपस्यया मदस्रुतिक्षामभिवैकवारणम् ।
परिज्वलन्तं निधनाय भूभृतां दहन्तमाशा इव जातवेदसम् ॥२५॥

ततः सदर्पं सगर्वं सान्तःसारं तपस्यया तपश्चर्यया ॥ तपस्यतेः क्यजन्तात्स्त्रियामप्रत्यये टाप् ॥ प्रतनुं कृशमत एव मदस्रुत्या मदक्षरणेन क्षामं कृशम् ॥ "क्षायो मः" इति निष्ठातकारस्य मकारः॥ एकवारणमेकाकिनं गजमिव स्थितमित्युपमा । पुनः । भूभृतां राज्ञां निधनाय नाशाय परिज्वलन्तं तेजस्विनमत एवाशा दिशो दहन्तं जातवेदसमग्निमिव स्थितमित्युपमालंकारः ॥ "कृपीटयोनिर्ज्वलनो जातवेदाः सप्तार्चिषः" इत्यमरः ॥

अनादरोपात्तधृतैकसायकं जयेऽनुकूले सुहृदीव सस्पृहम् ।
शनैरपूर्णप्रतिकारपेलवे निवेशयन्तं नयने बलोदधौ ॥ २६ ॥

अनादरेति ॥ पुनश्च । अनादरेणावगणनयोपात्तो निषङ्गादुद्धृतो धृतैकः सायको येन तं तथानुकूले सुहृदीव जये सस्पृहं जयमिच्छन्तमिवेत्यर्थः । पुनः । अपूर्णो न्यूनः प्रतिकारो बाणाहरणमस्त्यर्पणरूपो यस्य सः । अत एव पेलवो लघुस्त्वाच्चापूर्णप्रतिकारपेलवे बलोदधौ सेनासमुद्रे शनैरसंभ्रमेण नयने दृशौ निवेशयन्तमिति वीरस्वभावोक्तिः । बलमुदधिरिवेत्युपमासमासः ॥ "पेपवासवाहनाधिषु च" इत्युदकस्योदादेशः ॥

निषण्णमापत्प्रतिकारकारणे शरासने धैर्य इवानपायिनि ।
अलङ्घनीयं प्रकृतावपि स्थितं निवातनिष्कम्पमिवापगापतिम् २७

१ विदिषान्.

Digitized by Google

निपण्णमिति ॥ पुनश्च । आपदां प्रतिकारस्य कारणे साधनेऽनपायिनि स्थिरे शरासने एवंभूते धैर्ये इव निपण्णं स्थितं प्रकृतौ स्वभावे स्थितमपि । निर्विकारमपीत्यर्थः । अत एवालक्षनीयमनतिक्रमणीयमत एव निवातनिष्कम्पं वाताभावाभिधत्ते ॥ "निवातावाभयावातौ" इत्यमरः ॥ आपन्नामपतिं समुद्रमिव स्थितम् ॥

उपेयुषीं बिभ्रतमन्तकद्युतिं वधाददूरे पतितस्य दंष्ट्रिणः ।
पुरः समावेशितसत्पशुं द्विजैः पतिं पशूनामिव हूतमध्वरे ॥ ३८ ॥

उपेयुषीमिति ॥ पुनश्च । अदूरे समीपे पतितस्य दंष्ट्रिणो वराहस्य ॥ ग्रीष्मादिस्यादिनिमत्ययः ॥ वधादेतोरुपेयुषीं प्राप्तामन्तकस्येव यमस्येव द्युतिं छायां बिभ्रतं धारयन्तम् । तथा च द्विजैर्ब्राह्मणैरध्वरे यज्ञे ॥ "यज्ञः सवोऽध्वरो मखः" इत्यमरः ॥ हूतमाहूतं पुरोऽग्रे समावेशितः स्थापितः सत्पशुर्यज्ञीयपशुर्यस्य तं पशूनां पतिं रुद्रमिव स्थितम् ॥

निजेन नीतं विजितान्यगौरवं गभीरतां धैर्यगुणेन भूयसा ।
घनोदयेनेव घनोरुवीरुधा समन्धकारीकृतमुत्तमाचलम् ॥ ३९ ॥

निजेनेति ॥ पुनश्च । निजेन नैसर्गिकेन भूयसा बहुलेन धैर्यमेव गुणस्तेन विजितमन्येषां गौरवं गाम्भीर्यं यस्मिन्कर्मणि तथा गभीरतां दुरवगाहत्वं नीतम् । अत एव घनाः साम्द्रा उरवश्च महत्यो वीरुधो लताश्च यस्मिंस्तेन घनोरुवीरुधा घनोदयेनारण्यमादुर्भावेन समन्धकारीकृतं दुरवगाहीकृतमुत्तमाचलमिव स्थितम् ॥ समन्ततोऽन्धकारो यस्य स इति विग्रहः ॥

महर्षभस्कन्धमवूनकन्धरं बृहच्छिलावप्रघनेन वक्षसा ।
समुज्जिहीर्षुं जगतीं महाभरां महावराहं महतोऽर्णवादिव ॥ ४० ॥

महर्षभेति ॥ महर्षभस्य महाद्युपभस्य स्कन्ध इव स्कन्धावंसौ यस्य तम् ॥ उपमानपूर्वपदत्वादुत्तरस्कन्धलोपः ॥ "ऋषभो द्युतभो वृषः" इत्यमरः ॥ "स्कन्धो भुजशिरोंऽसोऽस्त्री" इत्यमरः ॥ अवूनकन्धरं स्थूलग्रीवम् ॥ "अथ ग्रीवायां शिरोधिः कन्धरेत्यपि" इत्यमरः ॥ बृहच्छिलावप्रं महाशिलातटं तद्वद्घनेन कठिनेन वक्षसोपलक्षितम् । महाभरां दुर्हरतिभारवतीं जगतीं महीं समुज्जिहीर्षुं दुष्टराजकार्णवात्समुद्धर्तुमिच्छुम् । अत एव महतोऽर्णवाज्जगतीं समुज्जिहीर्षुमुक्तावयवोपपत्तिविशिष्टं च महावराहमिव स्थितम् ॥ अर्थसाधर्म्यादियमुपमा न श्लेषः । शब्दसामसाधर्म्येण तस्य विधानादिति रहस्यम् ॥

१ पोत्रिणः. २ महच्छिला.

Digitized by Google

हरिन्मणिश्यामसुदग्रविग्रहं प्रकाशमानं परिभूय देहिनः ।
मनुष्यभावे पुरुषं पुरातनं स्थितं जलादर्श इवांशुमालिनम् ॥४१॥

हरिदिति ॥ पुनश्च । हरिन्मणिश्यामं मरकतमणिश्यामलसुदग्रविग्रहसुदारमूर्तिं देहिनः तत्त्वाभ्यभिभूय प्रकाशमानम् । जलमेवादर्शो मुकुरस्तस्मिन्नंशुमालिनं सूर्यमिव । मनुष्यभावे मनुष्यरूपे स्थितं पुरातनं पुरुषम् । यो बदरीतपोवननिवासी नारायणसहचरो नरो नाम स एवायमिति सर्वथः ॥

गुरुक्रियारम्भफलैरलंकृतं गतिं प्रतापस्य जगत्प्रमाथिनः ।
गणाः समासेदुरनीलवाजिनं तंपात्यये तोयघना घना इव ॥ ४२ ॥

गुरुभिरिति ॥ गुरुभिः क्रियारम्भाणां फलैरलंकृतम् । सफलकर्मारम्भमित्यर्थः । जगत्प्रमाथिनो जगद्विजयिनः प्रतापस्य तेजसो गतिं स्थानम् । अतोऽस्य बहूनामेकलक्ष्यत्वं च युज्यत इति संदर्भाभिप्रायः । पूर्वोक्तविशेषणविशिष्टमनीलवाजिनं श्वेताश्वमर्जुनं गणाः प्रमथादयस्तत्पराजये तोयघनास्तोयभरिताः । वार्षिका इत्यर्थः । घना मेघा इव । महाचलमिति शेषः । समासेदुरवापुरित्यर्थः ॥

यथास्वमाशंसितविक्रमाः पुरा मुनिप्रभावक्षततेजसः परे ।
ययुः क्षणादप्रतिपत्तिमूढतां महानुभावः प्रतिहन्ति पौरुषम् ॥४३॥

यथास्वमिति ॥ पुरा पूर्वं स्वस्वमनतिक्रम्य यथास्वमहमेनेनं जेष्यामीत्याशंसिताः काङ्क्षिताः कथिता वा विक्रमा यैस्ते परे शत्रवो मुनिप्रभावात्क्षततेजसो हतप्रभावाः सन्तः । क्षणात्प्रतिपत्तिमूढतां मोहान्धतां ययुः । तथा हि । महानुभावोऽतिप्रतापः पौरुषं पुरुषस्य चेष्टितं प्रतिहन्ति नाशयति ॥

ततः प्रजज्ञे सममेव तत्र तैरपेक्षितान्योन्यबलोपपत्तिभिः ।
महोदयानामपि संघवृत्तितां सहायसाध्याः प्रदिशन्ति सिद्धयः॥४४॥

तत इति ॥ तत एकैकस्याशक्तावपेक्षिता वाञ्छितान्योन्यबलोपपत्तिरन्योन्यशक्त्यवष्टम्भो यैस्तैस्तैः प्रमथैस्तत्रार्जुने ॥ क्रियाधारत्वात्तत्रापी ॥ सममेकपदेव प्रजज्ञे महत्तम् ॥ भावे क्विप् ॥ तथा हि । सहायसाध्याः सिद्धयः कार्यसिद्धयो महोदयानां महानुभावानामपि संघेन हस्तिव्यापारो येषां तेषां भावस्तत्ता तां संघहस्तितां संघूयकारितां प्रदिशन्ति । अतो गणानामपि संघूयकारित्वं न दोष इति भावः ॥

१ महाचलम्. २ दीनताम्. ३ महोदयेष्वोऽपि हि.

Digitized by Google

किरातसैन्याद्गुरुचापनोदिताः समं समुत्पेतुरुपात्तरंहसः ।
महावनाद्दुन्मनसः खगा इव प्रवृत्तपत्रध्वनयः शिलीमुखाः ॥ ४५ ॥

किरातेति ॥ गुरुभिर्बृहद्भिश्चापैर्नोदिताः प्रक्षिप्ता उपात्तरंहसः प्राप्तवेगाः प्रवृत्तपत्रध्वनयः संजातपक्षस्वनाः शिलीमुखा बाणाः । महावनाद्दुन्मनसः क्वापि गन्तुमुत्सुकान्यथोक्तविशेषणविशिष्टाश्च खगाः पक्षिण इव । किरातसैन्यात्सर्वं समन्ततः समुत्पेतुः ॥

गभीररन्ध्रेषु भृशं महीभृतः प्रतिस्वनैरुन्नमितेन सानुषु ।
धनुर्निनादेन जवादुपेयुषा विभिद्यमाना इव दध्वनुर्दिशः ॥ ४६ ॥

गभीरेति ॥ गभीररन्ध्रेषु गम्भीरगह्वरेषु महीभृतः सानुषु ये प्रतिस्वनास्तैर्भृशमुन्नमितेनोत्थापितेन दीर्घीकृतेन जवादुपेयुषा प्राप्तवता धनुषो निनादेन दिशो विभिद्यमाना विदीर्यमाणा इव दध्वनुर्भीमं चक्रुः ॥

विधूनयन्ती गहनानि भूरुहां तिरोहितोपान्तनभोदिगन्तरा ।
महीयसी वृष्टिरिवानिलेरिता रवं वितेने गणमार्गणावलिः ॥ ४७ ॥

विधूनयन्तीति ॥ भूरुहां गहनानि वनानि ॥ "अटव्यरण्यं विपिनं गहनं काननं वनम्" इत्यमरः ॥ विधूनयन्ती कम्पयन्ती तिरोहितानि छादितान्युपान्तानि प्रान्तानि नभोऽन्तरीक्षं दिगन्तराणि च यया सा गणमार्गणावलिः प्रमथशरसंहतिरनिलेन वायुनेरिता प्रेरिता महीयसी वृष्टिरिव रवं वितेने विस्तारयामास ॥

त्रयीमुदूनामनिलाशिनः सतः प्रयाति पोषं वपुषि प्रहृष्यतः ।
रणाय जिष्णोर्विदुषेव सत्वरं घनत्वमीये शिथिलेन वर्मणा ॥ ४८ ॥

त्रयीमिति ॥ ऋतूनां त्रयीं पञ्चमासान् ॥ कालाध्वनोरत्यन्तसंयोगे द्वितीया ॥ अनिलाशिनो वायुभक्षकस्य । कृशस्येत्यर्थः । सतस्तथापि रणाय रणं कर्तुं प्रहृष्यत उत्साहमानस्य ॥ "क्रियार्था-" इत्यादिना चतुर्थी ॥ जिष्णोरर्जुनस्य वपुषि पोषपुष्टिं प्रयाति भजति सति शिथिलेन । प्रथममिति शेषः । वर्मणा कवचेन विदुषेवाज्ञस्येव । अन्यथानुपपत्तेरिति भावः ॥ इणः कर्मणि क्विप् ॥

पतत्सु शस्त्रेषु वितत्य रोदसी समन्ततस्तस्य धनुर्धुनूषतः ।
सरोषमुल्केव पपात भीषणा बलेऽरि दृष्टिर्विनिपातदर्शिनी ॥ ४९ ॥

१ उन्नमितेन. २ विभज्यमाना. ३ वाहिनी.

Digitized by Google

पतस्त्विति ॥ शब्देषु रोदसी द्यावापृथिव्यौ ॥ "द्यावापृथिव्यौ रोदस्यौ" इत्यमरः ॥ समन्ततो वितत्य व्याप्य पतत्सु सत्सु धनुर्दुधूपतः कम्पितुमिच्छतः । आरुकालवत इत्यर्थः ॥ धूञः सन्नन्ताच्छतृप्रत्ययः ॥ "स्वरतिसूतिसूयतिधूञूदितो वा" इति विकल्पादिडभावः ॥ तस्यार्जुनस्य संबन्धिनी । भीषयत इति भीषणा ॥ बन्धादित्वाल्लुपुः ॥ विनिपातसंसिनी विनाशसूचिका दृष्टिरुक्तविशेषणोल्केव बलेषु मरोपं यथा तथा पपात ॥

दिशः समूहन्निव विक्षिपन्निव प्रभां रवेराकुलयन्निवानिलम् ।
मुनिश्चचाल क्षयकालदारुणः क्षितिं सशैलां चलयन्निवेषुभिः॥५०॥

दिश इति ॥ क्षयकालः कल्पान्तकाल इव ॥ "संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि" इत्यमरः ॥ दारुणो रौद्रो मुनिरर्जुन इषुभिर्बाणैर्दिशः समूहन्निवैकत्र समाहरन्निव । अन्यथा तासां पारदर्शनं न स्यादिति भावः । रवेः प्रभां विक्षिपन्निवापः।क्षिपन्निव । अन्यथा सा कथं न दृश्यत इति भावः । तथानिलं वायुमाकुलयन्निषुभिरन्तराल आपूर्णयन्निव । तस्य तथा गतिविघातादिति भावः ।सशैलां क्षितिं चलयन्निव कम्पयन्निव । तथा संक्षोभादिति भावः । चचाल गतिमकरोत् ॥ सर्वत्रेवशब्द उत्प्रेक्षायाम् ॥

विमुक्तमाशंसितशत्रुनिर्जयैरनेकमेकावसरं वनेचरैः ।
सं निर्जघानायुधमन्तरा शरैः क्रियाफलं काल इवातिपातितः॥५१॥

विमुक्तमिति ॥ आशंसितः काङ्क्षितः शत्रुनिर्जयो यैस्तैः । अहमहमिकया शत्रुं विजिगीषद्भिरित्यर्थः । वनेचरैरेकावसरं समकालम् ॥ अत्यन्तसंयोगे द्वितीया ॥ विमुक्तं प्रयुक्तमनेकमायुधम् ॥ जातावेकवचनम् ॥ सोऽर्जुनः क्रियाफलमातपातिक्रान्तः काल इव । अतिक्रान्तकालस्य कर्मणो निष्फलत्वादिति भावः । अन्तरा मध्ये शरैर्निजघान ॥

गतैः परेषामविभावनीयतां निवारयद्भिर्विपदं विदूरगैः ।
भृशं बभूवोपचितो बृहत्फलैः शरैरुपायैरिव पाण्डुनन्दनः॥५२॥

गतैरिति ॥ पाण्डुनन्दनोऽर्जुनः परेषामविभावनीयतां लघुप्रयोगादन्यत्र गूढप्रयोगाच्चादृश्यतामप्रकाश्यतां च गतैर्विपदमनर्थं निवारयद्भिर्विदूरगैर्दूरलक्ष्यगैः परमध्यलक्षविद्धैश्च बृहत्फलैरायतग्रैर्महालाभैश्च ॥ "फलं बाणाग्रलाभयोः" इति शाश्वतः ॥ शरैरुपायैः सामादिभिरिव भृशमुपचितः महान्तो बभूव ॥ अत्र शब्दमात्रसाधर्म्यात्सकृत्तामकृतश्लेषः । उपमेति केचित् ॥

१ मुनिर्जघान.

Digitized by Google

दिवः पृथिव्याः ककुभां नु मण्डलात्पतन्ति विम्बादुत तिग्मतेजसः।
सकृद्विकृष्टादथ कार्मुकान्मुनेः शराः शरीरादिति तेऽभिमेनिरे॥५३॥

दिव इति ॥ शरा दिवोऽन्तरिक्षात्पृथिव्या भूगोलाद्वा ककुभां मण्डलासु दिक्षां मण्डलाद्वोत तिग्मतेजसोऽर्कस्य विम्बान्मण्डलाद्वाथवा सकृद्विकृष्टात्कार्मुकाद्वा मुनेः शरीराद्वा पतन्तीति ते गणा अभिमेनिरे ज्ञातवन्तः। अन्यथा कथमेषां विभ्रमस्तर्थाय शराः संभाव्यन्त इति भावः॥ अत्र सर्वतः शरसंपातदर्शनात्संभावनया पृथिव्यादीनामन्यतमस्यापादानत्वोत्प्रेक्षा। सा च प्रतीयमाना व्यञ्जकाभावयोगात्। नुशब्दादयस्तु संशये ॥

गणाधिपानामविधाय निर्गतैः परासुतां मर्मविदारणैरपि।
जवादतीये हिमवानधोमुखैः कृतापराधैरिव तस्य पत्त्रिभिः॥ ५४॥

गणेति ॥ मर्मविदारणैरपि। मर्मस्थानान्येव विदारयद्भिरपीत्यर्थः। गणाधिपानां परासुतां मरणमविधायाकृत्वा निर्गतैः। तेषामसमर्थत्वादिति भावः। तस्य मुनेः पत्त्रिभिः शरैः कृतापराधैरिव स्वामिकार्यकरणात्सापराधैरिवेत्युत्प्रेक्षा। अधोमुखैः सद्भिर्जवादिमवानतीयेऽतिचक्रमे। तत्र प्रविष्टमित्यर्थः। लज्जितस्य कचिन्निलयनमुचितमिति भावः॥

द्विषां क्षतीर्याः प्रथमे शिलीमुखा विभिद्य देहावरणानि चक्रिरे।
न तासु पेते विशिखैः पुनर्मुनेररुंतुदत्वं महतां ह्यगोचरः॥ ५५॥

द्विषामिति ॥ प्रथमे। प्रथमयुक्ता इत्यर्थः। शिलीमुखा मुनिशरा द्विषां देहावरणानि वर्माणि विभिद्य याः क्षतीः प्रहारांश्चक्रिरे। तासु क्षतिषु पुनः पश्चात्प्रयुक्तैर्मुनेर्विशिखैर्न पेते न पतितम्। पिङ्गपेक्षदोषापातादिति भावः। तथा हि। अरुंतुदं पीडितपीडनं सतामगोचरो हि। सन्तः पीडितपीडां न कुर्वन्तीत्यर्थः। "न हन्यात्प्रसतमासीनं नार्तं नातिपरिक्षतम्" इति निषेधस्मरणादिति भावः॥ अरुर्व्रणं तुदतीति अरुंतुदः॥ "व्रजोऽशिरायामीर्मदः" इत्यमरः॥ "विध्यरुपोस्तुदः" इति सप्तमसूत्रः। "अरुर्द्विषदजन्तस्य मुम्" इति मुमागमः॥

समुज्झिता यावदराति निर्यती सहैव चापान्मुनिबाणसंहतिः।
प्रभा हिमांशोरिव पङ्कजावलिं निनाय संकोचमुमापतेश्चमूम्॥५६॥

समुज्झितेति ॥ यावन्तोऽरातयो यावदराति। "यावदवधारणे" इत्यव्ययीभावः॥ यावदराति यथा तथा समुज्झितेत्यारात्रिसमासंकथया मुक्ता मुनिचापात्सह

१ द्व. २ महतामगोचरः.

Digitized by Google

संधूयैव निर्यती निष्क्रामन्ती। तारक्तस्य कीचकमिति भावः॥ पातेः शतरि ङीप्॥ हुमिवाजसंहतिरुमापतेयमूं हिमांशोः प्रभा पङ्क्तावलिमिव संकोचं निनाय प्रापयामास॥ दुहादिपाठाज्जयतिर्द्विकर्मकः॥

अजिह्ममोजिष्ठममोघमक्लमं क्रियासु बर्हीषु पृथङ्नियोजितम्।
प्रसेहिरे सादयितुं न सादिताः शरौघमुत्साहमिवास्य विद्विषः॥५७॥

अजिह्ममिति॥ अजिह्मं स्वरूपतो गत्या वावक्रम्। अन्यत्र तु जिह्मस्थानमहत्तो न भवतीत्यजिह्मसम्। ओजिष्ठमोजस्विनं सारवत्तमं तेजिष्ठं च॥ उभयत्राप्योजस्विशब्दाद्विन्यन्तादिष्ठन्। "विन्मतोर्लुक्" इति लुक्। द्विलोपश्च॥ अमोघमवन्ध्यमक्लमं निरन्तरव्यापारेऽप्यश्रान्तं बर्हीषु क्रियासु छेदनभेदनपातनादिकर्मसु पृथग्भेदेन नियोजितम्। कर्मानुगुण्येन विनियुक्तमित्यर्थः। अस्य मुनेः शरौघमुत्साहमौत्सुक्यमिव। वीरस्यायिभावभूतं भयमविशेषमिवेत्यर्थः। सादिताः कर्षिता विद्विषः शत्रवः सादयितुं मतिकर्तुं न प्रसेहिरे न शेकुः। तस्योत्साहवदेव शरवर्षं दुर्धर्षमभूदिति भावः॥

शिवध्वजिन्यः प्रतियोधमग्रतः स्फुरन्तमुग्रेषुमयूखमालिनम्।
तमेकदेशस्थमनेकदेशगा निदध्युरर्कं युगपत्प्रजा इव॥५८॥

शिवेति॥ अनेकदेशगा नानादेशस्थाः शिवध्वजिन्यो हरसेनाः। उग्रेषवो मयूखा इवेत्युपमितसमासः। अन्यत्र तूग्रेषव इव मयूखा इति मयूरव्यंसकादित्वात्समासः। तेषां मालास्तास्तीति तमुग्रेषुमयूखमालिनम्॥ व्रीह्यादित्वादिनिः॥ एकदेशस्थमेकमेव स्थितं मुनिमर्कं प्रजा इव युगपत्प्रतियोधं योधं योधं प्रति॥ "अभ्यर्थं विभक्ति-" इत्यादिना प्रत्यर्थे वीप्सायामव्ययीभावः॥ अग्रतः स्फुरन्तं निदध्युर्ददृशुः। यथैकोऽर्क एकमेव स्थितोऽपि नानादेशस्थानामपि प्रतिपुरुषं मर्मवाक्षे वर्तत इति युगपत्प्रतीयते तद्वद्धरसेनावपी मुनिरपि प्रतियोधं तथैव प्रत्यभादित्यर्थः॥

मुनेः शरौघेण तदुग्ररंहसा बलं प्रकोपादिव विष्वगायता।
विधूनितं भ्रान्तिमियाय सङ्गिनीं महानिलेनेव निदाघजं रजः॥५९॥

मुनेरिति॥ प्रकोपादमर्षादिव विष्वक्समन्तादायतागच्छतोग्ररंहसा तीव्रवेगेन मुनेः शरौघेणोक्तविशेषणेन। महानिलेन वात्यया निदाघजं ग्रीष्मोत्थं रज इव। विधूनितं व्याहतं तद्बलं प्रमथानां सैन्यं सङ्गिनीमनुबन्धिनीम्। अविच्छिन्नामिति यावत्। भ्रान्तिमनवस्थानमियाय प्राप॥

अथ त्रिभिर्विशेषकमाह—तप इत्यादिना॥

तपोबलेनैष विधाय भूयसीस्तनूरदृश्याः स्विदिभूभिरस्यति।
अमुष्य मायाविहतं निहन्ति नः प्रतीपमागत्य किमु स्वमायुधम्॥६०

Digitized by Google

एष मुनिस्तपोबलेन तपःसामर्थ्येन भूयसीर्वहीरदभ्यास्तनूरात्मनः शरीराणि विधाय सृष्ट्वेत्यर्थः किरत्यति स्वित्क्षिपति किम् । अथवामुष्यास्य मुनेर्मायया विहतं प्रतिहतं स्वं स्वकीयमिवायुधं प्रतीपं प्रतिकूलमागत्य । प्रत्यादृत्येत्यर्थः । नोऽस्मान् निहन्ति किम् ॥ "जासिनिप्रहण—" इत्यादिसूत्रेण कर्मणि षष्ठी । शेषाविवक्षायां तु द्वितीया ॥

हृता गुणैरस्य भयेन वा मुनेस्तिरोहिताः स्वित्प्रहरन्ति देवताः ।
कथं न्वमी संततमस्य सायका भवन्त्यनेके जलधेरिवोर्मयः ॥ ६१ ॥

हृता इति ॥ यद्वा । अस्य मुनेर्गुणैः शान्त्यादिभिर्हृता आकृष्टा भयेन दरेण वा । भयाद्भिभ्यस्य एवेत्यर्थः । देवतास्तिरोहिताः सत्यः प्रहरन्ति स्वित् । तत्कुतः । अन्यथा अस्य मुनेरमी सायका जलधेरूर्मय इव कथं नु संततमनेकेऽसंख्या भवन्ति । अन्यत्र पक्षासंभवेन न स भवतीत्यर्थः । किमिति पृच्छन्त्यो देवता युध्यन्त इत्याह—गुणैर्हृता भयेन वा । एतेन गुणैरावर्तिताः । प्रीत्या बिभ्यत्यः । अस्माद्दृप्यमाना इत्यर्थः । किमस्य वितर्कभ्रयस्य मूलमित्याह—कथमिति ॥ अस्मात्कथं जलधेरूर्मयो यथैकस्यैव सायकाः संततमतिबहवो भवन्ति । एतद्योऽयमन्यसपक्षसंभवेन न संभवतीत्यर्थः । एकशब्दस्यैकशेषे कृत एक इति रूपमिति केचित् । नुशब्दस्त्वन्यार्थे ॥

जयेन कश्चिदिरमेदयं रणान्नवेदपि स्वस्ति चराचराय वा ।
ततापं कीर्णा नृपसूनुमार्गणैरिति प्रतर्काकुलिता पताकिनी ॥६२॥

जयेनेति ॥ कश्चिदयं रणाज्जयेन विरमेत् । अस्मानजित्वा कश्चिदयं युद्धमुपसंहरेदित्यर्थः । अपि चराचराय स्वस्ति भवेत्कश्चित् । स्थावरजङ्गमं जगत्र विनश्येदित्यर्थः ॥ कश्चिदपीह संभावनायाम् । मार्गणायां लिङ्ग ॥ इति प्रतर्काकुलिता पूर्वोक्ता ये प्रतर्कास्तैराकुलिता विह्वला । अत्र सदेतुकं विशेषणमाह—नृपसूनुमार्गणैरर्जुनबाणैः कीर्णा क्षिप्ता पताकिनी ततापं तापं प्राप ॥

अमर्षिणा कृत्स्नमिव क्षमाश्रयं मदोद्धतेनेव हितं प्रियं वचः ।
बलीयसा तद्विधिनेव पौरुषं बलं निरस्तं न रराज जिष्णुना ॥६३॥

अमर्षिणेति ॥ जिष्णुना निरस्तं बलं न रराज । किमिव । केन क्षिप्तं न शोभते । क्षमाश्रयं कृत्स्नं कार्त्स्न्यमर्षिणा निरस्तम् । यथा क्षमाश्रयं हि कृत्स्नमिव सार्वौर्वीनिरस्यते तच्च निरस्तं न शोभते । यथा च मदोद्धतेन पुंसा हितं प्रियवचनमिव निरस्तं न राजते । मदः पौरुषादिधर्मस्तेनोद्धतोऽतिक्षिप्तस्तेन बलीयसा च वि-

१ त्यजी.

Digitized by Google

विना दैवेन पौरुषमिव । निरस्तं सत्र राजते । बलीयसा दैवेन प्रतिहतपुरुषव्यापारस्य नैष्फल्यादेर्जिष्णुरपि बलीयानिति भावः ॥

प्रतिदिशं प्लवगाधिपलक्ष्मणा विशिखसंहतितापितमूर्तिभिः ।
रविकरग्लपितैरिव वारिभिः शिवबलैः परिमण्डलता दधे ॥ ६४ ॥

प्रतिदिशमिति ॥ प्लवगानामधिपोऽधीशो लक्ष्म यस्य तेन वानरचिह्नेन ॥ "कपिप्लवङ्गप्लवग–" इति । "चिह्नं लक्ष्म च लक्षणम्" इति चामरः ॥ प्लुतिकर्त्रेत्यर्थः । विशिखसंहतितापितमूर्तिभिरिति विशिखा बाणास्तेषां संहतयः समूहाः॥ "स्त्रियां तु संहतिर्द्वन्द्वम्" इत्यमरः ॥ तापिस्तापिताः पीडिता मूर्तयो देहा येषां तैस्तथाभूतैः । शरनिकरकर्तितकलेवरैरित्यर्थः । शिवबलैः प्रमथसैन्यैः ॥ कर्तृभिः ॥ रविकरेण ग्लपितैस्तप्तैर्वारिभिरुदकैरिव प्रतिदिशं दिक्षु परिमण्डलता । परितश्चक्राकारमण्डलतेति यावत् । दधेऽधारि । प्रतिदिशं मण्डलाकारेण स्थितमित्यर्थः ॥ पाप्तः कर्मणि लिट् ॥ आतपतप्तं हि नीरं परिभ्रमति तदन्मुनिपीडितं सैन्यं चक्राभेत्यर्थः ॥ द्रुतविलम्बितं छन्दः—"द्रुतविलम्बितमाह नभौ भरौ" इति लक्षणात् ॥

प्रवितताशरजालच्छन्नविश्वान्तराले
विधुवति धनुराविर्मण्डलं पाण्डुसूनौ ।
कथमपि जयलक्ष्मीभीतभीता विहातुं
विषमनयनसेनापक्षपातं विषेहे ॥ ६५ ॥

प्रविततेति ॥ प्रवितानि विस्तृतानि शरजालानि तैश्छन्नमाच्छादितं विश्वान्तरालं येन तस्मिन्छरपूरितब्रह्माण्डोदरे पाण्डुसूनावाविर्मण्डलमाविर्भूतमण्डलं धनुः ॥ आविर्भूतं मण्डलं यस्य धनुष इति बुद्धौ भूतार्थस्यानुभवेशाद्भूतशब्दस्यायोगः ॥ विधुवति कम्पयत्यास्फालयति सति भीतभीतेव भीतप्रकारेव जयलक्ष्मीर्विजयश्रीः कथमपि केनचित्प्रकारेण विषमनयनसेनापक्षपातं विहातुं त्यक्तुं विषेहे । क्षमाकेत्यर्थः ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथसमाख्यया व्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये अर्जुनाभिगमनो नाम चतुर्दशः सर्गः ।

१ शिवसेनेः. २ प्रमदसि घर.

Digitized by Google

पञ्चदशः सर्गः ।

अथ भूतानि वार्त्रघ्नशरेभ्यस्तत्र तत्रसुः ।
भेजे दिशः परित्यक्तमहेष्वासा च सा चमूः ॥ १ ॥

अथेति ॥ अथानन्तरं तत्र रणे भूतानि सर्वप्राणिनः । वृत्रं हतवानिति वृत्रहेन्द्रः ॥ "ब्रह्मभ्रूणवृत्रेषु क्विप्" ॥ तस्यापत्यं पुमान्वार्त्रघ्नोऽर्जुनः ॥ "तस्यापत्यम्" इत्यण्प्रत्ययः ॥ तस्य शरेभ्यस्तत्रसुर्भिभ्युः ॥ "वा भ्राशम्रभ्लसाम्" इति विकल्पादेस्वाभ्यासलोपाभावः ॥ सा चमूश्च । इषवोऽस्यन्त एभिरितीष्वासा धनूंषि ॥ "धनुर्भावोऽस्त्रमिष्वासः" इति हेमचन्द्रः ॥ "अकर्तरि च कारके संज्ञायाम्" इति करणे घञ् ॥ परित्यक्ता महान्त इष्वासा यया सा । परित्यक्तायुधेत्यर्थः । दिशो भेजे । पलायांचक्र इत्यर्थः ॥ अत्र भूतत्राससेनापलायनयोः समुच्चयकथनाद्भिन्नविषयः क्रियासमुच्चयोऽलंकारः । "गुणक्रियायोगपर्यं समुच्चयः" इति सामान्यलक्षणम् । तस्य पमकेन संसृष्टिः ॥ [उपान्तयमकम्] ॥

अपश्यद्भिरिवेशानं रणान्निववृते गणैः ।
मुह्यत्येव हि कृच्छ्रेषु संभ्रमज्वलितं मनः ॥ २ ॥

अपश्यद्भिरिति ॥ गणैः प्रमथैरीक्षानं स्वामिनं शिवम् । पुरोवर्तिनमिति भावः। अपश्यद्भिरिव रणान्निववृते निवृत्तम् ॥ भावे क्त्वि ॥ तथा हि । कृच्छ्रेष्वापत्सु संभ्रमेण साध्वसेन ज्वलितं तप्तम् ॥ "संभ्रमः साध्वसेऽपि स्यात्" इति विश्वः ॥ मनो मुह्यत्येव । अतः पुरोवर्तिनोऽप्यदर्शनमुपपद्यत इति भावः ॥

खण्डितार्शसया तेषां पराञ्मुखतया तया ।
आविवेश कृपा केतौ कृतोच्चैर्वानरं नरम् ॥ ३ ॥

खण्डितेति ॥ खण्डिता ध्वस्तार्शंसा अपाशा यस्यास्तया तेषां गणानां संबन्धिन्या तया । अतिसंनिकृष्टयेत्यर्थः । पराञ्मुखतया रणवैमुख्येन । पलायनेनेत्यर्थः। केतौ ध्वजे कृत आरोपित उच्चैरुन्नतो वानरो हनुमान्येन तं नरं पुरुषम् । कपिध्वजमित्यर्थः । कृपा करुणाविवेश । तदीयदुर्दशां दृष्ट्वा स कृपाविष्टोऽभूदित्यर्थः ॥ यमकालंकारः । [अन्तयमकम्] ॥

नन्वयमेतु कथं करुणा तत्राह—

आस्थामालम्ब्य नीतेषु वशं क्षुद्रेष्वरातिषु ।
व्यक्तिमायाति महतां माहात्म्यमनुकम्पया ॥ ४ ॥

Digitized by Google

आस्थामिति ॥ आस्थां यत्नमालम्ब्य ॥ "आस्था त्वालम्बनास्थानयत्नापेक्षासु कथ्यते" इति विश्वः ॥ वर्त्म नीतेषु क्षुद्रेषु दुष्टेष्वरातिषु शत्रुषु विषये ऽनुकम्पया कृपया महतां वीराणां माहात्म्यं महानुभावत्वं व्यक्तिं स्फुटतामापादयति प्राप्नोति । स्वपौरुषनिर्जितेष्वरातिष्वपि करुणा भूषणमेव महतामिति भावः ॥

स सासिः सासुसूः सासो येयायेयाययायययः ।
ललौ लीलां ललोऽलोलः शशीशशिशुशीः शशन् ॥ ५ ॥

स सासिरिति ॥ सहासिना वर्तमानः सासिः सलक्ष्यः । असून्सुवन्ति प्रेरयन्तीत्यसुसुवो बाणाः ॥ "षु प्रेरणे" इति धातोः "सत्सूद्विष–" इत्यादिना क्विप् ॥ असुसूभिः सह वर्तत इति सासुसूः सबाणः । अस्यन्ते क्षिप्यन्ते शरा अनेनेत्यासो धनुः ॥ "अकर्तरि च कारके संज्ञायाम्" इति घञ् ॥ आसेन सह वर्तत इति सासः सचापः ॥ सर्वत्र "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः ॥ येया यातव्या यानसाध्याः । अयेया अयातव्या यानं विनैव साध्याः ॥ "अचो यत्" इति यत्प्रत्ययः ॥ येयाश्चायेयाश्च येयायेयास्तेषां द्वयानामाये स्वर्णगजादिलाभे याति प्राप्नोतीति येयायेयाययः । अयः शुभावहदैवं यातीत्यययः । येयायेयाययश्चासावययश्चेति येयायेयाययाययः ॥ याधातोरुभयत्रापि "आतोऽनुपसर्गे कः" इति कप्रत्ययः ॥ अतो ललति विलसतीति ललः ॥ "लल विलासे" । पचाद्यच् ॥ अलोलोऽचपलः शशिन ईशः शिवस्तस्य शिशुः स्कन्दस्तं शृणाति हिनस्तीति शशीशशिशुशीः ॥ क्विप् ॥ शश्वन्नुतगतिं कुर्वन् ॥ "शश द्रुतगतौ" इति धातोः शतृप्रत्ययः ॥ सोऽर्जुनो लीलां शोभां ललौ आप ॥ "ला आदाने" कर्तरि लिट् ॥ एकाक्षरपादः ॥

त्रासजिह्मं यतश्चैतान्मन्दमेवान्वियाय सः ।
नातिपीडयितुं भग्नानिच्छन्ति हि महौजसः ॥ ६ ॥

त्रासेति ॥ सोऽर्जुनस्त्रासजिह्मं भयस्खलितं यथा तथा यतो गच्छतः । पलायमानानित्यर्थः । एतान्गणान्मन्दमेवान्वियायानुजगाम । तथा हि । महौजसो महानुभावा भग्नानतिपीडयितुं नेच्छन्ति ॥

अथाग्रे हसता साचिस्थितेन स्थिरकीर्तिना ।
सेनान्या ते जगदिरे किंचिदायस्तचेतसा ॥ ७ ॥

अथेति ॥ अथाग्रे । बलानामित्यर्थः । हसता तद्भङ्गदर्शनास्मयमानेन साचिस्थितेन तन्निवारणाय तिर्यग्व्यवस्थितेन ॥ "तिर्यगर्थे साचि तिरः" इत्यमरः ॥ स्थिरकीर्तिना । स्वयमभङ्गत्वादिति भावः । किंचिदीषदायस्तं खिन्नं चेतो यस्य

Digitized by Google

तेन स्वकीयगणभङ्गादीषत्स्खलचित्तेन सेनान्या स्कन्देन ॥ "पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः" इत्यमरः ॥ ते गणाः प्रमथादयो जगदिर उक्ताः ॥ ओङुपधर्नाभावाभिरौदुपधमेतत् ॥

अथैकविंशतिभिः श्लोकैः स्कन्दवाक्यमेवाह—मा विहासिष्टेत्यादिना ॥

मा विहासिष्ट समरं समरन्तव्यसंयतः ।
क्षतं क्षुणासुरगणैरगणैरिव किं यशः ॥ ८ ॥

रन्तव्यं रमणं क्रीडा ॥ वहुलग्रहणाद्भावे तव्यप्रत्ययः ॥ संयतयुद्धम् ॥ "समुदायः स्त्रियः संयत्सामग्र्याजसमिगुधः" इत्यमरः ॥ समे रन्तव्यसंयती येषां ते समरन्तव्यसंयतः तुल्यक्रीडासंगरा इति तेषां संबोधनम् । यूयं समरं सङ्गामं मा विहासिष्ट न त्यजत ॥ जहातेर्माङि लुङ् । मध्यमबहुवचनम् ॥ क्षुण्णाः पराजिता असुरगणा यैस्तैः । भवद्भिरिति शेषः । अगणैरिव गणेभ्योऽन्यैरिव किं किमर्थं यशः क्षतं नाशितम् । नैतद्युक्तं महाशूराणां भवादृशानामित्यर्थः ॥ [पादान्तादियमकम्] ॥

विवस्वदंशुसंश्लेषद्विगुणीकृततेजसः ।
अमी वो मोघमुद्यूर्णा हसन्तीव महासयः ॥ ९ ॥

विवस्वदिति ॥ विवस्वदंशुसंश्लेषेण सूर्यकिरणसंपर्केण द्विगुणीकृतानि तेजांसि येषां ते तथोक्ता मोघं व्यर्थमुद्यूर्णा उद्यताः ॥ "ऊर्णु उद्यमने" इति धातोः कर्मणि क्तः ॥ वो युष्माकममी महासयः सङ्घा हसन्तीवेत्युत्प्रेक्षा । किं पलायमानानां सङ्घैरिति शासः ॥

वनेऽवने वनसदां मार्गं मार्गमुपेयुषाम् ।
वाणैर्वाणैः समासक्तं शङ्केऽशं केन शाम्यति ॥ १० ॥

वन इति ॥ वनसदां वनेचराणामवने रक्षके वने मार्गं मृगसंबन्धिनं मार्गं पलायनमुपेयुषाम् । पलायमानानामित्यर्थः । युष्माकमिति शेषः । वाणो ध्वनिरेषामस्तीति तैर्वाणैर्ध्वनियुक्तैः ॥ "वण संशब्दने" इति धातोर्घञ् । ततो "अर्शआदिभ्यः—" इत्यच्प्रत्ययः ॥ वनकस्त्वाद्यवयोरभेदः । उक्तं च—"रलयोर्डलयोस्तादवयोर्वयवोरपि । ऊसयोर्मनयोश्चाम्ये सविसर्गाविसर्गयोः । सविन्दुकाविन्दुकयोः क्षादभेदेन कल्पनम्" इति ॥ वाणैः शरैः समासक्तं समासञ्जितमर्मं दुःखं तत्केन शाम्यतीति शङ्के । केनोपायेन शाम्येदिति विचारयामीत्यर्थः ॥ [पादादियमकम्] ॥

पातितोद्गूढमाहात्म्यैः संहृतायतकीर्तिभिः ।
धुर्वी कामापदं हन्तुं कृतमावृत्तिसाहसम् ॥ ११ ॥

पातितेति ॥ पातितं भ्रंशितमुद्गूढमाहात्म्यमुज्झितभावो यैस्तैः संहृता आहृता आ-

Digitized by Google

यता विस्तृताः कीर्तयो यैस्तैः। युष्माभिरिति शेषः। कां गुर्वीमापदं हन्तुम्। न कांचिदपीत्यर्थः। आवृत्तिर्युद्धान्निवृत्तिः। सैव साहसं कृतम्। अतः पापादन्यन्न किंचित्फलमस्तीति भावः। तदुक्तं मनुना—"यस्तु भीतः परावृत्तः सङ्ग्रामे हन्यते परैः। भर्तुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते॥ यद्वास्य सुकृतं किंचिदमुत्रार्थमुपार्जितम्। भर्ता तत्सर्वमादत्ते परावृत्तहतस्य तु" इति॥

नासुरोऽयं न वा नागो धरसंस्थो न राक्षसः।
ना सुखोऽयं नवाभोगो धरणिस्थो हि राजसः॥ १२॥

नेति॥ किं च। अयमसुरो दैत्यो न। नागो गजो वा पन्नगश्च न। धरसंस्थः पर्वताकारः॥ "अहार्यधरपर्वताः" इत्यमरः। "संस्था व्यवस्थामणिधिस्थितिसाकारमृत्युषु" इति वैजयन्ती॥ राक्षसो न। किं त्वयं सुखयतीति सुखः। सुखसाध्य इत्यर्थः। नवाभोगोऽभिनवप्रयत्नः। महोत्साह इत्यर्थः॥ "आभोगो वरुणच्छत्रे पूर्णतायत्नयोरपि" इति विश्वः॥ धरणिस्थो भूतलचारी राजसो रजोगुणप्रधानो ना पुरुषो हि। कश्चिन्मानुष इत्यर्थः॥ "पुरुषाः पूरुषा नरः। मनुष्या मानुषा मर्त्या मनुजा मानवा नराः" इत्यमरः॥ अतो न पलायनमुचितमिति भावः॥ गोमूत्रिकाबन्धः—"वर्णानामेकरूपत्वं यत्रैकान्तरमर्धयोः। गोमूत्रिकेति तत्प्राह दुष्करं तद्विदो विदुः" इति लक्षणात्॥ पोडशकोष्ठद्वयेऽर्धद्वयं क्रमेण विलिख्यैकान्तरविनिमयेन वाचने श्लोकनिष्पत्तिरित्युद्धारः॥

मन्दमस्यन्निषुलतां घृणया मुनिरेष वः।
प्रणुदत्यागतावज्ञं जघनेषु पशूनिव॥ १३॥

मन्दमिति॥ एष मुनिर्घृणया कृपयेषुं लतां शाखामिव मन्दमस्यन्क्षिपन्वो युष्मान्पशूनिवागतावज्ञं यथा तथा जघनेषु प्रणुदति चोदयति। किमतः परं कष्टमस्तीति भावः॥

न नोननुन्नो नुन्नोनो नाना नानानना ननु।
नुन्नोऽनुन्नो ननुन्नेनो नानेना नुन्ननुन्ननुत्॥ १४॥

नेति॥ पदच्छेदस्तावत्—न ना ऊननुन्नः नुन्नोनः ना अना नानाननाः ननु। नुन्नः अनुन्नः ननुन्नेनः ना अनेनाः नुन्ननुन्ननुत्॥ अथ योजना—हे नानानना नानामकाराण्याननानि येषां ते। नानाविधास्या इत्यर्थः। ऊनेन निकृष्टेन नुन्नो विद्ध ऊननुन्नो यः स ना न पुरुषो न। तथा नुन्न ऊनो न स नुन्नोनो ना पुरुषोऽना नन्वपुरुषः खलु। ऊनाद्भीतः पलायमानस्तु किं वक्तव्यमिति भावः।

१ धरासंस्थः. २ धरासंस्थः.

Digitized by Google

किं च। नुन्न इनः स्वामी यस्य स नुन्नेनः स न भवतीति ननुन्नेनः ॥ नञर्थस्य न-शब्दस्य सुप्सुपेति समासः ॥ स नुन्नो विद्धोऽप्यनुन्नोऽविद्ध एव। यूथमनुन्नस्वामिकत्वादनुन्ना एवेति भावः। तथा नुन्ननुन्नानुदतिशयेन नुन्नान्नुन्ननुन्नानुदतीति नुन्ननुन्नानुदतिपीडितपीडको नो पुरुषोऽनेना निर्दोषो न भवतीति। किंतु सदोष एवेति। "नार्तं नातिपरिक्षतम्" इति निषेधादित्यर्थः। अयं तु नैतादृश इति न पक्षायितव्यमिति भावः ॥ [एकाक्षरः] । अयमेकव्यञ्जनः । अन्त्यस्तकारस्तु न दोषावहः । "नान्त्यवर्णस्तु भेदकः" इत्यभ्युपगमात् ॥

वरं कृतध्वस्तगुणादत्यन्तमगुणः पुमान् ।
प्रकृत्या ह्यमणिः श्रेयान्नालंकारश्च्युतोपलः ॥ १५ ॥

वरमिति ॥ कृताः पूर्वमुत्पादिताः पश्चात्कृत्या नष्टास्ते कृतध्वस्ताः ॥ "पूर्वकाल—" इत्यादिना समासः ॥ कृतध्वस्ता गुणा यस्य तस्मात्पुंसोऽत्यन्तमतिशयेनागुणो निर्गुणः पुमान्वरं मनाक्त्रियः । किंचित्प्रिय इत्यर्थः ॥ "वरं क्लीवे मनाक्त्रिये" इत्यमरः ॥ तथा हि । प्रकृत्या स्वभावेनामणिर्मणिरहितोऽलंकारः श्रेयान् । च्युतोपलो भ्रष्टरत्नो न श्रेयान् ॥ "उपलः प्रस्तरे रत्ने" इति विश्वः ॥ पक्षावित्युः समरादसमर एव वरमिति भावः ॥ अत्र समानविषयारोपयोः प्रतिबिम्बकरणाद्दृष्टान्तालंकारः ॥

स्यन्दना नो चतुरगाः सुरेभा वाविपत्तयः ।
स्यन्दना नो च तुरगाः सुरेभावा विपत्तयः ॥ १६ ॥

स्यन्दना इति ॥ स्यन्दन्ते प्रद्रवन्तीति स्यन्दना जवनाः । स्यन्दना रथा नो सन्ति ॥ मन्त्रादिस्वाद्बहुषु ॥ चतुरं गच्छन्तीति चतुरगाः । तुरगाश्चाश्वा नो सन्ति । सुरेभाः शोभनबृंहणाः सुरेभा । वा सुरगजाश्च नो सन्ति । अविपत्तयो विपच्चिरहिताः । विपत्तयो वा विशिष्टाः पदातयो नो सन्ति । अतो न भेतव्यमिति भावः ॥ अत्र पूर्वोत्तरार्धगतानां विशेषणानां क्रोडेक्षीरेऽम्भीभूतानां यथासंख्यसंबन्धानुक्रमाद्यथासंख्यालंकारो यमकेन संसृष्टः ॥ [संसृष्टिकः] ॥

भवद्भिरधुनारातिपरिहापितपौरुषैः ।
इदैरिवार्कनिष्पीतैः प्रायेण पङ्को दुरुत्तरः ॥ १७ ॥

भवद्भिरिति ॥ अधुनारातिभिः परिहापितानि त्याजितानि पौरुषाणि यैस्तैर्भवद्भिः । अर्कनिष्पीतैरर्केण संशोषितैर्ह्रदैरिव । दुरुत्तरो दुस्तरः पङ्क इव दुष्कीर्तिः प्रायः ॥

१ व्यक्तयः.

Digitized by Google

वेत्रशाकक्रुजे शैलेऽलेशैजेऽक्रुकशात्रवे।
यात किं विदिशो जेतुं तुजेशो दिवि किंतया॥ १८॥

वेत्रेति॥ वेत्राणि वंशाः फलिन्यो वा शाकाः वर्बराश्च क्रुजा यस्मिन्नस्मिन्वेत्रशाकक्रुजे। शत्रुणा दुःप्रवेश्य इत्यर्थः॥ "वेत्रं वंशफलिन्योश्च" इति विश्वः॥ "शाकवर्बरवर्धकाः" इत्यमरः॥ लेशेन स्तोकेनाप्येजते कम्पत इति लेशैजः स न भवतीत्यलेशैजस्तस्मिन्। अत्यन्ताकम्पन इत्यर्थः॥ "एजृ कम्पने"। पचाद्यच्॥ न कोकते नादत्त इत्यकुकः ग्रहणासमर्थः शात्रवो यस्मिंस्तस्मिन्नकुकशात्रवे॥ "कुक आदाने"। पचाद्यच्॥ शैले पर्वते। केयं भावः किंता कुत्सिततया तयोपलक्षिताः सन्तः॥ "कुत्सानिन्दाव्यितर्केषु क्षेपे किंशब्द इष्यते" इति शाश्वतः॥ विदिशो जेतुं यात गच्छत किम्॥ यातेः संभ्रमे लोट्। मध्यमपुरुषबहुवचनम्॥ दिवि स्वर्गेऽपि। तुजेश इति तेषां संबोधनम्। तुजन्त इति तुजा देत्याः॥ "तुजि हिंसायाम्"। पचाद्यच्॥ तेभ्यो दैत्येभ्य ईशत इति तुजेशः॥ ईशेः क्विप्। तेभ्योऽपि शक्ता इत्यर्थः। स्वर्गेऽप्यसुरविजयिनां युष्माकमत्र क्षुद्रसत्वे क्षुद्रशत्रौ पलायनमनुचितमिति भावः॥ [प्रतिलोमानुलोमपादः]॥

अथेशो तिष्ठति पलायनमेतद्वो न युक्तमित्याह—

अयं वः क्लैब्यमापन्नान्दृष्टपृष्ठानरातिना।
इंच्छतीशश्च्युताचारान्दारानिव निगोपितुम्॥ १९॥

अयमिति॥ अयमीशः स्वामी शिवः क्लैब्यं निष्पौरुषत्वमापन्नान्प्राप्तांस्तथारातिना दृष्टपृष्ठान्। पलायमानानित्यर्थः। वो युष्मान्च्युताचारान्स्खलितव्रतान्दारान्कलत्राणीव॥ "अथ पुंभूम्नि दाराः" इत्यमरः॥ निगोपितुं गोप्तुम्॥ ऊदिदित्यादिद्विकल्पः॥ दारदोषं भवैव स्वमहिम्ना युष्मद्दोषं संवरितुमिच्छति। अतः कुतो युष्माकमनर्थ इत्यर्थः॥

ननु हो मथना राघो घोरा नाथमहो नु न।
तयदातवदा भीमा मार्भीदा वत दायत॥ २०॥

नन्विति॥ नन्वित्यामन्त्रणे। हो इत्याहाने॥ "हे है व्यस्तौ समस्तौ च हूतिसंबोधनार्थयोः। हो हौ चैवंविधौ क्षेपौ संयुक्त्याहानयोरपि" इति विश्वः॥ मथ्नन्तीति मथनाः॥ "मन्थ विलोडने"। कर्तरि ल्युट्॥ राधस्मि समर्था भवन्तीति राघः॥ "राधृ सामर्थ्ये"। क्विप्॥ घोराः क्रूराः। शत्रूणामिति भावः। नार्थं मथ्नन्ति पूजयन्तीति नाथमहः॥ दधिग्रहणात्कर्मण्युपपदे क्विप्॥ तयन्ति रक्षन्तीति

१ याच्छति. २ विगोपितुम्.

Digitized by Google

तथा रक्षकाः ॥ पचाद्यच् ॥ दायन्तीति दाताः शुद्धाः ॥ "दैप् शोधने" । कर्तरि क्तः ॥ वदन्तीति वदा वक्तारः ॥ पचाद्यच् ॥ तेषां द्वन्द्वस्तयदातवदाः । भीमा भयंकरा मामीः ॥ नञर्थमाशब्दस्य सुप्सुपेति समासः ॥ तान्ददतीति मामीदा अभयमदाः । एवंविधा यूयमिति शेषः । एतेति खेदे ॥ वयपोरभेदः ॥ न दायत इव न शुद्धाः किम् ॥ इव पृच्छायाम् ॥ किंतु शुद्धा एव न ॥ काकुरत्रानुसंधेयः ॥ "दैप् शोधने" । लोट् । मध्यमपुरुषबहुवचनम् ॥ [प्रतिलोमानुलोमार्थः] ॥

किं त्यक्तापास्तदेवत्वमानुष्यकपरिग्रहैः ।
ज्वलिताग्न्यगुणैर्गुर्वी स्थिता तेजसि मानिता ॥ २१ ॥

किमिति ॥ अपास्तोऽवधीरितो देवत्वमानुष्यकयोः परिग्रहः स्वीकारो यैस्तैः । अतिदेवमानुषैरित्यर्थः ॥ मनुष्याणां भावो मानुष्यकम् । योपधाद्वुक्पोत्तमाद्वुञ् ॥ ज्वलिताग्न्यगुणैर्ज्वलिताः प्रकाशिता इति यावद्ग्न्यगुणा असदृशगुणा यैस्तैः ॥ "अग्नौ विभिज्ञासरथौ" इति वैजयन्ती ॥ ईदृशैः । भवद्भिरिति शेषः । तेजसि प्रतापे स्थिता प्रतापैकशरणा मानिता शूरत्वाभिमानिता किमिति त्यक्ता । किमिति निर्लज्जैः पलायत इति भावः ॥

निशितासिरतोऽभीको न्येजतेऽमरणा रुचा ।
सारतो न विरोधी नः स्वाभासो भरवानुत ॥ २२ ॥

निशितेति ॥ हे अमरणा मरणरहिता निशितासिरतोऽतितीक्ष्णखड्गरतोऽभीको निर्भीको रुचा तेजसोपलक्षितः सुष्ठ्वाभासत इति स्वाभासो रमणीयः ॥ पचाद्यच् ॥ उतात्यर्थमतिशयेन भरवान् । रणभरसहिष्णुरित्यर्थः ॥ "उतात्यर्थविकल्पयोः" इति विश्वः ॥ ईदृशो नोऽस्माकं विरोधी शत्रुः सारतो बलतो न न्येजते न कम्पते । न प्रचलतीत्यर्थः ॥ "एजृ कम्पने" । लट् ॥ अतो भवद्भिरपि स्थातव्यमेव । न चलितव्यमिति भावः ॥ एतन्मते "विरोधी नः" इत्यत्र सविसर्गपाठः । प्रतिलोमे निर्विसर्गपाठे "पदान्ते सविसर्गाविसर्गयोः" इत्येतादृशकाक्व देवस्यीकारात् । अन्ये तु इनः सूर्य इव स्वाभास इनस्वाभास इत्येकं पदमाहुः । केचित्तु विरोधी शत्रुः पूर्वविशेषणविशिष्टो न । अपि तु पूर्वविशेषणविशिष्ट एवेति काकुर्वेन नकारमाहुः । परे तु सारतो न विरोधी न । न रतमरतम् । अरतेन सहवर्तमानाः सारता गुनयस्तानूनेयन्ति मारजेन न्यूनान्कुर्वन्तीति सारतोना दैत्यास्तेषां विरोधी विष्णुः स नार्वं नायम् । अतः कथं पलायन्ते । न स्वाभासः । स्वेन धनेन भासत इति स्वाभासः कुबेरः सोऽपि नायम् । न भरवाम्भं नक्षत्रं राति ॥ आतोऽनुपसर्गे कः ॥ भरवम्भस्तद्वाम्भवोऽपि न । अतः पलायनं नोचितमित्याहुरित्युपरिष्टात् ॥

Digitized by Google

जन्यवं न चलतीति कथं ज्ञायते। तमाह—

तनुवारभसो भास्वानधीरो विनतोरसा।
चारुणा रमते जन्ये कोऽभीतो रसिताशिनि॥ २३॥

तन्विति॥ तनुमाहृणोत्याच्छादयतीति तनुवारं वर्म॥ कर्मण्यण॥ तेन वभसि भासत इति तनुवारभसः॥ "भस दीप्तौ"। पचाद्यच्॥ भास्तांस्तेजस्वी चारुणा भास्वता विनतेनोन्नतेनोरसा वक्षःस्थलेनोपलक्षितः। एवंविधोऽप्यधीरो धैर्यरहितो रसितेन शब्दितेनैवाभाति ग्रसतीति रसिताशी तस्मिन्। रवेणैव विश्वमाजहारिणीत्यर्थः॥ आभीरुग्ये जिनिः॥ जन्ये युद्धे॥ "युद्धमायोधनं जन्यम्" इत्यमरः॥ अभीतो निर्भीकः सन्को रमते कः क्रीडति। निर्भयसंचारादेवास्य निश्चलत्वं निश्चीयत इत्यर्थः। [प्रतिलोमानुलोमेन श्लोकद्वयम्] । पूर्वश्लोकस्यार्थं प्रतिलोमः॥

अथ पञ्चभिः कुलकमाह—विभिन्नेत्यादिभिः॥

विभिन्नपातितादवीयनिरुद्धरथवर्त्मनि।
हतद्विपेनगष्ठघूतरुधिराम्बुनदाकुले॥ २४॥

आदर्वं विशिनष्टि—विभिन्नानि विदारितान्यतएव पातितान्यधीपा अश्वसमूहाश्च तै तथा॥ "पूर्वकाल—" इति समासः॥ तैरश्वसमूहैर्निरुद्धानि रथानां वर्त्मानि यस्मिंस्तथोक्ते॥ "वृन्दे लक्षीयमाश्वत्" इत्यमरः॥ "केशाश्वाभ्यां यञ्छावन्यतरस्याम्" इति छप्रत्ययः॥ हतास्ताडिता द्विषा गजा एव नगाः शैलाः॥ "शैलद्रुमौ नगावगौ" इत्यमरः॥ तैः घ्नूतान्युज्झितानि॥ घ्नुवतेः कर्मणि क्तः। "घ्नोः शूडनुनासिके च" इत्यूठादेशः॥ तानि रुधिराण्येवाम्बूनि तेषां नदैः प्रवाहैराकुले व्याप्ते॥

देवाकानिनि कावादे वाहिकास्वस्वकाहि वा।
काकारेभभरे काका निस्वभव्यव्यभस्वनि॥ २५॥

देवेति॥ पुनश्च। देवानाकनयत्युरीपयत्युत्साहयतीति देवाकानी तस्मिन्देवाकानिनि॥ "कन दीप्तौ" इति धातोर्ण्यन्तात्णिनिः। यद्वा। "के शब्दे" इति धातोराकपूर्वस्य भावे ल्युटि॥ आकानमाशब्दनम्। ईषद्दनमिति यावत्। देवानां तद्वतीत्यर्थः। कावाद ईषद्वादो वाक्कलहः॥ "ईषदर्थे" इति कुत्साब्दस्य कादेशः। तद्वति कावादे॥ "अर्शआदिभ्योऽच्"॥ वाहिका पर्यायेण रथभारोद्वहनम्॥ वहेः पर्याये धात्वर्थनिर्देशे ण्वुल्वक्तव्यः॥ वाहिकया क्रमप्राप्तरणक्रियया सुष्ठु शोभनं यथा तथास्वकान्परानाजिहीतेऽभियुङ्क्ते। योजयतीति यावत्। वाहिका-

१ निर्भिन्न. २ पाठान्तरमिदम्।

Digitized by Google

स्वस्वकाद्यास्तस्मिन् । योद्धृवर्गो युद्ध उपचर्यते ॥ "ओहाङ् गतौ" इति धातोर्विप्रत्ययः ॥ सोमपाशब्दवत्प्रक्रिया ॥ वाशब्दश्चार्थे ॥ कं मदोदकमाकिरन्तीति काकारा मदस्राविणः ॥ किरतेराक्पूर्वात्कर्मण्यण् ॥ एवंविधा इभभरा गजघटा यत्र यस्मिन्काकारेभभरे । काका इव काका गर्ग्या इति लक्षणया तेषामामन्त्रणम् । निस्त्रा निकृत्साहा भव्याः सोत्साहास्तानुभयान्व्ययन्ति संवृण्वन्तीति निस्त्रभव्यव्याः ॥ "व्येञ् संवरणे" । "आतोऽनुपसर्गे कः" ॥ तैर्वभस्ति भासत इति निस्त्रभव्यभस्त्रास्तस्मिन् ॥ "अन्येभ्योऽपि दृश्यते" इति क्विप् ॥ [सर्वतोभद्रम्] । सर्वतो भ्रमणात्सर्वतोभद्रास्त्यधिभद्रबन्धः । यथाह दण्डी—"तदिदं सर्वतोभद्रं भ्रमणं यदि सर्वतः" इति । उद्धारस्तु—"अष्टकोष्ठचतुष्टयं लिखित्वा तत्र श्लोकं क्रमेण लिखित्वा सर्वतो वाचनात्सर्वतोभद्रः" इति ॥

प्रनृत्तशववित्रस्ततुरगाक्षिप्तसारथौ ।
मारुतापूर्णतूणीरविकृष्टहतसादिनि ॥ २६ ॥

प्रनृत्तेति ॥ प्रनृत्तशवेभ्यो नृत्यत्कबन्धेभ्यो वित्रस्तैः क्षुभितैस्तुरगैराक्षिप्ता अवधूताः सारथयो यत्र तस्मिन् । तथा मारुतेनापूर्णेभ्यांस्तूणीरेनिषङ्गैर्विकृष्टाः ह्रियमाणा हतास्ताडिताः सादिनस्तौरङ्गिका यत्र तस्मिन् । यद्वा । मारुतापूर्णतूणीरैर्विकृष्टा आकर्षिता अतएव हता मारिताः सादिनोऽश्वारा यत्र तस्मिन् ॥

ससत्त्वरतिदे नित्यं सदरामर्षनाशिनि ।
त्वराधिककसन्नादे रमकत्वमकर्षति ॥ २७ ॥

ससत्त्वेति ॥ ससत्त्वानां सत्त्ववतां रतिदे रागप्रदे नित्यं सदराणां सभयानाममर्षनाशिनि क्रोधहारिणि त्वरयोत्साहेनाधिकं कसन्तो विकसन्तो नादा यत्र तस्मिन्रमयतीति रमकः ॥ रमधातोर्वुञ् । तस्याकादेशः ॥ तद्भावो रमकत्वम् । रणकर्मणा परस्परमकत्वमकर्षत्यपनुदति । वीराणां परस्परमुत्साहं रणकर्मणा स्फोरयतीत्यर्थः ॥ [अर्धभ्रमकः] ॥

आसुरे लोकवित्रासविधायिनि महाहवे ।
युष्माभिरुन्नतिं नीतं निरस्तमिह पौरुषम् ॥ २८ ॥

आसुर इति ॥ एवंविध आसुरेऽसुरसंबन्धिनि लोकत्रासविधायिनि लोकभयंकरे महाहवे महायुद्धे युष्माभिरुन्नतिं हर्षं नीतं प्रापितं पौरुषं पुरुषकर्म निरस्तं नाशितमिह सङ्ग्रामे ॥

इति शासति सेनान्यां गच्छतस्ताननेकधा ।
निषिध्य हसता किंचित्तस्थे तत्रान्धकारिणा ॥ २९ ॥

Digitized by Google

इतीति ॥ इतीत्थं सेनान्यां स्कन्दे शासत्यात्मापयत्यनेकधा गच्छतः पलायमानांस्तान्गणानभिषिच्य निवार्यान्धकारिणा हरेण किंचिद्धसता तस्मै क्षितम् ॥ धावे क्षिद् ॥ [निरौष्ठ्यम्] ॥

मुनीषुदहनातप्तॉल्लज्जया निविवृत्सतः ।
शिवः प्रह्लादयामास तान्निषेधहिमाम्बुना ॥ २० ॥

मुनीति ॥ मुनेरिषव एव दहनस्तेनातप्तान्पीडितांस्तथा लज्जया रणभङ्गाच्छालीनत्वेन निविवृत्सतो निवर्तितुकामान् ॥ "इच्छार्थेभ्यः सनोः" इति विकल्पात्परस्मैपदम् ॥ तान्गणान्शिवो निषेधो मा भैष्ट मा पलायतेति निवारणवचनं स एव हिमाम्बु शीतोदकं तेन प्रह्लादयामास ॥ रूपकालंकारः ॥

दूनास्तेऽरिबलादूना निरेभा बहु मेनिरे ।
भीताः शितशराभीताः शंकरं तत्र शंकरम् ॥ २१ ॥

दूना इति ॥ दूनाः शरतप्ताः ॥ "त्वादिभ्यः" इति निष्ठानत्वम् ॥ अरिबलाच्छत्रुबलादूना ऊनबलाः ॥ "पञ्चमी विभक्ते" इति पञ्चमी ॥ निरेभा निःशब्दाः । कृतः । भीतास्त्रस्ताः । कुतः । यतः शितैस्तीक्ष्णैः शरैरभीता अभिभूयात्ताः ॥ इण्कर्मणि क्तः ॥ ते गणास्तत्र रणे शंकरमभयवचनेन सुखकरं शंकरं शिवं बहु यथा तथा मेनिरेऽमन्यन्त ॥ [पादाद्यन्तयमकम्] ॥

महेष्वजलधौ शत्रोर्वर्तमाना दुरुत्तरे ।
प्राप्य पारमिवेशानमाशश्वास पताकिनी ॥ २२ ॥

महेष्विति ॥ दुरुत्तरे दुस्तरे शत्रोः संबन्धिनि महेष्वजलधौ महति बाणसागरे वर्तमाना पताकिनी सेनेशानं शिवं पारं परतीरमिव ॥ "पारावारे परार्वाची" इत्यमरः ॥ प्राप्याशश्वास प्राणिति स्म ॥

स बभार रणापेतां चमूं पश्चादवस्थिताम् ।
पुरः सूर्यादपावृत्तां छायामिव महातरुः ॥ २३ ॥

स इति ॥ स शिवो रणापेतां रणादपहृत्तां पराङ्मुखीभूतामत एव पश्चात्पृष्ठभागेऽवस्थितां चमूं पुरोऽग्रे स्थितः सूर्यः सूर्यकिरणस्तस्मादपावृत्तां पराहृत्तां छायां महातरुरिव बभार । छाया तरुरिवात्मैकशरणां तां चमूं न मुमोचेत्यर्थः ॥

मुञ्चतीशे शराञ्छिष्णौ पिनाकस्वनपूरितः ।
दध्वान ध्वनयन्नाशाः स्फुटन्निव धराधरः ॥ २४ ॥

१ हिमांशुना.

Digitized by Google

मुञ्चतीति ॥ ईशे हरे कर्तरि जिष्णावर्जुने विषये शरान्मुञ्चति सति पिनाकस्य शिवकार्मुकस्य स्वनेन ध्वनिना पूरितो धराधर इन्द्रकीलः स्फुटन्निव विदीर्यमाण इवेत्युत्प्रेक्षा । आशा दिशो ध्वनयन्शब्दयुक्ताः कुर्वन्द्ध्वान शब्दमकरोत् ॥ "दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः" इत्यमरः ॥

तन्नगा दद्दशुर्भीमं चित्रसंस्था इवाचलाः ।
विस्मयेन तयोर्युद्धं चित्रसंस्था इवाचलाः ॥ ३५ ॥

तदिति ॥ भीमं तयोर्हरपाण्डवयोस्तत्सिद्धं युद्धं नगाः प्रमथाधिष्ठितसंस्थाधिष्ठाकारा अचलाः शैला इव । तथा चित्र आलेख्ये संस्था स्थितिर्येषां ते चित्रसंस्थाधिष्ठलिखिता इवाचला आश्चर्यवशाधिष्ठलाः सन्तो विस्मयेन ददृशुः ॥ [द्विचतुर्थयमकम्] ॥

परिमोहयमाणेन शिक्षालाघवलीलया ।
जैष्णवी विशिखश्रेणी परिजह्रे पिनाकिना ॥ ३६ ॥

परीति ॥ शिक्षालाघवलीलयाभ्यासपाटवातिशयेन हेतुना परिमोहयमाणेन भ्रामोद्यता ॥ "अनाद्यकर्मकाच्चित्तवत्कर्तृकात्" इति परस्मैपदे प्राप्ते "न पादम्यि–" इत्यादिना तत्प्रतिषेधादात्मनेपदं ज्ञानच् । "णेर्विभाषा" इति कृस्थस्य मस्य वा भत्वम् ॥ पिनाकिना हरेण जिष्णोरर्जुनस्येयं जैष्णवी विशिखश्रेणी बाणसंघातः परिजह्रे निरस्ता ॥

अवद्यन्पश्रिणः शंभोः सायकैरवसायकैः ।
पाण्डवः परिचक्राम शिक्षया रणशिक्षया ॥ ३७ ॥

अवद्यन्निति ॥ पाण्डवोऽर्जुनोऽवसायकैरवसानकरैः ॥ स्यतेर्ण्यन्ताण्ण्वुल्प्रत्ययः ॥ सायकैर्बाणैः शंभोः पश्रिणः शरानवद्यन्खण्डयन् ॥ यतेः शातृप्रत्ययः ॥ "ओतः श्यनि" इत्योकारलोपः ॥ शिक्षया शस्त्रं प्रभवितुमिच्छया । उत्साहेनेत्यर्थः । रणे शिक्षयाभ्यासेन च परिचक्राम । उत्साहनैपुण्याभ्यां चचारेत्यर्थः ॥ [आद्यन्तयमकम्] ॥

चारुचुश्रिरारेची चञ्चच्चीरुचा रुचः ।
चचार रुचिरभारु चारैराचारचञ्चुरः ॥ ३८ ॥

चारैरिति ॥ चारैर्गतिविशेषैश्चित्र इति चारुचुः ॥ "तेन चित्रश्चुप्चणपौ" इति चुप्चुप्रत्ययः ॥ चिरमारेचयति रिक्तीकरोतीति चिरारेची । चञ्चच्चमत्कारस्य वस्त्रस्य रुचा प्रभया । रोचत इति रुचः शोभमानः ॥ "इगुपध–"

Digitized by Google

इति कः ॥ रुचिरः सुन्दरः । चभूर्यते भृशं चरतीति चभुरः ॥ चरतेर्यङन्तात्पचाद्यच् । "चरफलोश्च" इति सुमागमः । "यङोऽचि च" इति यङो लुक् ॥ आचारस्य शुद्धव्यवहारस्य चभुरो भृशमाचरितः स मुनिभारु यथा तथा चारैश्चकादिवर्णैर्गतिविशेषैश्चचार ॥ "चारः पियालद्रुमे स्यात्तरौ बन्धापसर्पयोः" इति विश्वः॥ [भुवनरः] ॥

स्फुरत्पिशङ्गमौर्वीकं धुनानः स बृहद्धनुः ।
धृतोल्कानलयोगेन तुल्यमंशुमता बभौ ॥ ३९ ॥

स्फुरदिति ॥ स मुनिरर्जुनः स्फुरन्ती पिशङ्गी पिशङ्गवर्णा मौर्वी ज्या यस्य तत्तथोक्तम् ॥ "नपुंसके" इति कप्रत्ययः ॥ बृहद्धनुर्गाण्डीवं धुनानः कम्पयन् । उल्कैवानलस्तेन धृतो योगो येन तेनांशुमतार्केण सूर्येण तुल्यं बभौ ॥ उपमा ॥

पार्थबाणाः पशुपतेरावन्नुर्विशिखावलीम् ।
पयोमुच इवारन्ध्राः सावित्रीमंशुसंहतिम् ॥ ४० ॥

पार्थेति ॥ पार्थबाणा अर्जुनशराः पशुपतेर्विशिखावलीं शरसंघातम् । सवितेरियं सावित्री तामंशुसंहतिं किरणसमूहमरन्ध्रा निबिडाः पयोमुचो मेघा इव । आवन्नुस्तिरोदधुः ॥

शरवृष्टिं विधूयोर्वीमुदस्तां सव्यसाचिना ।
रुरोध मार्गणैर्मार्गं तपनस्य त्रिलोचनः ॥ ४१ ॥

शरेति ॥ त्रिलोचनः शिवः । सव्येन सचते समवैतीति तेन सव्यसाचिनार्जुनेनोदस्तां क्षिप्तामुर्वीं महतीं शरवृष्टिं मार्गणैः शरैर्विधूय निरस्य तपनस्य मार्गं रुरोधावन्ने ॥

तेन व्यातेनिरे भीमा भीमार्जनफलाननाः ।
न नानुकम्प्य विशिखाः शिखाधरजवाससः ॥ ४२ ॥

तेनेति ॥ तेन शिवेन भीमा भयंकरा भियो भयस्य मार्जनं निरासस्तदेव फलं प्रयोजनं येषां तान्याननान्यग्राणि येषां ते भीमार्जनफलाननाः । तथा शिखाधरा मयूरास्तेषु जातानि शिखाधरजानि बर्हाणि तानि वासांसि पक्षा येषां ते शिखाधरजवाससः । मयूरपक्षिण इत्यर्थः । विशिखा बाणा अनुकम्प्य कृपां कृत्वा न व्यातेनिर इति न । किं त्वनुकम्प्यैवेत्यर्थः । अनुजिघृक्षुस्त्वादिति भावः ॥ संभाव्यनिषेधने द्वौ प्रतिषेधावित्युक्तम् ॥ [गूढ़लाघवकम्] ॥

१ पिशङ्ग. २ धुन्वानः.

Digitized by Google

द्युविषद्व्यापिनी तारसंरावविहतश्रुतिः ।
हैमीषुमाला शुशुभे विद्युतामिव संहतिः ॥ ४३ ॥

द्युविषदिति ॥ द्यां स्वर्गं विषदन्तरिक्षं च गच्छतीति द्युविषद्व्यापिनी ते इव व्यापिनी ॥ द्वितीयामकरणे श्रितादिषु गम्यादीनामुपसंख्यानात्समासः ॥ तारेणोच्चैस्तरेण संरावेण विहतास्ताडिता विद्धाः श्रुतयः कर्णा यया सा तथोक्ता । हैमी हेममयीषुमाला शिवशरावलिर्विद्युतां संहतिरिवोक्तविशेषणा विद्युन्मालेव । शुशुभे ॥ चतुर्थपादवर्णानां त्रिपाद्यां संभवाद्दृश्यचतुर्थपादमाहुः ॥

विलङ्घ्य पत्रिणां पंक्तिं भिन्नः शिवशिलीमुखैः ।
ज्यायो वीर्यमुपाश्रित्य न चकम्पे कपिध्वजः ॥ ४४ ॥

विलङ्घ्येति ॥ शिवशिलीमुखैः पत्रिणां पंक्तिं निजशरावलिं विलङ्घ्यातिक्रम्य भिन्नो विद्धः कपिध्वजो ज्यायः प्रशस्तम् ॥ "वृद्धप्रशस्ययोर्ज्यायान्" इत्यमरः ॥ वीर्यं सत्त्वमुपाश्रित्यावष्टभ्य न चकम्पे न चचाल । किं तु तान्सहजवनवाविलर्थः ॥

जगतीशरणे युक्तो हरिकान्तः सुधासितः ।
दानवर्षीकृतार्शंसो नागराज इवाबभौ ॥ ४५ ॥

जगतीति ॥ अर्थद्वयवाची श्लोकोऽयम् । तत्रादावगराज इति पदच्छेदमाश्रित्यैकार्थोऽभिधीयते—ईशस्य रणे युक्तः शक्तः । अन्यत्र जगतीशरणे भूरक्षणे युक्तः खितः । विधिनेति शेषः । हरिः सिंह इव कान्तो मनोहरः । अन्यत्र हरीणां सिंहानां कान्त आवासदानात्प्रियः । सुधु दधाति पालयति प्रजा इति सुधा ॥ विजन्तः ॥ असितः कृष्णवर्णः ॥ ततो विशेषणसमासः ॥ अन्यत्र सुधा लेपद्रव्यविशेषस्तद्वत्सितो धवलः । दानवर्षी बहुमदः कृतार्शंसः कृतजयाभिलाषः । अन्यत्र दानवैर्दैत्यैरपिमिश्च कृतार्शंसः नानाफलाभिलाषो यस्मिन्स ना नरोऽर्जुनः । अगराजो हिमवानिव जगत्यावर्भाविसेकार्थः ॥ अथैरावतसाम्यमुच्यते—जगतीं भुवं श्यन्ति तनूकुर्वन्तीति ते जगतीशा राक्षसास्तेषां रणस्तत्र युक्तो विहितः समर्थः । हरिकान्त इन्द्रप्रियः ॥ उभयत्रापि समानमेतत् ॥ सुधासितोऽमृतस्वच्छः । एकत्र क्षीरतः । अन्यत्र वर्णत इति विवेकः । दानवर्षी धनप्रदो मदस्रावी च कृतार्शंसः । उभयत्र कृतजिगीषः पार्थो नागराज इव ऐरावत इवाबभाविति द्वितीयोऽर्थः ॥ अथ श्लेषोपन्यासमुच्यते—जगतीशरणे भूरक्षणे युक्तो नियुक्तः । दैवेनेति शेषः ॥ "शरणं गृहरक्षित्रोः" इत्यमरः ॥ हरिकान्तः कृष्ण-

१ विशेष. २ पाठः. ३ समाश्रित्य.

Digitized by Google

प्रियः । उभयत्रापि तुल्यम् । सुधु दधातीति सुधा । वसुधेति केचित् ॥ एकदेशग्रहणात्समुदायग्रहणम् ॥ तम सितो बद्धः ॥ "पिञ् बन्धने" । क्तः ॥ अन्यत्र सुधयासितेन सितो बद्धः । अमृतप्रिय इत्यर्थः । दानवा ऋषयश्च तैः कृताशंसो विहितमङ्गलः । उभयत्रापि तुल्यमेतत् । सोऽर्जुनो नागराजः शेष इवाबभाविति तृतीयोऽर्थः ॥

विफलीकृतयत्नस्य क्षतवाणस्य शंभुना ।
गाण्डीवधन्वनः स्वेभ्यो निश्चक्राम हुताशनः ॥ ४६ ॥

विफलीति ॥ शंभुना क्षतवाणस्यातएव विफलीकृतयत्नस्य निष्फलमयत्नस्य गाण्डीवं धनुर्यस्य तस्य गाण्डीवधन्वनोऽर्जुनस्य ॥ "वा संज्ञायाम्" इत्यनङादेशः ॥ स्वेभ्य इन्द्रियरन्ध्रेभ्यः ॥ "स्वमिन्द्रिये सुखे स्वर्गे" इति विश्वः ॥ हुताशनोऽग्निर्निश्चक्राम निष्क्रान्तः । क्रोधादिति भावः ॥

स पिशङ्गजटावलिः किरन्नुरुतेजः परमेण मन्युना ।
ज्वलितौषधिजातवेदसा हिमशैलेन समं विदिद्युते ॥ ४७ ॥

स इति ॥ पिशङ्गजटावलिः पिशङ्गजटाजूटः परमेणोत्कृष्टेन मन्युना क्रोधेनोरु महत्तेजः किरन्विक्षिपन्सोऽर्जुनो ज्वलिता ओषधयस्तृणज्योतींषि जातवेदा दवाग्निर्यस्मिंस्तेन हिमशैलेन समं तुल्यं हिमाद्रिरिव विदिद्युते हिमाद्रिवच्छुभ इति बिम्बमतिबिम्बभावोपमा ॥

शतशो विशिखानवद्यते भृशमस्मै रणवेगशालिने ।
प्रथयन्ननिवार्यवीर्यतां प्रजिघायेषुमघातुकं शिवः ॥ ४८ ॥

शतश इति ॥ शिवः शतशो विशिखानवद्यते खण्ड्यते रणवेगशालिनेऽस्मै पार्थाय भृशमनिवार्यवीर्यताम् । निजामिति शेषः । तस्मै प्रथयन्दर्शयन् । किं स्वघातुकममारकम् ॥ "स्पृपत–" इत्यादिना इन्तेरुकञ् ॥ इषुम् ॥ जातावेकवचनम् ॥ प्रजिघाय प्रयुयुजे ॥ "हि गतौ" इति धातोर्लिट् । "हेरचङि" इति कुत्वम् ॥

शंभोर्धनुर्मण्डलतः प्रवृत्तं तं मण्डलादंशुमिवांशुभर्तुः ।
निवारयिष्यन्विदधे सिताश्वः शिलीमुखच्छायवृतां धरित्रीम् ४९

शंभोरिति ॥ सिताश्वोऽर्जुनः शंभोर्धनुर्मण्डलतो धनुर्मण्डलात्प्रवृत्तं निष्क्रान्तं तमिषुम् । अंशुभर्तुरर्कस्य मण्डलात्प्रवृत्तमंशुमिव । अत्रापीषुवज्जातावेकवचनम् ॥ नि-

१ धनुषः. २ निश्चचार; निःसस्मार.

Digitized by Google

वारयितुमिच्छुवारयिषुकामः ॥ क्रियार्थक्रियायां लृटि तस्य शत्रादेशः ॥ धरित्रीं भुवं शिलीमुखानां छाया शिलीमुखच्छायम् ॥ "छाया बाहुल्ये" इति नपुंसकत्वम् ॥ तेन वृतां व्याप्तां विदधे कृतवान् । शरजालच्छायावृतां धरित्रीमकरोदित्यर्थः॥

घनं विदार्यार्जुनबाणपूगं ससारवाणोऽयुगलोचनस्य ।
घनं विदार्यार्जुनबाणपूगं ससार बाणोऽयुगलोचनस्य ॥ ५० ॥

घनमिति ॥ अयुगलोचनस्य विषमनेत्रस्येशस्यालोचनस्य । लोक्यतेऽसौ लोचनः ॥ कर्मणि ल्युट् ॥ न लोचनोऽलोचनस्तस्यालोचनस्याक्षुपज्ञानविषयस्य संबन्धी सारो बलं बाणः शब्दस्ताभ्यां सारबाणाभ्यां स्थिरशब्दाभ्यां सह वर्तते इति ससारबाणः ॥ बहुव्रीहेरेव इत्युक्तम् ॥ न युज्यते कुत्रापीत्ययुक्तस्तद्रहितः ॥ क्विप् ॥ बाणः शरः ॥ जातावेकवचनम् ॥ घनं सान्द्रमर्जुनस्य बाणपूगं शरव्रातं विदार्य विभिद्य घनं निबिडं विदार्याभूमिकृष्माण्ड्यो लताविशेषा अर्जुनाः कक्कुभद्रुमा बाणा नीलसैरेयकाः पूगाः क्रमुकास्तेषाम् ॥ "विभाषा वृक्ष—" इत्यादिना द्वन्द्वैकवद्भावः ॥ विदार्यार्जुनबाणपूगं ससार । विवेशेत्यर्थः । यद्वा तदानीमेव युगलोचनस्यार्जुनस्य बाणः । ससारेत्यर्थः ॥ [अर्थावलिः] ॥

रुजन्महेषून्बहुधाशुपातिनो मुहुः शरौघैरपवारयन्दिशः ।
चलाचलोऽनेक इव क्रियावशान्महर्षिसंघैर्बुबुधे धनंजयः ॥ ५१ ॥

रुजन्नित्यादि ॥ बहुधाशुपातिनः शीघ्रमापततो महेषून्मुहुः शरौघै रुजन्भञ्जन् । तथा दिक्षुशापवारयन्नाच्छादयन्क्रियावशाद्युद्धकर्मायत्तया चलाचलोऽतिचञ्चलो धनंजयो महर्षिसंघैरनेको बहुविध इव बुबुधे ददृशे ॥

विकाशमीयुर्जगतीशमार्गणा विकाशमीयुर्जगतीशमार्गणाः ।
विकाशमीयुर्जगतीशमार्गणा विकाशमीयुर्जगतीशमार्गणाः॥५२॥

विकाशमिति ॥ जगतीशस्यार्जुनस्य मार्गणा बाणा विकाशं प्रसारमीयुः । तथा जगति लोके ईशमार्गणाः शंभुशरा विकाशं विषमगतिमीयुः । प्रापुरित्यर्थः । तथा जगतीं पृथ्वीं श्यन्ति तनूकुर्वन्तीति जगतीशा दानवाः ॥ "आतोऽनुपसर्गे कः" ॥ तान्मारयन्तीति जगतीशमारणाः । क्विप् ॥ ते च ते गणाश्च जगतीशमार्गणाः प्रमथा विकाशमुल्लासं हर्षमीयुः । प्रापुरित्यर्थः । अहो देवेऽप्यस्य पराक्रमप्रसर इति विस्मयादिति भावः । तदानीं मार्गयन्तीति मार्गणा अन्वेषणाः ॥ कर्तरि ल्युट् ॥ जगतीशस्य मार्गणा अन्वेषकाः शिवद्वारो देवर्ष्यादयो दीनां पक्षिणां काको नदिरवेति विकाशमाकाशमीयुः । दिदृक्षवेति भावः ॥ [महायमकम्] ॥

Digitized by Google

संपश्यतामिति शिवेन वितायमानं
लक्ष्मीवतः क्षितिपतेस्तनयस्य वीर्यम् ।
अङ्गान्यभिन्नमपि तत्त्वविदां मुनीनां
रोमाञ्चमञ्चिततरं विभरांबभूवुः ॥ ५२ ॥

संपश्यतामिति ॥ इतीत्थं शिवेन वितायमानं विस्तार्यमाणम् ॥ "तनोतेर्यकि" इति वैकल्पिक आकारादेशः ॥ लक्ष्मीवतो जयश्रीमतः ॥ "मादुपधायाः—" इत्यादिना मतुपो मस्य वकारः ॥ क्षितिपतेस्तनयस्यार्जुनस्य वीर्यं शौर्यं संपश्यतां तत्त्वविदामपि हरेरंशावतारोऽयमिति विदुषामपि । किमुतान्येषामिति भावः । मुनीनामङ्गानि गात्राण्यभिन्नमविरलमञ्चिततरमतिरुचिरतरं रोमाञ्चं रोमहर्षं विभरांबभूवुर्बभुः ॥ "भीह्री—" इत्यादिना विकल्पादाम्प्रत्ययः ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथसमाख्यया
व्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये
किरातयुद्धवर्णनो नाम पञ्चदशः सर्गः ।

षोडशः सर्गः ।

ततः किरातधिपतेरलघ्वीमाजिक्रियां वीक्ष्य विवृद्धमन्युः ।
स तर्कयामास विविक्ततर्कश्चिरं विचिन्वन्निति कारणानि ॥ १ ॥

तत इति ॥ ततोऽनन्तरं किरातधिपतेः संबन्धिनीमलघ्वीं गुर्वीमाजिक्रियां रणकर्म वीक्ष्य विवृद्धमन्युर्विवृद्धकोपो विविक्तो निष्कलङ्कस्तर्क ऊहो ज्ञानं वा यस्य सोऽर्जुनः कारणानि रणभराशक्तिकारणानि विचिन्वन्विमृषन् । इतीत्थं वक्ष्यमाणमेव तर्कयामासाभ्यूहितवान् ॥

अथ त्रयोविंशतिश्लोकैर्वितर्कमेवाह—

मदस्रुतिश्यामितगण्डलेखाः क्रामन्ति विक्रान्तनराधिरूढाः ।
सहिष्णवो नेह युधामभिज्ञा नागा नगोच्छ्रायमिवाक्षिपन्तः ॥२॥

मदेत्यादि ॥ इह युद्धे मदस्रुतिभिर्मदजलैः श्यामाः कृता इति श्यामिता गण्ड-

१ विवृत्त.

Digitized by Google

क्षेत्राः कपोलभागा येषां ते विक्रान्ताः पराक्रमं कुर्वन्तः ॥ कर्तरि क्तः । "शूरो वीरश्च विक्रान्तः" इत्यमरः ॥ तैर्नरैरधिरूढाः सहिष्णवो रणभरक्षमा युधां युद्धानामभिज्ञाः । शिक्षिता इत्यर्थः ॥ कृञोमात्कर्मणि पट्वी ॥ किं च । नगानामुच्छ्रायं पर्वतानामौन्नत्यम् ॥ घञन्तेनोपसर्गस्य समासो नोपसृष्टाद्धञ्श्रयत्ययः । "भिजीश्रुवोऽनुपसर्गे" इत्यत्रानुपसर्ग इति निषेधात् ॥ आक्षिपन्तः प्रतिषेधयन्त इव स्थिताः । तथोन्नता इत्यर्थः । नागा गजा इह सङ्ग्रामे न क्रामन्ति न चरन्ति । वधा युद्धान्तरेष्विति शेषः । एवमुत्तरत्रापि सर्वत्र द्रष्टव्यम् । तथापि कथं मे शक्तिह्रासोऽयमिति सर्वत्र तात्पर्यार्थः ॥

विचित्रया चित्रयतेव भिन्नां रुचं रवेः केतनरत्नभासा ।
महारथौघेन न संनिरुद्धा पयोदमन्द्रध्वनिना धरित्री ॥ ३ ॥

विचित्रेति ॥ विचित्रया नानावर्णया केतनानां रत्नानि तेषां भासा प्रभया भिन्नां संवलितां रवे रुचं कार्ष्णिं चित्रयता विचित्रवर्णां कुर्वतेव स्थितेनेति केतनीत्यनिर्भिदेयमुत्प्रेक्षा । पयोदमन्द्रध्वनिना मेघगम्भीरघोषेण महता रथानामोघेन समूहेन धरित्री न संनिरुद्धा नाहता ॥

समुल्लसत्प्रासमहोर्मिमालं परिस्फुरच्चामरफेनपङ्क्ति ।
विभिन्नमर्यादमिहातनोति नाश्वीयमाशा जलधेरिवाम्भः ॥ ४ ॥

समुल्लसदिति ॥ इह युद्धे प्रासाः कुन्ताः ॥ "प्रासस्तु कुन्तः" इत्यमरः ॥ ते महोर्मय इव तेषां मालाः समुल्लसन्त्यो यत्र तत्समुल्लसत्प्रासमहोर्मिमालम् । चामराणि फेना इव परिस्फुरन्त्यश्चामरफेनानां पङ्क्तयो यत्र तत्तथोक्तम् । अश्वीयमश्वसमूहः ॥ "तुन्दे स्वश्वीयमाश्वत्" इत्यमरः ॥ जलधेरम्भ इव विभिन्नमर्यादं तुन्दमर्यादमुल्लङ्घनं यथा तथाशा दिशो नातनोति नाप्नोति ॥

हताहतेत्युद्धतभीमघोषैः समुज्झिता योद्धृभिरभ्यमित्रम् ।
न हेतयः प्राप्तदिशिक्षिपः स्वे विवस्वदंशुज्वलिताः पतन्ति ॥ ५ ॥

हतेति ॥ इत महरताहत विध्यत ॥ इन्तेर्लोट् । मध्यमपुरुषबहुवचनम् । "अनुदात्तोपदेश—" इत्यादिनानुनासिकलोपः । आहतेत्यत्र कर्मणः प्रयोगासंभवेऽपि इन्तेः स्वाभाविककर्मत्वस्यानपायात् । अकर्मकत्वस्य चात्र विवक्षितत्वेन कर्मणिक्तस्यैव तच्छ्रुतेः "आत्मे यमहनः" इत्यात्मनेपदम् ॥ इत्येवमुद्धताः भयङ्कराः भीमाश्च घोषा येषां तैर्योद्धृभिर्योधैरभ्यमित्रममित्रानभि समुज्झिता मुक्ता विवस्वतोंऽशुभिः । प्रतिफलितैरिति भावः । ज्वलिता दीपिता अतएव प्राप्तास्त-

१ अभिस्फुरत् ; अभिस्फुरत्

हितां तिपो याभिस्ता इतयः शस्त्राणि ते न पतन्ति ॥ "इतिः स्यादायुधे" इति विश्वः ॥

अभ्यायतः संततधूमधूम्रं व्यापि प्रभाजालमिवान्तकस्य ।
रजः प्रवृण्वन्रथाङ्गनुन्नं ननोति न व्योमनि मातरिश्वा ॥ ६ ॥

अभीति ॥ अभ्यायतो वीरान्हन्तुमागच्छतः ॥ इणः शतृप्रत्ययः ॥ अन्तकस्य कालस्य संबन्धि संततं सततं धूमवद्धूम्रं व्यापि व्यापकं प्रभाजालमिव क्षितं मर्त्यैरधि रथाङ्गै रथचक्रैश्च नुन्नं प्रेरितं रजो मातरिश्वा मरुद्व्योमन्यन्तरिक्षे न ननोति न विस्तारयति ॥

भूरेणुना रासभधूसरेण तिरोहिते वर्त्मनि लोचनानाम् ।
नास्त्यत्र तेजस्विभिरुत्सुकानामह्नि प्रदोषः सुरसुन्दरीणाम् ॥ ७ ॥

भूरेणुनेति ॥ अत्राहवे रासभो गर्दभस्तद्वद्धूसरेणेषत्पाण्डुना ॥ "ईषत्पाण्डुस्तु धूसरः" इत्यमरः । "रासभो गर्दभः खरः" इत्यमरः ॥ भूरेणुना रजसा लोचनानां वर्त्मनि चक्षुर्मार्गे तिरोहिते सति तेजस्विभिस्तेजस्विषु वीरेषूत्सुकानाम् । वीरवरणार्थमागतानामित्यर्थः ॥ "प्रसितोत्सुकाभ्यां तृतीया च" इति विकल्पात्तृतीया ॥ सुरसुन्दरीणामह्नि दिवस एव प्रदोषो रात्रिर्नास्ति । अन्धकारवत्पृष्टेस्तिरोधानाद्रात्रिभ्रमः स्यादिति भावः ॥

रथाङ्गसंक्रीडितमद्यहेषा बृंहन्ति मत्तद्विपबृंहितानि ।
संघर्षयोगादिव मूर्च्छितानि ह्रादं निगृह्णन्ति न दुन्दुभीनाम् ॥ ८ ॥

रथाङ्गेति ॥ रथाङ्गसंक्रीडितं रथचक्रकूजितमश्वानां च हेषा ह्रेषितानि शब्दितानि ॥ "अश्वानां ह्रेषा हेषा च निःस्वनः" इत्यमरः ॥ बृंहन्ति महान्ति मत्तद्विपानां बृंहितानि । "बृंहितं करिगर्जितम्" इत्यमरः ॥ संघर्षयोगादिव परस्परस्पर्धासंबन्धादिव मूर्च्छितानि ह्रादं गतानि सन्ति ॥ "नपुंसकमनपुंसक–" इत्यादिना नपुंसकैकशेषः ॥ दुन्दुभीनां ह्रादं निर्घोषम् ॥ "स्वाननिस्वाननिर्ह्राद–" इत्यमरः ॥ न निगृह्णन्ति न तिरस्कुर्वन्ति ॥

अस्मिन्यशःपौरुषलोलुपानामरातिभिः प्रत्युरसं क्षतानाम् ।
मूर्च्छान्तरायं मुहुरुच्छिनत्ति नासारशीतं करिशीकराम्भः ॥ ९ ॥

अस्मिन्निति ॥ अस्मिन्रणे यशःपौरुषयोर्लोलुपानां बहूनामतएवारातिभिः प्रत्युरसमुरसि ॥ "प्रतेरुरसः सप्तमीस्थाद्" इति समासान्तः ॥ क्षतानां वि-

१ संमति. २ भूत. ३ गार्द.

Digitized by Google

द्धानां संबन्धिनं यूथैर्वान्तरायो रजविप्रस्तमासारशीतं वर्षधाराशीतलम् ॥ "धारासंपात आसारः" इत्यमरः ॥ करिणां शीकर एवाम्भः ॥ कर्तृ ॥ द्रुतर्नोच्छ्वसिति न नाम्यति ॥

अस्रद्रुदीनामुपचीयमानैर्विदारयद्भिः पदवीं ध्वजिन्याः ।
उच्छ्रायमायान्ति न शोणितौघैः पङ्कैरिवाश्यानघनैस्तटानि॥१०॥

अस्रदिति ॥ अस्रद्रुदीनां तटान्युपचीयमानैरुपचयं नीयमानैस्तथा ध्वजिन्याः पदवीं विदारयद्भिः ॥ "विदरयद्भिः" इति पाठे विदरां दरसंचारां कुर्वद्भिः ॥ आश्यानाः ईषच्छुष्काः ॥"संयोगादेरातो धातोर्यण्वतः" इति ङ्यायतेर्निष्ठानत्वम् ॥ घनाः साम्द्रास्तैराश्यानघनैः शोणितौघैः पङ्कैरिवोच्छ्रायं वृद्धिं नायान्ति न प्राप्नुवन्ति ॥

परिक्षते वक्षसि दन्तिदन्तैः प्रियाङ्गशीता नभसः पतन्ती ।
नेह प्रमोहं प्रियसाहसानां मन्दारमाला विरलीकरोति ॥ ११ ॥

परीति ॥ इह रणे दन्तिदन्तैर्गजदन्तैः परिक्षते ताडिते वक्षसि नभसः पतन्ती प्रियाया अङ्ग इव शीता शीतला सुखकरी मन्दारमाला । सुरैर्मुक्तेति शेषः । प्रियं साहसं येषां तेषां प्रियसाहसानाम् । यतो गजाभियायिनामिति भावः । प्रमोहं महारमूर्च्छां न विरलीकरोति न मन्दीकरोति ॥

निषादिसंनाहमणिप्रभौघे परीयमाणे करिशीकरेण ।
अर्कत्विषोन्मीलितमभ्युदेति न खण्डमाखण्डलकार्मुकस्य ॥ १२ ॥

निषादीति ॥ करिणां शीकरेण पुष्करतुषारेण परीयमाणे व्याप्यमाने निषादिनो हस्त्यारोहाः ॥ "हस्त्यारोहा निषादिनः" इत्यमरः ॥ तेषां संनाहा कवचानि तेषां मणिप्रभौघे रत्नांशुजालेऽर्कस्य त्विषा तेजसोन्मीलितमुत्पादितमाखण्डलकार्मुकस्येन्द्रधनुषः ॥ "आखण्डलः सहस्राक्षः" इत्यमरः ॥ खण्डं नाभ्युदेति ॥

महीभृता पक्षवतेव भिन्ना विगाह्य मध्यं परवारणेन ।
नावर्तमाना निनदन्ति भीममपां निधेरापइव ध्वजिन्यः ॥ १३ ॥

महीति ॥ पक्षवता महीभृता मैनाकेनेव परवारणेन शत्रुगजेन मध्यं विगाह्य प्रविश्य भिन्नाः क्षोभिता ध्वजिन्यः सेनाः ॥ "ध्वजिनी वाहिनी सेना" इत्यमरः ॥ अपां निधेः सागरस्यापइव । आवर्तमाना भ्रमन्त्यः सत्यः ॥ "स्यादावर्तोऽम्भसां भ्रमः" इत्यमरः ॥ भीमं न निनदन्ति ॥ [1]

१ निषारयद्भिः; विदम्भयद्भिः. २ निवर्तमाना.

Digitized by Google

महारथानां प्रतिदन्त्यनीकमधिस्पदस्यन्दनमुत्थितानाम् ।
आमूललूनैरतिमन्युनेव मातङ्गहस्तैर्म्रियते न पन्थाः ॥ १४ ॥

महारथानामिति ॥ प्रतिदन्त्यनीकं दन्तिसैन्यं प्रति ॥ "अनीकं तु रणे सैन्ये" इति विश्वः ॥ अधिस्पदा महारथाः स्यन्दना रथा यत्र तत्तथा ॥ "रंहस्तरसी तु रवः स्यदः" इत्यमरः ॥ उत्थितानां मण्डितानां महारथानां रथिकविशेषाणाम् । तदुक्तम्—"आत्मानं सारथिं चाश्वान्रक्षन्युध्येत यो नरः । स महारथसंज्ञः स्यादित्याहुर्नीतिकोविदाः" इति लक्षणात् । पन्था मार्गः आमूलात्मूलेनोच्छिन्नैर्गतहस्तैर्गमनकरैरतिमन्युनातिक्रोधेनेव न म्रियते न निरुध्यते ॥

धृतोत्पलापीड इव प्रियायाः शिरोरुहाणां शिथिलः कलापः ।
न बर्हभारः पतितस्य शङ्कोर्निषादिवक्षःस्थलमातनोति ॥ १५ ॥

धृतेति ॥ पतितस्य वक्षसि मग्नस्य शङ्कोस्तोमरस्य संबन्धी ॥ "बर्हं पुंसि शिरस्यं शङ्कुर्न सर्वलो तोमरोऽस्त्रियाम्" इत्यमरः ॥ बर्हभारस्तन्मूलबद्धो लाञ्छनपिञ्छकलापो धृत उत्पलापीडः कुवलयशेखरो यस्मिन्सः । प्रियायाः संबन्धी शिथिलः ग्रस्तः शिरोरुहाणां कलापः केशपाश इव । निषादिनो हस्त्यारोहस्य वक्षःस्थलं नातनोति न व्याप्नोति ॥

उज्झत्सु संहार इवास्तसंख्यमद्राय तेजस्विषु जीवितानि ।
लोकत्रयास्वादनलोलजिह्वं न व्याददात्याननमत्र मृत्युः ॥ १६ ॥

उज्झत्स्विति ॥ अभ्राद्वे संहारे कल्पान्त इव तेजस्विषु वीरेष्वस्तसंख्यमसंख्यं यथा तथाद्राय झटिति ॥ "द्राग्झटित्यञ्जसाद्राय" इत्यमरः ॥ जीवितान्युज्झत्सु त्यजत्सु सत्सु मृत्युर्लोकत्रयस्यास्वादने भक्षणे लोला गृधुर्जिह्वा यस्मिंस्तदाननं न व्याददाति न विदृणोति ॥ "आङो दोऽनास्यविहरणे" इत्यनास्यविहरण इति निषेधादास्मनेपदम् ॥

सत्यमेव । तथापि किं ते कुस्सितम् । तत्राह—

इयं च दुर्वारमहारथानामाक्षिप्य वीर्यं[1] महतां बलानाम् ।
शक्तिर्ममावस्यति हीनयुद्धे सौरीव ताराधिपधाम्नि दीप्तिः[2] ॥ १७ ॥

इयमिति ॥ इयं मम शक्तिश्च दुर्वाराः पराक्रमिणो महारथा येषु तेषां महतां बलानां वीर्यमाक्षिप्य निरस्य ताराधिपधाम्नि चन्द्रतेजसि । सूर्यस्येयं सौरी ॥ "सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः" इति स्त्रियां ङीष् । यकारस्य लोपः ॥

१ इद. २ कीर्तिम्. ३ दीप्तः.

Digitized by Google

दीप्तिरिव । हीनयुद्धे किरातरूपेऽवसन्नवसीदति । एतच्च विरुद्धमस्यद्भुतं चेति भावः ॥ "पोऽन्तकर्मणि" इति धातोर्लुट् ॥

माया स्विदेषा मतिविभ्रमो वा ध्वस्तं नु मे वीर्यमुताहमन्यः ।
गाण्डीवमुक्ता हि यथा पुरा मे पराक्रमन्ते न शराः किराते ॥१८॥

मायेति ॥ एषा शक्तिहासरूपा माया स्विरेवताशोभनं नाम । मतिविभ्रमो बुद्धिविपर्ययो वा । अथवा मे वीर्यं ध्वस्तं नष्टं नु । उताहमन्योऽर्जुनो न वा । कुतः । हि यस्माद्गाण्डीवमुक्ता मे शराः पुरा यथापूर्वम् । परिपन्थिध्विवेत्यर्थः । किराते न पराक्रमन्तेऽतिविघ्नेन न प्रवर्तन्ते । "उपपराभ्याम्" इत्यात्मनेपदम् । दृष्टिरप्रतिबन्धः ॥

पुंसः पदं मध्यममुत्तमस्य द्विधेव कुर्वन्धनुषः प्रणादैः ।
नूनं तथा नैष यथास्य वेषः प्रच्छन्नमप्यूहयते हि चेष्टा ॥ १९ ॥

पुंस इति ॥ किं च । उत्तमस्य पुंसः पुरुषोत्तमस्य मध्यमं पदमाकाशं धनुषः प्रणादैः ॥ "उपसर्गादसमासेऽपि णोपदेशस्य" इति नत्वम् ॥ द्विधा कुर्वन्निव विदारयन्निव स्थितः स एष किरातो नूनं तथा तथाभूतो न ॥ कीदृशस्तत्राह—अस्य पुरुषस्य यथा यथाभूतो वेषः । वर्तत इति शेषः । अतो नायं किरातस्वरूप इत्यर्थः । कुतः । हि यस्माच्चेष्टा व्यापारः प्रच्छन्नमपि निगूढमपि स्वरूपमूहयते तर्कयते । तस्य स्वभावादव्यभिचारादिति भावः ॥

अथ चतुर्भिश्चेष्टामेवाचष्टे—

धनुः प्रवन्ध्वनितं रुषेव सकृद्विकृष्टा विततेव मौर्वी ।
संधानमुत्कर्षमिव व्युदस्य मुष्टेरसंभेद इवापवर्गे ॥ २० ॥

धनुरिति ॥ धनू रुषेव प्रवन्धेनाविच्छेदेन ध्वनितम् ॥ ध्वनतेः कर्तरि क्तः ॥ मौर्वी च सकृद्विकृष्टा विततेवैकवाराकर्षणादेव विततेव स्थिता । संधानं बाणसंधानमुत्कर्षमुद्धरणं व्युदस्येव वर्जयित्वा । किमु कृतमिति शेषः । अपवर्गे बाणमोक्षेऽपि मुष्टेरसंभेदोऽसंभेदनमिव । मुष्टिबन्धं विनेव बाणमोक्षः कृत इवेति श्लाघवोक्तिः ॥

अंसावविष्टब्धनतौ समाधिः शिरोधराया रहितप्रयासः ।
धृता विकारांस्त्यजता मुखेन प्रसादलक्ष्मीः शशलाञ्छनस्य ॥ २१ ॥

अंसाविति ॥ किं च । अंसावविष्टब्धौ स्थिरावित्यवस्थापितौ च नतौ चावष्टब्धनतौ शिरोधरायाः कन्धरायाः समाधिः संस्थानविशेषश्च रहितः प्रयासो यस्मिन्स तथोक्तः । निःप्रयास इत्यर्थः । तथा विकारांस्त्यजता । अमृतस्यानिर्विकारेणेत्यर्थः । मुखेन शशलाञ्छनस्येन्दोः प्रसादलक्ष्मीर्धृता ॥ असंभवस्संबन्धो निदर्शनालंकारः ॥

१ यथा पुरेव; तथा पुरेव. २ रुषेव. ३ अवष्टम्भ.

Digitized by Google

प्रहीयते कार्यवशागतेषु स्थानेषु विष्टब्धतया न देहः ।
स्थितप्रयातेषु ससौष्ठवश्च लक्ष्येषु पातः सदृशः शराणाम् ॥२२॥

प्रहीयत इति ॥ तस्य देहः कार्यवशेन प्रयोजनवशेनागतेषु स्थानेष्वालीढादिस्थानकेषु विष्टब्धतया स्थिरतया ॥ कर्म्मा ॥ न प्रहीयते न त्यज्यते । किंतु स्थिर इव तिष्ठतीत्यर्थः । सुष्ठु भावः सौष्ठवं लाघवम् ॥ उक्षाग्रादित्वादञ्प्रत्ययः ॥ तेन सह वर्तमानः ससौष्ठवः शराणां पातश्च स्थितान्यचलानि प्रयातानि चलानि तेषु स्थितप्रयातेषु विषये चलाचलेषु लक्ष्येषु सदृश एकरूपः ॥

परस्य भूयान्विवरेऽभियोगः प्रसह्य संरक्षणमाप्तरन्ध्रे ।
भीष्मेऽप्यसंभाव्यमिदं गुरौ वा न संभवत्येव वनेचरेषु ॥ २३ ॥

परस्येति ॥ किं च । परस्य विवरे रन्ध्रे । अल्पेऽपीति शेषः । भूयान्भूयिष्ठः प्रसह्य झटित्यभियोगो ज्ञातृत्वम् । परस्य रन्ध्रज्ञातृत्वात्प्रहारोद्योग इत्यर्थः । आत्मरन्ध्रे विवरे । अनल्पेऽपीति शेषः । प्रसह्य झटिति संरक्षणं गोपनम् । इदं दूषणं भीष्मेऽपि गुरौ वा द्रोणे वाप्यसंभाव्यं दुर्वितर्कम् । वनेचरेषु न संभवत्येव । अतो नार्यं किरातः । किं त्वेष तिरोहितवेषः कोऽप्यमानुषोऽपुरुष इति भावः ॥

अप्राकृतस्याहवदुर्मदस्य निवार्यमस्यास्त्रबलेन वीर्यम् ।
अल्पीयसोऽप्यामयतुल्यवृत्तेर्महापकाराय रिपोर्विवृद्धिः ॥ २४ ॥

अप्राकृतस्येति ॥ अप्राकृतस्योत्करीत्यासाधारणस्याहवदुर्मदस्य रणमत्तस्यास्य किरातस्य वीर्यं तेजोऽस्त्रबलेन दिव्यशस्त्रमहिम्ना निवार्यं निवारणीयम् । अन्यथा निवार्यत्वमस्येति भावः । तथा हि । अल्पीयसोऽप्यल्पस्याप्यामयतुल्यवृत्तेः रोगसमानविक्रियस्य ॥ "रोगव्याधिगदामयाः" इत्यमरः ॥ रिपोर्विवृद्धिर्महापकाराय । किं स्वयं महानुभाव इति भावः ॥

स संप्रधार्यैवमहार्यसारः सारं विनेष्यन्सगणस्य शत्रोः ।
प्रस्वापनास्त्रं द्रुतमाजहार ध्वान्तं घनारब्ध इवार्धरात्रः ॥ २५ ॥

स इति ॥ अहार्यसारोऽनिवार्यवीर्यः सोऽर्जुन एवं संप्रधार्य निर्धार्य सगणस्य सानुगस्य शत्रोः सारं सत्त्वं विनेष्यन्प्रापयन् । प्रस्वाप्यते झाप्यतेऽनेनेति प्रस्वापनं तदेवास्त्रम् । घनारब्धो मेघावरुद्धोऽर्धरात्रो निशीथः ॥ "अर्धरात्रनिशीथौ द्वौ" इत्यमरः ॥ "अर्धं नपुंसकम्" इति समासः । "अहःसर्वैकदेश–" इत्यादिना समासान्तः "रात्राह्नाहाः पुंसि" इति पुंलिङ्गता ॥ ध्वान्तमिव द्रुतमाजहाराचकर्ष ॥

१ स्थिर. २ ददभू. ३ घनागद.

Digitized by Google

प्रसक्तदावानलधूमधूम्रा निरुन्धती धाम सहस्ररश्मेः ।
महावनानीव महातमिस्रा छाया ततानेशबलानि काली ॥ २६ ॥

प्रसक्तेति ॥ प्रसक्तः संततो यो दावानलधूमस्तद्वद्धूम्रा धूसरा सहस्ररश्मेर्धाम तेजो निरुन्धत्याच्छादयती काली कृष्णवर्णा ॥ "जानपद–" इत्यादिना ङीप् ॥ छाया कान्तिः । ईशबलानि महातमिस्रा महती तमःसंततिः ॥ "तमिस्रा तु तमःसंततिः" इति विश्वः ॥ महावनानीव । ततान व्यानशे ॥

आसादिता तत्प्रथमं प्रसह्य प्रगल्भतायाः पदवीं हरन्ती ।
सभेव भीमा विदधे गणानां निद्रानिरासं प्रतिभागुणस्य ॥ २७ ॥

आसादितेति ॥ तदेवासादनं प्रथमं तत्प्रथमं यथा तथा प्रसह्यासादिता कल्पिता प्रगल्भताया व्यवहारधाढर्यस्य पदवीं हरन्ती भीमा भयंकरी निद्रा । उक्तविशेषणा सभा संसदिव । गणानां प्रतिभा प्रज्ञा शक्तिः सैव गुणस्तस्य निरासं प्रतिभाप्रभवं विदधे चक्रे ॥

गुरुस्थिराण्युत्तमवंशजत्वाद्विज्ञातसाराण्यनुशीलनेन ।
केचित्समाश्रित्य गुणान्वितानि सुहृत्कुलानीव धनूंषि तस्थुः २८

गुर्वीति ॥ केचिदुत्तमवंशजत्वाद्वंशो वेणुः कुलं च ॥ "वंशो वेणौ कुले च" इति विश्वः ॥ गुरूणि महान्ति स्थिराणि दृढानि च गुरुस्थिराण्यनुशीलनेन परिचयबलेन विज्ञातः सारो बलं येषां तानि गुणैर्मौर्वीभिः शौर्यादिभिश्चान्वितानि धनूंषि सुहृत्कुलानि मित्रकुलानीव समाश्रित्य तस्थुः । धनूंष्यबहुत्व निर्देश्युरित्यर्थः ।

कृतान्तदुर्वृत्त इवापरेषां पुरः प्रतिद्वन्द्विनि पाण्डवास्त्रे ।
अतर्कितं पाणितलाभिपेतुः क्रियाफलानीव तदायुधानि ॥ २९ ॥

कृतान्तेति ॥ कृतान्तदुर्वृत्त इव दैवदुर्विहित इव ॥ "कृतान्तो यमसिद्धान्तदैवाङ्गस्वकर्मसु" इति विश्वः ॥ पाण्डवास्त्रे पुरः प्रतिद्वन्द्विनि सति प्रतिकूलवर्तिनि सति तदा तस्मिन्काले ऽपरेषामायुधानि क्रियाफलानीव कृष्यादिफलानीव । अतर्कितमविचारितमेव पाणितलाभिपेतुः ॥

अंसस्थलैः केचिदभिन्नधैर्यैः स्कन्धेषु संश्लेषवतां तरूणाम् ।
मदेन मीलन्नयनाः सलीलं नागा इव स्वस्तकरा निषेदुः ॥ ३० ॥

अंसेति ॥ अभिन्नधैर्यास्तदानीमप्यक्षतधैर्याः केचिदंसस्थलैरंसभागैः सह संश्लेष-

१ संबन्धवती. २ निद्रावमित्रा. ३ गुणावमानि. ४ गीर्वा.

Digitized by Google

पवतां तरूणां स्कन्धेषु मकाण्डेषु मदेन मीलन्ति नयनानि येषां ते नागा गजा इव सस्तकराः सस्तहस्ताः सन्तः सलीलं निषेदुर्निषण्णाः ॥

तिरोहितेन्दोरथ शंभुमूर्भ्रः प्रणम्यमानं तपसां निवासैः ।
सुमेरुशृङ्गादिव बिम्बमार्कं पिशङ्गमुच्चैरुदियाय तेजः ॥ ३१ ॥

तिरोहितेति ॥ अथ तिरोहितेन्दोः किरातमायया छन्नचन्द्राच्छंभुमूर्भ्रः सकाशात् । सुमेरुशृङ्गादर्कसंबन्धि बिम्बमिव । तपसां निवासैस्तापसैः प्रणम्यमानमभिवन्द्यमानं पिशङ्गं तेज उच्चैरूर्ध्वमुदियाय प्रकटीबभूव । तत्र तत्राटन्निति भावः ॥

छायां विनिर्धूय तमोमयीं तां तत्त्वस्य संवित्तिरिवापविद्याम् ।
ययौ विकाशं द्युतिरिन्दुमौलेरालोकमत्यादिशती गणेभ्यः ॥ ३२ ॥

छायामिति ॥ इन्दुमौलेर्द्युतिः कान्तिः । तत्त्वस्य संविच्चिज्ज्ञानं तत्त्वज्ञानमपविद्यामिव । तां तमोमयीं छायां निद्रां विनिर्धूय निरस्य गणेभ्य आलोकं वस्तुप्रकाशं चिरमत्यादिशती वितरन्ती विकाशं विस्तारं ययौ ॥

त्विषां ततिः पाटलिताम्बुवाहा सा सर्वतः पूर्वसरीव संध्या ।
निनाय तेषां द्रुतमुल्लसन्ती विनिद्रतां लोचनपङ्कजानि ॥ ३३ ॥

त्विषामिति ॥ सर्वतः पाटलिताः पाटलीकृता अम्बुवाहा यया सा तथोक्ता त्विषां तेजसां ततिः । पूर्वा सरतीति पूर्वसरी ॥ "पूर्वे कर्तरि" इति टमत्यये ङीप् । "सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः" इति पूर्वाशब्दस्य पुंवद्भावः ॥ संध्या प्रातःसंध्येवोल्लसन्ती प्रसरन्ती तेषां गणानां लोचनपङ्कजानि द्रुतं विनिद्रतां विकासं निनाय ॥

पृथग्विधान्यस्त्रविरामबुद्धाः शस्त्राणि भूयः प्रतिपेदिरे ते ।
मुक्ता वितानेन बलाहकानां ज्योतींषि रम्या इव दिग्विभागाः ३४

पृथगिति ॥ अस्त्रविरामेण प्रस्तापनास्त्रोपरमेण बुद्धा विनिद्रास्ते गणा बलाहकानां वितानेन मेघपटलेन मुक्तातपत्र रम्या दिग्विभागा दिगन्ता ज्योतींषि नक्षत्राणीव ॥ "ज्योतिस्तारारश्मिभाज्वालादकप्रकाशरमात्मसु" इति वैजयन्ती ॥ पृथग्विधानि नानाविधानि शस्त्राणि भूयः प्रतिपेदिरे । जगृहुरित्यर्थः ॥

द्यौरुन्ननामेव दिशः प्रसेदुः स्फुटं विसस्रे सवितुर्मयूखैः ।
क्षयं गतायामिव यामवत्यां पुनः समीयाय दिनं दिनश्रीः ॥३५॥

१ यमादिव. २ अभ्यादिशती.

Digitized by Google

यौरिति ॥ तदा यामवत्यां रात्रौ क्षयं गतायां विभातायामिव द्यौरन्तरिक्षमुच्यते तामेवोर्ध्वमुत्पपातेवेत्युत्प्रेक्षा। दिशः प्रसेदुः। सवितुर्मयूखैः स्फुटं स्पष्टं विसस्रे विस्तृतम् ॥ भावे क्विप् ॥ दिनश्रीः पुनर्घसृकान्तिर्दिनं समीयाय संजगाम ॥ अत्र वैधर्म्यकरम्बितेन गुणक्रिययोः समुच्चयेन समुच्चयोऽलंकारः। तस्य च समुच्चयनोरभेदप्रधानत्वाच्चयशब्दवाच्ययानुप्रवेशलक्षणसंकरः ॥ दिनप्रसादो गुणः। शेषाः क्रियाः ॥

महाद्रुदुर्गे शिथिलप्रयत्ने दिग्वारणेनेव परेण रुग्णे ।
भुजङ्गपाशान्भुजवीर्यशाली प्रबन्धनाय प्रजिघाय जिष्णुः॥३६॥

महाद्रुदुर्ग इति ॥ भुजवीर्यशाली जिष्णुरर्जुनो महाद्रुं प्रस्तापनाद्रुं तदुर्गमिव तस्मिन्महाद्रुदुर्गे दिग्वारणेन दिग्गजेनेव परेण शत्रुणा शिथिलप्रयत्नमल्पप्रयासं यथा तथा रुग्णे भग्ने सति ॥ रुजो भङ्गे क्रमेणि क्तः। "ओदितश्च" इति निष्ठातकारस्य नत्वम् ॥ प्रबन्धनाय प्रकर्षेण बन्धनाय भुजङ्गा एव पाशास्तान्प्रजिघाय प्रहितवान् ॥

जिह्वाशतान्युच्छसयन्त्रजस्रं लसत्तडिल्लोलविषानलानि ।
श्वासाग्निरस्ता भुजगेन्द्रसेना नभश्चरैस्तत्पदवीं विवेद्रे ॥ ३७ ॥

जिह्वेति ॥ लसन्त्यस्तडिल्लोला विद्युल्लता विषानला विषाग्नयो येषु तानि जिह्वाशतान्यजस्रमुच्छसयन्ती चलयन्ती भुजगेन्द्रसेना श्वासाग्न्यभश्चरैर्निरस्ता सती। तेषां नभश्चराणां पदवीं मार्गं विवेद्रे विशेषेण ररोध ॥

दिङ्नागहस्ताकृतिमुद्वहद्भिर्भोगैः प्रशस्तासितरत्ननीलैः ।
रराज सर्पावलिरुच्छसन्ती तरङ्गमालेव नभोऽर्णवस्य ॥ ३८ ॥

दिङ्नागेति ॥ दिङ्नागहस्ताकृतिमुद्वहद्भिर्दिक्करिकराकारैस्तथा प्रशस्तानि समीचीनान्यसितरत्नानीन्द्रनीलमणयस्तद्वज्जीवैर्भोगैः कायैरुपलक्षिता सर्पावलिरुच्छसन्ती प्रसृप्यन्ती नभ एवार्णवस्तस्य तरङ्गमालेव रराज ॥ रूपकोत्थापितेयमुत्प्रेक्षा ॥

निःश्वासधूमैः स्थगितांशुजालः फणावतामुत्फणमण्डलानाम् ।
नक्तंदिवासं वपुरभ्युवाह विलोचनानां सुखमुष्णरश्मेः॥ ३९ ॥

निःश्वासेति ॥ उष्णरश्मेरसं नक्तंदिवोभयमितानि फणामण्डलानि येषां तेषां फणावतां सर्पाणां निःश्वासेषु ये धूमास्तैः स्थगितमाच्छादितमंशुजालं यस्य स तथोक्तः। अतएव विलोचनानां सुखं सुखकरं वपुरभ्युवाह ॥

१ मते. २ सुवत्तनत्वम्. ३ निरम्बनाय. ४ अतत्वम्. ५ विवते.

Digitized by Google

प्रतप्तचामीकरभासुरेण दिशः प्रकाशेन पिशङ्कयन्त्यः ।
निश्चक्रमुः प्राणहरेक्षणानां ज्वालामहोल्का इव लोचनेभ्यः॥४०॥

प्रतप्तेति ॥ प्राणहराणीक्षणानि येषां तेषां प्राणहरेक्षणानां दृष्टिविषाणां लोचनेभ्यो नेत्रेभ्यः ॥ "लोचनं नयनं नेत्रम्" इत्यमरः ॥ प्रतप्तं यच्चामीकरं सुवर्णं तद्वद्भासुरेण ॥ "भक्षभासमिदो घुरच्" इति घुरच्प्रत्ययः ॥ प्रकाशेन तेजसा दिशः पिशङ्कयन्त्यो ज्वालामहोल्का इव निश्चक्रमुर्निर्जग्मुः ॥

आक्षिप्तसंपातमपेतशोभमुद्धूमिधूमाकुलदिग्विभागम् ।
वृतं नभो भोगिकुलैरवस्थां परोपरुद्धस्य पुरस्य भेजे ॥ ४१ ॥

आक्षिप्तेति ॥ आक्षिप्तः प्रतिषिद्धः संपातः संचारो यस्मिंस्तत् । सिद्धानां पक्षिणां येति शेषः । अपेता गता शोभा यस्माच्चदपेतशोभं गतश्रीकमुद्धूतवद्भिर्धूमाभ्यामाकुला दिग्विभागा दिगन्ता यस्मिंस्तद्भोगिकुलैः सर्पकुलैर्वृतमाहृतं नभः परोपरुद्धस्य शत्रुवेष्टितस्य पुरस्यावस्थामिवावस्थां दशां भेजे । उत्प्रेक्षा तत्साधर्म्यं शत्रुमित्यर्थः ॥ निदर्शनालंकारः ॥

तमाशु चक्षुःश्रवसां समूहं मन्त्रेण तार्क्ष्योदयकारणेन ।
नेता नयेनेव परोपजापं निवारयामास पतिः पशूनाम् ॥ ४२ ॥

तमिति ॥ पशूनां पतिः शिवस्तं चक्षुःश्रवसां सर्पाणां समूहं तार्क्ष्योदयकारणेन गरुडाविर्भावहेतुना मन्त्रेण नेता नायको नयेन नीत्या परोपजापं परोपजापं पराकृतं स्वमण्डलभेदमिव ॥ "भेदोपजापावुपधा" इत्यमरः ॥ आशु निवारयामास॥

प्रतिग्रतीभिः कृतमीलितानि द्युलोकभाजामपि लोचनानि ।
गरुत्मतां संहतिभिर्विहायः क्षणप्रकाशाभिरिवावतेने ॥ ४३ ॥

प्रतीति ॥ द्युलोकभाजामप्यनिमेषाणामपि कृतं मीलनं निमेषो येषां तानि लोचनानि दृष्टीः प्रतिग्रतीभिः प्रतिपद्यतीभिः ॥ इन्तेः क्तरि ङीप् ॥ गरुत्मतां तार्क्ष्याणां संहतिभिः समूहैः क्षणप्रकाशाभिर्विद्युद्भिरिव । तासां सौवर्णत्वादिति भावः । विहायोऽन्तरिक्षमवतेने व्याप्तम् ॥

ततः सुपर्णव्रजपक्षजन्मा नानागतिर्मण्डलयत्रवेन ।
जरत्तृणानीव वियन्निनाय वनस्पतीनां गहनानि वायुः ॥ ४४ ॥

तत इति ॥ ततः सुपर्णव्रजानां तार्क्ष्यकुलानां पक्षेभ्यो जन्म यस्य स नानागति-

१ लोचनस्य. २ अक्षेण. ३ क्षण. ४ संततिभिः.

Digitized by Google

दिविचरगतिर्वायुर्वनस्पतीनां द्रुमाणां गहनानि जरतृणानि जीर्णतृणानीव जवेन मन्दस्खलन्भ्रमयन्विचयदन्तरिक्षं निनाय ॥

मनःशिलाभङ्गनिभेन पक्ष्मान्निरुध्यमानं निकरेण भासाम् ।
व्यूढैरुरोभिश्च विनुद्यमानं नभः ससर्पेव पुरः खगानाम् ॥ ४५ ॥

मनःशिलेति ॥ मनःशिला धातुविशेषस्तस्या भङ्गश्छेदस्तन्निभेन तत्सदृशेन भासां निकरेण कान्तिपुञ्जेन पक्ष्माग्रे निरुध्यमानमाक्रियमाणं व्यूढैर्विशालैरुरोभिर्वक्षोभिश्च ॥ "उरो वक्षस्य वक्षस्य" इत्यमरः ॥ विनुद्यमानं मेर्यमाणं नभः खनामानं गरुडानां पुरः ससर्पेव ससारेव । उत्तरोत्तरदेशांतरोधानेन गच्छतां खगानामग्रेऽपि पुरोभागः सादृश्यात्पूर्ववदुपलभ्यमानतया नभस एव छेदनात्पुरः ससर्पेवेत्युत्प्रेक्षालंकारः ॥

दरीमुखैरासवरागताम्रं विकासि रुक्मच्छदधाम पीत्वा ।
जवानिलाघूर्णितसानुजालो हिमाचलः क्षीव इवाचकम्पे ॥ ४६ ॥

दरीति ॥ जवानिलेनाघूर्णितानि भ्रमितानि सानुजालानि यस्य स हिमाचलः । आसवस्य रागो रक्तता तद्वत्ताम्रम् ॥ गुणयोरेवोपमानोपमेयभावः ॥ विकासि विकस्वरं रुक्मच्छदाः सुवर्णपलाशास्तार्क्ष्यास्तेषां धाम तेजो दरीभिर्मुखैरिव दरीमुखैः पीत्वा क्षीवो मत्त इवाचकम्प आचचाल ॥ उपमाव्यापितेयमुत्प्रेक्षा ॥

प्रवृत्तनक्तंदिवसंधिदीप्तैर्नभस्तलं गां च पिशङ्गयद्भिः ।
अन्तर्हितार्कैः परितः पतद्भिश्छायाः समाचिक्षिपिरे वनानाम् ४७

प्रवृत्तेति ॥ नक्तं च दिवा च नक्तंदिवम् ॥ "अचतुर–" इत्यादिना सप्तम्यर्थे द्वयोरप्यव्ययवोर्द्वन्द्वैकवद्भावनिपाते समासान्तः ॥ लक्षणया त्वहोरात्रमात्रवाची ॥ प्रवृत्तः प्रादुर्भूतो यो नक्तंदिवस्य संधिः संध्या तद्वदीप्तैः शोभितैर्नभस्तलं गां भुवं च पिशङ्गयद्भिः पिशङ्गीकुर्वद्भिरन्तर्हित आच्छादितोऽर्को यैस्तैः पतद्भिः पक्षिभिः परितः सर्वतो वनानां छायाः समाचिक्षिपिरे समाक्षिप्ताः । अन्तर्धेदिव तेजःप्रकाशात्प्रकाश्यमन्तर्हिता इत्यर्थः ॥

स भोगिसंघः शमयुग्रधाम्नां सैन्येन तिग्मे विनतासुतानाम् ।
महाध्वरे विघ्नयपचारदोषः कर्मान्तरेणेव महोदयेन ॥ ४८ ॥

स इति ॥ स भोगिसंघः सर्पसमूह उग्रधाम्नां तेजस्विनां विनतासुतानां तार्क्ष्यपक्षिणां सैन्येन महाध्वरे महाक्रतौ विघ्नयपचारदोषः कर्मस्खलनदोषो महोदयेन महासामर्थ्येनाथवा महता फलेन तत्सूचेन मकरक्रियासिद्धेरिति कर्मान्तरेण मापचिकेनेव कर्म ज्ञातिं निघ्ने शमितः ॥

१ महाध्वरः. २ नभःस्थलम्. ३ जवम्. ४ कर्मान्तरेण.

Digitized by Google

साफल्यमस्रे रिपुपौरुषस्य कृत्वा गते भाग्य इवापवर्गम् ।
अनिन्धनस्य प्रसभं समन्युः समाददेऽस्त्रं ज्वलनस्य जिष्णुः॥४९॥

साफल्यमिति ॥ अस्रे सर्पास्त्रे । भाग्ये भाग्भवीये शुभे कर्मणीव । रिपुपौरुषस्य रिपुपराक्रमस्य साफल्यं कृत्वापवर्गमवसानं समाप्तिं गते सति । स्वनिहत्या परसाफल्यात्सफलीकरणोपचारः । समन्युः सक्रोधो जिष्णुरर्जुनोऽनिन्धनस्येन्धनं विनैवोत्पादितस्य ज्वलनस्य ज्वलनमदीपकमस्त्रमाग्नेयाख्यं प्रसभं शीघ्रं समाददे जग्राह ॥

ऊर्ध्वं तिरश्चीनमधश्च कीर्णैर्ज्वालासटैर्लङ्घितमेघपङ्क्तिः ।
आयस्तसिंहाकृतिरुत्पपात प्राण्यन्तमिच्छन्निव जातवेदाः॥ ५० ॥

ऊर्ध्वमिति ॥ ऊर्ध्वं तिरश्चीनं तिर्यक् ॥ "विभाषाञ्चेरदिक्स्त्रियाम्" इति समस्त्यवः ॥ अधश्च कीर्णैर्विक्षतीर्ज्वाला एव सटाः केसराः ॥ "सटा जटाकेसरयोः" इति विश्वः ॥ तैर्लङ्घितमेघपङ्क्तिरतिक्रान्तजलदालिरायस्तस्य लङ्घनोद्यतस्य सिंहस्येवाकृतिर्यस्य स जातवेदा अग्निः प्राण्यन्तं प्राणिनां संहारमिच्छन्निवोत्पपात ॥

भित्त्वेव भाभिः सवितुर्मयूखाञ्ज्वाल विष्वग्विसृतस्फुलिङ्गः ।
विशीर्यमाणश्चनिनादधीरं ध्वनिं वितन्वन्नकृशः कृशानुः॥ ५१ ॥

भित्त्वेति ॥ भाभिस्तेजोभिः सवितुर्मयूखान्किरणान् ॥ "किरणोऽस्त्रीमयूखांशु–" इत्यमरः ॥ भित्त्वेवाभिहत्येव विष्वक्समन्ताद्विसृताः स्फुलिङ्गा यस्य सः । स्फुलिङ्गोऽस्य मयूखाभिघातहेतुकत्वमुत्प्रेक्षते ॥ "त्रिषु स्फुलिङ्गोऽग्निकणः" इत्यमरः ॥ अकृशोऽतनुः कृशानुर्वह्निर्विशीर्यमाणस्य विदलतोऽध्वनो निनादमिव धीरमुद्धतं ध्वनिं वितन्वञ्ज्वाल ॥

चयानिवाद्रीनिव तुङ्गशृङ्गान्कचित्पुराणीव हिरण्मयानि ।
महावनानीव च किंशुकानां ततान वह्निः पवनानुवृत्त्या ॥ ५२ ॥

चयानिति ॥ वह्निः पवनानुवृत्त्या वायुवशेन चयानिव हिरण्मयान्प्राकारानिव ॥ "चयः समूहे प्राकारे" इति विश्वः ॥ तुङ्गशृङ्गानद्रीनिव क्वचिद्धिरण्मयानीति "दाण्डिनायन–" इत्यादिना निपातनात्साधुः । पुराणि नगराणीव तथा किंशुकानां पलाशतरूणाम् ॥ "पलाशे किंशुकः पर्णः" इत्यमरः ॥ महावनानीव । पुष्पितानीति भावः । ततान वितस्तार । तदाकारेण जज्वालेत्यर्थः ॥

मुहुश्चलत्पल्लवलोहिनीभिरुच्चैः शिखाभिः शिखिनोऽवलीढाः ।
तलेषु मुक्ताविशदा बभूवुः सान्द्राञ्जनश्यामरुचः पयोदाः ॥५३॥

१ भीमम्. २ लोहिताभिः.

Digitized by Google

मुद्गरिति ॥ साम्द्राञ्जनश्यामरुचो घनकज्जलश्यामरुचः पयोदा मुहुश्चलन्त्यश्च ताः पल्लवलोहिन्यो लोहितवर्णाश्च वाग्मिश्चलत्पल्लवलोहिनीभिः ॥ "वर्णाद्दनुदात्तोपधाच्चो नः" इति ङीप्। तकारस्य नकारः ॥ शिखिनोऽग्नेरुच्चैरुन्नताभिः शिखाभिर्ज्वालाभिरवलीढाः । दग्धा इत्यर्थः । अतएव तलेष्वधोभागेषु शुक्लापिदा गौल्किकपवला वभूवुः । जलसंशोषणादिति भावः ॥ "अधःस्वरूपयोरस्त्री तलम्" इत्यमरः ॥

लिलिक्षतीव क्षयकालरौद्रे लोकं विलोलार्चिषि लोहिताश्वे ।
पिनाकिना हूतमहाम्बुवाहमस्त्रं पुनः पाशभृतः प्रणिन्ये ॥ ५४ ॥

लिलिक्षतीति । क्षयकालरौद्रे कल्पान्तकालभयावहे विलोलार्चिषि चलज्ज्वाले लोहिताश्वे ज्वलने ॥ "लोहिताश्वो वायुसखः" इत्यमरः ॥ लोकं लिलिक्षति लेढुमिच्छति सति भिषत्सति सतीव ॥ लिहेः सन्नन्ताच्छतृप्रत्ययः ॥ पिनाकिना पुनर्हूता आहूता आकारिता महाम्बुवाहा येन तत्पाशभृतो वरुणस्यास्त्रं प्रणिन्ये प्रयुक्तम् ॥

ततो धरित्रीधरतुल्यरोधसस्तडिल्लतालिङ्गितनीलमूर्तयः ।
अधोमुखाकाशसरिन्निपातिनोरपः प्रसक्तं मुमुचुः पयोमुचः ॥ ५५ ॥

तत इति ॥ ततो वरुणास्त्रप्रयोगानन्तरं धरित्रीधरतुल्यरोधसः पर्वतसमप्रान्ताः ॥ "रोधः स्तात्प्रान्तकूलयोः" इति विश्वः ॥ तडिल्लताभिरालिङ्गिता नीलमूर्तयो नीलावयवानि येषां ते पयोमुचो मेघा अधोमुखा आकाशसरिदिव निपतन्तीत्यधोमुखाकाशसरिन्निपातिनीः ॥ "कर्तर्युपमाने" इति णिनिः ॥ अपो जलानि प्रसक्तं सततं यथा तथा मुमुचुः ॥ इतः प्रभृति पंचभिः कुलकम् ॥

पराहतध्वस्तशिखे शिखावतो वपुष्यधिक्षिप्तसमिद्धतेजसि ।
कृतास्पदास्त्रस्त इवायसि ध्वनिं पयोनिपाताः प्रथमे वितेनिरे ॥ ५६ ॥

पराहतेति ॥ पराहता अभिहता अतो ध्वस्ता निर्वापिताः शिखा ज्वाला यस्य तस्मिन्पराहतध्वस्तशिखे । अधिक्षिप्तं महारितं ताडितमिति यावत् । अतः समिद्धं झटिति प्रदीप्तं तेजो यस्य तस्मिन्धिक्षावतोऽग्नेर्वपुषि । तप्तेऽयसि लौह इव कृतास्पदाः कृतक्षितयः ॥ "आस्पदं प्रतिष्ठायाम्" इति निपातः ॥ प्रथमे पयोनिपाता जलपाता ध्वनिं वितेनिरे विस्तारयामासुः ॥

महानले भिन्नसिताभ्रपातिभिः समेत्य सद्यः कथनेन फेनताम् ।
व्रजद्भिरार्द्रेन्धनवत्परिक्षयं जलैर्विते[1]ने दिवि धूमसंततिः ॥ ५७ ॥

१ पुस्त. २ कथनेन. ३ वनैः.

Digitized by Google

महानल इति ॥ महानलेऽग्नौ भिन्नानि खण्डितानि सिताभ्राणीव पतन्तीति भिन्नसिताभ्रपातिभिः ॥ "कर्तर्युपमाने" इति णिनिमत्ययः ॥ अतएव सद्यः कथनेन पाकेन फेनतां प्राप्य समेत्य परिसर्पं नाशं व्रजद्भिर्जर्जनैरार्द्रेन्धनवदार्द्रकाष्ठैस्तुल्यम् ॥ "तेन तुल्यं क्रिया चेद्वतिः" इति वतिमत्ययः ॥ दिवि गगने धूमसंततिर्वितेने विस्तारिता । फेनादिकमार्द्रेन्धनेऽपि तुल्यम् ॥

स्वकेतुभिः पाण्डुरनीलपाटलैः समागताः शक्रधनुःप्रभाभिदः ।
असंस्थितामादधिरे विभावसोर्विचित्रचीनांशुकचारुतां त्विषः ५८

स्वकेतुभिरिति ॥ पाण्डुरैर्नीलैः पाटलैश्च पाण्डुरनीलपाटलैर्विचित्रैः स्वकेतुभिर्धूमैः समागताः संगता अतएव शक्रधनुषः प्रभाभिदो द्युतिभाजो विभावसोरग्नेस्त्विषोऽसंस्थितामस्थिरां विचित्रस्य चीनांशुकस्य पट्टदुकूलस्य चारुतामादधिरे दधुः ॥

जलौघसंमूर्छनमूर्छितस्वनः प्रसक्तविद्युल्लसितैधितद्युतिः ।
प्रशान्तिमेष्यन्धृतधूममण्डलो बभूव भूयानिव तत्र पावकः ॥५९॥

जलौघेति ॥ जलौघानामुदकभराहाणां संमूर्छनेन मेलनेन मूर्छितस्वनः प्रवृद्धघोषः ॥ "मूर्छनं मेलने मोहे हृद्दौ मूर्छितमेव वा" इति सज्जनः ॥ प्रसक्तैः संगतैर्विपुतां तडिद्भवानां लसितैः स्फुरणैरेधिता वर्धिता द्युतिर्यस्य स धृतधूममण्डलो जलाघातात्संभृतधूमपटलः पावकः प्रशान्तिमेष्यंस्तत्र देशे भूयानिव बभूव भूयस्तया स्थापित इवेत्युत्प्रेक्षा ॥

प्रवृद्धसिन्धूर्मिचयस्थवीयसां चयैर्विभिन्नाः पयसां प्रपेदिरे ।
उपात्तसंध्यारुचिभिः सरूपतां पयोदविच्छेदलवैः कृशानवः ॥६०॥

प्रवृद्धेति ॥ प्रवृद्धानां सिन्धोरूर्मीणां चया राशय इव स्थवीयसां स्थूलतराणां पयसां चयैः पूरैर्विभिन्ना विश्लेषिताः कृशानवोऽग्नय उपात्तसंध्यारुचिभिः गृहीतसंध्यारागैः पयोदानां विच्छिद्यन्त इति विच्छेदा विच्छिन्ना विशिष्टा लवाः शकलास्तैः सरूपतां समानरूपतां प्रपेदिर इत्युपमा ॥

उपैत्यनन्तद्युतिरप्यसंशयं विभिन्नमूलोऽनुदयाय संक्षयम् ।
तथा हि तोयौघविभिन्नसंहतिः स हव्यवाहः प्रययौ पराभवम् ॥६१॥

उपैतीति ॥ अनन्तद्युतिर्महातेजा अपि विभिन्नमूलोऽसंशयं यथा तथानुदयाय पुनरभ्युत्थानाय संक्षयं नाशमुपैति । तथा हि । तोयौघैर्विभिन्ना संहतिः संघातो यस्य

१ विशेष. २ इव. ३ विपृक्त.

Digitized by Google

स तथोक्तः स इत्यवाहोऽग्निः परामर्षं मात्रं मयपौ ॥ विशेषेण सामान्यसमर्थनमर्थान्तरन्यासः ॥

अथ विहितविधेयैराशु मुक्ता वितानै-
रसितनगनितम्बश्यामभासां घनानाम् ।
विकसदमलधाम्नां प्राप नीलोत्पलाना
श्रियमधिकविशुद्धां वह्निदाहादिव द्यौः ॥ ६२ ॥

अथेति ॥ अथाग्निनिर्वाणानन्तरं विहितविधेयैः कृतकृत्यैरसितनगस्याञ्जनाद्रेर्निस्तम्बः कटकस्तद्वच्छ्यामभासां घनानां वितानैः पटलैर्मुक्ता धीराकाशो वह्निदाहादिवेत्युत्प्रेक्षा । विकसन्ति च तान्यमलधामानि स्वच्छकान्तीनि च तेषां नीलोत्पलानामधिकविशुद्धामत्युज्ज्वलां श्रियं प्रापेति निदर्शनालंकारः ॥

इति विविधमुदासे सव्यसाची यदस्त्रं
बहुसमरनयज्ञः सादयिष्यन्नरातिम् ।
विधिरिव विपरीतः पौरुषं न्यायवृत्तेः
सपदि तदुपनिन्ये रिक्ततां नीलकण्ठः ॥ ६३ ॥

इतीति ॥ बहुसमरनयाननेकरणोपायाञ्जानातीति बहुसमरनयज्ञः ॥ "आतोऽनुपसर्गे कः" इति कप्रत्ययः । न तु "इगुपध–" इत्यादिनाकारान्तादनुपपदात्कर्मोपपदो भवति । "विमतिपेषेण" इति वार्तिकव्याख्याने भाष्यकारेणार्थग्रहणशब्दमुदाहृत्यात्रार्थग्रहणशब्दस्य कर्मोपपदत्वं दर्शितम् ॥ सव्यसाच्यर्जुनोऽरातिं सादयिष्यन् । अवसादयितुकामः सन्नित्यर्थः ॥ क्रियार्थक्रियायां लृटि तस्य शत्रादेशः ॥ इति पूर्वोक्तप्रकारेण विविधं यदस्त्रमुदासे । प्रयुक्तवानित्यर्थः ॥ "उपसर्गादस्त्यूह्योर्वा" इत्यात्मनेपदम् ॥ विपरीतो विधिः प्रतिकूलं दैवम् ॥ "विधिर्विधाने दैवेऽपि" इत्यमरः ॥ न्यायेन नीत्या हविर्वर्तनं यस्य तस्य नीतिनिघ्नस्य पौरुषमिव नीलकण्ठः शिवः सपदि तदस्त्रं रिक्ततां व्यर्थतामुपनिन्ये संहरवान् ॥ माकिनीहृच्छम् ॥

दीप्तप्रभावतनुरप्यतनुप्रभावः
प्रत्याचकाङ्क्ष जयिनीं भुजवीर्यलक्ष्मीम् ।
अक्षेऽद्भूतपतिनापहृतेऽक्षिपुञ्जै-
र्वर्षिष्यता दिनकृतेव जलेऽब्जलोकः ॥ ६४ ॥

१ विविधः.

Digitized by Google

दीतेति ॥ भूतपतिना शंभुना । अनुग्रहीष्यतेति शेषः । अस्त्रेष्वपहृतेषु सत्सु वर्षिष्यतोत्तरत्र सहस्रगुणं पितरिष्यता दिनकृता सूर्येण जलेष्वपहृतेषु सत्सु लोक इव दीतमभावो गतास्त्रमहिमा । अन्यत्र गतशक्तिः । अतएव तनुः क्षीणो दीतमभावतनुत्वाभ्यतनुप्रभावो निसर्गतः सामर्थ्यादधिकः । अन्यत्रोद्योगवान् । ततो जिष्णुरर्जुनो जयिनी जयनशीलाम् ॥ " जिदक्षि– " इत्यादिनेनिमत्ययः ॥ भुजवीर्यलक्ष्मीं भुजपराक्रमसंपदम् । उभयमपि पुरुषकारमिति यावत् । तत्कालकुण्ठतामिति शेषः । मत्त्याचकाह । मत्त्याहर्तुमित्यपेक्षार्थः । यथा लोकः नद्यादिजलापहारेऽप्युपायान्तरेण कूपादिना जीवितुमिच्छति तद्वदस्त्रबलापहारेऽपि भुजबलेनैव जेतुमिषेषेति भावः ॥ वसन्ततिलकाहृत्तम् ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथसमाख्यया व्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये किरातार्जुनयुद्धं नाम षोडशः सर्गः ।

सप्तदशः सर्गः ।

अथ पञ्चभिः पार्थं विशेषयन्बन्दिनः कुलकमाह—अथेत्यादिभिः ॥

अथापदामुद्धरणक्षमेषु मित्रेष्विवास्त्रेषु तिरोहितेषु ।
धृतिं गुरुश्रीर्गुरुणाभिपुष्यन्स्वपौरुषेणेव शरासनेन ॥ १ ॥

अथ जयलक्ष्मीप्रत्याकाङ्क्षानन्तरमापदामुद्धरणक्षमेष्वापन्निवारणसमर्थेष्वस्त्रेषु प्रस्तावनादिषु तादृशेषु मित्रेष्विव तिरोहितेष्वन्तर्हितेषु सत्सु गुरुणा महता स्वपौरुषेणेव तादृशेन शरासनेन धृतिं धैर्यमभिपुष्यन्वर्धयन् । अथापि धनुषि पौरुषे च सति किमनेन किरात इति धैर्यमवलम्बमान इत्यर्थः । अतएव गुरुभिः महद्भिरोभासंपत्तिः ॥ " पदा मा लक्ष्मीः श्रीर्निगच्छते " इति श्राश्वतः ॥

भूरिप्रभावेण रणाभियोगात्प्रीतो विजिष्णुश्च तदीयवृद्धया ।
स्पष्टोऽप्यविस्पष्टवपुःप्रकाशः सर्पन्महाधूम इवाद्रिवह्निः ॥ २ ॥

भूरीति ॥ पुनश्च । भूरिप्रभावेण महानुभावेन सह रणाभियोगापुद्धलाभात्प्रीतस्तदीयवृद्धया शत्रुवृद्धया विजिष्णुश्च विशेषेण तथा स्पष्टो दीप्त्या प्रज्वलन्प्रत्यक्षः स्पष्टो वपुःप्रकाशो यस्य सः । कुतः । सर्पन्प्रसरन्महान्धूमो यस्य स सर्पन्महाधूमोऽद्रिवह्निरिव स्थितः ॥

Digitized by Google

तेजः समाधित्स परैरहार्यं निजं महन्मित्रमिवोरुधैर्यम् ।
आसादयन्नस्खलितप्रभावं भीमे भुजालम्बमिवारिदुर्गे ॥ २ ॥

तेज इति ॥ पुनश्च । परैरपरिभिरहार्यमप्रमेयं निजं स्वकीयं महत्तेजो वीर्यं मित्रमिव समाधित्स । अतएव भीमे भयानकेऽरिरेव दुर्गे तस्मिन्नरिदुर्गे शत्रुसंकटेऽस्खलितप्रभावमचलशीलमुद्यं महद्दैर्यं भुजालम्बमिव इन्द्रावष्टम्भमिवासादयन्प्रापयत् । ईदृशे संकटेऽपि महावीर्यत्वाद्धैर्यमत्यजन्नित्यर्थः ॥

वंशोचितत्वादभिमानवत्या संप्राप्तया संप्रियतामसुभ्यः ।
समक्षमादित्सितया परेण बध्वेव कीर्त्या परितप्यमानः ॥ ४ ॥

वंशेति ॥ पुनश्च । अभिमानो ममताबुद्धिस्तद्वत्या विषयतया ॥ कर्मणि कर्तृत्वोपचारः ॥ अभिमानास्पदेनेत्यर्थः । अन्यत्र कुलशीलाद्यभिमानवत्या । वंशोचितत्वात्स्वकुलानुरूपत्वादसुभ्यः प्राणेभ्योऽपि संप्रियतां संप्राप्तया परेण शत्रुणाऽग्नेः समीपे समक्षमन्नतः ॥ "अव्ययीभावे शरत्प्रभृतिभ्यः" इति समासान्तष्टच्प्रत्ययः॥ आदातुं ग्रहीतुमिहवादित्सितया । आजिहीर्षितयेत्यर्थः ॥ आङ्पूर्वाददातेः सन्नन्तात्कर्मणि क्तः ॥ बध्वेव कीर्त्या हेतुना परितप्यमानः ॥ कर्तरि शानच् । "हेतौ" इति तृतीया । कम्यया शोक इतिवत् ॥

पतिं नगानामिव वज्रमूलमुन्मूलयिष्यंस्तरसा विपक्षम् ।
लघुप्रयत्नं निगृहीतवीर्यस्त्रिमार्गगावेग इवेश्वरेण ॥ ५ ॥

पतिमिति ॥ पुनश्च । नगानां पतिं हिमवन्तमिव वज्रमूलं विपक्षं शत्रुं तरसा बलेनोन्मूलयिष्यन् । किं च । त्रिभिर्मार्गैर्गच्छतीति त्रिमार्गगा गङ्गा ॥ उपपदसमासः ॥ तस्या वेग इव । ईश्वरेण लघुप्रयत्नमल्पप्रयासं यथा तथा निगृहीतवीर्यः प्रतिबद्धशक्तिः । इतोऽग्रशक्तिरिति यावत् ॥ पुरा किल हिमाद्रिविदलनाय गगनात्पतन्तं गङ्गावाहं गङ्गाधरो निजजटाजूटेन निजग्राहेति पौराणी कथा । तद्वदित्यर्थः॥

संस्कारवत्त्वाद्गमयत्सु चेतः प्रयोगशिक्षागुणभूषणेषु ।
जवं यथार्थेषु शरेषु पार्थः शब्देषु भावार्थमिवाशशंसे ॥ ६ ॥

संस्कारेति ॥ एवंभूतः पार्थः संस्कारवत्त्वात्संस्कारश्चित्तवासना । अन्यत्र साधुत्वम् । अतएवार्थानां प्रयोजनविषयादिति भावः । अथवा संस्कारो व्युत्पत्तिस्तद्वत्त्वात् । चेतसि रमयत्सु । प्रयोगः संधानमोक्षादिः शिक्षाभ्यासो गुणस्तदादितोऽतिशयो मौर्वी वा । अन्यत्र तु प्रयोगोऽभियुक्तव्यवहारः शिक्षाभ्यासो गुणाः सत्त्वज्ञानकरणा-

१ गमयो; गमये. २ यथार्थेषु.

Digitized by Google

दृक्षः क्लेशसादादयो वा। ते भूषणं येषां तेषु यथा यथाभूता अर्था येषां तेषु यथार्थेषु। अन्यत्र भिषजार्थेषु। कृपणन्ति हिंसन्तीति अरास्तेषु अयं तस्॥ निर्वाहकत्वात्पदाधारत्वविवक्षायां सप्तमी॥ शब्देरूपपदेषु भावः प्रकृतिनिमित्तं सामान्यादिः स एवार्थस्तमिव। आक्षर्षंस आचकाङ्क्षे॥ आक्षिक्षंसत्योराङ्पूर्वयोरिच्छायामात्मनेपदमुपसंख्यानात्॥ यथा आध्विकाः शब्दैरर्थं साधयन्ति तद्वदयं शरैरर्थं साधयितुमियेषेत्यर्थः॥

भूयः समाधानविवृद्धतेजा नैवं पुरा युद्धमिति व्यथावान्।
सं निर्ववामास्रममर्षजन्मं विषं महानाग इवेक्षणाभ्याम्॥ ७॥

भूय इति॥ भूयः पुनरपि समाधानेन युद्धाय मनोव्यवस्थापनेन विवृद्धतेजाः प्रवृद्धप्रतापः पुरा पुरातनं युद्धमेवमित्थं शक्तिसादकरं न भवतीति हेतोर्व्यथावान्परितापवान्सोऽर्जुन ईक्षणाभ्यां दृष्टिभ्यां महानागो महासर्पो विषमिवामर्षजन्मं क्रोधोत्थापितमस्त्रमशु निर्ववाम निरगार। सात्विकानां वीररसाधारण्याद्वीरे रसेऽश्रूदयोक्तिः। "स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभेदोऽथ वेपथुः। वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्विका मताः"॥

तस्याहवायासविलोलमौलेः संरम्भताम्रायतलोचनस्य।
निर्वापयिष्यन्निव रोषतप्तं प्रजापयामास मुखं निदाघः॥ ८॥

तस्येति॥ आहवायासेन युद्धायासेन विलोलमौलेः स्रस्तकेशबन्धस्य॥ "मूर्धा किरीटं केशाश्च संयता मौलयस्त्रयः" इत्यमरः॥ संरम्भताम्रे क्रोधारुणे आयते लोचने यस्य तस्य॥ "संरम्भः संभ्रमे कोपे" इति विश्वः॥ तस्यार्जुनस्य रोषतप्तं मुखं निदाघो घर्मो निर्वापयिष्यन्निवविलीकरिष्यन्निवेत्युत्प्रेक्षा। प्रजापयामास सिषेच। स्वेदं जनयामासेत्यर्थः॥ स्नातेर्मित्त्वविकल्पितत्वाद्रूपविकल्पः॥

क्रोधान्धकारान्तरितो रणाय भ्रूभेदरेखाः स बभार तिस्रः।
घनोपरुद्धः प्रभवाय वृष्टेरूर्ध्वांशुराजीरिव तिग्मरश्मिः॥ ९॥

क्रोधेति॥ क्रोधोऽन्धकार इव तेनान्तरित आहृतः सोऽर्जुनो घनोपरुद्धो मेघाहृतस्तिग्मरश्मी रविर्वृष्टेः प्रभवाय वर्षणाय तिस्र ऊर्ध्वांशूनां राजीरिव। अर्कस्योर्ध्वांशोरेषोदयो दृष्टिछिद्रमिवागमः। रणाय रणमहत्त्वाय तिस्रस्त्रिसंख्या भ्रूभेदो भ्रूमङ्गस्तस्य रेखा बभार॥

सं प्रध्वनय्याम्बुदनादि चापं हस्तेन दिङ्नाग इवाद्रिशृङ्गम्।
बलानि शंभोरिडमिस्तताप चेतांसि चिन्ताभिरिवाशरीरः॥१०॥

१ घनैः. २ भूभङ्ग. ३ घनावरुद्धः. ४ घर्मरश्मिः.. ५ प्रध्वानयन्.

Digitized by Google

स इति ॥ सोऽर्जुनोऽम्युदयशब्दतीसम्युदनादि ॥ "कर्तर्युपमाने" इति णिनिः॥ चापं दिक्करिगो दिग्गजोऽद्रिशृङ्गमिव हस्तेन करेण मध्यनम्य मध्यनयञ्शंभोर्वक्षाम्यशरीरोऽनङ्गः कामश्चेतांसि युवमनांसि चिन्ताभिः श्रेयोजनध्यानैरिवेषुभिस्ततापेव तापयामास ॥ तपतिः सकर्मकः । अत्रेषुशब्दः स्त्रीलिङ्गः । अन्यथोपमानोपमेयवोर्भिन्नलिङ्गत्वादोषात् ॥ "पत्री रोप इषुर्द्वयोः" इत्यमरः ॥

सद्यादितेवाभिनिविष्टबुद्धौ गुणाभ्यसूयेव विपक्षपाते ।
अगोचरे वागिव चोपरेमे शक्तिः शराणा शितिकण्ठकाये ॥ ११ ॥

सद्यादितेति ॥ अभिनिविष्टा शास्त्रनिश्चिता बुद्धिर्यस्य स तस्मिन्नभिनिविष्टबुद्धौ शास्त्रनिश्चितमतौ विषये सद्यादिता ग्रामणिकार्यसमर्थकतेव । न हि सम्यगभ्यस्तशास्त्रं प्रति सद्यापि शक्नोतीति व्याचक्षते केचित् । अन्ये त्वभिनिविष्टबुद्धावाग्रहाविष्टचित्ते विषये सद्यादिता हितोपदेशतुल्यमिव । न ह्याग्रही हितं गृह्णातीति भावः । विपक्षपाते वीतरागे विषये गुणाभ्यसूया गुणासहिष्णुतेव । समदर्शी हि चन्तमपि न द्वेष्टि यत इति भावः । अगोचरेऽवाङ्मनसगोचरे ब्रह्मणि वागिव । "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति श्रुतेरिति भावः । शराणां शक्तिः शितिकण्ठकाये शिवशरीर उपरेमे उपरता । तस्यास्तोभ्यमहिमत्वादिति भावः ॥ "विभाषाकर्मकात्" इत्यस्य वैकल्पिकत्वात्पक्षे आत्मनेपदम् ॥ अत्र मालोपमा ॥

उमापतिं पाण्डुसुतप्रणुन्नाः शिलीमुखा न व्यथयांबभूवुः ।
अभ्युत्थितस्साद्रिपतेर्नितम्बमर्कस्य पादा इव हैमनस्य ॥ १२ ॥

उमेति ॥ पाण्डुसुतेन प्रयुक्ताः प्रक्षिप्ताः शिलीमुखा बाणा उमापतिं शिवमभ्युत्थितस्याभ्युन्नतस्याद्रिपतेर्नितम्बं कटकम् । हैमन्ते भवस्य हैमनस्य । "सर्वप्राय्य तत्रोपम्य" इत्यण्प्रत्ययः । तकारलोपश्च ॥ अर्कस्य पादा रश्मय इव ॥ "पादा रश्म्यङ्घ्रितुर्यांशाः" इत्यमरः ॥ न व्यथयांबभूवुः ॥ "मध्ये स्थितस्यासुमतां सदूरमर्कस्य" इति पाठान्तरे मध्ये स्थितस्य हैमनस्यार्कस्य पादाः किरणा असुमतां प्राणिनां सदूरमिवेति न दुःसहत्वादपायासुरिति ॥

संप्रीयमाणोऽनुबभूव तीव्रं पराक्रमं तस्य पतिर्गणानाम् ।
विषाणभेदं हिमवानसह्यं वभ्रानतस्येव सुरद्विपस्य ॥ १३ ॥

संप्रीति ॥ गणानां पतिः शिवस्तीव्रं तस्यार्जुनस्य पराक्रमं रणे रोषस्यानतस्य परिणतस्य । नमश्चरिण इत्यर्थः । सुरद्विपस्यासह्यं विषाणभेदं दन्तप्रहारं हिमवानिव संप्रीयमाणः संहृष्यन्ननुबभूवानुमतवति स्म । तस्यास्तोभ्यत्वादनुजिघृक्षुत्वाचेति भावः॥

१ अभ्युज्जिघृक्षत्व.

Digitized by Google

तस्मै हि भारोद्वरणे समर्थं प्रदास्यता बाहुमिव प्रतापम् ।
चिरं [1]विषेहेऽभिभवन्नदानीं स कारणानामपि कारणेन ॥ १४ ॥

तस्मै इति ॥ तस्मै पार्थाय भारस्य भूभारस्योद्वरणे वहने समर्थं प्रतापं बाहुमिव । अवष्टम्भतयेति शेषः । अन्यथा भारोद्वहनस्य दुष्करत्वादिति भावः ॥ "स प्रतापः प्रभावश्च पराक्रमः कोशदण्डजम्" इत्यमरः ॥ प्रदास्यता वितरिष्यता कारणानां ब्रह्मादीनामपि कारणेन जनकेन देवेन सोऽर्जुनोऽभिभवन्नदानीं चिरं विषेहे सोढः । दातस्त्वादिति भावः ॥

अथ त्रिभिर्भगवदभिप्रायमाविष्कुर्वद्भिः कलापकमाह—

प्रत्याहृतौजाः कृतसत्त्ववेगः पराक्रमं ज्यायसि यत्तनोति ।
तेजांसि भानोरिव निष्पतन्ति यशांसि वीर्यज्वलितानि तस्य ॥ १५ ॥

प्रत्याहृतेति ॥ प्रत्याहृतौजाः परेण प्रतिहतबलः सन्नपि कृतसत्त्ववेगः कृतोत्साहातिशयः सन्यः पुमान्ज्यायसि स्वस्मादप्यधिके पराक्रमं तनोति तस्य पुंसः भानोरर्कस्य तेजांसीव वीर्येण शौर्येण ज्वलितानि प्रकाशितानि यशांसि निष्पतन्ति । उद्भवन्तीत्यर्थः । हीनस्याधिकाभियोगो यशस्कर इति भावः ॥

ततः किमित्यत आह—

दृष्टावदानाद्व्यथतेऽरिलोकः प्रध्वंसमेति व्यथिताच्च तेजः ।
तेजोविहीनं विजहाति दर्पः शान्तार्चिषं दीपमिव प्रकाशः ॥ १६ ॥

दृष्टेति ॥ दृष्टमवदानं महत्कर्म यस्य तस्माद्दृष्टावदानादृष्टपौरुषादरिलोकः शत्रुजनो व्यथते विभेति । व्यथिताद्भीतात्तेजः प्रध्वंसं नाशमेति । तेजोविहीनं दर्पं उत्साहः शान्तार्चिषं निर्वाणज्वालं दीपं प्रकाश इव विजहाति त्यजति ॥

ततः प्रयात्यस्तमदावलेपः स जय्यतायाः पदवीं जिगीषोः ।
गन्धेन जेतुः प्रमुखागतस्य गन्धद्विपस्येव मतङ्गजौघः ॥ १७ ॥

तत इति ॥ ततो दर्पहान्यनन्तरमस्तौ क्षयं गतौ मदावलेपौ मदगर्वौ यस्य सः । सोऽरिलोको गन्धेन मदगन्धेनैव जेतुर्जयनशीलस्य ॥ तृच्प्रत्ययः ॥ प्रमुखागतस्याभिमुखागतस्य गन्धद्विपस्यान्यो मतङ्गजौघो मत्तगजसमूह इव जिगीषोर्नायकस्य जय्यतायाः । पदवीं प्रयाति प्राप्नोति । विजिगीषुणा जेतुं शक्यो भवतीत्यर्थः ॥ "शक्यजय्यौ शक्यार्थे" इति निपातः ॥ अत्र श्लोकद्वयेन ज्यायसि पराक्रमकरणा-

१ भारोद्वहने. २ प्रसेहे. ३ क्षत. ४ विलोकः. ५ भवदाति.

Digitized by Google

दीनां पूर्वपूर्वस्योत्तरोत्तरं प्रति कारणत्वकथनात्कारणमालाख्योऽलंकारः । लक्षणं तूक्तम् ॥

एवं प्रतिद्वन्द्विषु तस्य कीर्तिं मौलीन्दुलेखाविशदां विधास्यन् ।
इयेष पर्यायजयावसादां रणक्रियां शंभुरनुक्रमेण ॥ १८ ॥

एवमिति ॥ एवमुक्तरीत्या प्रतिद्वन्द्विषु प्रत्यरिमध्ये तस्यार्जुनस्य मौलीन्दुलेखाविशदां कीर्तिं विधास्यन्करिष्यन्ननुक्रमेणाविपर्यासेन पर्यायेण जयोऽवसादो भङ्गश्च तौ जयावसादौ यस्यां तां पर्यायजयावसादां रणक्रियामियेषेच्छति स्म । जयानन्तरं भङ्गो भङ्गानन्तरं जय इति पर्यायार्थः । तस्य विपर्यासोऽन्यतरनैरन्तर्यं तदभावोऽनुक्रम इत्यौनरुक्त्यम् ॥

मुनेर्विचित्रैरिषुभिः स भूयान्निन्ये वशं भूतपतेर्बलौघः ।
सहात्मलाभेन समुत्पतद्भिर्जातिस्वभावैरिव जीवलोकः ॥ १९ ॥

मुनेरिति ॥ मुनेर्विचित्रैरिषुभिः स भूयानसंख्यो भूतपतेर्बलौघ आत्मलाभेन जन्मना सह समुत्पतद्भिराविर्भवद्भिः । आजन्मसिद्धैरित्यर्थः । जातयो गोत्वमनुष्यत्वादयः स्वभावा जातिनियता धर्मास्तैर्जातिस्वभावैर्जीवलोकः प्राणिजातमिव । वशं निन्ये नीतः ॥ कर्मणि लिट् ॥ प्राणिनो जातिधर्मानिव गणान्मुनिशरान्जातिक्रमिवं नेतुरित्यर्थः ॥

वितन्वतस्तस्य शरान्धकारं त्रस्तानि सैन्यानि रवं निशेमुः ।
प्रवर्षतः संततवेपथूनि क्षपाघनस्येव गवां कुलानि ॥ २० ॥

वितन्वत इति ॥ त्रस्तानि सैन्यानि संततवेपथूनि निरन्तरकम्पानि गवां कुलानि वृन्दानि प्रवर्षतो वृष्टिं कुर्वतः क्षपाघनस्य रात्रिमेघस्येव शरैर्योऽन्धकारस्तं वितन्वतो विस्तारयतस्तस्य मुनेः संबन्धिनं रवं शरवर्षघोषं निशेमुः शुश्रुवुः । न तु किंचिदरुद्धः । चेष्टा तु दूर आस्तामिति भावः ॥

स सायकान्साध्वसविप्लुतानां क्षिपन्परेषामतिसौष्ठवेन ।
शतीव दोषाद्गतलोचनानां विभिद्यमानः पृथगावभासे ॥ २१ ॥

स इति ॥ अतिसौष्ठवेनातिलाघवेन सायकान्शरान्क्षिपन्सोऽर्जुनः साध्वसेन विप्लुतानां भ्रान्तानां साध्वसविप्लुतानां परेषां द्विषां दोषेण रागादिनाद्गतलोचनानां मुद्रितचक्षुषां शतीव पृथग्विभिद्यमान आवभासे । यथा सदोषचक्षुर्दोषैकमन्त्रो नानेव लक्ष्यते तद्वदेकोऽप्यनेक इव दृष्ट इति भावः ॥

१ शतेन्दु.

Digitized by Google

क्षोभेण तेनाथ गणाधिपानां भेदं ययावाकृतिरीश्वरस्य।
तरंगकम्पेन महाह्रदानां छायामयस्येव दिनस्य भर्तुः ॥ २२ ॥

क्षोभेणेति ॥ अथ गणाधिपानां संबन्धिना तेन क्षोभेण कम्पेनेश्वरस्याकृतिराकारो मूर्तिर्महाह्रदानां तरंगकम्पेन छायामयस्य प्रतिबिम्बरूपस्य दिनस्य भर्तुर्दिवाकरस्याकृतिरिव भेदं विकारं ययौ प्राप। स्वयं निर्विकारोऽपि प्रतिसूर्यपत्परसंसर्गाच्चया प्रतीयत इत्यर्थः ॥

यदि देवोऽपि विकृतस्तर्हि कोपः किं न कृतः। तत्राह—

प्रसेदिवांसं न तमाप कोपः कृतः परस्मिन्पुरुषे विकारः।
आकारवैषम्यमिदं च भेजे दुर्लक्ष्यचिह्ना महतां हि वृत्तिः ॥ २३ ॥

प्रसेदिवांसमिति ॥ प्रसेदिवांसमर्जुनं प्रति प्रसन्नचित्तं तं देवं कोपो नाप न प्राप। तत्राप्यनुग्रहं प्रयाचितेति भावः। तत्र हेतुः—परस्मिन्पुरुषे परात्मनि देवे। स्वतो निर्विकार इत्यर्थः। विकारः कोपरूपः कृतः। न कृतश्चिदित्यर्थः। ननु तस्य निर्विकारस्य कथं बहिराकारभेदः कारणाभावादिति चेत्तत्र विध इत्याह—इदं पूर्वोक्तमाकारवैषम्यं च भेजे। किंतु केनापि कारणेन न कुप्यतीत्यर्थः। ननु निर्विकारे कुत आकारभेदस्तत्राह—महतां वृत्तिश्चेष्टा दुर्लक्ष्यचिह्ना दुर्ग्रहहेतुका हि ॥

विकारमेवाह—

विस्फार्यमाणस्य ततो भुजाभ्यां भूतानि भर्त्रा धनुरन्तकस्य।
भिन्नाकृतिं ज्यां दहशुः स्फुरन्तीं क्रुद्धस्य जिह्वामिव तक्षकस्य २४

विस्फार्यमाणस्येति ॥ ततोऽनन्तरं भूतानि भर्त्रा भूतपतिना॥ भूतस्तृप्त्यत्ययः। अतएव "न लोक-" इत्यादिना षष्ठीप्रतिषेधः ॥ भुजाभ्याम् ॥ कर्तृकरणयोस्तृतीया ॥ विस्फार्यमाणस्याकृष्यमाणस्य धनुरन्तक इव तस्य धनुरन्तकस्य संबन्धिनीं स्फुरन्तीं चलन्तीमतएव भिन्ना द्विधेव दृश्यमानाकृतिर्यस्यास्तां ज्यां धनुर्गुणं क्रुद्धस्य तक्षकस्य नागविशेषस्य जिह्वामिव दहशुः। द्विधाभावाद्भयंकरत्वादेति भावः ॥

सव्यापसव्यध्वनितोग्रचापं पार्थः किरातधिपमाशशङ्के।
पर्यायसंपादितकर्णतालं यन्ता गजं व्यालमिवापराद्धः ॥ २५ ॥

सव्येति ॥ पार्थः सव्यापसव्याभ्यां ध्वनितं नादितमुग्रचापं येन तं किरातधिपम्। अपराद्धः प्रमत्तो यन्ता पर्यायेणावीगपयेन संपादितं कर्णयोस्तालमास्फालनं

१ रजो वा.. २ रजोभुजाभ्याम्. ३ वेपम्व.

Digitized by Google

येन तं व्यालं दुहुस् ॥ "भेदलिङ्गः शठे व्यालः" इत्यमरः ॥ गजमिवाशक्तम् । तथापचातुर्यदर्शनादुर्जयः क्रोऽप्ययमनर्थकरश्चेति शङ्कितमानसार्थः ॥

निजग्मिरे तस्य हरेषु जालैः पतन्ति वृन्दानि शिलीमुखानाम् ।
तेजस्विभिः सिन्धुमुखागतानि यादांसि यादोभिरिवाम्बुराशेः॥२६

निजग्मिर इति ॥ हरेषु जालैस्तस्यार्जुनस्य पतन्त्यागच्छन्ति शिली शब्दं मुखे येषां तेषां शिलीमुखानां शराणां वृन्दानि । तेजस्विभिः प्रबलैरम्बुराशेर्यादोभिर्जन्तुभिः सिन्धुमुखेन नदीमुखेनागतानि यादांसीव जलजन्तूनिव ॥ "यादांसि जलजन्तवः" इति वैजयन्ती ॥ निजग्मिरे इतानि ॥

विभेदमन्तः पदवीनिरोधं विध्वंसनं चाविदितप्रयोगः ।
नेतारिलोकेषु करोति यद्यत्तत्तच्चकारास्य शरेषु शंभुः ॥ २७ ॥

विभेदमिति ॥ अन्तर्विभेदं व्यूहविश्लेषणमुपजापं च पदवीनिरोधं मार्ग एव मतिबन्धनमन्यत्र स्वासारमसारमतिबन्धं विध्वंसनं खण्डनं दुर्घटनदादादिकं चेत्यादि यत्तच्चेता नायको जिगीषुरविदितप्रयोगः संहृतमन्त्रत्वादविज्ञातोपायप्रयोगः सन् । अरिलोकेषु शत्रुलोकेषु करोति । तत्तच्छंभुरविदितप्रयोगोऽज्ञातसंधानमोक्षादिकः सन् । अस्यार्जुनस्य शरेषु चकार कृतवान् ॥ कर्तरि लिट् ॥ श्लेषालंकारः ॥

सोढावगीतप्रथमायुधस्य क्रोधोज्झितैर्वेगितया पतद्भिः ।
छिन्नैरपि त्रासितवाहिनीकैः पेते कृतार्थैरिव तस्य बाणैः ॥ २८ ॥

सोढेति ॥ सोढानि परैरवगीतानि गर्हितानि प्रथमायुधानि पूर्वोत्सृष्टायुधानि यस्य तस्यार्जुनस्य संबन्धिभिः क्रोधोज्झितैः क्रोधामिषिक्तैः पूर्ववाणवैफल्यात्कोपेन त्यक्तैः । अतएव वेगितया वेगेन पतद्भिर्गतिं कुर्वद्भिः । अतएव छिन्नैरपि त्रासिता वाहिन्यो यैस्तैरतएव कृतार्थैरिव बाणैः पेते ॥ भावे लिट् ॥ वस्तुतस्त्वकृतार्था एवेत्यर्थः ॥

अलंकृतानामृजुतायुजेन गुरूपदिष्टां गतिमाश्रितानाम् ।
सतामिवापर्वणि मार्गणानां भङ्गः स जिष्णोर्धृतिमुन्ममाथ॥२९॥

अलमिति ॥ ऋजुतावक्राकारत्वमक्षीरत्वं च सैव गुणस्तेनालंकृतानां गुरुभिर्धनुर्विद्यागुरुभिर्धर्मशास्त्रगुरुभिश्चोपदिष्टां दर्शितां गतिं गमनमाचारं चाश्रितानां मार्गणानां शराणां सतां साधूनामिवापर्वण्यग्रन्थौ । अग्र्यनामस्वादौ । अकाण्ड इत्यर्थः॥ "पर्वः स्यादुत्सवे ग्रन्थौ मखादौ जलजान्तरे" इति विश्वः ॥ स ईश्वरकृतो भङ्ग-

१ पाठ्य. २ ऊर्वसिमि:. ३ अपेपस्य. ४ मन्त्रसंहत्. ५ वेगा. ६ गमनायुधस्य.

Digitized by Google

श्लेदो व्यसनं च जिष्णोरर्जुनस्य कस्यचिज्जिसरस्य ॥ "जिष्णुः शक्रे धनंजये । जिसरे" इति विश्वः ॥ धृतिं धैर्यमुन्ममाथ । जहारेत्यर्थः । अकाण्डे साधुविपत्तिदर्शनादिव शरभङ्गदर्शनादुर्यभङ्गेऽधृतिस्यर्थः ॥

बाणच्छिदस्ते विशिखाः स्मरारेरवाप्युखीभूतफलाः पतन्तः ।
अखण्डितं पाण्डवसायकेभ्यः कृतस्य सद्यः प्रतिकारमापुः ॥२०॥

बाणेति ॥ बाणच्छिदः पार्थशरच्छेदिनस्ते शरारेर्विशिखा अवाप्युखीभूतफला विमुखाग्रा विफलाश्च सन्तः पतन्तः पाण्डवसायकेभ्यः ॥ क्रियाग्रहणाच्चतुर्थी ॥ पाण्डवसायकानां कृतस्य फलभङ्गरूपस्य स्वकर्मणः सद्योऽखण्डितं प्रतिकारमापुः । अत्युत्कटं कर्म सद्यः फलं दर्शयतीति भावः ॥

पुनरर्जुनस्य जयमाह—

चित्रीयमाणानतिलाघवेन प्रमाथिनस्तान्भवमार्गणानाम् ।
शङ्काकुलाया निषसाद दूरं बाणान्ध्वजिन्या हृदयेष्वरातिः ॥२१

चित्रीयमाणानिति ॥ अरातिरर्जुनोऽतिलाघवेनातिशीघ्रत्वाच्चित्रीयमाणांश्चित्रमाश्चर्यं कुर्वाणान् ॥ "नमोवरिवश्चित्रङः क्यच्" ॥ भवमार्गणानां प्रमाथिनः स्रन्थयतस्तान्बाणान् । शङ्काकुलायाः संकुलितायाः संक्षुभितायाः ध्वजिन्याः सेनायाः हृदयेषु दूरं गाढं निषसाद निखातवान् ॥

तस्यातियत्नादतिरिच्यमाने पराक्रमेऽन्योन्यविशेषणेन ।
हन्ता पुरां भूरि घृषत्कवर्षं निरास नैदाघ इवाम्बु मेघः ॥ २२ ॥

तस्येति ॥ तस्यार्जुनस्य पराक्रमेऽतियत्नाद्धेतोरन्योन्यस्य विशेषणेनातिशयकरणेनातिरिच्यमानेऽतिक्रम्यमाणे सति पुरां हन्ता त्रिपुरविजयी हरो भूरि मयूखं घृषत्कवर्षं बाणवर्षम् ॥ "घृषत्कबाणार्विशिखाः" इत्यमरः ॥ निदाघे भवो नैदाघो मेघोऽम्बुवाहोऽम्बु जलमिव निरास मुमोच ॥ अस्यतेर्लिट् ॥ निदाघग्रहणं वर्षणस्यावितीव्रत्वद्योतनार्थम् ॥

अनासृशन्तः क्वचिदेव मर्म प्रियैषिणानुग्रहिताः शिवेन ।
सुहृत्प्रयुक्ता इव नर्मवादाः शरा मुनेः प्रीतिकरा बभूवुः ॥२३॥

अनासृशन्त इति ॥ प्रियैषिणा प्रियचिकीर्षुणा शिवेनानुग्रहिताः प्रयुक्ता अतएव क्वचिदेव मर्मानासृशन्तोऽस्पृशन्तस्ते शराः सुहृन्मित्रं सोऽपि प्रियैषी तेन प्रयुक्ता उच्चारिता नर्मवादाः प्रियवादा इव । मुनेरर्जुनस्य प्रीतिकराः प्रीतिजनका बभूवुः ॥

१ समाकुलायाः. २ विष्णुः. ३ मेघोऽम्बु.

Digitized by Google

अस्त्रैः समानामतिरेकिणीं वा पश्यन्निरूपणामपि तस्य शक्तिम् ।
विषादवक्तव्यबलः प्रमाथी स्वमाललम्बे बलमिन्दुमौलिः ॥२४॥

अस्त्रैरिति ॥ अस्त्रैः स्वायुधैः समानां तुल्यामतिरेकिणीं ततोऽधिकां वा तस्य मुनेरिपूणामपि शक्तिं पश्यन्विषादेनोत्साहभङ्गेन वक्तव्यानि निर्वाच्यानि बलानि यस्य स प्रमाथी शत्रुमर्दनः इन्दुमौलिर्महादेवः स्वं बलमात्मीयं बलमालम्बे स्वसामर्थ्यमवलम्बितवान् ॥

ततस्तपोवीर्यसमुद्धतस्य पारं ययासोः समरार्णवस्य ।
महेषुजालान्यखिलानि जिष्णोरर्कः पयांसीव समाचचाम ॥२५॥

तत इति ॥ ततो महिमप्रादुर्भावानन्तरं देवस्तपोवीर्याभ्यां समुद्धतस्य प्रगल्भस्य समर एवार्णवस्तस्य पारमन्तं ययासोर्जिगमिषोर्जिष्णोरर्जुनस्याखिलानि महेषुजालानि समग्रबाणसमूहानर्कः सूर्यः पयांसीव जलानीव समाचचाम । संजहारेत्यर्थः ॥

रिक्ते सविश्रम्भमथार्जुनस्य निषङ्गवक्त्रे निपपात पाणिः ।
अन्यद्विपापीतजले सतर्षं मतङ्गजस्येव नगाश्मरन्ध्रे ॥ २६ ॥

रिक्त इति ॥ अथ बाणान्तर्धानानन्तरमर्जुनस्य पाणिः करो रिक्ते बाणशून्येऽपि निषङ्गवक्त्रे तूणीरमुखेऽभ्यद्विपेन गजान्तरेणापीतजले पीततोये नगस्याचलस्याश्मरन्ध्रे शिलागर्ते । कन्दर इत्यर्थः । सतर्षं सतृष्णं यथा स्यात्तथेति क्रियाविशेषणम् । मतङ्गजस्य पाणिर्शुण्डया कर इव सविश्रम्भं सन्त्सेव बाणा इति सविश्वासं निपपात ॥

च्युते स तस्मिन्निषुधौ शरार्थाद्धस्तार्थसारे सहसैव बन्धौ ।
तत्कालमोघप्रणयः प्रपेदे निर्वाच्यताकाम इवाभिमुख्यम् ॥२७॥

च्युत इति ॥ शरा एवार्थो धनं यस्य तस्माच्युते भ्रष्टे तस्मिन्निषुधौ निषङ्गे सहसा झटिति च्यस्तार्थसारेऽक्षान्ते नष्टधनसारे बन्धाविव तत्काले मोघो वितथः प्रणयः प्रीतिर्यस्य सः । प्रणयेनार्थमार्थनात्पूर्वं कृतार्थ एवेति भावः । स पाणिः । निर्वाच्यता कृतघ्नत्वादपवादराहित्यं कामयत इति निर्वाच्यताकामः ॥ धीप्सिकामिमदाचरिभ्यो णः ॥ स इवेत्युत्प्रेक्षा । आभिमुख्यं प्रपेदे । यथा कश्चित्कृतघ्नस्तत्काले कृतघ्नतामपि बन्धुं पूर्वोपकारस्मरणात्पुनः पुनरनुयाति तद्वदित्यर्थः ॥

आचष्टयामास गतागताभ्यां सावेगमप्राकुलिरस्य तूणौ ।
विधेयमार्गे मतिरुत्सुकस्य नयप्रयोगाविव गां जिगीषोः ॥ २८ ॥

१ तूणम्. २ अथ. ३ पन्न. ४ सवेगम्. ५ उन्मुखस्य.

Digitized by Google

आघट्टयामासेति ॥ अस्य मुनेरग्रं चासावङ्गुलिश्चेत्यग्राङ्गुलिः॥"इत्ताग्राग्रहस्तयोर्गुणिनोर्भेदात्" इति वामनः॥ विधेयमार्गं कर्तव्यान्वेषेण उत्सुकस्य महतस्तं शुद्धं जिगीषोर्नायकस्य मतिर्बुद्धिर्नयः पाङ्क्त्यः प्रयोग उपायस्तौ नयप्रयोगाविव तूणौ निषण्णौ सावेगं ससंभ्रमम् ॥ "इष्टानिष्टागमाज्ञानमावेगश्चित्तसंभ्रमः" इति शाश्वतः ॥ गतागताभ्यां यातायाताभ्यामापोहापाभ्यां चाघट्टयामास । अन्यत्र तु वितर्कयामास । शरग्रहणाय पुनः पुनस्तूणयोः पाणिं व्यापारयामासेत्यर्थः ॥

बभार शून्याकृतिरर्जुनस्तौ महेषुधी वीतमहेषुजालौ ।
युगान्तसंशुष्कजलौ विजिह्मः पूर्वापरौ लोक इवाम्बुराशी॥२९॥

बभारेति ॥ शून्याकृतिरिषुनाशान्निस्तेजस्करूपोऽर्जुनस्तौ वीतमहेषुजालौ वीतानि रिक्तानि महेषुजालानि ययोस्तौ महेषुधी महानिषधी । विजिह्मः शून्यो लोको युगान्ते संशुष्कजलौ ॥ "शुषः कः" इति निष्ठातकारस्य ककारः ॥ पूर्वापराम्बुराशी समुद्राविव । बभार ॥

तेनानिमित्तेन तथा न पार्थस्तयोर्यथा रिक्ततयाजुतेपे ।
स्वामापदं प्रोज्झ्य विपत्तिमग्नं शोचन्ति सन्तो ह्युपकारिपक्षम्॥३०

तेनेति ॥ पार्थस्तयोस्तूणयो रिक्ततया हेतुना यथाजुतेपे शुशोच तथा तेनानिमित्तेन बाणक्षयरूपेण दुर्निमित्तेन न शुशोच । तथा हि । सन्तः स्वामापदं मोक्ष्य विमुच्य विपत्तिमग्नमुपकारिणां पक्षं वर्गं शोचन्ति । स्वव्यसनापेक्षया परकीयव्यसनमेव सतामनुतापकमित्यर्थः ॥

प्रतिक्रियायै विधुरः स तस्मात्कृच्छ्रेण विश्लेषमियाय हस्तः ।
पराङ्मुखत्वेऽपि कृतोपकारात्तूणीमुखान्मित्रकुलादिवार्यः॥३१॥

प्रतीति ॥ प्रतिक्रियायै विधुरः प्रतिकर्तुमसमर्थः ॥ "तुमर्थाच्च भाववचनात्" इति चतुर्थी ॥ अर्जुनस्य स हस्तः पाणिः । पराङ्मुखत्वेऽपि तत्कालवैमुख्येऽपि कृतोपकारात्तस्मात्तूणीमुखान्मित्रकुलादार्यः साधुः कृतज्ञ इव ॥ "आर्यः साधुकुलीनयोः" इति विश्वः ॥ कृच्छ्रेण महाकष्टेन विश्लेषमियाय ॥ गौरादित्वात्तूणमब्दान्तीप् ॥

पश्चात्क्रिया तूणयुगस्य भर्तुर्जज्ञे तदानीमुपकारिणीव ।
संभावनायामधरीकृतायां[1] पत्युः पुरः साहसमासितव्यम्॥३२॥

पश्चादिति ॥ तदानीं भर्तुः स्वामिनः ॥ कर्तरि षष्ठी ॥ पश्चात्क्रिया पृष्ठतः करणं

१ विफलीकृतायाम्.

Digitized by Google

तूणयुगलोपकारिजीवोपकारिकेव जङ्घे जाता । तथा हि । संभावनायां स्वयोग्यतावामपरीक्षितावामफलीकृतायां पत्युः स्वामिनः पुरोऽग्र आसितव्यमासंस्थितम् ॥ बहुलग्रहणाद्भावे तव्यप्रत्ययः ॥ साहसं न सभं न योग्यम् । भर्त्रा संभावितस्तावसरेऽनुपकर्तुरनुजीविनस्तत्सांमुख्यमनुचितमित्यर्थः ॥

तं शंभुराक्षिप्तमहेषुजालं लौहैः शरैर्मर्मसु निस्तुतोद ।
हतोत्तरं तत्त्वविचारमध्ये वक्तेव दोषैर्गुरुभिर्विपक्षम् ॥ ४३ ॥

तमिति ॥ शंभुराक्षिप्तान्याहतानि महेषुजालानि यस्य तं मुनिं तत्त्वविचारमध्ये वादमध्ये हतोत्तरं निरुत्तरीकृतं विपक्षं प्रतिवादिनम् । वक्ता वादी गुरुभिर्दोषैर्निग्रहस्थानैरिव । लौहैर्लोहमयैः शरैर्मर्मसु निस्तुतोद व्यथयामास ॥

जहार चास्मादचिरेण वर्म ज्वलन्मणिद्योतितहैम्यलेखम् ।
षण्डः पतङ्गान्मरुदेकनीलं तडित्वतः खण्डमिवाम्बुदस्य ॥ ४४ ॥

जहारेति । किं च । अस्मान्मुनेरचिरेण शीघ्रं ज्वलद्भिर्मणिभिर्द्योतिता हैम्यः सौवर्ण्यो लेखा यस्य तत्तथोक्तं वर्म कवचम् । षण्डो मरुत्पवनः पतङ्गात्सूर्यादेकनीलं केवलं कृष्णवर्णम् ॥ "एके मुख्यान्यकेवलाः" इत्यमरः ॥ तडित्वततडिद्युक्तस्याम्बुदस्य खण्डमिव । जहार । तदा भगवन्मायया शुक्लकथुको मुनिर्मेघनिर्मुक्तः सूर्य इव विदीप इति भावः ॥

अथ युग्मेनाह—

विकोशनिर्धूततनोर्महासेः फणावतश्च त्वचि विच्युतायाम् ।
प्रतिद्विपाबद्धरुषः सेमर्षं नागस्य चाक्षिप्तमुखच्छदस्य ॥ ४५ ॥

विकोशेति ॥ सोऽर्जुनः । तनुं त्रायत इति तनुत्रं वर्म ॥ "आतोऽनुपसर्गे कः" इति कप्रत्ययः ॥ तेन विना । विकोशः कोशादुद्धृतो निर्धूततनुर्वाणोज्झितमूर्तिः ॥ ततो विशेषणसमासः ॥ तस्य विकोशनिर्धूततनोर्महासेर्महासत्त्वस्य तथा त्वचि विच्युतायां सत्यां फणावतश्च शुक्लकथुकस्यादेश्च प्रतिद्विपे प्रतिगजे आबद्धरुषो बद्धकोपस्य सेमर्षं मर्षणसहितस्यात्र आक्षिप्तमुखच्छदस्य निरस्तमुखावरणस्य नागस्य गजस्य च ॥

विबोधितस्य ध्वनिना घनानां हरेरपेतस्य च शैलरन्ध्रात् ।
निरस्तभूमस्य च रात्रिवर्गैर्विना तदुत्रेण रुचिं स भेजे ॥ ४६ ॥

१ विचारणायाम्. २ पादीप. ३ हेमभेखया. ४ निर्धौत. ५ सरोषस्य. ६ वस्त्र. ७ भेजे.

Digitized by Google

विबोधितस्येति ॥ घनानां घनेना गर्जितेन विबोधितस्य। शैलरन्ध्रात्स्कन्दतादपेतस्य निष्क्रान्तस्य हरेः सिंहस्य च। तथा निरस्तधूमस्य वह्नेरिव दीप्तिं शोभां भेजे। एतेनास्य तीव्रतापैरनिर्यातनस्वरणदुर्मदस्वमनस्वितेजस्वितान्युक्तानि। अत्र ऋषिमिव ऋषिमिति सादृश्यालेपादसंभवद्वस्तुसंबन्धी निदर्शनालंकारो माल्या संसृष्टः ॥

अचित्ततायामपि नाम युक्तामचूर्ध्वतां प्राप्य तदीयकृच्छ्रे।
महीं गतौ ताविषुधी तदानीं विवव्रतुश्चेतनयेव योगम् ॥ ४७ ॥

अचित्ततायामिति ॥ तदानीं कबन्धपतनसमये महीं गतावितीषुधी निषङ्गावचित्ततायामप्यचेतनलेऽपि तदीयकृच्छ्रे स्वामिव्यसने युक्तां योग्यात्। नाम किल। अकिंचित्करत्वादिति भावः। अचूर्ध्वतामवाङ्मुखत्वं प्राप्य चेतनया प्राणिसाधारणज्ञानेनेव योगं चैतन्यसंबन्धं विवव्रतुरिवेत्युत्प्रेक्षा। अचेतनत्वेऽवाङ्मुखत्वादिचेतनधर्मयोगादिति भावः ॥

स्थितं विशुद्धे नभसीव सत्त्वे धात्रा तपोवीर्यमयेन युक्तम्।
शस्त्राभिघातैस्तमजस्रमीशस्रष्टा विवस्वन्तमिवोल्लिलेख ॥ ४८ ॥

स्थितमिति ॥ विशुद्धे निर्मले नभसीव सत्त्वे सत्त्वगुणे स्थितं तपोवीर्यमयेन तपोवीर्याभ्यां गतेन धात्रा तेजसा युक्तं तमर्जुनमीशस्रष्टा विश्वकर्मा विवस्वन्तमिवादित्यमजस्रं शस्त्राभिघातैः शस्त्रकर्षणैरुल्लिलेख ततक्ष ॥

संरम्भवेगोज्झितवेदनेषु गात्रेषु चाधैर्यमुपागतेषु।
मुनेर्बभूवागणितेषुराशेर्लोहस्तिरस्कार इवात्ममन्युः ॥ ४९ ॥

संरम्भेति ॥ संरम्भवेगेन संभ्रमातिशयेनोज्झितवेदनेषु त्यक्तदुःखेषु गात्रेषु चाधैर्यं स्तैमित्यमुपागतेषु सत्सु। न गणिता इषुराशयो येन तस्यागणितेषुराशेर्मुनेरर्जुनस्यात्ममन्युः स्वकोपः। लोहस्य विकारो लौहः कार्ष्णायसः। तिरस्क्रियते आच्छाद्यतेऽनेनेति तिरस्कारः कवचक इव। बभूव। रोषवशात् किंचित्प्रहारदुःखमज्ञासीदित्यर्थः। क्रोधैकवर्मणां वीराणां किमन्यैर्लोहभारैरित्यर्थः ॥

अथ युग्मेनाह—

ततोऽनुपूर्वायतवृत्तबाहुः श्रीमान्क्षरल्लोहितदिग्धदेहः।
आस्कन्द्य वेगेन विमुक्तनादः क्षितिं विधुन्वन्निव पार्ष्णिघातैः ५०

१ चेतनेषु. २ बभूव तस्य. ३ अगणितादितेषोः. ४ धातुदिग्धः; पदादिग्धः. ५ पार्ष्णिभागैः.

Digitized by Google

तत इति ॥ ततोऽनन्तरमनुपूर्वौ पूर्वमनुगतौ गोपुच्छाकारावायतौ दीर्घौ वृत्तौ वर्तुलौ बाहू यस्य स श्रीमान्शोभावान्वक्षस्तोदितदिग्वदेहः क्षतदुधिरलिप्तगात्रः पाणिघातैश्चरणतलाघातैः ॥ "तद्वन्ती घुटिके गुल्फौ स्त्रियां पार्ष्णिरघस्तयोः" इत्यमरः ॥ क्षितिं विभुन्वन्यक्कन्यपिव वेगेनास्कन्द्याभिमुख्य विमुक्तनादः सोऽर्जुनः॥

साम्यं गतेनाशनिना मघोनः शशाङ्कखण्डाकृतिपाण्डुरेण ।
शंभुं विभित्सुर्धनुषा जघान स्तम्बं विषाणेन महानिवेभः ॥ ५१ ॥

साम्यमिति ॥ मघोन इन्द्रस्याशनिना वज्रेण सह साम्यं गतेन वज्रकल्पेन शशाङ्कस्य खण्डं शकलं तस्येवाकृतिर्यस्य । तद्वदकृमिवर्यः । पाण्डुरं च तद्वदेवेति भावः॥ तेन शशाङ्कखण्डाकृतिपाण्डुरेण धनुषा शंभुं विभित्सुर्भेत्तुमिच्छुः सन् । महानिभो गजो विषाणेन दन्तेन स्तम्बमिव । जघान ॥

रयेण सा संनिदधे पतन्ती भवोद्भवेनाग्नि चापयष्टिः ।
समुद्धता सिन्धुरनेकमार्गा परे स्थितेनौजसि जह्नुनेव ॥ ५२ ॥

रयेणेति ॥ रयेण वेगेन पतन्ती सा चापयष्टिर्भवस्य संसारस्योद्भव उत्पत्तिर्यस्मात्तेन भवोद्भवेनेश्वरेण परे ज्योतिषि स्थितेन । जह्नुना राजर्षिणा समुद्धतात्युत्कटानेकमार्गा विस्रोताः सिन्धुर्गङ्गेव । आत्मनि संनिदधे । सम्यङ्निहिता । अन्तर्निक्षिप्तेत्यर्थः ॥

विकार्मुकः कर्मसु शोचनीयः परिप्लुतौदार्य इवोपचारः ।
विचिक्षिपे शूलभृता सलीलं स पत्त्रिभिर्दूरमदूरपातैः ॥ ५३ ॥

विकार्मुक इति ॥ विकार्मुको भग्नचापोऽत एव परिप्लुतौदार्यो दानवर्जित उपचारः सत्कार इव कर्मसु रणक्रियासु कृत्येषु च शोचनीयः शोच्योऽपूज्यश्च सरभसमनाकृष्यत्वाच्च सोऽर्जुनः शूलभृता शिवेन सलीलं यथा तथादूरपातैरतिगाढप्रहारैः पत्रिभिः शरैर्दूरमत्यन्तं विचिक्षिपे क्षुण्णः ॥

उपोढकल्याणफलोऽभिरक्षन्वीरव्रतं पुण्यरणाश्रमस्थः ।
जेपोपवासैरिव संयतात्मा तेपे मुनिस्तैरिषुभिः शिवस्य ॥ ५४ ॥

उपोढेति ॥ उपोढमासक्तं कल्याणफलमङ्गलाभकर्षं स्वर्गादिकं च यस्य स वीरव्रतमाहवादनिवृत्तिरूपं तीव्रं तपश्चाभिरक्ष्यमाणः पुण्यो यो रण एवाश्रमस्तत्र विहरतीति पुण्यरणाश्रमस्थः संयतात्मा नियमितचित्तो मुनिरर्जुनः कश्चित्तपस्वी च तैः शिवस्य महादेवस्येषुभिः शरैर्जपोपवासैरिव तेपे तप्तः॥ तपतेः कर्मणि क्विप्॥

१ तत्राङ्गजेत्या. २ स्तम्भम्. ३ परिस्थितेन. ४ सोऽप्यपूज्यः. ५ महोपवासैः; वपोपवासैः.

Digitized by Google

ततोऽग्रभूमिं व्यवसायसिद्धेः सीमानमन्यैरतिदुस्तरं सः ।
तेजःश्रियामाश्रयमुत्तमार्सिं साक्षादहंकारमिवाललम्बे ॥ ५५ ॥

तत इति ॥ ततश्चापान्तर्धानानन्तरं सोऽर्जुनोऽग्रभूमिं विपदि गन्तव्यस्थानम् । अरणमित्यर्थः । कुतः । व्यवसायसिद्धेर्युद्धोद्योगसिद्धेः सीमानमवधिम् । साधकतममित्यर्थः । अन्यैः परैरतिदुस्तरं दुरतिक्रमं तेजःश्रियां प्रतापसंपदामाश्रयम् । हेतुमित्यर्थः । उत्तमार्सिं महास्त्रम् ॥ "सन्मदद्–" इत्यादिना समासः ॥ साक्षादहंकारं सविग्रहमभिमानमिवाललम्बे जग्राह ॥

शरानवद्यजनवद्यकर्मा चचार चित्रं प्रविचारमार्गैः ।
हस्तेन निर्क्षिशभृता सदीप्तः सार्कांशुना वारिधिरूर्मिणेव ॥ ५६ ॥

शरानिति ॥ अनवद्यकर्मागर्ह्यकर्मा ॥ "अवद्यपण्य–" इत्यादिना निपातः ॥ शरानवद्यज्जनवद्यन्वीरो निर्क्षिशभृता खड्गयुक्तेन हस्तेन । सार्कांशुनार्काँशुसहितेनोर्मिणा तरंगेण वारिधिरिव । दीप्तो दीपितः सोऽर्जुनः प्रविचारमार्गैः खड्गिनां गतिभेदैश्चित्रं यथा तथा चचार ॥

यथा निजे वर्त्मनि भाति भाभिश्छायामयश्चाप्सु सहस्ररश्मिः ।
तथा भ्रमन्नाशु रणस्थलीषु स्पष्टद्विमूर्तिर्ददृशे स भूतैः ॥ ५७ ॥

यथेति ॥ भाभिर्दीप्तिभिरुपलक्षितः ॥ "स्युः प्रभारुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः" इत्यमरः ॥ सहस्ररश्मिरर्को यथा निजे वर्त्मनि नभसि छायामयः प्रतिबिम्बरूपः सन्नप्सु भाति । रणस्थलीषु च स्पष्टे द्वे मूर्ती यस्य स स्पष्टद्विमूर्तिः सन् । सोऽर्जुनो भ्रमंस्तथा भूतैर्गणैर्ददृशे दृष्टः । यथैकोऽर्को नभस्यप्सु चानेक इव दृश्यते तथा सोऽपि दिवि भुवि चाप्सु संचारायोगपद्यभ्रमादेवैकोऽप्यनेक इव भूतैर्दृष्ट इत्युत्प्रेक्षा ॥

शिवप्रणुन्नेन शिलीमुखेन स्तरुप्रदेशादपवर्जिताङ्गः ।
ज्वलन्नसिस्तस्य पपात पाणेर्घनस्य वप्रादिव वैद्युतोऽग्निः ॥ ५८ ॥

शिवेति ॥ शिवेन मरुता[1] क्षिप्तस्तेन शिलीमुखेन स्तरुप्रदेशान्मुष्टिप्रदेशमवधिं कृत्वा ॥ "स्तरुः खड्गादिमुष्टौ स्यात्" इत्यमरः ॥ अपवर्जिताङ्गो मुक्तविग्रहोऽसिः खड्गस्तस्यार्जुनस्य पाणेः करात् । घनस्य मेघस्य वप्राच्चक्रवालाद्वैद्युतो विद्युत्संबन्ध्यग्निरिव । ज्वलन्पपात ॥

आक्षिप्तचापावरणेषुजालश्छन्नोत्तमार्सिः स बभेऽवभूतः ।
रिक्तः प्रकाशश्च बभूव भूमेरुत्सादितोद्यान इव प्रदेशः ॥ ५९ ॥

१ अविदीप्तः. २ नभस्य. ३ अभिभूतः. ४ उत्पादित.

Digitized by Google

आक्षिप्तेति ॥ आक्षप्तान्यपहृतानि चापावरणेपुजालानि धनुर्वर्मबाणसमूहा यस्य स क्षिप्तोच्चयासिर्द्रुमहालङ्घो वृषे रणे ॥ "वृषमास्कन्दनं संख्यम्" इत्यमरः ॥ अवधूतो निरस्तः सोऽर्जुन उत्सादितमुत्पाटितमुधानं यस्य स भूमेः प्रदेशो भूमिभाग इव रिक्तः शून्यः प्रकाशो निःसंबन्धश्च बभूव ॥

स खण्डनां प्राप्य परादमर्षवान्भुजद्वितीयोऽपि विजेतुमिच्छया ।
ससर्ज वृष्टिं परिरुग्णपादपां द्रवेतरेषां पयसामिवाश्मनाम् ॥६०॥

स इति ॥ परात्परस्माच्छ्रोः ॥ "पूर्वादिभ्यो नवभ्यो वा" इति विकल्पात्स्मादादेशः ॥ खण्डनां भङ्गं प्राप्यामर्षवान्सोऽर्जुनो भुजद्वितीयो भुजमात्रसहायः सन्नपि विजेतुमिच्छया द्रवेभ्य इतराणि तेषां द्रवेतरेषां कठिनानां पयसामिव । करकाजामिवेत्यर्थः । अश्मनां संबन्धिनीं परिरुग्णा भग्नाः पादपा यस्यां सा तां वृष्टिं ससर्ज । अश्ममिर्जघानेत्यर्थः ॥

नीरन्ध्रं परिगमिते क्षयं पृषत्कैर्भूतानामधिपतिना शिलाविताने ।
उच्छ्रायस्थगितनभोदिगन्तरालं चिक्षेप क्षितिरुहजालमिन्द्रसूनुः ॥६१॥

नीरन्ध्रमिति ॥ शिलावितानेशिलाजाले भूतानामधिपतिना शिवेन पृषत्कैर्बाणैः क्षयं परिगमिते नीते सतीन्द्रसूनुरर्जुन उच्छ्रायेणोत्सेधेन स्वगितमाच्छादितं नभो दिगन्तरालं च येन तन्नीरन्ध्रं सान्द्रम् । रोहन्तीति रुहाः ॥ इगुपधलक्षणः कप्रत्ययः ॥ क्षितौ रुहा द्रुमास्तेषां जालं चिक्षेप प्रेरयामास ॥ "उच्छ्रायं गमितवती" इति प्रामादिकः पाठः ॥

निःशेषं शकलितवल्कलाङ्गसारैः कुर्वद्भिर्भुवमभितः कषायचित्राम् ।
ईशानः सकुसुमपल्लवेर्नगेस्तैरातेने बलिमिव रङ्गदेवताभ्यः ॥ ६२ ॥

निःशेषमिति ॥ ईशानः शिवः ॥ शानच्प्रत्ययः ॥ निःशेषं यथा तथा शकलितानि वल्कलानि त्वचोऽङ्गानि सारा मज्जा च येषां तैर्भुवमभितः कषायो यो रागः । रागेण रञ्जनमिति यावत् ॥ "राने काये कषायोऽस्त्री" इति वैजयन्ती ॥ तेन चित्रां विचित्रवर्णां कुर्वद्भिः सकुसुमपल्लवैस्तैर्नगैर्हेतुभी रङ्गे रङ्गरङ्गे या देवतास्ताभ्यो बलिं पूजामिवादेने ॥

उन्मज्जन्मकर इवामरापगाया वेगेन प्रतिमुखमेत्य वाणनद्याः ।
गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः ६३

१ वेगेन मेघाः. २ क्षीरन्ध्रे परिगमिते; नीरन्ध्रोच्चयमिते. ३ वनीवः.

Digitized by Google

उन्मज्जमिति ॥ गाण्डीव्यर्जुन उन्मज्जन्नुच्चरन्मकरो जलग्राहविशेषोऽपराधमाया इव वाजनया वाजमवाहाद्वेगेन मतिमुखमभिमुखमेत्यागत्य कनकखिलानिभम् । कनकग्रहं काठिन्यातिशयद्योतनार्थम् । विषमविलोचनस्य भ्यम्बकस्य वक्षो हृदयं भुजाभ्यामाजघ्ने ताडितवान् ॥ अथात्मनेपदं विचार्यम् । "आङो यमहनः" इत्यनाकर्मकाधिकारात् "स्वाङ्गकर्मकाच्च" इति वक्तव्यत्वात् ॥ न च शिवस्य मतिमुखमित्यन्वयात्कनकखिलानिभं कनकनिकषतुल्यं श्यामं स्तनं आजघ्न इत्यर्थ इतिवाच्यमौचित्याचरणात् । न हि युद्धाय संनद्धा निपुणा अपि मल्लाः स्तनस्ताडनमाचरन्ति । किं तु स्तनाभ्यास्ताडनम् । किं च । अनन्तरं वक्ष्यमाणभयकर्तृकाधिनयसहनविरोधादुक्त एवैत्यन्वयस्याप्यवधानाच्च पूर्वैरेव दूषितत्वात् । अतो व्याकरणान्तराद्वृद्धव्यम् ॥ केचिन्तु "भ्यम्बकस्य वक्षः प्राप्य" इत्यध्याहारं स्वीकृत्याकर्मकत्वादात्मनेपदमाहुः ॥

अभिलषत उपायं विक्रमं कीर्तिलक्ष्म्यो-
रसुगममरिसैन्यैरक्रमभ्यागतस्य ।
जनक इव शिशुले सुप्रियस्यैकसूनो-
रविनयमपि सेहे पाण्डवस्य स्मरारिः ॥ ६४ ॥

अभिलषत इति ॥ कीर्तिलक्ष्म्योरुपायं साधनभूतमरिसैन्यैरसुगमं दुरासदं विक्रममभिलषतः । सुखसाध्यं हि किंचिन्महत्फलं मार्ग्यमाणस्तेजस्वी । अतएवाक्रमन्तिक्रमभ्यागतस्योत्सङ्गसमारूढस्य च पाण्डवस्याविनयं स्मरारिः । अनेन भक्तवात्सल्यमेव सहनकारणमिति सूच्यते । शिशुले शैशवे सुप्रियस्य परममेवास्पदस्य । सुतः । एक एव सूनुत्वस्यैकसूनोरविनयं जनक इव सेहे सोढवान् ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया पण्डितपण्डितराजव्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये आयुधाहारो नाम सप्तदशः सर्गः ।

अष्टादशः सर्गः ।

तत उदग्र इव द्विरदे मृगौ रणमुपेयुषि भीमभुजायुधे ।
धनुरपास्य सबाणधि शंकरः प्रतिजघान घनैरिव सृष्टिभिः ॥ १ ॥

तत इति ॥ ततो मृगयुद्धानन्तरमुदग्रे महति द्विरदे गज इव भीमे भुजायु-

१ अनुकरन्.

Digitized by Google

वायुने यस्य तथायुते रणमुपेयुषि मुनौ शंकरः स्वयमपि सधाणधि सत्वं धनुरपास्य शक्रा मुष्टिभिर्घनैर्लोहमुद्गरैरिव मतिजघान । प्राक्मुनिकृतापातस्य मतिघातं कृतवानित्यर्थः ॥ "घनाः कठिनसंघातमेघकाठिन्यमुद्गराः" इति वैजयन्ती । "घनस्तु लोहमुद्गरे" इति विश्वः ॥ यद्यपि मुष्टिशब्दः "मुष्टा तु वञ्चया । स रविः स्यादरत्निस्तु निष्कनिष्टेन मुष्टिना" इत्यमरे उभयथा प्रयोगादिह निष्कसंधाप्यमोपनामसाधप्यात्पुंस्त्वेन प्राह्यः ॥ तुतविस्मितं हृष्यत् ॥

हरदृषाद्भुतयोर्ध्वनिरुद्धतन्नभूदुसंवलिताङ्गुलिपाणिजः ।
स्फुटदनल्पशिलारवदारुणः प्रतिननाद दरीषु दरीभृतः ॥ २ ॥

हरेति ॥ हरदृषाद्भुतयोरद्रु निविडं यथा तथा संवलिताः संघट्टिता अङ्गुलयो येषां ते । मुष्टीकृता इत्यर्थः । तेषु पाणिषु जातस्तथोक्तः । स्फुटन्तीनां विदलन्तीनामनल्पशिलानामारव इव दारुणो भीषणो ध्वनिरुत्पतन्मुद्गरच्छन् । दरीभृतो गिरेर्दरीषु गुहासु प्रतिननाद प्रतिदध्वान ॥

शिवभुजाहतिभिन्नदृषद्भुतीः सुखमिवाद्रुवभूव कपिध्वजः ।
क इव नाम सहन्मनसां भवेदनुकृतेरपि सत्त्ववतां क्षमः ॥ ३ ॥

शिवेति ॥ कपिध्वजः शिवस्य भुजाहतिभिर्मुष्टिघातैर्भिन्ना विदीर्णा याः पृथवो महत्यः शतयः महारा प्रजाताः सुखमिवाद्रुवभूव । दुःसकरीरपीति भावः । सतीर्दुःखं प्राणीगणदित्यर्थः । ननु दुःसहदुःखवेगेषु कथमगणनेत्यत्राह— क इति ॥ क इव नाम को हु खलु सत्त्ववतां सत्त्वाधिकानां बृहन्मनसां तेजस्विनामनुकृतेरनुकरणस्यापि क्षमो भवेत् । मनस्विनां चरितं नटवदनुकर्तुमपि न कश्चिदीहे । तत्त्वाचरणं तु दूरापास्तम् । रौद्ररसाधिष्ठमनस्विनां कुतः सुखसहनेति भावः ॥

व्रणमुखच्युतशोणितशीकरस्थगितशैलतटाभभुजान्तरः ।
अभिनवौषसरागभृता बभौ जलधरेण समानमुमापतिः ॥ ४ ॥

व्रणेति ॥ व्रणमुखेभ्यश्च्युतस्य क्षरितस्य शोणितस्य शीकरैः स्थगितमाहतं शैलतटवर्ग विकटं भुजान्तरं वक्षो यस्य स तथोक्तः । उमापतिरभिनवमौषसरागं संध्यारागं बिभर्तीति तथोक्तेन जलधरेण समानं तुल्यं यथा तथा बभाविस्पुषमा ॥

उरसि शूलभृतः प्रहिता मुहुः प्रतिहतिं ययुरर्जुनमुष्टयः ।
शुशरवा इव सह्यमहीभृतः पृथुनि रोधसि सिन्धुमहोर्मयः ॥ ५ ॥

उरसीति ॥ शूलभृतः शिवस्योरसि प्रहिताः प्रयुक्ता अर्जुनस्य मुष्टयः । पृथुनि वि-

१ महीभृवः. २ शीकरैः.

श्चाले सञ्जमहीभृतः सञ्जाद्रे रोधसि तदे शुचरयास्तीव्रवेगाः सिन्धोः समुद्रस्य महोर्मय इव । शुद्धुः प्रतिहर्तुं ययुः ॥

निपतितेऽधिशिरोधरमायते समभरत्नियुगेऽयुगचक्षुषः ।
त्रिचतुरेषु पदेषु किरीटिना लुलितदृष्टि मदादिव चस्खले ॥ ६ ॥

निपतित इति ॥ अयुगानि चक्षूंषि यस्य तस्यायुगचक्षुषश्शिलोचनस्यायते दीर्घे अरत्नियुगे अरत्न्योर्बद्धमुष्टयोर्हस्तयोर्युगे युग्मे ॥ "हस्तो मुष्टा तु बद्धया। स रत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना" इत्यमरः ॥ प्रकृते तु मुष्टिमात्रविवक्षया प्रयोगः । शिरोधरायामधीरधिशिरोधरमधिकंधरं समं युगपन्निपतिते सति । किरीटिनार्जुनेन मदादिव भ्रीणि चत्वारि वा त्रिचतुराणि ॥ "संख्ययाव्ययासन्न—" इत्यादिना बहुव्रीहिः । "चतुरोऽच्करजेभ्युणाम्प्राप्तूपसंख्यानम्" इति समासान्तोऽच्प्रत्ययः ॥ त्रिचतुरेषु पदेषु लुलितदृष्टि घूर्णितनेत्रं यथा तथा चस्खले स्खलितम् ॥ भावे क्विप् ॥

अभिभवोदितमन्युविदीपितः समभिसृत्य भृशं जवमोजसा ।
भुजयुगेन विभज्य समाददे शशिकलाभरणस्य भुजद्वयम् ॥ ७ ॥

अभिभवेति ॥ अभिभवेनोत्कर्षेणोदित उत्पन्नो यो मन्युः क्रोधस्तेन विदीपितः प्रज्वलितः सोऽर्जुनो भृशं जवं समभिसृत्य समभिमुखीभूय ओजसा बलेन शशिकलाभरणस्येन्दुमौलेः शिवस्य भुजद्वयं भुजयुगेन विभज्य वियोज्य समाददे जग्राह ॥

प्रववृतेऽथ महाहवमद्भयोरचलसंचलनाहरणो रणः ।
करणशृङ्खलसंकलनायुरुर्युरुभुजायुधगर्वितयोस्तयोः ॥ ८ ॥

प्रववृत इति ॥ अथ महाहवे महारणे मद्भयोर्बलीयसोः ॥ "मद्भः पाशे कपोले च मस्त्यभेदे बलीयसि" इति विश्वः ॥ युरुर्भुजावेवायुधं तेन गर्वितयोस्तयोः शिवार्जुनयोः करणानि करचरणजघनान्येव शृङ्खलानि येषां तेषां संकलना संघटना तया गुरुर्युस्तरस्तथाचलस्य हिमाद्रेः संचलनं कम्पस्तस्याहरण आरोपकः ॥ कर्तरि ल्युट् ॥ रणः प्रवृत्ते मावर्तत ॥

अयमसौ भगवानुत पाण्डवः स्थितमवाङ्मुनिना शशिमौलिना ।
समधिरूढमजेन तु जिष्णुना स्विदिति वेगवशान्मुमुहे गणैः ॥ ९ ॥

अयमिति ॥ अयं पुरोवर्ती पुमानसौ भगवान्प्रसिद्धो देवः ॥ तदुक्तम्—"इदमः प्रत्यक्षरूपं समीपतरवर्ति चैतदो रूपम् । अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानी-

१ उत्थित. २ करयुगेन. ३ आयुधयोरभयोः.

Digitized by Google

यात्" इति ॥ उत्त पाण्डवः । अर्थं हि तिग्मदंष्ट्रायां भ्रम इति वेदितव्यम् । अथ पतनावस्थायामाह— मुनिनावागथः स्थितमुत्त शशिमौलिनाजेन देवेन तु समधिरूढमुपरि स्थितमथ जिष्णुना स्थिरजृम्भनेन वा समधिरूढमित्येवं गणैर्वेगवशान्मुहुरे भ्रान्तम् ॥ "मुह वैचित्त्ये" । भावे क्विप् ॥

प्रचलिते चलितं स्थितमास्थिते विनमिते नतमुन्नतमुन्नतौ ।
वृषकपिध्वजयोरसहिष्णुना मुहुरभावभयादिव भूभृता ॥ १० ॥

प्रचलिते इति ॥ असहिष्णुना तयोर्भरमसहमानेन भूभृता शैलेनाभावभयादिनाभयादिव मुहुर्मुहुः वृषकपिध्वजयोः प्रचलिते चलने सति चलितं प्रचेले । आस्थिते तूष्णीमवस्थाने स्थितं तथैव तस्थे । विनमिते सति सम्यनाक्रमणे सति नतं नम्रीभूतम् । अनामीति यावत् । उन्नतावुन्नमने सत्युन्नतमुद्गतामि ॥ सर्वत्र भावे क्तः ॥

करणसङ्कलनिःसृतयोस्तयोः कृतभुजध्वनि वल्गु विवल्गतोः ।
चरणपातनिपातितरोधसः प्रससृपुः सरितः परितः स्थलीः ॥ ११ ॥

करणेति ॥ करणानि करचरणबन्धविशेषास्तान्येव शृङ्खलानि तेभ्यो निःसृतयोः । भुजस्फोटशब्दयोरित्यर्थः । कृतो भुजध्वनिर्भुजास्फोटनशब्दो यस्मिन्कर्मणि तथा वल्गु सुन्दरं च यथा तथा विवल्गतोरुत्प्लवमानयोस्तयोर्हरपार्थयोश्चरणपातैः पादक्षेपैर्निपातितानि रोधांसि यासां ताः सरितो नद्यः परितःस्थलीः परितःस्थलीषु प्रससृपुः प्रवहताः ॥ "अभितःपरितः—" इत्यादिना द्वितीया । "जानपद—" इत्यादिनाकृभिमार्गे ङीप् ॥ कूलपातक्षोभादुद्वेलसलिलाः सरितः स्थलानि ग्रामर्क्षेत्राणि । एतेन तयोर्भार उक्तः ॥

वियति वेगपरिङ्कृतमन्तरा समभिसृत्य रयेण कपिध्वजः ।
चरणयोश्चरणानमितक्षितिर्निजगृहे तिसृणां जयिनं पुराम् ॥ १२ ॥

वियतीति ॥ वियत्यन्तरिक्षे वेगेन परिकृतमुत्पतितं विदूरां पुरां जयिनं विपुरान्तकम् ॥ "जिदक्षि—" इत्यादिनेनित्यत्वः ॥ कपिध्वजोऽर्जुनश्चरणाभ्यां पादाभ्यामानमितक्षितिः सन् । रयेण वेगेन समभिसृत्याभिद्रुत्यान्तरा मध्यमार्गं चरणयोः पदयोर्निजगृहे । निपुरीत्यवाप्तिरित्यर्थः । उत्पतितस्य भगवतश्चरणौ स्वकराभ्यां जग्राहेत्यर्थः ॥

विस्मितः सपदि तेन कर्मणा कर्मणां क्षयकरः परः पुमान् ।
वेल्लुकामभवनौ तमङ्कमं निष्पिपेष परिरभ्य बाहुना ॥ १३ ॥

१ प्रचलितं चलिते, प्रचलने चलितम्, २ विधन. ३ आदरि. ४ नवत्रमम्.

Digitized by Google

विस्मित इति ॥ तेन कर्मणा चरणग्रहणकर्मणा सपदि विस्मितः सविस्मयः कर्मणां तपकरः । मोक्षमद इत्यर्थः । परः पुमान्हरोऽवनौ स्थितौ सेतुं कामो यस्य तत् ॥ "तुकाममनसोरपि" इति मकारलोपः ॥ अङ्कमं अङ्कान्तं तं पार्थं बलात् परिरभ्य निष्पिपेष । गाढमालिलिङ्गेत्यर्थः ॥ रथोद्धताछन्दः ॥

तपसा तथा न मुदमस्य ययौ भगवान्यथा विपुलसत्त्वतया ।
गुणसंहतेः समतिरिक्तमहो निजमेव सत्त्वमुपकारि सताम् ॥ १४ ॥

तपसेति ॥ भगवान्देवोऽस्यार्जुनस्य विपुलसत्त्वतया । बहुसत्त्वसंपदेत्यर्थः । धैर्यसंपन्नेति यावत् । यथा मुदं ययौ तथा तपसा मुदं न ययौ । तथा हि । सतां गुणसंहतेस्तपःसेवादिगुणसंघातात्समतिरिक्तमतिशयितं निजं सत्त्वमेवोपकार्युपकारकमहो ॥ मणितालरासछन्दः ॥

अथ हिमशुचिभस्मभूषितं शिरसि विराजितमिन्दुलेखया ।
स्वपुरतिमनोहरं हरं दधतमुदीक्ष्य ननाम पाण्डवः ॥ १५ ॥

अथेति ॥ अथ हिमशुचिना हिमशुभ्रेण भस्मना भूषितं शिरसीन्दुलेखया विराजितं शोभितमतिमनोहरं सुन्दरं स्वपुर्दधतं किरातरूपं विहाय निजविग्रहं दधानं हरमुदीक्ष्य पाण्डवो ननाम प्रणतवान् ॥ अपरवक्त्रं छन्दः— "अयुजि नयरसा युजः सलै तदपरवक्त्रमिदं मजौ जरौ" इति लक्षणात् ॥

सहशरधि निजं तथा कार्मुकं वपुरतनु तथैव संवर्मितम् ।
निहितमपि तथैव पश्यन्नसिं वृषभगतिरुपाययौ विस्मयम् ॥ १६ ॥

सहेति ॥ वृषभस्येव गतिर्यस्य सोऽर्जुनस्तस्मिन्समये सह शरधिभ्यां वर्तत इति सहशरधि सनिषङ्गम् ॥ "बोपसर्जनस्य" इति विकल्पात्सहशब्दस्य न सभावः ॥ निजं कार्मुकं गाण्डीवं तथैव पूर्ववदेव संवर्मितं सन्यक्कवचितम् । अतनु महच्चिरं वपुस्तथैव निहितं यथापूर्वं स्थापितम् । असिमपि खड्गं च तथैव पश्यन्विस्मयमुपाययौ ॥ क्वचित्तु "वृषभगतिम्" इति पाठः । तत्र वृषभगतिं शिवं च पश्यन्विस्मयमुपाययावित्यर्थः ॥ मदुदितवदना वृत्तम्—"मदुदितवदना भवेन्नौ रौ" इति लक्षणात् ॥

सिषिचुरवनिमम्बुवाहाः शनैः सुरकुसुममियाय चित्रं दिवः ।
विमलरुचि भृशं नभो दुन्दुभेर्ध्वनिरखिलमनाहतस्थानशे ॥ १७ ॥

सिषिचुरिति ॥ अम्बुवाहाः शनैरवनिं सिषिचुरसिंचन् । दिवोऽन्तरिक्षाच्चित्रं विचित्रं सुरकुसुमं मन्दारकुसुमानि ॥ जातावेकवचनम् ॥ इषावाजगाम । अनाह-

१ तथा ख.
१५

Digitized by Google

तस्तादाडितस्य दुन्दुभेः ॥ आतावेकवचनम् ॥ व्यभिः शब्दो विमलदिशि गगनभित्तिं नभो भूयमानशो व्याप । अताडिता एव दुन्दुभयो नेदुरित्यर्थः । सर्वमिदमस्य सर्वलोकहितार्थत्वादिति वेदितव्यम् ॥

आसेदुषां गोत्रभिदोऽनुवृत्त्या गोपायकानां भुवनत्रयस्य ।
रोचिष्णुरत्नावलिभिर्विमानैर्द्यौराचिता तारकितेव रेजे ॥ १८ ॥

आसेदुषामिति ॥ गोत्रभिद इन्द्रस्यानुवृत्त्यानुस्मरणेनासेदुषामासन्नानां भुवनत्रयस्य गोपायकानां रक्षकाणां लोकपालादीनाम् ॥ "गुपूधूप–" इत्यादिनायमन्नयः । तदन्ताच्चुन् ॥ रोचिष्णवः प्रकाशनशीला रत्नावलयो येषां तैः ॥ "अर्तिकृञ्–" इत्यादिनेष्णुच्प्रत्ययः ॥ विमानैः पुष्पकैराचिता व्याप्ता द्यौस्तारकिता संजाततारकेव रेजे ॥ उत्प्रेक्षालंकारः ॥

हंसा बृहन्तः सुरसद्मवाहाः संह्रादिकण्ठाभरणाः पतन्तः ।
चक्रुः प्रयत्नेन विकीर्यमाणैर्व्योम्नः परिष्वङ्गमिवाग्रपक्षैः ॥ १९ ॥

हंसा इति ॥ बृहन्तो महान्तः सुरसद्मानि विमानानि वहन्तीति सुरसद्मवाहाः ॥ कर्मण्यण् ॥ संह्रादीनि निह्रादीनि मुखराणि कण्ठाभरणानि किंकिण्यो येषां ते । पतन्तो यावन्तो हंसाः प्रयत्नेन विकीर्यमाणैर्विक्षिप्यमाणैरग्रपक्षैः पक्षाग्रैर्व्योम्नः परिष्वङ्गमालिङ्गनं चक्रुरिवेत्युत्प्रेक्षा ॥

मुदितमधुलिहो वितानीकृताः सज उपरि वितत्य सांतानिकीः ।
जलद इव निषेदिवांसं वृषे मरुदुपसुस्रयांबभूवेश्वरम् ॥ २० ॥

मुदितेति ॥ अथ मरुद्गायुर्जलद इव मेघ इव वृषे निषेदिवांसमुपविष्टमीश्वरं मुदिता मधुलिहो भूत्वा यामिक्षा वितानीकृता उल्लोचाकाराः कृताः ॥ "अक्षी वितानमुल्लोचः" इत्यमरः ॥ सांतानिकीः संतानकुसुमविकाराः सजः । मन्दारमाला इत्यर्थः ॥ संतानशब्दादिकारार्थे ठक् ॥ "संतानः कल्पवृक्षश्च" इत्यमरः ॥ उपरि वितत्य विस्तार्योपसुस्रयांबभूव मरुदयामास ॥

कृतस्तुति परिवन्दितेनोच्चकैर्गणपतिभिरभिन्नरोमोद्गमैः ।
तपसि कृतफले फलव्यायसी स्तुतिरिति जगदे हरेः सूनुना ॥ २१ ॥

कृतेति ॥ अभिन्नरोमोद्गमैरविरलरोमाञ्चैर्गणपतिभिः प्रमथमुख्यैरुच्चकैः परिवन्दितेन साधु साध्विति संस्तुतेन ॥ "वदि अभिवादनस्तुत्योः" । कर्मणि क्तः ॥ हरेः सूनुनार्जुनेन तपसि । कृतं फलं प्रमथत्साक्षात्कारलक्षणं येन तस्मिन् । कृतफले सतीत्यर्थः । कृतस्तुति कृतसंस्तोत्रं यथा तथा फलव्यायसी फलाधिकेति वक्ष्यमाणा स्तुतिर्जगदे कथिता ॥

१ विमानवाहाः.

Digitized by Google

शरणं भवन्तमतिकारुणिकं भव भक्तिगम्यमधिगम्य जनाः ।
जितमृत्यवोऽजित भवन्ति भये ससुरासुरस्य जगतः शरणम् ॥२२॥

शरणमिति ॥ हे अजित हे अपराजित हे भव । अतिकारुणिकमतिदयालुम् ॥ "तदस्य मयोजनम्" इति ठक् ॥ भक्तिगम्यं भक्तिमात्रसुलभं भवन्तं शरणं रक्षकमधिगम्य जितमृत्यवो जनाः । न च तद्विभ्रं किंतु ससुरासुरस्य जगतो भय आपदि शरणंलयं रक्षितारो भवन्ति ॥ "शरणं गृहरक्षित्रोः" इति विश्वः ॥ प्रमिताक्षराहृत्तम् ॥

विपदेति तावदवसादकरी न च कामसंपदभिकामयते ।
न नमन्ति चैकपुरुषं पुरुषास्तव यावदीश न नतिः क्रियते ॥२३॥

विपदिति ॥ हे ईश । यावत्तव नतिः प्रणामो न क्रियते । पुरुषेणेति शेषः । तावदेवैकं पुरुषमेकाकिनं सन्तमवसादकरी क्षयकरी विपदेति प्राप्नोति । कामसंपन्मनोरथसंपच्च नाभिकामयते नेच्छति । पुरुषाश्चान्ये लोकास्त्वमेकं पुरुषं तव स्तुतिभक्तवर्णं न नमन्ति न वशे वर्तन्ते । नानिहनिहचिर्नापीहमात्रिरित्यर्थः । यदा तु त्वां प्रणमन्ति तदैव सर्वं लभ्यत इति भावः ॥

संसेवन्ते दानशीला विमुक्त्यै संपश्यन्तो जन्मदुःखं पुमांसः ।
यन्निःसङ्गस्त्वं फलस्यानतेभ्यस्तत्कारुण्यं केवलं न स्वकार्यम् ॥२४॥

संसेवन्त इति ॥ दानं शीलं स्वभावो निजधर्मो येषां ते दानशीलाः । त्वामेवोद्दिश्य दानं कुर्वन्त इत्यर्थः । "तस्माद्दानं परमं वदन्ति" इति श्रुतेरिति भावः । कुतः । यतो जन्मदुःखं संपश्यन्तोऽनुभवन्तः पुमांसो विमुक्त्यै मोक्षाय संसेवन्ते । भवन्तमिति शेषः । आनतेभ्यः प्रणम्रेभ्यो निःसङ्गो निस्पृहस्त्वं यत्फलसि फलं ददासि । तेषां फलार्थित्वादिति भावः । तत्केवलं निरुपाधिकं कारुण्यं करुणा ॥ स्वार्थे ष्यञ् ॥ "कारुण्यं करुणा घृणा" इत्यमरः ॥ न स्वकार्यम् । एतदेव विशद्यम् । केवलं परार्थत्वादिति भावः ॥ शालिनीवृत्तम् ॥

प्राप्यते यदिह दूरमगत्वा यत्फलत्यमरलोकगताय ।
तीर्थमस्ति न भवार्णववाह्यं सार्वकामिकमृते भवतस्तत् ॥ २५ ॥

प्राप्यत इति ॥ यत्तीर्थमिहास्मिन्लोके दूरमगत्वा प्राप्यते । स्मृतिमात्रसुलभमित्यर्थः । गङ्गादिकं तु न तथेति भावः । यत्तीर्थममरलोकगताय फलति फलं प्रयच्छति । अत्रापि स्मरणमात्रादेवेति भावः । भवः संसारः स एवार्णवस्ततो बाह्यं बहिर्भवं संसारातीतम् । मोक्षपदमित्यर्थः ॥ "बहिर्देवपञ्चजनेभ्यश्च" इति ष्यञ्प्रत्ययः ॥ सर्वे कामाः प्रयोजनमस्येति सार्वकामिकम् ॥ "तदस्य

Digitized by Google

प्रयोजनम्" इति ठक् ॥ तत्राद्यस्तरन्त्यनेनेति तीर्थं तारकं भवतस्त्वद्दते ॥ "अन्यारात्–" इत्यादिना पञ्चमी ॥ अन्यभाक्षि ॥ औपच्छन्दसिकं हृस्वम् ॥

व्रजति शुचि पदं त्वयि प्रीतिमान्प्रतिहतमतिरेति घोरां गतिम् ।
इयमनघ निमित्तशक्तिः परा तव वरद न चित्तभेदः क्वचित् ॥ २६ ॥

व्रजतीति ॥ हे वरद । त्वयि प्रीतिमानरः शुचि निर्मलं पदं कैवल्यं मुक्तिं व्रजति ॥ "मुक्तिः कैवल्यनिर्वाण–" इत्यमरः ॥ प्रतिहतमतिरुपहतबुद्धिः । त्वद्वेषीत्यर्थः । घोरां गतिं तीव्रं नरकमेति प्राप्नोति ॥ न चैतावता तव रागद्वेषकलङ्कप्रसङ्ग इत्याह— इयमिति ॥ हे अनघ निष्कलङ्क । इयम् । भक्ताभक्तयोरिति शेषः ॥ विषेषणाभ्यान्त्वल्लीलिङ्गता ॥ परा दुस्तरा निमित्तशक्तिर्निमित्तभूता शक्तिः स्वद्वेषितयेह तव क्वचिद्भक्ते द्वेषिणि वा कृपायां चित्तभेदो बुद्धिवैषम्यं नास्ति । स्वकर्मवैव जन्तुस्तरति पतति वा । त्वं साक्षितया सर्वत्र सम इत्यर्थः ॥

दक्षिणां प्रणतदक्षिण मूर्तिं तत्त्वतः शिवकरीमविदित्वा ।
रागिणापि विहिता तव भक्त्या संस्मृतिर्भव भवत्यभवाय ॥ २७ ॥

दक्षिणामिति ॥ हे भव हे प्रणतदक्षिण प्रणतेषु दाक्षिण्यसंपन्न । दाक्षिण्यं परच्छन्दानुवर्तित्वम् ॥ "दक्षिणः सरलावामपरच्छन्दानुवर्तिषु" इति विश्वः ॥ शिवकरीं श्रेयस्करीम् ॥ "कृञो हेतु–" इत्यादिना टप्रत्यये ङीप् ॥ तव दक्षिणां मूर्तिं तत्त्वतो यावाभ्यैक्यादिदित्वापि रागिणा रागद्वेषवतापि भक्त्या विहिता तव संस्मृतिः संस्मरणमभवाय संसारनिहृत्यै ॥ प्रसज्यप्रतिषेधेऽपि नञ्समास इष्यते ॥ भवति । तत्त्वज्ञानं विनापि भक्तिपूर्विका तव संस्मृतिरेव मुक्तिनिदानमित्यर्थः ॥ स्वागताहृत्तम् ॥

दृष्ट्वा दृश्यान्याचरणीयानि विधाय
प्रेक्षाकारी याति पदं मुक्तमपायैः ।
सम्यग्दृष्टिस्तस्य परं पश्यति यस्त्वां
यश्चोपास्ते साधु विधेयं स विधत्ते ॥ २८ ॥

दृष्ट्वेति ॥ प्रेक्षया बुद्ध्या करोतीति प्रेक्षाकारी विवृण्वकारी दृश्यानि दृश्यानि दृष्ट्वा ज्ञात्वाचरणीयानि विधाय कर्तव्यानि च कृत्वापायैर्मुक्तं पदं याति । "अविद्यया मृत्युं तीर्त्वा विद्यया मृतमश्नुते" इति श्रुतेः । ज्ञानकर्मभ्यां मुक्तिरित्यर्थः । किंतु ये अपि ज्ञानकर्मणी स्वहितत्व एव मुक्तिसाधने मान्यविषय इत्याशयेनाह—

Digitized by Google

सम्यगिति ॥ यः परं त्वां पश्यति तस्य सम्यग्दृष्टिः सम्यग्ज्ञानम् । यश्च त्वामुपास्ते सेवते स एव साधु विवेकं विदधे । साधुकारीत्यर्थः ॥ मत्तमयूरं वृत्तम् । लक्षणं तूक्तम् ॥

युक्ताः स्वशक्त्या मुनयः प्रजानां हितोपदेशैरुपकारवन्तः ।
समुच्छिनत्सि त्वमचिन्त्यधामा कर्माण्युपेतस्य दुरुत्तराणि ॥ २९ ॥

युक्ता इति ॥ मुनयो व्यासादयः स्वशक्त्या निजयोगमहिम्ना युक्ताः । तथा हितोपदेशैर्विधिनिषेधवाक्यैः स्मृतीतिहासपुराणमुखेन प्रजानामुपकारवन्तः कृतोपकाराश्च । मोक्षमदस्तु तेषामन्येषां च त्वमेवेत्याह—समिति ॥ अचिन्त्यधामाचिन्त्यमहिमा त्वमेवोपेतस्य शरणं प्राप्तस्य मपक्षस्य संबन्धीनि दुरुत्तराणि सुदुस्तराणि कर्माणि बन्धकानि पुण्यपापानि समुच्छिनत्सि नाशयसि । ते त्वन्नासमर्था एवेति भावः॥

संनिबद्धमपहर्तुमहार्यं भूरि दुर्गतिभयं भुवनानाम् ।
अद्भुताकृतिमिमामतिमायस्वं विभर्षि करुणामय मायाम् ॥ ३० ॥

संनिबद्धमिति ॥ अतिक्रान्तो मायां बन्धरूपामतिमायः ॥ "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति समासः ॥ हे करुणामय हे कृपालो । संनिबद्धं स्वकर्मणा दृढबद्धमतएवाहार्यमन्यैरमुच्यं भूरि प्रभूतं भुवनानां दुर्गतिभयं नरकभयम् ॥ "स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम्" इत्यमरः ॥ अपहर्तुमद्भुताकृतिं विचित्ररूपामिमां मायां दृश्यमानां स्त्रीलाविग्रहरूपां बिभर्षि । अन्येषां कर्मानुबन्धी विग्रहपरिग्रहः । भवतस्तु परोपकारार्थ इत्यर्थः ॥

न रागि चेतः परमा विलासिता वधूः शरीरेऽस्ति न चास्ति मन्मथः ।
नमस्क्रिया चोषसि धातुरित्यहो निसर्गदुर्बोधमिदं तवेहितम् ॥ ३१ ॥

न रागीति ॥ हे देव । चेतस्तव चित्तं रागि रागयुक्तं न । परमयोगित्वादिति भावः । तथापि परमा निरतिशया विलासिता स्वच्छारादिचेष्टाशीलता । भिक्षाटनादिषु विहरणेन तौर्यत्रिकव्यसनितया चेति भावः । किंच । शरीरेऽर्धाङ्गे वधूरस्ति । प्रसिद्धं चैतदिति भावः । तथापि मन्मथः कामश्च नास्ति । तस्य भस्मीकरणादिति भावः । किंच । मातरुषसि संध्यायां धातुर्ब्रह्मणो नमस्क्रिया वन्दनम् । स्वयं जगद्व्यस्यापीत्यर्थः । इतीत्थं विरुद्धमिदमुक्तमीदृशं चेहितं निसर्गतो दुर्बोधं दुरावलनीयम् । दुर्ग्रहमित्यर्थः । अद्भुतपूर्वत्वादिति भावः ॥ वंशस्थं वृत्तम् ॥

तवोत्तरीयं करिचर्म साङ्गजं ज्वलन्मणिः सारशनं महाहिः ।
स्रगास्थपङ्क्तिः शवभस्म चन्दनं कला हिमांशोश्च समं चकासति ॥ ३२ ॥

१ मुक्ताः. २ अद्भुताकृतिमिमामतिमायां. ३ शरीरेण तवास्ति.

Digitized by Google

तवेति ॥ हे देव । तव सान्नद्धं सलोमकं करिचर्मोत्तरीयं संव्यानम् ॥ "संव्यानमुत्तरीयं च" इत्यमरः ॥ दुःस्पर्शमिति भावः । व्यलम्बमणिर्व्यलम्बो महानहिः सारङ्गं कटियूपाविशेषः । घोऽन्येषां प्राणहर इत्यर्थः ॥ "क्लीबे सारङ्गं चाथ पुंस्कन्यां शृङ्गले भिदु" इत्यमरः ॥ आस्रपङ्क्तिः कपालमालाः सज्यास्यम् । शवभक्ष पन्नगम् । उभयत्राप्यस्पृश्यमशुचं चेति भावः । किंच । एतानि वस्तूनि हिमांशोः कला च समं तुल्यतया चकासति दीप्यन्ते । त्वदाश्रयवशादरम्यस्यापि रम्यतेति किमत्राश्चर्यं तवेति भावः ॥

अविग्रहस्याप्यतुलेन हेतुना समेत्य भिन्नद्वयमूर्ति तिष्ठतः ।
तवैव नान्यस्य जगत्सु दृश्यते विरुद्धवेषाभरणस्य कान्तता॥२३॥

अविग्रहस्येति ॥ अविग्रहस्य वस्तुतोऽशरीरस्यापि ततोऽतुलेन दुर्वोधत्वादसदृशेन हेतुना । केनापि कारणेनेत्यर्थः । भिन्ना संगता विलक्षणा च द्वयी द्विविधा स्त्रीपुंसात्मिका मूर्तिर्यस्मिन्कर्मणि तत्समेत्य भिन्नद्वयमूर्ति यथा तथा तिष्ठतः । अशरीरस्य शरीरमेव विरुद्धम् । तदपि नारीनरात्मकमिति किमतश्चित्रमस्तीति भावः । एवंविधस्य तवैव जगत्सु विरुद्धे वेषाभरणे पूर्वोक्ते यत्र तत्र विरुद्धवेषाभरणस्यापि सतः कान्तता रमणीयता दृश्यते । अन्यस्य न दृश्यते तस्मादचिन्त्योऽसौ तव महिमेति भावः ॥

आत्मलाभपरिणामनिरोधैर्भूतसंघ इव न त्वमुपेतः ।
तेन सर्वभुवनातिग लोके नोपमानमपि नाप्युपमेयः ॥ २४ ॥

आत्मेति ॥ हे देव । त्वं भूतसंघ इव शरीरादिसंघात इव । आत्मलाभपरिणामनिरोधैर्जन्मजरामरणैरुपेतो युक्तो नासि । तेन कारणेन हे सर्वभुवनातिग सर्वलोकोत्तर । उपमीयतेऽनेनेत्युपमानं नासि । उपमीयते यदुपमेयमपि नासि । न कश्चित्त्वादृशोऽस्ति । त्वमपि नान्यसदृशः । अनन्यसाधारणत्वादित्यर्थः ॥ दृश्यमुक्तम्॥

त्वमन्तकः स्थावरजङ्गमानां त्वया जगत्प्राणिति देव विश्वम् ।
त्वं योगिनां हेतुफले रुणत्सि त्वं कारणं कारणकारणानाम् ॥२५॥

त्वमिति॥ हे देव । त्वं स्थावरजङ्गमानामन्तकः संहर्ता । त्वया हेतुना विश्वं सर्वं जगत्प्राणिति जीवति । त्वं योगिनां हेतुः प्रवर्तकं कर्म फलं भोगश्च ते हेतुफले रुणत्सि निवर्तयसि । तेषां त्वमेव बन्धविमोचक इत्यर्थः । किंच । त्वं कारणानि भूतानि तेषां कारणानि भूतसूक्ष्माणि परमाणवो वा तेषां कारणकारणानां कारणं महत्तत्वादिहिरोत्पत्तिस्थानम् । अत्र सर्वम् "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति" इति श्रुतिः प्रमाणमिति भावः॥

१ अनन्त. २ विषये. ३ सर्वम्.

Digitized by Google

रक्षोभिः सुरमनुजैर्दितेः सुतैर्वा
लोकेष्वविकलमाप्तमाधिपत्यम् ।
पावित्र्याः शरणगतार्तिहारिणे ते
माहात्म्यं भव भवते नमस्क्रियायाः ॥ ३६ ॥

रक्षोभिरिति ॥ रक्षोभी राक्षसैः सुरैश्च मनुजैश्च तैर्दितेः सुतैर्दैत्यैर्वा लोकेषु पदविकलं संपूर्णमाधिपत्यमाप्तं प्राप्तं तदे भव शरणगतानामार्तिहारिणे ते भवते तुभ्यं नमस्क्रियायाः ॥ "नमःस्वस्ति–" इत्यादिना चतुर्थी ॥ पावित्र्याः पापहारिण्या माहात्म्यं सामर्थ्यं न कस्योऽपि भवति । शिरसस्त्वभ्यंवनतिरिति भावः ॥ महर्षिणीहृत्यम् ॥

अथाष्टमूर्तिषु काश्चित्स्तुवन्वायुमूर्तिं तावदाह—

तरसा भुवनानि यो बिभर्ति ध्वनति ब्रह्म यतः परं पवित्रम् ।
परितो दुरितानि यः पुनीते शिव तस्मै पवनात्मने नमस्ते ॥३७॥

तरसेति ॥ यः पवनस्तरसा बलेन ॥ "तरसी बलरंहसी" इति विश्वः ॥ भुवनानि बिभर्ति प्राणात्मना धारयति । यतो यस्मेरणात्परिवर्तं परं परमं ब्रह्म वर्णात्मकं ध्वनति नदति । "सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णान्जनयति" इति वचनात् । यः पवनः परितो दुरितानि पातकानि पुनीते शोधयति । नाशयतीति यावत् । हे शिव । तस्मै पावयतीति पवनो वायुः स एवात्मा यस्य तस्मै पवनात्मने ते तुभ्यं नमः ॥ हृद्यमुक्तम् ॥

अथाग्निमूर्तिं स्तौति—

भवतः स्मरतां सदासने जयिनि ब्रह्ममये निषेदुषाम् ।
दहते भवबीजसंततिं शिखिनेऽनेकशिखाय ते नमः ॥ ३८ ॥

भवत इति ॥ जयिनि विजयशीले सर्वोत्कृष्टे ब्रह्ममये ब्रह्मप्रधाने सदासने सम्यगासने । योगासन इत्यर्थः । निषेदुषामुपविष्टानां भवतः स्मरतां भवन्तं ध्यायताम् ॥ "अधीगर्थ–" इत्यादिना शेषे कर्मणि षष्ठी ॥ भवबीजसंततिं संसारनिदानसमूहं भवनिदानकर्मसंघातं दहते भस्मीकुर्वते । अनेकशिखाय बहुज्वालाय शिखिने वह्निमूर्तये ते तुभ्यं नमः ॥

१ यत्. २ पावन्या. ३ तत्. ४ तव भव तत्. ५ ब्रह्मपदे. ६ संदर्शि.

Digitized by Google

अथ जङ्घमूर्तिं स्तौति—

आबाधामरणभयार्चिषा चिराय
क्लुप्तेभ्यो भव महता भवानलेन ।
निर्वाणं समुपगमेन यच्छते ते
बीजानां प्रभव नमोऽस्तु जीवनाय ॥ २९ ॥

आबाधेति ॥ हे भव बीजानां प्रभव कारणभूत ॥ "जीवनाद्" इति पा
तत्प्रतिबिम्बत्वादिति भावः ॥ आबाधाध्यात्मिकादिदुःखं मरणं पक्षत्वं
भयं तदेवार्चिर्यस्य तेन महता भवानलेन संसाराग्निना चिराय चिरं क्लुप्ते
भ्येभ्यः समुपगमेन संसेवया निर्वाणं संतापशान्तिं यच्छते ददते जीवयतीति
तस्मै जीवनाय जङ्गमात्मने ते तुभ्यं नमः ॥

इदानीं नमोमूर्तिं स्तौति—

यः सर्वेषामावरीता वरीयान्सर्वैर्भावैर्नावृतोऽनादिनिष्ठः ।
मार्गातीतायेन्द्रियाणां नमस्तेऽविज्ञेयाय व्योमरूपाय तस्मै ॥

य इति ॥ भवेत्यनुवर्तते । भवत्यस्मादयं भवश्च इति भवस्तत्संबुद्धौ । सक
ज्ञानकेति यावत् । वरीयानुरुतरः । विभुरित्यर्थः ॥ "भियस्थिर-" इत्यादि
ब्दस्य वरादेशः । यस्त्वं सर्वेषां वस्तूनामावरीताच्छादयिता ॥ वृणोतेस्तुच्प्रत्य
सर्वैर्भावैः पदार्थैर्नावृतः केनापि कदाचिदप्यनावृतः । स्वयं व्यापकत्वादिति
अविद्यमाने आदिनिष्ठे उत्पत्तिनाशौ यस्यासावनादिनिष्ठो नित्यः ॥ "
भिज्यत्तिनाशान्ताः" इत्यमरः ॥ इन्द्रियाणां चक्षुरादीनां मार्गातीतायातीन्द्रि
अत एवाविज्ञेयायापरिच्छेयाय तस्मै व्योमरूपाय ते तुभ्यं नमः ॥

अणीयसे विश्वविधारिणे नमो नमोऽन्तिकस्थाय नमो दवीयसे
अतीत्य वाचां मनसां च गोचरं स्थिताय ते तत्पतये नमो नमः ॥

अणीयस इति ॥ भवेत्यनुवर्तते । हे भव । अणीयसे सूक्ष्मतराय तथापि
विधारिणे जगद्धारकाय ते तुभ्यं नमः । अन्तिकस्थायान्तर्यामितया संनिकृष्टाय
तथापि दवीयसे दूरतराय दुर्ज्ञेयाय ते तुभ्यं नमः । वाचां मनसां च गोचरं
अतीत्य विद्यावाद्यजनसगोचराय । तत्पतये तेषां वाङ्मनसानामध्यक्षाय । स
अतीत्येव न इत्यत इति विरोधः । ते तुभ्यं नमो नमः ॥ " चापके हे भवत
दक्षध्यद् " इति द्विरुक्तिः । " संभ्रमेण महच्चिन्तापदम् " इति काशिका
अनुद्रेकाय संभ्रमः ॥ विरोधाभासोऽलंकारः ॥

१ क्लिप्. २ जीवानां प्रभव. ३ सर्वैश्च तत्, सर्वैः पश्चत्

असंविदानस्य ममेश संविदां तितिक्षितुं दुश्चरितं त्वमर्हसि ।
विरोध्य मोहात्पुनरभ्युपेयुषां गतिर्भवानेव दुरात्मनामपि ॥ ४२ ॥

असंविदानस्येति ॥ संविदः ज्ञानानामीश । "ईशानः सर्वविद्यानाम्" इति श्रुतेरिति भावः ॥ "मेधोपलब्धिर्धिस्संवित्" इत्यमरः ॥ असंविदानस्याज्ञानस्य ॥ "समो गमृच्छि–" इत्यादिना विदेः संपूर्वादकर्मकाच्छानच्प्रत्ययः ॥ मम दुश्चरितं अस्मदयोगरूपं दुश्चेष्टितं तितिक्षितुं सोढुम् ॥ तिजेः सन्नन्ताच्छुन्प्रत्ययः ॥ त्वमर्हसि योग्योऽसि ॥ ननु तव महानपराधः कथं सोढव्यस्यत्राह— विरोध्येति ॥ मोहाद्-ज्ञानाद्विरोध्य वैरमुत्पाद्य पुनरभ्युपेयुषां पश्चाच्छरणागतानां दुरात्मनामपि भवानेव गतिः । स्वं हि शरणागतानामपराधं न गणयसीत्यर्थः ॥

संप्रति वरं याचते—

आस्तिक्यशुद्धमवतः प्रियधर्म धर्म
धर्मात्मजस्य विहितागसि शत्रुवर्गे ।
संप्राप्नुयां विजयमीश यया समृद्धया
तां भूतनाथ विभुतां वितराहवेषु ॥ ४३ ॥

आस्तिक्येति ॥ हे प्रियो धर्मो यस्येति प्रियधर्म ॥ "समासान्तो विधिरनित्यः" इति न समासान्तोऽच्प्रत्ययः ॥ परलोके मतिरस्तीत्यास्तिकः पारलौकिकः ॥ "अस्तिनास्तिदिष्टम्–" इति ठक् ॥ तस्य भाव आस्तिक्यं विश्वासेन शुद्धं विमलं धर्मं वैदिकाचारमवतः पालयतो धर्मात्मजस्य युधिष्ठिरस्य विहितागसि कृतापकारे शत्रुवर्गे शत्रुवर्गविषये । हे ईश । यया समृद्ध्यात्मास्त्रबलेन विजयं संप्राप्नुयां भजेयम् । हे भूतनाथ । आहवेषु तां विभुतां विभूतिं शस्त्रविद्यां वितर देहि ॥

इति निगदितवन्तं स्नुतमुच्चैर्मघोनः
प्रणतशिरसमीशः सादरं सान्त्वयित्वा ।
ज्वलदनलपरीतं रौद्रमस्त्रं दधानं
धनुरुपपदमस्मै वेदमभ्यादिदेश ॥ ४४ ॥

इतीति ॥ इत्युच्चैर्निगदितवन्तं प्रणतशिरसं मघोन इन्द्रस्य स्नुतमर्जुनमीशो महादेवः सादरं यथा तथा सान्त्वयित्वेदमब्रवीदस्मा अर्जुनाय ज्वलतानलेन तेजसा परीतं व्याप्तं रौद्रं रुद्रदेवताकं पाशुपतमस्त्रं दधानं धनुरुपपदं धनुःशब्दोपपदं

१ विरुध्य. २ विहितापदि. ३ लोकनाथ. ४ वरास्त्रम्.

Digitized by Google

वेदस् । यजुर्वेदमित्यर्थः । अभ्यादिदेश । अध्यापयामासेत्यर्थः ॥ "यजुरुपपदं वेदस्" इत्यत्र यजुरुपपदस्यं वेदशब्दस्य न तु संज्ञिनस्तदर्थस्येति संज्ञायाः संज्ञिनस्तत्राभावाद्-भाष्यवचनदोषमाहुरार्लंकारिकाः । तदुक्तम्— "यदेवाधाष्यवचनमवाष्यवचनं हि तत्" इति । समाधाने तु यजुःशब्दविशेषितेन वेदशब्देन । शब्दपरेणेत्यर्थः । प-रोपदेशयोग्यो यजुर्वेदो ज्ञेयः ॥

स पिङ्गाक्षः श्रीमान्भुवनमहनीयेन महसा
तनुं भीमां बिभ्रच्त्रिगुणपरिवारग्रहरणः ।
परीत्येशानं त्रिः स्तुतिभिरुपगीतः सुरगणैः
सुतं पाण्डोर्वीरं जलदमिव भास्वानभिययौ ॥ ४५ ॥

स इति ॥ पिङ्गाक्षः पिङ्गलाक्षः श्रीमान्शोभावान्भुवनमहनीयेन लोकपूज्येन महसा तेजसा भीमां तनुं बिभ्रत् । त्रिगुणत्रिशिखः परिवार आकारो यस्य तत्त्रिगुणपरि-वारं त्रिशूलं तदेव ग्रहरणमायुधं यस्य स तथोक्तः । सूर्यपक्षे तु त्रिगुणत्रयपरिवारस्व-रूपात्मक इति बोध्यम् । स यजुर्वेदः सुरगणैः स्तुतिभिरुपगीतः सन् । ईशानं देवं त्रिशिखारम् ॥ " द्वित्रिचतुर्भ्यः सुच् " इति सुच्प्रत्ययः ॥ परीत्य प्रदक्षिणीकृत्य पीरं पाण्डोः सुतमर्जुनम् । भास्वान्सूर्यो जलदमिव । अभिययौ ॥ शिखरिणीवृत्तम् ॥

अथ शशधरमौलेरभ्यनुज्ञामवाप्य
त्रिदशपतिपुरोगाः पूर्णकामाय तस्मै ।
अवितथफलमाशीर्वादमारोपयन्तो
विजयि विविधमस्त्रं लोकपाला वितेरुः ॥ ४६ ॥

अथेति ॥ अथ शशधरमौलिवरप्रदानानन्तरं त्रिदशपतिपुरोगा इन्द्रादयो लो-कपालाः शशधरमौलेः शंभोरभ्यनुज्ञामवाप्य पूर्णकामाय तस्मै पाण्डवायावितथ-फलमोघफलमाशीर्वादमारोपयन्तः प्रयुञ्जाना विजयि जयशीलं विविधं नानावि-धमस्त्रमैन्द्रादिकं वितेरुर्ददुः ॥ मालिनीवृत्तम् ॥

असंहार्योत्साहं जयिनमुदयं प्राप्य तरसा
पुरं पुर्वी गोप्तुं स्थितमनवसादाय जगतः ।
सधाम्ना लोकानां तमुपरि कृतस्थानममरा-
स्तपोलभ्या दीप्तं दिनकृतमिवोलूकरुपजग्मुः ॥ ४७ ॥

१ जयशीलम्,

Digitized by Google

असंहार्योत्साहमिति ॥ तरसा बलेन वेगेन च जयिनं जयश्रीसमुदयमङ्गलाभरूपमभ्युदयम् । अन्यत्र उदयाद्रिं च । प्राप्यासंहार्योत्साहं संहर्तुमशक्योत्साहं जगतोऽनुग्रहाय क्षेमाय गुर्वीं धुरं दुष्टनिग्रहम् । तपोपसंहाररूपं च भारम् । वोढुं स्थितम् । स्वप्रभया स्वतेजसा लोकानामुपरि कृतस्थानं कृतास्थितिं कृतपदम् । अन्यत्रोपरिवर्तमानम् । तपोलक्ष्म्या दीप्तं तं पाण्डवम् । अमरा इन्द्रादयो दिनकृतं सूर्यमिव । तच्चैरुपजग्मुः साधु महाभाग्योऽसीति तुष्टुवुः ॥ शिखरिणीवृत्तम् ॥

व्रज जय रिपुलोकं पादपद्मानतः स-
न्नदित इति शिवेन श्लाघितो देवसंघैः ।
निजगृहमथ गत्वा सादरं पाण्डुपुत्रो
धृतगुरुजयलक्ष्मीर्धर्मसूनुं ननाम ॥ ४८ ॥

व्रजेति ॥ शिवेन व्रज स्वपुरं गच्छारिलोकं जयेति नदित उक्तः । यतः पादपद्मानतः शिवपादपङ्कजानतः संस्तथा देवसंघैः श्लाघितः स्तुतोऽत एव धृता गुर्वी जयलक्ष्मीर्येन स पाण्डुपुत्रोऽर्जुनो निजगृहं स्वाश्रमं गत्वा प्राप्याथ सादरं यथा तथा धर्मसूनुं राजानं ननाम नमनं चकार ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया घण्टापथसमाख्यया
व्याख्यया समेतः कविश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये
धर्मजयाक्षलाभो नामाष्टादशः सर्गः ।

समाप्तमिदं किरातार्जुनीयं नाम महाकाव्यम् ।

१ उदितः. २ भवेन.

Digitized by Google

अथ किरातार्जुनीयटीकाप्रमाणकाः

१ अमरकोशः ।
२ अलंकारसर्वस्वम् ।
३ कामन्दकः ।
४ काव्यप्रकाशः ।
५ काशिका ।
६ केशवकोशः ।
७ कैयटः ।
८ क्षीरस्वामी ।
९ दण्डी ।
१० नीतिवाक्यामृतम् ।
११ न्यासोद्योतः ।
१२ पाणिनिः ।
१३ भाष्यकारः ।
१४ मनुः ।
१५ मार्तण्डकोशः ।
१६ यादवकोशः ।
१७ वामनः ।
१८ वार्तिकम् ।
१९ विश्वप्रकाशकोशः ।
२० शुचरत्नाकरः ।
२१ वैजयन्तीकोशः ।
२२ शब्दार्णवकोशः ।
२३ शाकटायनः ।
२४ शाश्वतकोशः ।
२५ सज्जनः ।
२६ हलायुधकोशः ।
२७ हेमचन्द्रकोशः ।

Digitized by Google

अथ किरातार्जुनीयस्य सूचीपत्रम् ।

	सर्गः	श्लोकः
अकृषिममेमरसामिरामं•	३	३७
अखण्डमाखण्डल•	१	२९
अखिलमिदमनुध्य•	५	२१
अगुढदासस्फुटदन्त•	८	३६
अगसानुषु निताम्त•	९	७
अचक्रमत सपलवां•	१०	४९
अचिन्तवावामपि•	१७	४७
अचिरेण परस्य•	२	९
अजम्मा पुरुषस्तावत्•	११	७०
अजिग्रमोचिद्यमोच•	१४	५७
अणीयसे विश्वविधा•	१८	४१
अतुरव्युपवन्ति•	२	५१
अतिपातितकाल•	२	४२
अतिशयितवनाम्बर•	१०	८
अतीतसंख्या विहिता•	१४	१०
अत्यर्थं दुरुपसदादुपेत्य•	७	९
अथ कृतकपिलोभनं•	१०	१७
अथ क्षमामेव•	१	४४
अथ चेदवधिः•	२	१६
अथ जयाय नु मेकमही•	५	१
अथ दीपितवारिवाहवर्त्मा• ...	१३	२०
अथ दीर्घतरं तमः•	१३	३०
अथ परिमलनामवाच्य•	१०	१
अथ भूतभव्यभवदीय•	१२	१९
अथ भूतमि वार्तान्न•	१५	१
अथ वाचस्पत्य वचनेन•	१२	१
अथ विहितविधेये•	१६	६२
अथवैव कृतप्रवेव पूर्व•	१३	५
अथ शुद्ध रत्नौजेरभ्य•	१८	४६
अथ स्फुरन्मौनविधूत•	८	२७
अथ स्वमायाकृतमन्दिरो•	८	१

	सर्गः	श्लोकः
अथ हिमशुचिभस्म•	१८	१५
अथापे हसता साधि•	१५	७
अथापदामुद्धरणक्षमेषु•	१७	१
अथाभिपश्यन्निव•	३	५१
अथामर्षाभिसर्गाच्च•	११	१
अथोच्चकैरासनतः•	२	५७
अथो शरस्तेन मदर्थ•	१४	१७
अथोल्भासेव सुमेरु•	३	३२
अदीपितं वैद्युतवातवेदसा• ...	४	२९
अद्य क्रियाः कामदुघाः•	३	६
अधरीचकार च विवेक•	६	२१
अधिगम्य गुह्यकपतामिति• ...	६	१८
अधिरुह्य पुष्पभरनम्रशिखी:• ...	६	१७
अनादरोपात्तपृतैक•	१४	३६
अनाप्तपुण्योपचये•	३	५
अनामृशन्तः कथितेव•	१७	३३
अनायुधे सत्त्वविधाविते•	१४	१६
अनारतं तेन पदेषु•	१	१५
अनारतं वी मणि•	१	४०
अनिर्वयेन दिवसा•	११	७१
अनुकूलपातिनमचण्ड•	६	२५
अनुकूलमस्य च विधिम्ब• ...	१२	४१
अनुचरेण धनाधिपतेरयो•	५	१६
अनुजगुरुच दिव्यं•	३	६०
अनुजानुमध्यमवसक्त•	१२	२२
अनुदाताकारतया•	३	३
अनुपालयतामुदे•	२	१०
अनुभावतया गुरु स्थिर•	१३	१५
अनुघासतमित्यना•	२	५४
अनुवानु पुष्पितलता•	६	१८
अनुदेमयमभरुनैः समता•	६	८

Digitized by Google

	सर्गः	श्लोकः
अनेकरावम्बरचाश्व•	१	१६
अनेन योगेन विपृद्ध•	३	२८
अन्तकः पर्यवस्थाता•	११	१३
अन्तिकान्तिकमेतेन्दु•	९	२१
अन्यदीयविधिश्चे न•	१३	४६
अन्यदोषमिव ह्रः स्वर्ग•	१३	४८
अन्योन्यरक्तमनसा•	९	७४
अपनेयमुदेतुमि•	२	३६
अपवन्धनुषः शिवाश्चिकस्थै• ...	१३	२३
अपरानसमीरणे•	२	५०
अपवादितविद्धरे•	२	२६
अपवादादभीतस्य•	११	५६
अपश्यद्भिरिविशार्यं•	१५	२
अपहस्थेऽथवा सद्भिः•	११	६८
अमाहतस्यादव•	१६	२४
अभिवस्तं पृथासूनुः•	११	८
अभिद्रोहेण भूतानामू•	११	२१
अभिवमनसः•	१०	४२
अभिभवति मनः कदम्व•	१०	२३
अभिमवोदितमन्यु•	१८	७
अभिमानधनस्य•	२	१९
अभिमानवतो•	२	१३
अभिमुनि सहसा•	१०	४५
अभियोग इवानू•	२	४६
अभिरक्षिमगालि विमल•	१२	२
अभिलषत उच्चयं•	१७	६१
अभिवर्षति योऽनु•	२	३१
अभूतमात्रस्य विकद्र•	१४	१९
अभ्यक्षनि मुनिपाक्षमपत्रा• ...	१३	६३
अभ्यावत्तः संस्तवभूम•	१६	६
अमर्षिणा इवगिर•	१४	६३
अमी पृथुस्तम्बभुवः•	४	२६
अमी वनदूरुहरोध•	४	३५

	सर्गः	श्लोकः
अयथार्थक्रियारम्भैः•	११	५२
अयमच्युतश्च वचनेन•	१२	३५
अयमसौ भगवानुत•	१८	९
अयमेव मृगप्रसवकामः•	१३	९
अर्थं वः श्रेय्यमापत्रा•	१५	१९
अलकाधिपभृत्यदर्शितं•	३	५९
अलंकृतानामनुजुता•	१७	२९
अलंकृतं तत्तदुदीक्ष्य•	११	६०
अलंकृतत्वाज्जनने•	११	४०
अलमेव विलोकितः•	५	१७
अलसपदमनोरमं मरुत्वा•	१०	६०
अवचयपरिभोगपत्थि•	१०	५
अवत्यन्थिनः संभोः•	१५	३७
अवधूतपङ्कजपराग•	६	३
अवधूयारिभिर्नीता•	११	५८
अवन्ध्यकोपस्य•	१	३३
अवरुग्नतुङ्गसुरदारु•	६	५
अवलीढसनाभिरश्वसेनः•	१३	११
अवहितहृदयो विधाय•	२	५८
अविमृदस्याप्यतुलेन•	१८	३३
अविज्ञातमवन्धस्य•	११	४३
अविनयतया तथापि•	२	२९
अविभाविसनिष्क्रम•	१३	२७
अविमृष्यमेतदभिलप्यति•	६	४४
अविरलोद्गिरतवारि•	५	६
अविरलकुसुमीवन•	१०	२८
अविरलमलसेषु•	१०	४३
अविलङ्घ्यधिकर्षणं•	३	५७
अविवेकपृथाश्रमा•	१३	२९
अवसत्कमनवेक्षितानि•	१०	५९
अवसत्कमाराधवतो•	१	११
अवसानिवकत्व•	२	४८
अवसायमवाप्तवत्यया•	४	३१

Digitized by Google

	सर्गः	श्लोकः
असिः शरा वर्म धनुश्च•	१४	२०
असृक्कृतीनामुपचीव•	१६	१०
असंविदामस्य ममेदम•	१८	४२
असंशयं न्यस्तमुपाप्त•	८	३८
असंशयालोचितकार्य•	३	३३
असंहार्यौस्साहं वयिम•	१८	४७
अक्षवेदमधिगम्य तत्त्वतः•	१३	६२
अक्षवेदविदयं मही•	१३	६७
अक्षैः समानामति•	१७	३४
अस्मिन्नगृह्णत पिनाक•	५	३३
अस्मिन्मयाः पीडय•	१६	९
अंगृणाभिरतीव•	९	३
अंसस्थलैः केचिद•	१६	३०
अंसावबद्धज्यनती•	१६	२१
आकारमाधांसितभूरि•	३	२७
आकीर्ण वलरक्षसा•	७	३६
आकीर्णा मुखनलिभै•	७	१८
आकुमारमुपदेहु•	१३	४३
आकुलश्चलयत्रि•	९	८
आक्षिप्तचापावरणेषु•	१७	५९
आक्षिप्तसंपातमपेत•	१६	४१
आक्षिप्यमाणं रिपुभिः•	३	५०
आघट्टयामास गता•	१७	३८
आघ्राय क्षणमतितृप्त•	७	३४
आतपे धृतिमता•	९	३०
आतिथेयीमथासाद्य•	११	९
आत्मनीनमुपविष्टते•	१३	६९
आत्मलाभपरिणाम•	१८	३४
आदत्ता नखपदैः•	९	४९
आधाधामरणभया•	१८	३९
आमत्तभमरद्रुता•	७	१०
आमोदवासितवना•	९	७७
आयत्तः सुरसरिदोघ•	७	३२

	सर्गः	श्लोकः
आरोदुः समवनतस्य•	७	३३
आर्यासितापथिति•	६	४६
आशु कान्तमभिसारित•	९	३८
आसक्तभरनीकाशो•	११	५
आसक्ता धूरियं•	११	७७
आसजद्विपदवीमदा•	७	२४
आसादिता तमथयं•	१६	२७
आसुरे क्रोडविन्यास•	१५	२८
आसेदुषां गोत्रभिदो•	१८	१८
आस्तिक्यशुद्धमवतः•	१८	४३
आस्थामालम्ब्य गीतेषु•	१५	४
आस्थितः स्थपित•	९	९
आहिते नु मधुना•	९	६९
इच्छतां सह वधूभिः•	९	१३
इतरेतरानभिभवेन•	६	३४
इति कथयति तत्र•	४	३७
इति गां विधाय विरतेषु•	१२	३२
इति चालयन्नचलसानु•	१२	५२
इति तानुदारमनुनीय•	१२	४०
इति तेन विसिस्म्य चाप•	१३	१४
इति दर्शितविक्रियं•	२	२५
इति निगदितवर्त्म•	१८	४४
इति सुरपतेन महेन्द्र•	३	३०
इति विविधमुदासे•	१६	६३
इति विषमितचक्षुषा•	१०	५६
इति शासति सेनाम्यां•	१५	२९
इदीरयित्वा गिरमात्त•	१	२६
इदीरिताकूतमनील•	१४	२६
इत्थं विदस्य वनिताभि•	८	५५
इत्युक्तवन्तं परिरभ्य•	११	८०
इत्युक्तवन्तं मम साधये•	३	२४
इत्युक्तवानुक्तिविशेष•	३	१०
इत्युक्त्वा सपदि हितं मिथ•	५	५१

Digitized by Google

	सर्गः	श्लोकः
इदमीदृग्गुणोपेतं•	११	४१
इमाम्बमूनीत्यपवर्जिते•	८	२०
इमामहं वेद न तावकीं•	१	३७
इयमिङ्गुदाय रोचतां•	२	५
इयं च दुर्वारमहारथा•	१६	१७
इयं शिवायां निवसते•	४	२१
इह दुरधिगमैः किंविदेवा• ...	५	१८
इह पीतभवास्त्वपोऽनुभावा• ...	१३	४
इह लम्बितमंशुकं सुरापः	५	४०
ईक्षांचक्रमभ्रमि चिराय•	५	२९
उच्यतां स वचनीय•	९	३९
उच्यतां शुचिमिवाशु•	९	१८
उच्यतां तदिह देवा•	१६	१६
उडुपस्खलनक्षिप्तो•	५	३९
उत्तङ्गे तमपिपमे तर्सं•	७	२१
उत्तुङ्गप्रकुचकुम्भा•	७	३०
उदस्य धैर्यं हविषेव•	८	५०
उदारकीर्तेरुदयं•	१	१८
उदारचन्द्रमाजीःषु•	११	६५
उदितोपलस्खलन•	६	४
उदीरितां वामिति•	३	५५
उद्दण्डयशःस्थविवेक•	१४	३१
उद्वेष्मुमिषिभिज•	९	२४
उन्मथ्यन्मदर इवा•	१७	६३
उपदारं इवाखनि•	१३	३३
उपकारकमावदे•	२	४३
उपवासदृढाश्चिल•	२	४७
उपविश्वदृढाशया•	२	२८
उपलभ्य पयोव्रतच्छ•	६	१४
उपलाहतोदकच्छ•	६	१०
उपवस्त उपलेषु•	११	५०
उपवासाः पथिश्रमापि•	४	१०
उपेयुषीं विश्वतमस्कः	६	१२

	सर्गः	श्लोकः
उपेयुषीं विश्वतमस्कः	१४	३८
उपैति सर्वं परिणाम•	४	२२
उपैत्यनन्तद्युतिरित्य•	१६	६१
उपोढकल्याणफलो•	१७	५४
उमापतिं पाण्डुसुत•	१७	१२
उरसि शूलभृतः प्रहिता•	१८	५
उद तत्त्वमाह विपरि•	६	३५
ऊर्ध्वं तिरश्चीनमधश्च•	१६	५०
ऋषिर्वसिष्ठः स यदि•	६	३६
एकतामिव गतस्व•	९	१२
एवं मतिदन्दिषु तस्व•	१७	१८
ओजसापि खलु नून•	९	३३
ओडुपलक्षविदंश•	९	५७
औषसातपभयादप•	९	११
कटुरे वृषस्य कृत•	१२	२०
कण्ठाम्ले सुरसरितो•	१२	५४
कतिपयसदकारपुष्प•	१०	३०
कथमिव तव संमति•	१०	३६
कथं वा दीयतामर्घा•	११	७६
कथासङ्गेन मने•	१	२४
कपोलसंक्रोचि विलो•	४	९
करणधृङ्कनिःसृतयोः•	१८	११
करिष्यसे यत्र सुदुश्च•	३	२९
करणमभिहितं नया•	१०	५८
करोति योऽप्येषमनाति•	३	५१
करौ धुनाना नवपल्लवाढ्यौ पयस्यगाधे•	८	४८
करौ धुनाना नवपल्लवाढ्यौ वृथा कृथा•	८	७
कलमभरेण विलोल•	८	१७
कवर्थं स विश्वदुपगीत•	१२	९
कषकल्मषनिरस्तमहा•	५	४७
काम्बदूत्य इव कुसुम•	९	६
काम्बदेश बहु संविद्य•	९	३७
काम्बसंक्रमपराभिव•	९	५२

Digitized by Google

	सर्गः	श्लोकः
क्रान्तावनं सुरवरोद•		९ ७६
क्रान्तानां कृतपुण्यकः•		७ ५
किं मतेन न हि युक्त•		९ ४०
किं त्यक्तापास्तदेवत्व•		१५ २१
किमपेक्ष्य फलं•		२ २१
किमसामयिकं वित•		२ ४०
किमुपेक्षसे कथय•		१२ ३१
किरातसैन्यादुरुचाप•		१४ ४५
कुप्यताद्यु भवतानत•		९ ५३
कुररीगणः कृतरवस्तरवः•		५ २५
कुरु तन्मतिमेव•		२ २२
कुरु तात तपास्यमार्ग•		१३ १३
कुसुमनगवनान्युपेतु•		१० ३१
कुसुमितमवलम्ब्य•		१० ५३
कृतधृति परिवभ्रिरे•		१८ २१
कृतमणामस्य महीं•		१ २
कृतं पुरुषशब्देन•		११ ७२
कृतवानन्यदेहेषु•		११ २६
कृतानतिर्न्यहतसा•		३ ३१
कृतान्तदुर्वृत्त इवा•		१६ २९
कृतारिषड्वर्गजयेन•		१ ९
कृतावधानं वितवार्हि•		४ ३३
कृतोमिरेखं शिथिलत्व•		४ ६
कृष्णद्वैपायनादेशात्•		११ ४६
को ध्वितं हरितुरङ्ग•		१३ ५०
कोऽपवादः स्तुतिपदे•		११ २५
क्रान्तावां प्रहचरितानू•		७ १२
क्रामद्भिर्घनपदवीमनेक•		५ ३४
क्रियासु युक्तैर्नृप•		१ ४
क्रोधान्धकारान्तरितो•		१७ ९
क्लान्तोऽपि त्रिदशवधूजन•	...	७ २९
क्व चिराय परिग्रहः•		२ ३९
क्षणिवस्तनवः शान्तो•		११ ४५

	सर्गः	श्लोकः
क्षययुक्तमपि•		२ ११
क्षितिनभःसुरलोक•		५ ३
क्षिपति योऽनुवनं वितवां•		५ ४५
क्षीणयावकरसोऽप्यलि•		९ ६२
क्षुभितामिनिःसृत•		१२ ४५
क्षोभेण तेनाथ गणा•		१७ २२
खण्डिताशंसया तेषां•		१५ ३
गणाधिपानामविषाद•		१४ ५४
गतवति मखलेखा•		९ ७८
गताम्बुगूनां सदवम्ब•		४ १३
गतैः परेषामविषाद•		१४ ५२
गतैः सहावैः कलहंस•		८ २९
गन्धमुद्वहरवः कल•		९ ३१
गभीररम्भेषु भृशं मही•		१४ ४६
गम्यतामुपमते वयनानां•		९ ४
गुणसंपदा समधिगम्य•		५ २४
गुणानुरक्तामनुरक्त•		१ ३१
गुणापवादेन तदम्य•		१४ १२
गुरुक्रियारम्भफले•		१४ ४२
गुरुस्थिराण्युत्तम•		१६ २८
गुरून्कुर्वन्ति ते वंश्या•		११ ६४
गूढोऽपि वपुषा रावनू•		११ ६
ग्रसमानमिवोर्मासि•		११ ७३
ग्रहविमानगणानभितो•		५ १४
घनपोत्रविदीर्णशालं•		१३ ३
घनं विदार्याङ्कुम•		१५ ५०
घनापि कामं कुसुमाभि•		८ ४
चपलं वसु मितान्य•		१३ ५३
चतसृष्वपि ते दिवे•		२ ६
चमरीगणैर्गणवलस्य•		१२ ४७
चयानिवाद्रीनिव•		१६ ५२
चलनेऽनिशचलति•		१२ २८
चारचञ्चुश्चिरारेची•		१५ ३८

Digitized by Google

	सर्गः	श्लोकः
चिचर्षवां वन्यपशामज •	३	११
चित्तनिर्वृतिविधायि •	९	७१
चित्तवासनि कल्याणी •	११	१४
चिन्तयमानानलि •	१७	३१
चिरनियमकृशोऽपि •	१०	१४
चिरमपि कलिताम्य •	१०	४८
च्युते स तस्मिन्विधुरो •	१७	३७
छायां विनिर्भूय वनोन्मदीं • ...	१६	३२
जनतीशरणे युक्तो •	१५	४५
जयमङ्गलविर्यवदेद्ध •	४	३२
जटानां कीर्णया केशैः •	११	३
जनैकपाममनिन्द्य •	४	१९
जन्यदेवतपसां विरोधिनीं •	१३	६४
जाम्बिनोऽस्य स्थितिं विद्वां • ...	११	३०
जयतः सदा जयमुपांशु •	१२	८
जयनमभवाजूनम •	११	१८
जयारवक्षेडितनादं •	१४	२९
जवेन कश्चिदिरमेदयं •	१४	६२
जरतीमपि विश्वास •	११	७
जलदवालवनैरसिता •	५	४८
जलीघसंमूर्छन •	१६	५९
जहातु मैनं कथमर्द •	३	१४
जहार चास्मादधिरोह •	१७	४४
जहिहि कठिनतां •	१०	५१
जहीहि कोपं दयितो •	८	८
जिहासवास्मुजलत •	१६	३७
जीवन्त्या दुर्भगा देदे •	११	३२
जेतुमेव भवता •	१३	५४
ज्वलज्जटाद्य जात •	२	२४
ज्वलतीऽनलवद्युति •	१२	७
ज्वलितं न हिरण्य •	२	२०
तत्र तत्र तप स्थिरे •	१८	१
तथा स्थिरस्य वपो •	१४	१

	सर्गः	श्लोकः
ततः किरातापिपते •	१६	१
ततः पपद्वे समभेद •	१४	४४
ततः प्रयात्यस्तमदा •	१७	१७
ततः शरच्चन्द्रकरा •	३	१
ततः स कूजत्कलहंसत •	४	१
ततः सदर्पं मनुं तपस्यता • ...	१४	३५
ततः स संमेक्ष्य शरद्गुप्त •	४	२०
ततः सुपर्णध्वजपक्ष •	१६	४४
ततस्तपोवीर्यसमुद्भवस्य •	१७	३५
ततोऽप्रभूमिं व्यवसाय •	१७	५५
ततो धरित्रीधरतुल्य •	१६	५५
ततोऽनुपूर्व्यामतवृत्त •	१७	५०
ततोऽपवादेन पताकिनी •	१४	२७
तत्तदीयविधिज्ञता •	१३	५७
तत्तिलिलितमिदं •	१३	६८
तत्र कार्मुकभृतं •	१३	३५
तथा न पूर्वं कृतभूषणा •	८	४१
तथापि विप्रः •	१	८
तथापि भिन्नं नृप •	३	१२
तदलघ तनुरस्तु •	१०	५०
तदभूदिवारः रुदतं •	६	२९
तदर्कं मणिपक्ष •	२	१५
तदा रम्भाण्डरम्भाणि •	११	२८
तदाशु कर्तुं त्वयि •	१	२५
तदाशु कुर्वन्धचर्म •	३	५४
तदुपेत्य विभयत •	६	४३
तदूना दरशुर्भीमं •	१५	३५
तनुमवशितलोक •	१०	१५
तनुवारभसो भास्वान •	१५	२३
तनूरुहोद्भेदघनानि •	८	५
तपनमण्डलदीप्तिमेद •	५	२
तपसा कृशं वपुरुवाह •	१२	६
तपसा तथा न मुदमस्य •	१८	१४

Digitized by Google

	सर्ग:	श्लोक:
तपसा निर्धौतकल्म• ...	...	१२ ३९
तपोवनेनेव विधाय• ...	...	१४ ६०
तमसामुपदधिरे विधान•...	...	७ १३
तमसनुवनराजिश्यामितो• ...	...	४ ३८
तमनतिशयनीयं सर्वतः• ...	...	५ ५२
तमभिन्दधन्दिन इवेन्द्र• ...	...	६ २
तमाशु चक्षुःश्रवसां• ...	...	१६ ४२
तमुदीरितारुणपदांशु• ...	...	१२ १४
तरसा भुवनानि यो• ...	...	१८ ३७
तरसैव क्रोऽपि भुवनेऽ• ...	...	१२ २६
तवोत्तरीयं करिचर्म• ...	...	१८ ३२
तस्मै हि भारोद्वरणे• ...	...	१७ १४
तस्यातियत्नादति• ...	...	१७ ३२
तस्याद्यवायासविलोल• ...	...	१७ ८
तं शंभुराक्षिप्तमदेषु• ...	...	१७ ४३
ताम्भूरिधाम्नश्चतुरोऽपि• ...	...	३ ३५
तापसोऽपि विभुता• ...	...	१३ ३९
तामैक्षत क्षणं सभ्या• ...	...	११ ५१
तावदाश्रीयते लक्ष्म्या• ...	...	११ ६१
तिरोदितश्चक्षनिकुञ्ज• ...	...	१४ ३३
तिरोदिताम्बानि तिताम्ब•...	...	८ ४७
तिरोदितेन्दोरथ• ...	...	१६ ३१
तिष्ठता तपसि पुण्य• ...	...	१३ ४४
तिष्ठद्भिः कथमपि• ...	...	७ ४
तीराम्बराणि मिथुनानि• ...	...	८ ५६
तुतोष पश्यन्कलमस्य• ...	...	४ ४
तुल्यरूपमसितोत्पल• ...	...	६ ६१
तुषारलेखाकुलितो• ...	...	३ ३६
तेजः समाश्रित्य परै• ...	...	१७ ३
तेन व्यतेनिरे भीमा• ...	...	१५ ४२
तेन सूरिरुपकारिता• ...	...	१३ ६०
तेनाभिनिन्ये तथा• ...	...	१७ ४०
तेनानुवसदावेन• ...	...	११ ४८
तयीमृतूनामभिला• ...	...	१४ ४८
त्रासविद्रं वलश्चेता• ...	...	१५ ६
त्रिःसमक्रत्वो जवती• ...	...	३ १८
त्रसमस्कः स्थावरजङ्गमानां• ...	...	१८ ३५
त्वया साधु समारम्भि• ...	...	११ १०
त्विषां तटिः पाटलिता• ...	...	१६ ३३
दक्षिणां मलतदक्षिण• ...	...	१८ २७
ददृशेऽथ सविस्मयं• ...	...	१३ १७
दधत इव विलासचाक्षि• ...	...	५ ३२
दधतमाकरिभिः करिभिः•...	...	५ ७
दधति क्षतीः परिणत• ...	...	६ ७
दनुजः स्विदयं क्षपाचरो• ...	...	१३ ८
दरीमुखेरासवराग• ...	...	१६ ४६
दिक्प्रावदस्ताकृतिमुद्वहद्भि•...	...	१६ ३८
दिवः पृथिव्याः ककुभां• ...	...	१४ ५३
दिव्यस्त्रीणां सचरणलाक्षा•...	...	५ २३
दिशः समूहमिव• ...	...	१४ ५०
दीपयन्नथ नभः• ...	...	६ २३
दीपितस्त्वमनुभाव• ...	...	१३ ३८
दुरात्मदीव्यता राज्ञा• ...	...	११ ४७
दुरासदवनव्यायो• ...	...	११ ६३
दुरासदामरीमुमानू• ...	...	११ २३
दुर्धर्षं तदथ मा स्म• ...	...	१३ ४६
दुःशासनाकर्षपरो• ...	...	३ ४७
दूनास्तेऽरिबलादूना• ...	...	१५ ३१
दृश्यतामयमनोरुहा• ...	...	१३ ७०
दृष्टावदानाद्दयवेऽरि• ...	...	१७ १६
दृष्ट्वा दृष्ट्याचरणीयानि• ...	...	१८ २८
देवाङ्गानिनि कावादे• ...	...	१५ ५५
दो मिलन्मदलिनीज• ...	...	६ २०
द्यौर्वि वदन्ती वनिता• ...	...	८ ३६
द्युविषद्भामिनी वार• ...	...	१५ ४३
द्वीपजनामेव दिशः• ...	...	१६ ३५

Digitized by Google

	सर्गः	श्लोकः
हुवप्रदमिवाभुमिच्छ•		१० २
हारि चक्षुरधिपाणि•		९ ४३
हिरदानिव दिग्गि•		२ २३
हिषतः परासिषिचु•		१२ ३४
हिषतामुदयः•		२ ८
हिषता विहितं•		२ १७
हिषन्निमित्त यदियं•		१ ४१
हिषां विघाताय•		१ ३
हिषां सतीर्वीः मयमे•		१४ ५५
धनुः मवन्धव्यनितं•		१६ २०
धर्मात्मजो धर्मनिवन्धिनी•		३ ४
धार्तराष्ट्रैः सह भीति•		११ ५५
धार्त्तेलन्द्रियवधोचित•		९ ७२
धूतानामभिमुखपातिभिः•		७ ३
धृतविसवलम्बावलि•		१० २४
धृतविसवलम्बे निधाय•		१० ४६
धृतहेतिरिव्यधृतिन्न•		६ २४
धृतोत्पलकर्णपीठ इव•		१६ १५
धैर्यावसादेन हतमसादा•		३ ३८
धैर्येण विश्वास्यतया•		३ ३४
ध्रुवं मनाक्षः मदिवस्य•		१४ ९
ध्वनिरविविरेषु•		१० ४
ध्वजेव हर्षं जयः•		११ ५७
न ज्ञातं ज्ञात वलस्य•		११ ४२
न तेन वर्त्म स्खलितु•		१ २१
न दराद भूयदवगमामि•		१२ १६
न दलति निघने•		१० ३९
नतु हो मनना राघो•		१५ २०
न नोनुन्ने नुनोनो•		१५ १४
न पपाद संमिदिव•		१२ ४
न प्रसादनुपिर्वं•		९ २५
न मृषा खलु सोऽस्यं विधातुः•		११ ६
नयनमिव सूक्ष्मिः मनुष्ये•		५ २२

	सर्गः	श्लोकः
न रात्रि चेतः परमा•		१८ ३१
नवपल्लवाङ्गुलिभृतः•		६ २६
न वर्म कस्मैचिदपि•		१४ १४
नवविनिद्रमपाकुसुम•		५ ८
नवातपालोहितमादित्यं•		४ ८
न विरोधिनी दयमियाय•		१२ ४६
न विलिप्तिये न विष•		१२ ५
न समयपरिरक्षणं•		१ ४५
न सुखं मार्थये नार्थ•		११ ६६
न स्रजो ददधिरे•		९ ३५
नागारलब्धोचिवां•		५ ३६
नाम्बरजाः श्रियो जातु		११ २४
नाभियोक्तुमनृतं		१३ ५८
नासुरोऽयं न वा नानो•		१५ १२
निचयिनि जवनी•		१० २९
निजगिरे तस्य हरेषु•		१७ २६
निजेन गीतं विदितास्य•		१४ ३९
निद्राविनोदितनितास्य•		९ ७५
निपतितेऽधिशिरोधर•		१८ ६
निपीयमानस्तवका•		८ ६
निवद्धनिःश्वासविकम्पिता•	...	४ १५
निमीलदाकेकरलोल•		८ ५३
निरङ्गने साधिविलो•		८ ५२
निरस्यं साम न दान•		१ १२
निरास्यदं मध्यकुतूहलि•		३ ९
निरीक्ष्यमाणा इव•		४ ३
निरीक्ष्य संरम्भनिरस्त•		३ २१
निर्याय विद्याय दिनादि•		३ २५
निवृत्तवृत्तोत्पयोधर•		८ ३
निशम्य सिद्धिं दिषता•		१ २७
निशासरीद्रेषु विकासतां•		१४ ३०
निशिचरेशरजोऽभिको•		१५ २२
निःशेषं मथनिरेषु•		७ ३८

Digitized by Google

	सर्गः	श्लोकः
निःशेषं शकलित०	१७	६२
निःश्वासधूमैः स्थगिता०	१६	३९
निषण्णमापत्प्रतिकार०	१४	३७
निषादिसंनाहमणि०	१६	१२
निसर्गदुर्बोध०	१	६
निहते विद्विषन्निवहिरावः०	१२	३८
निहितसरलयावदे०	१०	३
नीतोच्छ्वासं मुहुरधिधिरं०	५	३१
नीरन्ध्रं पथिषु रजो रथा०	७	२५
नीरन्ध्रं परिगमिते०	१७	६१
नीलनीरजनिभे०	९	१९
नुनोद तस्य स्वलप०	४	५
नूनमनभवतः शराङ्गिं०	१३	४५
नृपतिमुनिपरिग्रहेण०	१०	६
नृपसुतमभितः०	१०	४४
न्यायनिर्गीतसार०	११	३९
पतत्सु शस्त्रेषु वितत्य०	१४	४९
पतन्ति नास्मिन्विशदाः०	४	२३
पतितैरपेतबलदान०	६	२७
पतिं नगानामिव०	१७	५
पथश्च्युतायां समितौ०	३	१५
पपात पूर्वा वहतोऽपि०	४	१८
परमाक्षपरिग्रहोक्तयेभ्यः०	१३	२६
परवानर्थसंविदौ०	११	३३
परस्य भूयाम्बिवरे०	१६	२३
पराहतश्चस्तशिखे०	१६	५६
परिक्षीणमुपतभुजस्य०	१२	११
परिक्षते वक्षसि दन्ति०	१६	११
परिणामसुखे०	२	४
परिणाहिना तुहिनराशि०	१२	२३
परिभ्रमन्मूर्धवधूद्धता०	४	१४
परिभ्रमरक्षोदित०	१	३४
परिमोदयमानेन०	१५	३६
परिवीतमंशुभिरुदस्त०	१२	१८
परिसरनिषयेषु लीढमुक्ता०	५	३८
परिसृरपतिसूनुधाम०	१०	२०
परिस्फुरन्मीनविघट्टितो०	८	४५
परीतमुशापपयेः०	४	११
परोऽपजानाति यदन्नता०	१४	२३
पश्चात्क्रिया तूपयुगस्य०	१७	४२
पाणिपल्लवविधूनन०	९	५०
पातितोन्नुन्नमाहात्म्यैः०	१५	११
पातुमादितरतीन्यभि०	९	५१
पार्थबाणाः पशुपतेः०	१५	४०
पुरःसरा धामवतां०	१	४३
पुराधिकृढः शयनं०	१	२८
पुरोपनीतं नृप०	१	३९
पुंसः पदं मध्यममुत्त०	१६	१९
पृथग्विधाभ्यन्नविराम०	१६	२४
पृथुरुदम्बरुदम्बरावितं०	५	९
पृथुधाम्नि तत्र परिवोधि०	६	४५
पृथूरुपर्यस्तबृहल्लता०	१४	२४
प्रकृतमनुसंसार नाभि०	१०	४१
प्रचलिते चलितं०	१८	१०
प्रणतिमधणाम्बि०	२	४४
प्रणतिमथ विधाय प्रस्थिताः०	६	४७
प्रणिधाय चित्तमथ भक्तया०	६	३९
प्रणिधाय तत्र विधिनाथ०	६	१९
प्रतनत्यामीकरभासुरेण०	१६	४०
प्रतिक्रियायै विभुरः०	१७	४१
प्रतिनतीभिः कृत०	१६	४३
प्रतिदिशमभिगच्छता०	१०	२१
प्रतिदिशं भुवनाधिप०	१४	६४
प्रतिबोधबुभ्रमविभिन्न०	६	१२
प्रत्यार्द्रीकृततिलकास्तुषार० ...	७	१५
प्रत्याहतौजाः कृत०	१७	१५

Digitized by Google

	सर्गः	श्लोकः
अनृतव्रतविभ्रष्ट०	१५	२६
अपिलोः किंच ते मुखि०	११	१६
अबभूव बालमवलोकयितुं०	६	५
अभवति न सदा परो०	१०	३५
अभवः खलु क्षोभ०	२	१२
अमार्हुमवद्यः पशून०	११	६७
अवच्छलोधैः कुसुमानि	८	१४
अयुज्य सामाचरितं०	१४	७
अलीनभूपालमपि०	१	२२
अवतृषेऽथ महादव०	१८	८
अवालभङ्गालजपाणि०	८	२१
अविकर्षनिनादभिन्न०	१२	१६
अविसहचारवाल०	१४	६५
अविशेष गामिव०	१२	१०
अवृत्तमकैदिव०	१६	४७
अवृद्धसिन्धूर्मिचय०	१६	६०
अशान्तवर्षाभिभवः०	८	२८
अश्रव्योत्तम्भदुरभीणि०	७	३५
असहदावानल०	१६	२६
असह्य वोऽस्मासु परैः०	३	४४
असादरम्बनोबन्धि०	११	२८
असादलक्ष्मी दयितं०	३	२
असेदिवांसं न तु०	१७	२३
अस्खानश्रमवनिता०	७	३१
अस्विद्यामिरविनाम०	९	३६
अहीयते कार्यवशा०	१६	२२
आकृष्णावपि यने०	९	१०
आतोऽभिमानव्यसनाद०	३	४५
आत्मने गुणवत्यपि०	९	५८
आत्मने वरिष्ट दूर०	१८	२५
आदेऽक्षरा वक्ष्यति याच०	८	१५
आदेन संगम्य विपक्ष०	८	३७
आदेन सिक्ता चरणे०	८	५४

	सर्गः	श्लोकः
आदेषु यैः पार्थ विनोप०	३	५२
आदेः खलीलं करवारि०	८	४९
आते पिनाकिनि मया०	११	८१
आदेरितः शाखधरेण करीवः०	९	२८
आनमालतीसितकपाल०	१२	२४
आवरीतपोवनमिवास०	१२	३३
आवद्धोपचितोरपि०	९	६४
आभार शून्याकृतिः०	१७	३९
आमवदपि बलं मिथो०	१०	३७
आमवानपि क्षोप०	२	३७
आमशालिलया यथा तथा०	१३	१२
आहुधा गतां भगति०	६	४२
आहु वर्हिचन्द्रकनिभं०	६	११
(आहुभिश्च बाहुभि०)	१२	क्षेपकः
आहुतः कृतसन्कृतेर्विधातुं०	१३	१०
आणच्छिदस्ते विधिनाः०	१७	३०
आभरांबभूवुरपवृत्त०	१२	४९
आहुदुदाहज्जलदनादि०	१२	४२
आयंकरः प्राणभृतां०	११	१७
आयादिवाक्षिप्य शचाहते०	८	४६
आर्तुभिः मनयसंभम०	९	५४
आर्तुपसखि निशि०	९	६६
आवतः स्मरतां सदा०	१८	३८
आवहिरभुनारति०	१५	१७
आवन्मनेतर्हि मन०	१	३२
आवन्ति ते सभ्यतमा०	१४	४
आववीवदे हतवृत्तम०	६	४१
आवादेषु ममदा०	१	२८
आभ्यो आवन्नपि मुने०	५	४९
आिभ्येव आभिः सवितु०	१६	५१
आुवमरावलितेन०	५	४
आूभर्तुः समधिकमादधे०	७	२७
आूवः समाधानविधूत०	१७	७

Digitized by Google

	सर्गः	श्लोकः
भूरिमभावेन रणाभि०	१७	२
भूरेजुषा रासभभूसुरेण०	१६	७
भृशकुसुमशरेषु०	१०	६१
भूविलासमुभवानमु०	९	५६
मम दिवच्छत्रनि०	३	३९
मणिमयूखचयांशुकभा०	५	५
मतिभेदतमस्तिरो०	२	३३
मतिमाश्चिनयममा०	२	५२
मथिताश्चसो रथविकीर्ण०	१२	५१
मदमानसमुद्भवं०	२	४९
मदसिक्तमुखे०	२	१८
मदकुतिश्चामित०	१६	२
मधुरैरवशानि०	२	५५
मध्यमोपलनिभे ललदंशा०	९	२
मनसा जपैः मधुरितिभिः०	६	२२
मनःशिलाभङ्गनिभेन०	१६	४५
मनोरमं मापितमम्बरं०	४	७
मन्दमस्यजिघुक्षता०	१५	१३
मया मृगाम्बन्नुरनेन०	१४	२५
मरुतः शिखा नवतृणा०	६	३३
मरुतां पतिः स्विद०	१२	१५
मरुता मयूखनिचयेन०	१२	१३
मरुते फलाय तदनेकस्य०	६	२८
मरुत्स्वयोगाय मदा०	३	२३
मरुधमस्कन्धमनून०	१४	४०
मरालले भिन्नसिताश्च०	१६	५७
मरारयाणां मतिदन्त्य०	१६	१४
मरालदुर्गे शिथिल०	१६	३६
मरिचलतागुलतमाल०	१२	५०
मरीभृता पल्लवतेव०	१६	१३
मरीभृतां सञ्चरितै०	१	२०
मरेभुवलभी ग्रभो०	१५	३२
मरीवसो मानवना०	१	१९

	सर्गः	श्लोकः
मा मममन्दविमूढ०	९	७०
मानाश्चिरावेकचर०	३	५३
मानिनीजनविलोचन०	९	२६
मा भूवजपथहरास्तवे०	५	५०
माया स्विदेषा मति०	१६	१८
मार्गजेरय तव०	१३	५९
मा विहासिष्ट समरं०	१५	८
मादेभं नयमभितः०	७	२०
मित्रमिह्मुपकारि०	१३	५१
मुकुलितमतिशय्य०	१०	२७
मुक्तमूलनघुरुचिरित०	९	५
मुखैरसौ विद्रुमभङ्ग०	४	३६
मुचतीषे धरालिङ्गी०	१५	३४
मुदितमधुलिहो विताभी०	१८	२०
मुनयस्तवोऽभिमुख०	१२	२५
मुनिदनुतनयाभिलोभ०	१०	१६
मुनिमभिमुखतां०	१०	४०
मुनिरस्मि विरामतः०	१३	७
मुनिरूपोऽनुरूपेण०	११	२
मुनीषुदङ्गनातता०	१५	३०
मुनेर्विचित्रैरिषुभिः०	१७	१९
मुनेः शरीरेण तदुग्र०	१४	५९
मुहुरनुपतता विधूय०	१०	३३
मुहुश्चलत्पल्लवलोहिनी०	१६	५३
मूलं दोषस्य हिंसादे०	११	२०
मृगाम्बिनिमम्भुवयुः०	१४	१५
मृणालिनीनाममुरञ्जितं०	४	२७
मृदिवकिसलयः सुराङ्गना०	१०	९
यच्छति मतिमुखं०	९	१४
यथा निजे वर्त्मनि०	१७	५७
यथामतिश्चं दिवता०	११	७४
यथायथं ताः सदिता०	८	२
यथास्वमाधोषित०	१४	३३

Digitized by Google

	सर्गः	श्लोकः
वदनोचत पीत्य०	२	२
वदान्य कामं भवता त्व०	१४	१८
वदा विनृह्यति हर्त०	१४	२४
वदि प्रमाणीकृतमार्य०	१४	११
वदि मनसि शमः किमङ्ग० ...	१०	५५
वमनियमकृशीकृत०	१०	१०
वया समासादित०	३	२२
वयसेव तिरोदधम्मुहु०	३	५८
वयोऽधिगन्तुं युव०	३	४०
वहुमिच्छसि पितृ०	१३	६५
वस्मिन्ननेश्वर्यकृत०	३	१९
वः करोति वधोद्यमं०	११	१९
वः सर्वेषामावरीवा०	१८	४०
वा वम्वाः सत्सहायानां०	११	२२
वावस्य प्रथिततरङ्ग० ...	७	१६
वुक्कः प्रमाथमि दिवा०	११	२९
वुक्काः स्वसत्त्वा मुनयः०	१८	२९
वुधुत्सुनेव कवचं०	११	१५
वेनापविद्धसलिलः०	५	३०
वोधं च तं वोम्यतमाव०	३	२६
वोधितः पुलकरोधि०	९	४१
वोधिदुस्तमनोभव०	९	६८
ब्रह्मोभिः सुरमनुजैः०	१८	३६
ब्रह्मीषु राजतनवस्य०	१२	१२
ब्राह्मया तु विविधा०	९	१५
ब्राह्मव वेत्रः मदिराक्षिव०	१४	२८
ब्राह्मकुसंक्रीडितमन्थ०	१६	८
ब्रम्या ब्रवसुविरपैति०	५	३७
ब्रवेन सा संविदधे०	१७	५२
ब्रह्मिरत्नचयमान क्षिप्ते०	५	१०
भावकान्तवनवेषु	९	६३
भावद्भिः पथि भवता०	७	६
भाविराजगणिकामि०	९	१६

	सर्गः	श्लोकः
रामाणामवशितमास्य०	७	७
रिक्ते सविश्रम्भमथा०	१७	३६
रुधिरकरमपि नार्य०	१०	६२
रुधिरपल्लवपुष्पलतागृहै०	५	१९
रुधिराकृतिः कनकसानु०	६	१
रुवम्महेभूम्बहुधा०	१५	५१
रुन्धती नयनवाक्य०	९	६७
लघुवृत्तितया भिदां०	२	५३
लभ्यमेकसुकृतेन०	१३	५२
लभ्या धरित्री तव०	३	१७
लिलिक्षतीव क्षय०	१६	५४
लेखया विमलविद्रुम०	९	२२
लोकं विधाता विहितस्व०	३	४१
लोचनाधरकृता०	९	६०
लोलदृष्टि वदनं०	९	४७
वदनेन पुष्पितलतान्त०	१२	४१
वनान्तराव्याकठिनी०	१	३६
वनाश्रयाः कस्य मृगाः	१४	१३
वनेऽवने वनसदां०	१५	१०
वपुरिन्द्रियोपवनेषु०	१२	३
वपुषा परमेण भूधरा०	१३	१
वयं क्व वर्णाश्रमरक्षणो०	१४	२२
वरं कृतध्वस्तगुणा०	१५	१५
वरोरुभिर्वारणहस्त०	८	२२
वसूनि वाञ्छन्न वशी०	१	१३
वंशालक्ष्मीमनुदृत्य०	११	६९
वंशोचितत्वादभिमान०	१७	४
वाजिभूमिरिभराज०	१३	५५
वाससां शिथिलतामुप०	९	६५
विकचवारिरुहं दधतं०	५	१३
विकसितकुसुमाधरं०	१०	३२
विकामुकः कर्मसु योध०	१७	५३
विकासमीयुर्वनतीसमार्जना० ...	१५	५२

Digitized by Google

	सर्गः	श्लोकः
विकोशनिर्धूतरजो• ...	...	१७ ४५
विक्षणव्य द्वारमनेकमुखं• ...	...	६ ३७
विगाहमाने रमणी• ...	...	८ ३१
विचकर्ष च संहितेषु• ...	...	११ १८
विचिन्वता चिन्तयेव• ...	...	१६ ३
विच्छिन्नाभ्रविलायं• ...	...	११ ७९
विजहीहि रणोत्साहं• ...	...	११ ३१
विजिगीषते यदि वसुम्• ...	...	१२ ३०
विजित्य यः माध्वमय• ...	...	१ ३५
विततधीकररागिभिः• ...	...	५ १५
वितन्वतस्तस्य वरा• ...	...	१७ २०
विदिताः भविष्य विहिता• ...	...	६ ३०
विदूरपातेन भिदामुपेयुः• ...	...	८ १०
विधाय रक्षाम्परितः• ...	...	१ १४
विधाय विध्वंसमनात्म• ...	...	३ १६
विधिसमयनियोगा• ...	...	१ ४६
विधुरं किमतःपरं• ...	...	२ ७
विधूतकेशाः परिलो• ...	...	८ ३३
विधूनयन्ती गहनानि• ...	...	१४ ४७
विनम्रशालिप्रसवोध• ...	...	४ २
विनयं गुणा इव विवेद्• ...	...	१२ १७
विनिर्यतीनां गुरुखेद• ...	...	८ २६
विपक्षचित्तोन्मथना• ...	...	८ ३४
विपत्रलेखा मिरलक्त• ...	...	८ ४०
विपदेति तावदवसाद• ...	...	१८ २३
विपदोऽभिभवस्यवि• ...	...	२ १४
विपाण्डुभिर्म्लानतया• ...	...	४ २४
विपाण्डु संध्यानमिवा• ...	...	४ २८
विफलीकृतबलस्य• ...	...	१५ ४६
विबोधितस्य ध्वनिना• ...	...	१७ ४६
विभिन्नपर्यन्तवनीत• ...	...	८ ३०
विभिन्नपातिताश्वीय• ...	...	१५ २४
विभेदमन्थः पदवी• ...	...	१७ २७

	सर्गः	श्लोकः
विमुक्तमाधंसिव• ...	...	१४ ५१
विमुच्यमानेरपि तस्य• ...	...	४ १२
वियति वेगपरिप्लुत• ...	...	१८ १२
विरचय्य कानमविभाव• ...	...	१२ ४४
विरोधि सिद्धेरिति• ...	...	१४ ८
विलङ्घ्य पत्रिणां पदि• ...	...	१५ ४४
विलम्बमानाकुलकेश• ...	...	८ १८
विवरेऽपि मैनमनिमूढ• ...	...	१२ ३७
विवस्वदंशुसंक्षेप• ...	...	१५ ९
विविक्तवर्णाभरणा• ...	...	१४ ३
विविक्तेऽस्मिन्वने• ...	...	११ ३६
विशङ्कमानो भवतः• ...	...	१ ७
विशदभूयुयुक्षज• ...	...	११ ४
विषमोऽपि विगाह्यते• ...	...	२ ३
विसारिदाचीमणि• ...	...	८ २३
विस्कार्यमाणस्य ततो• ...	...	१७ २४
विस्मयः क इव वा नव• ...	...	१३ ४०
विस्मितः सपदि तेन• ...	...	१८ १३
विहस्य पाणौ विधृते• ...	...	८ ५१
विहाय पाञ्छामुदिते• ...	...	४ २५
विहाय शान्तिं नृप• ...	...	१ ४२
विहारभूमेरभिषेच• ...	...	४ ३१
विहितां प्रियया• ...	...	२ १
वीक्ष्य रत्नखचके• ...	...	९ ५९
वीक्ष्य रत्नुमनसः सुर• ...	...	९ १
वीतवम्भमवरसं परं शुचि• ...	...	५ २२
वीतमभावतनुरप्य• ...	...	१६ ६४
वीतोवसः संनिधिमात्र• ...	...	३ ४९
वीर्यावदानेषु कृतावमर्ष• ...	...	३ ४३
वेणुशाद्रुवे शैले• ...	...	१५ १८
व्यक्तोदितस्मितमयूख• ...	...	२ ५९
व्यथितमपि भृशं मनो• ...	...	१० २२
व्यथितसिन्धुमनीरसनैः• ...	...	५ ११

Digitized by Google

	सर्गः	श्लोकः
व्यधत्त वस्मिन्पुरमुज्जयो०	...	५ ३५
व्यपोहितुं लोचनतो०	...	८ १९
व्यानशे सप्तपरेण०	...	९ १७
व्याहस्य मदतां पत्या०	...	११ ३७
व्रज वय रिपुलोकं०	...	१८ ४८
व्रजति शुचि पदं त्वयि०	...	१८ २६
व्रजतोऽस्य वृहत्पतन०	...	१३ २१
व्रजन्ति ते मूढधियः०	...	१ ३०
व्रजाविरेणुन्नुदनाद०	...	४ १६
व्रणमुखच्युतशोणित०	...	१८ ४
शीतांशतैरात्मतनोप०	...	३ ४२
शकिरर्वपक्षिषु स्वयं०	...	१३ ६१
शक्तिवैकस्यनयस्य०	...	११ ५९
शक्तिवाय इवाध्व०	...	९ ४६
शक्यो विधिज्ञानवयते०	...	१५ ४८
शमवन्धृतेन्द्रियशमैक०	...	६ २०
शंभोर्धनुर्मण्डलभः०	...	१५ ४९
शरणं भवन्नमतिकाद०	...	१८ २२
शरदम्बुधरच्छाया०	...	११ १२
शरदृष्टि विषूदोर्षी०	...	१५ ४१
शरानवद्यजनवय०	...	१७ ५६
शशधर इव लोचनाभि०	...	१० ११
शाखावसक्तकमनीय०	...	७ ४०
शाम्यता विनयवोधि०	...	१३ ३७
शारदां वनिवया धधि०	...	९ २९
शिरसा हरिन्मणिभिः०	...	६ २३
शिलाभैर्नादवदा०	...	८ ३२
शिवश्चिन्त्यः प्रतिबोध०	...	१४ ५८
शिवमनुभेव शिलीमुखेन०	...	१७ ५८
शिवमुवाहशिभिज०	...	१८ ३
शिवमीयिवं मरौ०	...	२ ३५
शीधुरागनिधुरासु०	...	९ ४२
शीधुरागनिधुरेषु०	...	९ ७३

	सर्गः	श्लोकः
शुक्लिमयूखनिचयैः०	...	५ ४९
शुचि भूषयति श्रुतं०	...	२ ३२
शुचिरप्सु विद्रुमलता०	...	६ १३
शुचिवस्कवीतवपुरस्य०	...	६ २१
शुभानना: सम्मुखेषु०	...	८ ४२
शून्यमादीर्णतामेति०	...	११ २७
श्योतन्मयूखेऽपि हिमद्युती०	...	३ ८
श्रद्धेया विमलम्भारः०	...	११ ३५
श्रियः कुरूणामधिपस्य०	...	१ १
श्रियं विकर्षःपदमस्य०	...	३ ७
श्रिया हसद्भिः कमलानि०	...	८ ४४
श्रीमद्भिर्नियमितकन्धरा०	...	७ ३७
श्रीमद्भिः सरथयजैः०	...	७ १
श्रीमल्लताभवनमोचधयः०	...	५ २८
श्रुतमप्यधिगम्य०	...	२ ४१
श्रुतिसुखमुपपीतिं०	...	१० ३८
श्रेयसीं तव संमाता०	...	११ ११
श्रेयसोऽभ्यस्य ते तात०	...	११ ४४
श्लिष्यतः प्रियवधूरुपकण्ठं०	...	९ २७
श्वसनचलितपल्लवा०	...	१० ३४
श्वसत्यया सुखसंविदिः०	...	११ ३४
स किंसखा साधु न०	...	१ ५
सकि वनादपनयत्य०	...	५ ४६
स क्षत्रियत्राणसहः०	...	३ ४८
स खण्डनां मांघ्य पराद०	...	१७ ६०
सखा स युक्तः कथितः०	...	१४ २१
सखि दयितमिदानयेति०	...	१० ४७
सखीवनं मेन गुरुकृता०	...	८ ११
सखीमिव भीति०	...	१ १०
स गतः क्षितिमुन्नशोणिताद्रिः०	...	१३ २१
संक्रान्तचन्दनरसा०	...	८ ५७
सचकितमिव विस्मया०	...	१० ७
स जयाम विस्मयमुदीक्ष्य०	...	६ १५

Digitized by Google

	सर्गः	श्लोकः
सवलक्षवलक्षरं नभो०	१०	१९
सव्यनोऽसि विवस्वदादि०	१३	६६
सव्यं धनुर्वदति०	१३	७१
स ततार सेकवपुर्वीरभिजः० ...	६	१६
स तदोवसा विधित०	१३	२९
स तमालनिभे रिपौ सुरान्वा० ...	१३	२४
स तमासस्राद वनमीक्ष०	१२	५३
सरसमतनुमाकृतेः०	१०	१३
सरसा विरचनादिव०	९	३४
सरादिवेषाभिनिविष्ट०	१७	११
स धनुर्मदेषुधि०	१२	२७
सध्यानं निपतिवनिर्झरा० ...	७	२२
सनाद्धवनिवं निसम्ब०	५	२७
संततं निशमयन्त०	१३	४७
संनिवद्धमपदर्तुं०	१८	३०
सपदि प्रियकपपरेखा०	१३	२५
सपदि हरिसखैर्यधू०	१०	१८
स पिङ्गाक्षः श्रीमा०	१८	४५
स पिङ्गजटावलिः०	१५	४७
स पुमानर्थवन्धम्मा०	११	६२
स मध्यनव्याम्बुदनादि०	१७	१०
स प्रयुन्ज तनये०	१३	३६
स बभार रणापेता०	१५	३३
स बिभर्ति भीषणभुजद्व०	६	३२
स भवस्य भवक्षयेद्ध०	१३	१९
स भोगिसंघः शममुप०	१६	४८
समदद्विरिदवानि०	१०	२५
स मन्थरावस्थिगदीवर०	४	१७
समवृत्तिरुपैति०	२	३८
समस्य संपादयता०	१४	६
समानकान्तीनि तुषार०	८	२५
समुच्छ्वसत्पङ्कजकोच०	८	२४
समुज्झिता यावदरातिः०	१४	५६
समुज्जतैः काशदुकूल०	८	९
समुज्जसत्मासमहोर्मि०	१६	४
संपश्यतामिति०	१५	५३
संमति लब्धवन्म०	५	४२
संमीयमाणोऽनुवभूव०	१७	१२
संभिन्नामदिरलवाविभि०	७	२३
संभिन्नैरिभदुरवावमादनेन० ...	७	११
संभोगक्षममहनामथो०	७	२६
संमूर्च्छतां रवतमिति०	५	४१
स यौवराज्ये नवयौव०	१	२२
सरजसमपदाय०	१०	२६
सरभसगजलम्ब्य०	१०	५४
सरोजपर्भे नु विलीन०	८	३५
सलक्षितचक्षित०	१०	३९
सलीलमासक्तलता०	८	१६
सलेशमुल्लिखितशावदे०	१४	२
स वंशस्यावदातस्य०	११	७५
सविनयमपराभिसृत्य०	१०	५७
स वृषध्वजसायकावभिन्नं०	१३	२८
सव्यलीकमवधीरित०	९	४५
सव्यापसव्यध्वनितो०	१७	२५
सव्रीडमन्दोरिव०	३	४६
सस्वरविदे नित्यं०	१५	२७
स समुद्वरता विधिमस्य०	१३	३४
स संमर्धयैवमहा०	१६	२५
स सायकाम्लाध्वस०	१७	२१
स साधिः साधुसूः०	१५	५
ससुरचापमनेकमणि०	५	१२
सह धरणिभृतं तया०	१८	१६
सहसा विदधीत०	२	३०
सहसोपगतः स०	२	५६
संरम्भवेगोज्झित०	१७	४९
संवासा मुहुरानिलेन०	७	१४

Digitized by Google

	सर्गः	श्लोकः	
संविधातुमभिषेक०		९	३२
संसिद्धाविति करणीय०		७	१७
संसेवन्ते दावशीला०		१८	२४
संस्कारवत्त्वाद्गमवस्तु०		१७	६
सापि लोचनयुगं०		९	४४
सारसं वदनमप्यिद्र०		५	२६
सारसं दधति गभीरमेघ०		७	३९
साक्रस्वमञ्जे रिपु०		१६	४९
सामोदाः कुसुमवतश्चिरो०		७	२८
साम्यं मतेनाप्यनिना०		१७	५१
सावलेप्यनुपलिप्सिते०		१३	५६
सिवच्छदानामपदिश्य०		४	३०
सिवपायिने भिन्नवदू०		६	९
सिचूरेः कृतरक्षण०		७	८
सिपिपुरपतिमस्तुवाद्वा०		१८	१७
सुकुमारमेकमनु मर्म०		६	४०
सुखेन लब्धा दयितः०		१	१७
सुखेषु दुखेषु च तुल्य०		१४	३२
सुता न यूयं किमु०		३	१३
सुरक्षमेवदयमम्ब०		१६	३६
सुरसरिति परंतपो०		१०	१२
सुलभैः सदा नवपदा०		५	२०
सुवदः सदया०		२	४५
सुवन्नाम्नावापिपु०		३	२०
सेतुमं दधति व्योमपुचा०		७	१९
सोदवाणो दयामन्या०		११	५३
सोदवपक्षिमयमना०		१७	२८
सोदवक्षैरमरवनै०		७	२

	सर्गः	श्लोकः	
स्तुवन्ति गुर्वीमभिषेव०		१४	५
स्थितमुन्नते तुहिन०		१२	२१
स्थितं विशुद्धे नभसीव०		१७	४८
स्थित्यतिक्रान्तिभीरुभि०		११	५४
स्थापितमवल्लतावत०		५	४४
स्पृहणीयगुणैर्मदा०		२	३४
स्फुटता न पदैरपा०		२	२७
स्फुटपौरुषमापपात०		१३	३२
स्फुटबहसटोन्नतिः स०		१३	२
स्फुरत्सिताक्षमोर्वीकं०		१५	३९
स्मर्यते तनुभृतां समागमं०		१३	४२
स्यन्दना नो चतुरगाः०		१५	१६
स्वकैतुभिः पाण्डुर०		१६	५८
स्वगोचरे सत्यपि चित्त०		८	१३
स्वधर्ममनुरुध्यते०		११	७८
स्वयं संरादयैवं शतमख०		१०	६३
स्वादितः स्वयमवेक्षित०		९	५५
हताहतेत्युद्धतभीम०		१६	५
हरपूषानुतयो०		१८	२
हरसैनिकाः प्रविभये०		१२	४८
हरिन्मणिश्यामसुदग्र०		१४	४१
हसा बृहन्तः सुरसद्म०		१८	१९
हसा गुणैरस्य भवेम०		१४	६१
हसोत्तरीया मसमं०		११	४९
हसाम्भसि व्यस्तवपूः०		८	४३
हसेव मन्निवनीमि०		९	४८
हेपयन्निमतेवर्षं०		१३	४१

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google



THE BORROWER WILL BE CHARGED AN OVERDUE FEE IF THIS BOOK IS NOT RETURNED TO THE LIBRARY ON OR BEFORE THE LAST DATE STAMPED BELOW. NON-RECEIPT OF OVERDUE NOTICES DOES NOT EXEMPT THE BORROWER FROM OVERDUE FEES.

WIDENER
HARVARD
FEB 1 6 2006
CHARGE

Digitized by Google